कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2876

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
शारीरकसूत्रभाष्येरत्न-प्रभायांद्वितीयाध्याये प्रथमपाद	—	वेदांग	पूर्ण	-	6/12	730	संस्कृत	कागद				

१३०

॥ श्रीकृष्णानंद रामसमर्थ ॥

॥ अथ शारीरकसूत्रभाष्ये रत्नप्रभायां द्वितीयाध्यायस्य प्रथमपादः प्रारभः ॥

ॐ नमसिद्ध । ॐ ॐ

श्रीगणेशायनमः॥ हरिःॐम्॥ सच्चिदानंदरूपायकृष्णायाक्लिष्टकारिणे नमोवेदांतवेद्यायगुरवेबुद्धिसाक्षिणे १ सांख्यादिस्मृ
तियुक्तिभिर्नचलितोवेदांतसिद्धांतगोनिर्मूलैर्विविधागमैरविदितोव्योमादिजन्माप्ययः उत्पत्त्यंतविवर्जितश्चितिवपुर्जीवोपिचकर्त्तांशको
लिंगेनप्रथितोपिनामननुहृत्तंजानकीशंभजे २ नामरूपेव्याकरवाणीतिश्रुतेर्नामननुहृदपिसंज्ञामूर्त्तिव्याकर्त्तापिलिंगशरीरो।
पाधिनाकर्त्तेतिअंशइतिचप्रथितः प्रसिद्धोयस्तंप्रत्यगभिन्नंपरमात्मानंमूलप्रकृतिनियंतारंभजेइत्यर्थः स्मृतिप्रसंगात्पूर्वोत्तराध्याययो।
र्विषयविषयिभावसंगतिंवक्तुंवृत्तंकीर्त्तयति प्रथमेध्यायइति जन्मादिसूत्रमारभ्यजगदुत्पत्त्यादिकारणंब्रह्मेतिप्रतिपादितंशास्त्रदृ।

श्रीगणेशायनमः॥ ॐ॥१॥ स्मृत्यनवकाशदोषप्रसंगादितिचेन्नाऽन्यस्मृत्यनवकाशदोषप्रसंगात् १ प्र
थमेध्यायेसर्वज्ञःसर्वेश्वरोजगतउत्पत्तिकारणंमृत्सुवर्णादयइवघटरुचकादीनां उत्पन्नस्यचजगतोनियंतृ
त्वेनस्थितिकारणंमायावीवमायायाः प्रसारितस्यचजगतःपुनःस्वात्मन्येवोपसंहारकारणमवनिरिवचतुर्वि =
धस्यभूतग्रामस्य सएवचसर्वेषांनआत्मेत्येतद्वेदांतवाक्यसमन्वयप्रतिपादनेनप्रतिपादितं प्रधानादिकारण दि =
वादाश्चाशब्दत्वेननिराकृताः इदानींस्वपक्षेस्मृतिन्यायविरोधपरिहारःप्रधानादिवादानांचन्यायाभासोपबृंहि

त्वानित्यादिसूत्रेषुसएवाद्वितीयःसर्वात्मेत्युक्तं आनुमानिकमित्यादिनाकारणांतरस्याश्रौतत्वंदर्शितमित्यर्थः एवंप्रथमाध्या
यस्यार्थमनूद्यतस्मिन्विषयेविरोधपरिहारविषयिणंद्वितीयाध्यायस्यार्थंपादशःसंक्षिप्यकथयतिइदानीमितिअत्रप्रथमपादेसमन्वयस्यसां।
ख्यादिस्मृतियुक्तिभिर्विरोधपरिहारःक्रियतेद्वितीयपादेसांख्याद्यागमानांभ्रांतिमूलत्वमविरोधायकथ्यते तृतीयपादेप्रतिवेदांतंसृष्टिश्रु
तीनांजीवात्मश्रुतीनांचव्योमादिमहाभूतानांजन्मलयक्रमादिकथनेनाविरोधःप्रतिपाद्यते चतुर्थपादेलिंगशरीरश्रुतीनांअविरोधइत्यर्थः अ
यमेवार्थः सुखबोधार्थंश्लोकेनसंगृहीतः ॥ द्वितीयेस्मृतितर्काभ्यामविरोधोन्यदुष्टता॥भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धतेति ॥ ९

तत्राज्ञातेविषयेविरोधशंकासमाध्ययोगात्समन्वयाध्यायानंतर्यमविरोधाध्यायस्ययुक्तंतत्रप्रथमाधिकरणस्यतात्पर्यमाह तत्रप्रथममिति श्रौतेसमन्वयेविरोधनिरासार्थत्वादस्यपादस्यश्रुतिशास्त्राध्यायसंगतयः स्वमतस्थापनात्मकत्वात्सर्वेषामधिकरणानागेतत्वादसंगतिः॥ अत्रपूर्वपक्षेस्मृतिविरोधादुक्तसमन्वयाऽसिद्धिःफलंसिद्धांतेतत्सिद्धिरितिविवेकः॥ तत्रब्रह्मण्युक्तवेदांतसमन्वयोविषयःसकिंसांख्यस्मृत्याविरुध्यतेनवेतिस्मृतिप्रामाण्याप्रामाण्याभ्यांसंदेहेपूर्वपक्षमाह यदुक्तमिति तंत्र्यंतेव्युत्पाद्यंते

प्रतिवेदांतंचसृष्ट्यादिप्रक्रियायाअविगीतत्वमित्यस्यार्थजातस्यप्रतिपादनायद्वितीयोध्यायआरभ्यते॥तत्रप्रथमंतावत्स्मृतिविरोधमुपन्यस्यपरिहरति यदुक्तंब्रह्मैवसर्वज्ञंजगतःकारणमितितदयुक्तं॥कुतःस्मृत्यनवकाशदोषप्रसंगात्स्मृतिश्चतंत्राख्यापरमर्षिप्रणीताशिष्टपरिगृहीताअन्याश्चतदनुसारिण्यःस्मृतयःएवंसत्यनवकाशाःप्रसज्येरन् तासुह्यचेतनंप्रधानंस्वतंत्रंजगतःकारणमुपनिबध्यते॥मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिनाधर्मजातेनापेक्षितमर्थंसमर्पयंत्यःसावकाशाभवंत्यस्यवर्णस्यास्मिन्कालेनेनविधानेनोपनयनमीदृशश्चाचारइत्थंवेदाध्ययनमित्थंसमावर्त्तनमित्थंसहधर्मचारिणीसंयोगइतितथापुरुषार्थांश्चवर्णाश्रमधर्मान्नानाविधान्विदधति॥नैवंकपिलादिस्मृतीनामनुष्ठेयेविषयेऽवकाशोस्ति॥मोक्षसाधनमेवहिसम्यग्दर्शनमधिकृत्यताःप्रणीताः यदितत्राप्यनवकाशाःस्युरानर्थक्यमेवासांप्रसज्येत ॥ ॥

तत्वान्यनेनेतितंत्रंशास्त्रंकपिलोक्तमन्याश्चपंचशिखादिभिःप्रोक्ताएवंसतिवेदांतानामद्वयब्रह्मसमन्वयेनिरर्थकाःस्युरित्यर्थः॥तासामपिब्रह्मार्थकत्वमस्त्वित्यविरोधइत्यतआह॥तासुहीति॥ननुसांख्यस्मृतिप्रामाण्यायप्रधानवादग्रहेमन्वादिस्मृतीनामप्रामाण्यंस्यादित्याशंक्यतासांधर्मेसावकाशत्वात्प्रामाण्यंस्यादित्याहमन्वादीति॥तर्हिसांख्यादिस्मृतीनामपिधर्मेतात्पर्येणप्रामाण्यमस्तुतत्वंतुब्रह्मैवेत्यविरोधइत्यतआह॥ नैवमिति॥

तत्त्वेविकल्पानुपपत्तेर्निरवकाशस्मृत्यनुसारेणश्रुतिव्याख्यानमुचितंसावकाशनिरवकाशयोर्निरवकाशंबलीयइतिन्यायादित्याह तस्मा
दिति॥ श्रुतिविरोधेस्मृत्यप्रामाण्यस्यसूत्रत्वात्पूर्वपक्षोनयुक्तइतिशंकते॥ कथमिति॥ येस्वातंत्र्येणश्रुत्यर्थंज्ञातुंशक्नुवंतितेषामयंपूर्वपक्षोनभ
वतिसांख्यदृष्टेषुश्रद्धालूनांतुभवे दित्याह॥ भवेदिति॥ तेषामतींद्रियार्थज्ञानवत्त्वाच्चनतत्रश्रद्धास्यादित्याह॥ कपिलप्रभृतीनांचेति॥ आ

तस्मात्तदविरोधेनवेदांताव्याख्यातव्याः॥ कथंपुनरीक्षत्यादिभ्योहेतुभ्योब्रह्मैवसर्वज्ञंजगतःकारणमित्य
वधारितःश्रुत्यर्थःस्मृत्यनवकाशदोषप्रसंगेनपुनराक्षिप्यते॥ भवेदयमनाक्षेपःस्वतंत्रप्रज्ञानां॥ परतंत्रप्रज्ञास्तु
प्रायेणजनाःस्वातंत्र्येणश्रुत्यर्थमवधारयितुमशक्नुवंतःप्रख्यातप्रणेतृकासुस्मृतिष्ववलंबेरन्तद्बलेनचश्रु-
त्यर्थंप्रतिपत्सेरन् अस्मत्कृतेचव्याख्यानेनविश्वस्युर्बहुमानात्स्मृतीनांप्रणेतृषु॥ कपिलप्रभृतीनांचार्षंज्ञान-
मप्रतिहतंस्मर्यते॥ श्रुतिश्चभवतिऋषिंप्रसूतंकपिलंयस्तमग्रेज्ञानैर्बिभर्तिजायमानंचपश्येदिति॥ तस्मान्नै
षांमतमयथार्थंशक्यंसंभावयितुं॥ तर्कावष्टंभेनचैतेर्थंप्रतिष्ठापयंति॥ तस्मादपिस्मृतिबलेनवेदांताव्याख्येया
इतिपुनराक्षेपः॥ तस्यसमाधिर्नान्यस्मृत्यनवकाशदोषप्रसंगादिति॥ यदिस्मृत्यनवकाशदोषप्रसंगेनेश्वरकारण-
वादआक्षिप्येतैवमप्यन्याईश्वरकारणवादिन्यःस्मृतयोऽनवकाशाःप्रसज्येरन्॥ ताउदाहरिष्यामः॥ यत्तत्सूक्ष्मम-
विज्ञेयमितिपरंब्रह्मप्रकृत्यसह्यंतरात्माभूतानांक्षेत्रज्ञश्चेतिकथ्यतइतिचोक्त्वातस्मादव्यक्तमुत्पन्नंत्रिगुणंद्वि-
जसत्तमेत्याह॥ तथान्यत्राप्यव्यक्तंपुरुषेब्रह्मन्निर्गुणेसंप्रलीयतइत्याह॥

दीयोजायमानंचकपिलंजनयेदृषिप्रसूतंविभृयात्ज्ञानैस्तंपश्येत्परमेश्वरमि
तिश्रुतियोजना॥ यथासांख्यस्मृतिविरोधाद्ब्रह्मवादस्त्याज्यइतित्वयोच्यतेतथास्मृत्यंतरविरोधात्प्रधानवादस्त्याज्यइतिमयोच्यतइतिभ
सिद्धांतयति॥ तस्यसमाधिरिति॥ तस्माद्ब्रह्मणःसकाशादव्यक्तंमायायांलीनंसूक्ष्मात्मकंजगदितियावत्॥

इतिहासवाक्यानुक्त्वा पुराणसंमतिमाह अतश्चेति प्रभवत्यस्मादिति प्रभवो जन्महेतुः प्रलीयतेऽस्मिन्निति प्रलयो लयाधिष्ठानं॥ तस्मात्कर्तुरीश्वरात्कार्याः ब्रह्मादयः प्रभवंति॥ स एव मूलमुपादानं॥ किं परिणामी न शाश्वतिकः कूटस्थ अतः स नित्य इत्यर्थः॥ ननु श्रुति। विरोधः किमिति नोक्त इत्यत आह॥ स्मृतिबलेनेति॥ स्मृतीनां मिथो विरोधे कथं तत्त्वनिर्णयस्तत्राह॥ दर्शितं त्विति॥ श्रुतिभिरेव। तत्त्वनिर्णय इत्यर्थः॥ स्मृतीनां का गतिरित्यत आह॥ विप्रतिपत्तौ चेति वस्तुतत्त्वे स्मृतीनां मिथो विरोधे वस्तुनि विकल्पायोगात्क्लृप्तश्रु।

अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूय इति पुराणे भगवद्गीतासु च अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेति॥ परमात्मानमेव च प्रकृत्यापस्तंबः पठति त। स्मात्कायाः प्रभवंति सर्वे स मूलं शाश्वतिकः स नित्य इति॥ एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते॥ स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यनेनोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः॥ दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतराः॥ तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं। ८ स्यादसति ह्यनुमानमिति॥ न चातींद्रियानर्थान् श्रुतिमंतरेण कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावा

न्निमूलाः स्मृतयः प्रमाणं इतरास्तु कल्प्यश्रुतिमूला न प्रमाणमित्यर्थः क्लृप्तश्रुतिविरोधे स्मृतिर्न प्रमाणमित्यत्र जैमिनीयन्यायमाह॥ तदुक्तमिति॥ औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धा सा सर्वा वेष्टयितव्येति स्मृतिर्मानं न वेति संदेहे मूलश्रुत्यनुमानान्मानमिति प्राप्ते सिद्धांतः॥ क्लृप्तश्रुतिविरोधे स्मृतिप्रामाण्यमनपेक्षमपेक्षाशून्यं हेयमिति यावत् ह्यतोऽसति विरोधे श्रुत्यनुमानं भवति अत्र तु विरोधे सश्रुत्यनुमानायोगान्मूलाभावात्सर्ववेष्टनस्मृतिरप्रमाणमित्यर्थः॥ अस्तु सांख्यस्मृतिः प्रत्यक्षमूलेत्यत आह॥ नचेति॥ ॥

शा॰भा॰ योगिनांसिद्धिमहिम्नातींद्रियज्ञानंसंभावयितुंशक्यमितिशंकतेशक्यमिति कपिलादिभिःकिलादौवेदप्रामाण्यंनिश्चित्यतदर्थस्यध।
र॰प्र॰टी॰ र्मस्यानुष्ठानेनसिद्धिःसंपादितातया सिध्याप्रणीतस्मृत्यनुसारेणानादिश्रुतिपीडानयुक्तोपजीव्यविरोधादितिपरिहरति॥नसिद्धे
१६७ रपीति॥अतिशंकितुमितिश्रुतीनांमुख्यार्थमतिक्रम्योपचरितार्थःशंकितुंनशक्यतइत्यर्थःस्वतःसिद्धेर्वेदोनोपजीव्यइतिचेन्न
नीश्वरस्यस्वतःसिद्धौमानाभावात् अंगीकृत्याप्याह॥सिद्धेति॥सिद्धानांवचनमाश्रित्यवेदार्थकल्पनायामपिसिद्धोक्तीनांमिथोवि

शक्यंकपिलादीनांसिद्धानामप्रतिहतज्ञानत्वादितिचेत् नसिद्धेरपिसापेक्षत्वात् धर्मानुष्ठानापेक्षाहिसिद्धिः॥
सचधर्मश्चोदनालक्षणस्ततश्चपूर्वसिद्धायाश्चोदनायाअर्थोनपश्चिमसिद्धपुरुषवचनवशेनातिशंकितुंशक्यते॥सिद्ध
व्यपाश्रयकल्पनायामपिबहुत्वात् सिद्धानांप्रदर्शितेनप्रकारेणस्मृतिविप्रतिपत्तौसत्यांनश्रुतिव्यपाश्रयादन्यत्निर्ण
यकारणमस्ति॥परतंत्रप्रज्ञस्यापिनाकस्मात्स्मृतिविशेषविषयःपक्षपातोयुक्तःकस्यचित्क्वचित्पक्षपातेसतिपुरु
षमतिवैश्वरूप्येणतत्त्वाऽव्यवस्थानप्रसंगात्तस्मात्तस्यापिस्मृतिविप्रतिपत्त्युपन्यासेनश्रुत्यनुसाराननुसारविषयवि
वेचनेनचसन्मार्गेप्रज्ञासंग्रहणीया॥यातुश्रुतिःकपिलस्यज्ञानातिशयंप्रदर्शयंतीप्रदर्शितानानतयाश्रुतिविरुद्धमपि
कापिलंमतंश्रद्धातुंशक्यंकपिलमितिशब्दसामान्यमात्रत्वादन्यस्यचकपिलस्यसगरपुत्राणांप्रतप्तुर्वासुदेवनाम्नःस्मरणा

रोधेश्रुत्याश्रितमन्वाद्युक्तिभिरेववेदार्थनिर्णयोयुक्तइत्यर्थःश्रुतिरूपाश्रयंविनासिद्धोक्तिमात्रंनतत्वनिर्णयकारणमित्यक्षरार्थःननुमदमतेः
सांख्यस्मृतौश्रद्धाभवतितस्यमतिर्वेदांतमार्गेकथ्यमानेयेत्यतआह॥परतंत्रेत्यादिना॥ननुश्रुत्याकपिलस्यसर्वज्ञत्वोक्तेस्तन्मतेश्रद्धा। राम॰
दुर्वारेत्यतआह॥यात्विति कपिलशब्दमात्रेणसांख्यकर्त्ताश्रौतइतिभ्रांतिरयुक्तातस्यद्वैतवादिनःसर्वज्ञत्वायोगादत्रचसर्वज्ञान। १६७
संभूतत्वेनश्रुतःकपिलोवासुदेवांशएवसहिसर्वात्मज्ञानंवैदिकंसांख्यमुपदिशतीतिसर्वज्ञइतिभावः॥प्रतप्तुःप्रदाहकस्य॥८

किंच यः कपिलं ज्ञानैर्विभर्त्ति तमीश्वरं पश्येदिति विधीयते तथा चान्यार्थस्येश्वरप्रतिपत्तिशेषस्य कपिलसर्वज्ञत्वस्य दर्शनमनुवादस्तस्य मानांतरेण प्राप्तिशून्यस्य स्वार्थसाधकत्वायोगान्नानुवादमात्रात्सर्वज्ञत्वप्रसिद्धिरित्याह॥ अन्यार्थेति॥ द्वैतवादिनः कपिलस्य श्रौतत्वं निरस्य ब्रह्मवादिनो मनोः श्रौतत्वमाह॥ भवति चेति॥ इतिहासेपि कापिलमतनिंदापूर्वकमद्वैतदर्शित्वमित्याह॥ महाभारतेपीति॥ पुरुषाः आत्मानः किं वस्तुतो भिन्ना उत न सर्वदृश्यानां प्रत्यगात्मैक इति विमर्शार्थः॥ बहूनां पुरुषाकाराणां देहानां यथैका योनिरुपादानं पृथिवी तथा तं पुरुषमा

अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात्॥ भवति चान्या मनोर्माहात्म्यं प्रख्यापयंती श्रुतिः॥ यद्वै किंच मनुरवदत्तद्भेषजमिति मनुना च सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छतीति सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं निंद्यत इति गम्यते कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते॥ आत्मभेदाभ्युपगमात्॥ महाभारतेपि च॥ बहवः पुरुषा ब्रह्मन् उताहो एक एव त्विति विचार्य॥ बहवः पुरुषा राजन् सांख्ययोगविचारिणामिति परपक्षमुपन्यस्य तद्व्युदासेन॥ बहूनां पुरुषाणां हि यथैका योनिरुच्यते॥ तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमित्युपक्रम्य॥ ममांतरात्मा तव च ये चान्ये देहसंस्थिताः॥ सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचित्॥ विश्वमूर्द्धा विश्वभुजो विश्वपादाक्षिनासिकः॥ एकश्चरति भूतेषु स्वैरचारी यथासुखमिति सर्वात्मनैव निर्द्दिशति श्रुतिश्च सर्वात्मतायां भवति॥ यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्येवंविधा॥

त्मानं विश्वं सर्वोपादानत्वेन सर्वात्मकं सर्वज्ञत्वादिगुणैः संपन्नं कथयिष्यामि विश्वे सर्वे लोकप्रसिद्धा देवतिर्यङ्मनुष्यादीनां मूर्द्धानो यस्यैवेति विश्वमूर्द्धा एकस्यैव सर्वक्षेत्रेषु प्रतिविंबभावेन प्रविष्टत्वादेवं विश्वभुजत्वादियोजना॥ सर्वभूतेष्वेकश्चरति अवगच्छति सर्वज्ञ इत्यर्थः॥ स्वैरचारी स्वतंत्रः नास्य नियंता कश्चिदस्ति सर्वेश्वर इत्यर्थः॥ यथासुखमिति विशोकानंदस्वरूप इति यावत् कापिलतंत्रस्य वेदमूलस्मृतिविरोधमुक्त्वा साक्षाद्वेदविरोधमाह॥ श्रुतिश्चेति॥ यस्मिन्ज्ञानकाले॥

यस्मिन्ज्ञानकालेकेवलंस्वतंत्रप्रकृतिकल्पनयैववेदविरुद्धंनकिंत्वात्मभेदकल्पनयापीतिसिद्धमितिसम्बन्धः॥स्मृतिविरोधेवेदस्यै
वाप्रामाण्यंकिंनस्यादित्यतआह॥वेदस्यहीति॥वेदस्यप्रामाण्यंस्वतःसिद्धमपौरुषेयत्वात्पौरुषेयवाक्यानांस्वार्थस्मृतितन्मूलानुभ
वयोःकल्पनयाप्रामाण्यंज्ञेयमितिव्यवहितंपरतःप्रामाण्यमितिविप्रकर्षःश्रुतिस्मृत्योर्विशेषइत्यक्षरार्थः॥समयोर्विरोधेहिनिरव
काशेनसावकाशंबाध्यमिहस्वतःपरतःप्रामाण्ययोर्वैषम्यात्झटितिनिश्चितप्रामाण्येनचानुपसंजातविरोधिनावेदवाक्येनविरुद्धस्मृ

अतश्चसिद्धमात्मभेदकल्पनयापिकापिलस्यतंत्रस्यवेदविरुद्धत्वंवेदानुसारिमनुवचनविरुद्धत्वंचनकेवलंस्वतं
त्रप्रकृतिकल्पनयैवेति॥वेदस्यहिनिरपेक्षंस्वार्थेप्रामाण्यंरवेरिवरूपविषये॥पुरुषवचसांतुमूलांतरापेक्षंवक्तृस्मृतिव्यव
हितंचेतिविप्रकर्षस्तस्माद्वेदविरुद्धेविषयेस्मृत्यनवकाशप्रसंगोनदोषः॥१॥कुतश्चस्मृत्यनवकाशप्रसंगोनदोषः॥इतरे
षांचानुपलब्धेः॥२॥प्रधानादितराणियानिप्रधानपरिणामत्वेनस्मृतौकल्पितानिमहदादीनिनतानिवेदेलोकेवोपल
भ्यंते॥भूतेंद्रियाणितावनलोकवेदप्रसिद्धत्वात्शक्यंतेस्मर्तुंअलोकवेदप्रसिद्धत्वात्तुमहदादीनांषष्ठस्येवेंद्रियार्थस्य
नस्मृतिरवकल्पते॥यदपिक्वचित्तत्परमिवश्रवणमवभासते॥तदप्यतत्परंव्याख्यातंआनुमानिकमप्येकेषांइत्यत्र॥
कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यंयुक्तंइत्यभिप्रायः॥तस्मादपिनस्मृत्यनवकाशप्रसंगोदोषः॥तर्कावष्टं ॥२॥छ
((भंतुनविलक्षणत्वादित्यारभ्योन्मू

तेरेवबाधइतिभावः॥तस्मादितिविशेषादित्यर्थः॥भ्रांतिमूलत्वसंभवादितिभावः॥१॥मह
दहंकारौतावदप्रसिद्धौअहंकारप्रकृतिकत्वेनतन्मात्राण्यप्यप्रसिद्धानिस्मर्तुंनशक्यंतइत्याह॥इतरेषांचेतिननुमहतःपरमव्यक्तमितिश्रु
तिप्रसिद्धानिमहदादीनीत्यतआह॥यदपीति॥सूत्रतात्पर्यमाह॥कार्येति॥सांख्यस्मृतेर्महदादिष्विवप्रधानेपिप्रामाण्यंनेतिनिश्चीयतइ
त्यर्थःसांख्यस्मृतेर्बाधेपितदुक्तयुक्तीनांकथंबाधइत्यतआह॥तर्केति॥२॥

ब्रह्मण्युक्तसमन्वयःप्रधानवादियोगस्मृत्याविरुध्यतेनवेतिसंदेहेपूर्वन्यायमतिदिशतिएतेनयोगःप्रत्युक्तः॥अतिदेशत्वान्नपूर्ववत्संगत्यादिकंद्रष्टव्यंपूर्वत्रानुक्तनिरासंपूर्वपक्षमाह॥अस्तिह्यत्रेति॥निदिध्यासनंयोगःत्रीणिउरोग्रीवाशिरांस्युन्नतानियस्मिंश्छरीरेतत्त्र्युन्नतंत्रिरुन्नतमितिपाठश्छांदसः युंजीतेतिशेषः॥नकेवलंयोगेविधिःकिंतुयोगस्यज्ञापकान्यर्थवादवाक्यान्यपिसंतीत्याह॥लिंगानिचेति॥तांपूर्वोक्तांधारणांयोगविदोयोगंपरमं

एतेनयोगःप्रत्युक्तः॥३॥एतेनसांख्यस्मृतिप्रत्याख्यानेनयोगस्मृतिरपिप्रत्याख्याताद्रष्टव्येत्यतिदिशति॥तत्रापिश्रुतिविरोधेनप्रधानंस्वतंत्रमेवकारणंमहदादीनिचकार्याणिअलोकवेदप्रसिद्धानिकल्प्यंते॥नन्वेवंसतिसमानन्यायत्वात्पूर्वेणैवैतद्गतंकिमर्थंपुनरतिदिश्यते॥अस्तिह्यत्राभ्यधिकाशंकासम्यग्दर्शनाभ्युपायोहियोगोवेदेविहितः॥श्रोतव्योमंतव्योनिदिध्यासितव्यइति॥त्रिरुन्नतंस्थाप्यसमंशरीरमित्यादिनाचासनादिकल्पनापुरःसरंबहुप्रपंचंयोगविधानंश्वेताश्वतरोपनिषदिदृश्यते॥लिंगानिचवैदिकानियोगविषयाणिसहस्रशउपलभ्यंते॥तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणामिति॥विद्यामेतांयोगविधिंचकृत्स्नमितिचैवमादीनि॥योगशास्त्रेप्यथतत्त्वदर्शनोपायोयोगइतिसम्यग्दर्शनाभ्युपायत्वेनैवयोगोंगीक्रियते॥अतःसंप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीयाभविष्यतीति॥इयमप्यधिकाशंकाऽतिदेशेननिवर्त्यते॥अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेःपूर्वोक्तायादर्शनात्॥सतीष्वप्यध्यात्मविषयासुबह्वीषुस्मृतिषुसांख्ययोगस्मृत्योरेवनिराकरणेयत्नःकृतः॥

((तपइतिमन्यंतेउक्तामेतांब्रह्मविद्यांयोगविधिंध्यानप्रकारंचमृत्युप्रसादान्नचिकेतालब्ध्वाब्रह्मप्राप्तइतिसम्बन्धः॥योगस्मृतिःप्रधानादितत्त्वांशेपिप्रमाणत्वेनस्वीकार्यासंप्रतिपन्नःप्रामाणिकोर्थैकदेशोयोगरूपोयस्यास्तत्त्वादित्यर्थः॥अष्टकाःकर्त्तव्याःगुरुरनुगंतव्यइत्यादिस्मृतीनांवेदाविरुद्धार्थकत्वान्मूलश्रुत्यनुमानेनप्रामाण्यमुक्तंप्रमाणलक्षणे॥एवंयोगस्मृतेर्योगेप्रामाण्यात्तत्त्वांशेपिप्रामाण्यमितिपूर्वपक्षमनूद्यसिद्धांतयति॥इयमिति॥ननुबौद्धादिस्मृतयोऽत्रकिमितिननिराकृताइत्यतआह॥सतीष्वपीति॥

शा॰भा॰
टी॰
१६९

अ॰२पा॰१

तासांप्रतारकत्वेनप्रसिद्धत्वादशिष्टैःपशुप्रायैर्गृहीतत्वाद्वेदबाह्यत्वाच्चात्रोपेक्षेतिभावः॥ तत्कारणमितितेषांप्रकृतानांकामानांकारणंसांख्ययोगाभ्यांविवेकध्यानाभ्यामभिपन्नंप्रत्यक्तयाप्राप्तंदेवंज्ञात्वासर्वपाशैरविद्यादिभिर्मुच्यतइत्यर्थः॥ समूलत्वेस्मृतिद्वयस्यनिरासःकिमितिक्रितइत्यतआह॥ निराकरणंत्वितिइतिहेतोः कृतमितिशेषः॥ प्रत्यासत्तेरितिश्रुतिस्थसांख्ययोगशब्दयोःसजातीयस्मृत्यर्थग्राहित्वा।

सांख्ययोगौहिपरमपुरुषार्थसाधनत्वेनलोकेप्रख्यातौशिष्टैश्चपरिगृहीतौलिंगेनचश्रौतेनोपबृंहितौ॥तत्कारणंसांख्ययोगाभिपन्नंज्ञात्वादेवंमुच्यतेसर्वपाशैरिति॥निराकरणंतुनसांख्यज्ञानेनवेदनिरपेक्षेणयोगमार्गेणवानिःश्रेयसमधिगम्यतइति॥श्रुतिर्हिवैदिकादात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनंवारयति॥ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेति॥द्वैतिनोहितेसांख्यायोगाश्चनात्मैकत्वदर्शिनः॥यत्तुदर्शनमुक्तंतत्कारणंसांख्ययोगाभिपन्नमितिवैदिकमेवतत्रज्ञानंध्यानंचसांख्ययोगशब्दाभ्यामभिलप्यते॥प्रत्यासत्तेरित्यवगंतव्यं॥येनत्वंशेननविरुध्येतेतेनेष्टमेवसांख्ययोगस्मृत्योःसावकाशत्वं॥तद्यथाऽसंगोह्ययंपुरुषइत्येवमादिश्रुतिप्रसिद्धमेवपुरुषस्यविशुद्धत्वंनिर्गुणपुरुषनिरूपणेनसांख्यैरभ्युपगम्यते॥ तथाचयोगैरप्यथपरिव्राड्विवर्णवासामुंडोऽपरिग्रहइत्येवमादिश्रुतिप्रसिद्धमेवनिवृत्तिनिष्ठत्वंप्रव्रज्याद्युपदेशेनानुगम्यते॥एतेनसर्वाणितर्कस्मरणानिप्रतिवक्तव्यानि॥तान्यपितर्कोपपत्तिभ्यांतत्त्वज्ञानायोपकुर्वंतीतिचेत्॥ उपकुर्वंतुनाम॥ तत्त्वज्ञानंतुवेदांतवाक्येभ्यएवभवतिनावेदविन्मनुतेतंबृहंतं॥ तंत्वौपनिषदंपुरुषंपृच्छामीत्येवमादिश्रुतिभ्यः॥३॥

न्वयस्यनविरोधइतिसिद्धं

इतियावत्॥किंसर्वांशेषुस्मृत्यप्रामाण्यंनेत्याह येनत्वंशेनेतिब्रह्मवादस्यकणभक्षादिभिर्विरोधमाशंक्यातिदिशति॥एतेनेतिश्रुतिविरोधेनेत्यर्थः॥उपकारकबाधोनयुक्तइत्याशंक्य।योंशउपकारकःसनबाध्यःकिंतुतत्त्वांशइत्याह॥ तान्यपीति॥ तर्कोनुमानंतदनुग्राहिकायुक्तिरुपपत्तिः॥स्मृतीनामप्रामाण्यात्ताभिःसम

राम॰
१६९

नविलक्षणत्वात् वृत्तानुवादेनास्याधिकरणस्यतात्पर्यमाह॥ ब्रह्मास्येति॥ पूर्वपक्षमाक्षिपति॥ कुतःपुनरिति॥ अनवकाशेहेतुमाह॥
ननुधर्मइवेति॥ मानांतरानपेक्षेवेदैकसमधिगम्येब्रह्मण्यनुमानात्मकतर्कस्याप्रवेशस्तेनाक्षेपस्यानवकाशः भिन्नविषयत्वात्तर्कवे
दयोरित्यर्थः॥ सिद्धस्यमानांतरगम्यत्वादेकविषयत्वाद्विरोधइतिपूर्वपक्षंसमर्थयते॥ भवेदयमिति॥ अवष्टंभोदृष्टांतः नन्वेकविष
यत्वेनविरोधेपिश्रुतिविरोधान्मानांतरमेवबाध्यतामित्यत आह यथाचेति॥ प्रबलश्रुत्यादुर्बलश्रुतिबाधवन्निरवकाशमानांतरेणल।

नविलक्षणत्वादस्यतथात्वंचशब्दात्॥४॥ ब्रह्मास्यजगतोनिमित्तकारणंप्रकृतिश्चेत्यस्यपक्षस्याक्षेपःस्मृतिनिमि।
त्तःपरिहृतस्तर्कनिमित्तइदानीमाक्षेपःपरिह्रियते॥ कुतःपुनरस्मिन्नवधारितआगमार्थेतर्कनिमित्तस्याक्षेपस्याव
काशः॥ ननुधर्मइवब्रह्मण्यप्यनपेक्षआगमोभवितुमर्हति॥ भवेदयमवष्टंभोयदिप्रमाणांतरानवगाह्य आगम
मात्रप्रमेयोऽयमर्थःस्यादनुष्ठेयरूपइवधर्मः॥ परिनिष्पन्नरूपंतुब्रह्मावगम्यते॥ परिनिष्पन्नेचवस्तुनिप्रमाणांतरा
णामस्त्यवकाशोयथापृथिव्यादिषु॥ यथाचश्रुतीनांपरस्परविरोधेसत्येकवशेनेतरानीयंते॥ एवंप्रमाणांतरविरोधे
पितद्वशेनैवश्रुतिर्नीयेत॥ दृष्टसाधर्म्येणचादृष्टमर्थंसमर्पयंतीयुक्तिरनुभवस्यसन्निकृष्यते विप्रकृष्यतेतुश्रुतिरैतिह्य
मात्रेणस्वार्थाभिधानात्॥ अनुभवावसानंचब्रह्मविज्ञानमविद्यायानिवर्तकंमोक्षसाधनंचदृष्टफलतयेष्यते॥ श्रुतिर
पिश्रोतव्योमंतव्यइतिश्रवणव्यतिरेकेणमननंविदधतीतर्कमप्यत्रादर्तव्यंदर्शयति॥ अतस्तर्कनिमित्तःपुनराक्षेपःक्रि

क्षणात्वन्यासावकाशश्रुतिनयनंयुक्तमित्यर्थः॥ किंचब्रह्म साक्षात्कारस्यमोक्षहेतुत्वेनप्रधानस्यांतरंगंतर्कस्तस्यापरोक्षदृष्टांतगोचर।
त्वेनप्रधानवदपरोक्षार्थविषयत्वात् शब्दस्तुपरोक्षार्थकत्वाद्बहिरंगमतस्तर्केणबाध्यइत्याह॥ दृष्टेति॥ ऐतिह्यमात्रेणपरोक्षतयेतियावत्॥
अनुभवस्यप्राधान्यंदर्शयति॥ अनुभवावसानंचेति॥ नैषातर्केणमतिरित्यर्थवादेनतर्कस्यनिषेधमाशंक्यविधिविरोधान्नैवमित्याह॥ श्रुति

एवंपूर्वपक्षंसंभाव्यचेतनब्रह्मकारणवादिवेदांतसमन्वयःक्षित्यादिकंनचेतनप्रकृतिकंकार्यद्रव्यत्वात् घटवदितिसांख्ययोगन्यायेनविरु
ध्यतेनवेतिसंदेहेस्मृतेर्मूलाभावात् दुर्बलत्वेप्यनुमानस्यव्याप्तिमूलत्वेनप्राबल्यात्तेनविरुध्यतइतिप्रत्युदाहरणेनपूर्वपक्षयति॥नविल
क्षणत्वादिति॥पूर्वोत्तरपक्षयोःसमन्वयाऽसिद्धिस्तत्सिद्धिश्चेतिपूर्ववत्फलंजगच्चब्रह्मप्रकृतिकंनद्विलक्षणत्वात्॥यद्विलक्षणंनतत्त।

नविलक्षणत्वादस्येति॥यदुक्तंचेतनंब्रह्मजगतःकारणंप्रकृतिरितितन्नोपपद्यते॥कस्माद्विलक्षणत्वादस्यविका
रस्यप्रकृत्याइदंहिब्रह्मकार्यत्वेनाभिप्रेयमाणंजगद्ब्रह्मविलक्षणंअचेतनमशुद्धंचदृश्यते॥ब्रह्मचजगद्विलक्षणंचे
तनंशुद्धंचश्रूयते॥नचविलक्षणत्वेप्रकृतिविकारभावोदृष्टः॥नहिरुचकादयोविकारामृत्प्रकृतिकाभवंतिशरावादयो
वासुवर्णप्रकृतिकाः॥मृदैवतुमृदन्विताविकाराःप्रक्रियंतेसुवर्णेनचसुवर्णान्विताः तथेदमपिजगदचेतनं
सुखदुःखमोहान्वितंसदचेतनस्यैवसुखदुःखमोहात्मकस्यकारणस्यकार्यंभवितुमर्हतिनविलक्षणस्यब्र
ह्मणः॥ब्रह्मविलक्षणत्वंचास्यजगतोऽशुद्ध्यचेतनत्वदर्शनादवगंतव्यं॥अशुद्धंहिइदंजगत् सुखदुःखमो
हात्मकतयाप्रीतिपरितापविषादादिहेतुत्वात्स्वर्गनरकाद्युच्चावचप्रपंचत्वाच्च॥अचेतनंचेदंजगत्चेतनंप्रति
कार्यकारणभावेनोपकरणभावोपगमात्॥नहिसाम्येसत्युपकार्योपकारकभावोभवति॥नहिप्रदीपौपरस्परस्यो
पकुरुतः॥ननुचेतनमपिकार्यकारणंस्वामिभृत्यन्याये
नभोक्तुरुपकरिष्यति॥

त्प्रकृतिकंयथामृद्विलक्षणारुचकादयइत्यर्थः॥सुखदुःखमोहाःसत्त्वर
जस्तमांसितथाचजगत्सुखदुःखमोहात्मकंसामान्यप्रकृतिकंतदन्वितत्वात्यदित्थंतत्तथायथामृदन्विताघटादयइत्याह॥मृदैवेति॥विल
क्षणत्वंसाधयति॥ब्रह्मविलक्षणत्वंचेति॥यथाहिएकएवस्त्रीपिंडःपतिसपत्न्युपपतीनांप्रीतिपरितापविषादादीन्करोतिएवमन्येपिभावा
द्रष्टव्याः॥तत्रप्रीतिःसुखंपरितापःशोकः॥विषादोभ्रमःआदिपदात्रागादिग्रहः उभयोश्चेतनत्वेनसाम्यादुपकार्योपकारकभावोस्यादित्यु
क्तंस्वामिभृत्ययोर्व्यभिचारादितिशंकतेननुचेतनमपीति॥

भृत्यदेहस्यैवस्वामिचेतनोपकारकत्वान्नव्यभिचारइत्याह॥ नेत्यादिना॥ उत्कर्षापकर्षशून्यत्वाच्चेतनानां मिथोनोपकारकत्वमित्याह॥
निरतिशयाइति॥ तस्मादुपकारकत्वात्स्तुतचेतनप्रकृतिकत्वबलेनजगच्चेतनमेवेत्येकदेशिनमुत्थापयति॥ योपीति घटादेश्चेतन।
त्वमनुपलब्धिबाधितंइत्यत आह॥ अविभावनंत्विति॥ अंतःकरणान्यपरिणामत्वात्ततोपि चैतन्यस्यानुपलब्धिरित्यर्थः अंतःकरणा

तस्वामिभृत्ययोरप्यचेतनांशस्यैवचेतनंप्रत्युपकारकत्वात् योह्येकस्यचेतनस्यपरिग्रहोबुद्ध्यादिरचेतनभागःसस्वा
न्यस्यचेतनस्योपकरोतिनतुस्वयमेवचेतनश्चेतनांतरस्योपकरोत्यपकरोतिवा॥ निरतिशयाह्यकर्त्तारश्चेतनाइति
सांख्यामन्यंते॥ तस्मादचेतनंकार्यकारणंनचकाष्ठलोष्ठादीनांचेतनत्वेकिंचित्प्रमाणमस्ति॥ प्रसिद्धश्चायंचेतनाचेत।
नप्रविभागोलोके॥ तस्माद्ब्रह्मविलक्षणत्वाचेदंजगत्तत्प्रकृतिकं॥ योपिकश्चिदाचक्षीतश्रुत्वाजगतश्चेतनप्रकृतिक
त्वंतद्बलेनैवसमस्तंजगच्चेतनमवगमिष्यामिप्रकृतिरूपस्यविकारेऽन्वयदर्शनात्॥ अविभावनंतुचैतन्यस्यप।
रिणामविशेषाद्भविष्यति॥ यथास्पष्टचैतन्यानामप्यात्मनांस्वापमूर्छाद्यवस्थासुचैतन्यंनविभाव्यतेएवंकाष्ठलो।
ष्ठादीनामपिचैतन्यंनविभावयिष्यते॥ तस्मादेवचविभाविताविभावितत्वकृताद्विशेषाद्रूपादिभावाभावाभ्यांच।
कार्यकरणानामात्मनांचचेतनत्वाऽविशेषेपिगुणप्रधानभावोनविरोत्स्यते॥ यथाचपार्थिवत्वाऽविशेषेपिमांसस्रू
पौदनादीनांप्रत्यात्मवर्त्तिनोविशेषान्परस्परोपकारित्वंभवन्त्येवमिहापिभविष्यति॥ प्रविभागप्रसिद्धिरप्यतएवन
((विरोत्स्यतइति॥ ॥

दन्यस्यतदुपरागदशायामेवचैतन्याभिव्यक्तिर्नान्यदेतिभावः तदभावेचैतन्यानभिव्यक्तौदृष्टांतः
॥ यथेति॥ आत्मानात्मनोश्चेतनत्वेस्वस्वामिभावःकुतइत्यतआह॥ तस्मादेवेतिसाम्येपिप्रातिस्विकस्वरूपविशेषाद्विशेषित्वेदृष्टांतःय।
याचेति॥ चेतनाचेतनभेदःकथमित्यतआह॥ प्रविभागेतिचैतन्याभिव्यक्त्यनभिव्यक्तिभ्यामित्यर्थः॥

त

सर्वस्यचेतनत्वमेकदेशयुक्तमंगीकृत्यसांख्यःपरिहरति॥ तेनापिकथंचिदिति॥ अंगीकारंत्यक्त्वासूत्रशेषेणपरिहरति नचेत्यादिना इतरच्चेतना
चेतनत्वरूपंवैलक्षण्यंतथात्वशब्दार्थः॥ श्रुतार्थापत्तिःशब्देनबाध्येतिभावः॥४॥ श्रुतिसाहाय्यान्नबाध्येत्युत्तरसूत्रव्यावर्त्यंशंकते॥ नन्विति॥ मृ

तेनापिकथंचित्कल्पनयाचेतनाचेतनत्वलक्षणंविलक्षणत्वंपरिह्रियेतशुद्ध्यशुद्धित्वलक्षणंतुविलक्षणत्वंनैवप
रिह्रियते॥ नचेतरदपिविलक्षणत्वंपरिहर्तुंशक्यतइत्याह॥ तथात्वंचशब्दादिति॥ अनवगम्यमानमेवहीदंलोकेसम
स्तस्यवस्तुनश्चेतनत्वंचेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतयाकेवलयोत्प्रेक्ष्यते॥ तच्चशब्देनैवविरुध्यते॥ यतःश
ब्दादपितथात्वमवगम्यते॥ तथात्वमितिप्रकृतिविलक्षणत्वंकथयतिशब्दएवविज्ञानंचाविज्ञानंचेतिकस्यचिद्विभा
गस्याचेतनतांश्रावयन्चेतनाद्ब्रह्मणोविलक्षणमचेतनंजगच्छ्रावयति॥४॥ ननुचेतनत्वमपिक्वचिदचेतनत्वाभि
मतानांभूतेंद्रियाणांश्रूयतेयथामृदब्रवीदापोब्रुवन्नितितत्तेजऐक्षतताआपऐक्षंतेतिचैवमाद्याभूतविषयाचेत
नत्वश्रुतिरिंद्रियविषयापितेहेमेप्राणाअहंश्रेयसेविवदमानाब्रह्मजग्मुरिति॥ तेहवाचमूचुस्त्वंनउद्गायेतिइत्येव
माद्येंद्रियविषयेति॥ अतउत्तरंपठति॥ अभिमानिव्यपदेशस्तुविशेषानुगतिभ्यां॥५॥ तुशब्दआशंकामपनुदतिनख
लुमृदब्रवीदित्येवंजातीयकयाश्रुत्याभूतेंद्रियाणांचेतनत्वमाशंकनीयंयतोऽभिमानिव्यपदेशएषःमृदाद्यभिमानि
न्योवागाद्यभिमानिन्यश्चचेतनादेवतावदनसंवदनादिषुचेतनोचितेषुव्यवहारेषुव्यपदिश्यंतेनभूतेंद्रियमात्रंकस्मा
द्विशेषानुगतिभ्यांविशेषोहिभोक्तॄणांभूतेंद्रियाणांचचेतनाचेतनप्रविभागलक्षणःप्रागभिहितःसर्वचेतनतायांचासौ

=तिंष्वषपति

दादीनांवक्तृत्वादिश्रुतेस्तदभिमानिविषयत्वात्तथाविज्ञानंचाविज्ञानंचेतिचेतनाचेतनविभाग शब्दस्योपचरितार्थत्वमयुक्तमितिसां
ख्यःसमाधत्ते॥ अभिमानीतिसंवदनंविवादः॥ नभूतमात्रमिंद्रियमात्रंवाचेतनत्वेनव्यपदिश्यते॥ लोकवेदप्रसिद्धविभागबाधायोगा

=छंहिए

विशेषपदस्यार्थांतरमाह॥ अपिचेति॥ अहंश्रेयसेस्वस्वश्रेष्ठत्वायप्राणाविवदमानाइत्युक्तप्राणानांचेतनत्वाचिदेवतापदेनविशेषितत्वान्मा
णादिपदैरभिमानिव्यपदेशइत्यर्थः॥ प्राणेनिःश्रेयसंश्रैष्ठ्यंविदित्वाप्राणाधीनाजाताइत्यन्वयः॥ अनुगतिंबहुधाव्याचष्टे अनुगताश्चेति॥ तत्सैप्राणा

अपिचकौषीतकिनःप्राणसंवादेकरणमात्राशंकाविनिवृत्तयेअधिष्ठातृचेतनपरिग्रहायदेवताशब्देनविशिषंति॥
एताहवैदेवताअहंश्रेयसेविवदमानाइति॥ तावाएताःसर्वादेवताःप्राणेनिःश्रेयसंविदित्वेतिच अनुगताश्चसर्वत्राभिमा
निन्यश्चेतनादेवतामंत्रार्थवादेतिहासपुराणादिभ्योऽवगम्यंतेअग्निर्वाग्भूत्वामुखंप्राविशदित्येवमादिकाचश्रुतिःक
रणेष्वनुग्राहिकांदेवतामनुगतांदर्शयति॥ प्राणसंवादवाक्यशेषेचतेहप्राणाःप्रजापतिंपितरमेत्योचुरितिश्रैष्ठ्यनि
र्धारणायप्रजापतिगमनंतद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यांप्राणश्रैष्ठ्यप्रतिपत्तिस्तस्मैबलिहरणमि
तिचैवंजातीयकअस्मदादिष्विवव्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशंद्रढयति॥ तत्तेजऐक्षतेत्यपिपरस्या
एवदेवतायाअधिष्ठात्र्याःस्वविकारेष्वनुगतायाइयमीक्षाव्यपदिश्यतइतिद्रष्टव्यंतस्माद्विलक्षणमेवेदंब्रह्म
णोजगद्विलक्षणत्वाच्चनब्रह्मप्रकृतिकमित्याक्षिप्ते॥५॥ प्रतिविधत्ते॥ दृश्यतेतु॥६॥ तुशब्दःपूर्वपक्षंव्यावर्तयति
यदुक्तंविलक्षणत्वान्नेदंजगद्ब्रह्मप्रकृतिकमिति॥ नायमेकांतोदृश्यतेहिलोकेचेतनत्वेनप्रसिद्धेभ्यःपुरुषादिभ्योविल-
क्षणानांकेशनखादीनामुत्पत्तिरचेतनत्वेनचप्रसिद्धेभ्योगोमयादिभ्योवृश्चिकादीनां॥ नन्वचेतनान्येवपुरुषादिशरीरा-
ण्यचेतनानांकेशनखादीनांकारणान्यचेतनान्येववृश्चिकादिशरीराण्यचेतनानांगोमयादीनांकार्याणीति॥ ९ ॥

यबलिहरणंवागादिभिःस्वीयवशिष्ठत्वादिगुणसमर्पणंकृतंतेजआदीनामीक्षणंतथैवेक्षत्यधिकरणेचेतननिष्ठतयाव्याख्यातंद्रष्टव्यमित्यर्थः
यस्मान्नास्तिजगतश्चेतनत्वंतस्मादितिपूर्वपक्षोपसंहारः॥५॥ कियत्किंचिद्वैलक्षण्यंहेतुःबहुवैलक्षण्यंवाआद्येव्यभिचारमाह॥ नायमेकांतोदृ
श्यतेहीति॥ हेतोरसत्वान्नव्यभिचारइतिशंकते॥ नन्विति॥

शा॰ भा॰ यत्किंचिद्वैलक्षण्यमस्ती निर्व्यभिचारइत्याह॥ उच्यतइतिशरीरस्यकेशादीनांचप्राणित्वाप्राणित्वरूपंवैलक्षण्यमस्तीत्यर्थः द्वितीयेपितत्रैवव्यभि अ॰२पा॰१
र॰प्र॰टी॰ चारमाह॥महानिति॥पारिणामिकःकेशादीनांस्वगतपरिणामात्मकइत्यर्थः॥किंचययोःप्रकृतिविकारभावः तयोःसादृश्यंवदतावक्तव्यंकि।
१७२ मात्यंतिकंयत्किंचिद्वेति॥आद्येदोषमाह॥अत्यंतेति॥द्वितीयमाशंक्यब्रह्मजगतोरपितत्सत्वात्प्रकृतिविकृतित्वसिद्धिरित्याह॥अथेत्या

उच्यते॥एवमपिकिंचिदचेतनंचेतनस्यायतनभावमुपगच्छतिकिंचिन्नेत्यस्त्येववैलक्षण्यं॥महांस्त्वयंपारिणा
मिकःस्वभावविप्रकर्षःपुरुषादीनांकेशनखादीनांचस्वरूपादिभेदात्॥तथागोमयादीनांवृश्चिकादीनांच॥अत्यंत
सारूप्येचप्रकृतिविकारभावएवप्रलीयेत॥अथोच्येतअस्तिकश्चित्पार्थिवत्वादिस्वभावःपुरुषादीनांकेशनखा
दिष्वनुवर्त्तमानोगोमयादीनांचवृश्चिकादिष्वितिब्रह्मणोपितर्हिसत्तालक्षणःस्वभावआकाशादिष्वनुवर्त्तमा।
नोदृश्यते॥विलक्षणत्वेनचकारणेनब्रह्मप्रकृतिकत्वंजगतोदूषयताकिमशेषस्यब्रह्मस्वभावस्याननुवर्त्तनंवि
लक्षणत्वमभिप्रेयतेउतयस्यकस्यचिदथचैतन्यस्येतिवक्तव्यं॥प्रथमेविकल्पेसमस्तप्रकृतिविकारोच्छेदप्रसंगः॥
नह्यसत्यतिशयेप्रकृतिविकारइतिभवति॥द्वितीयेचासिद्धत्वंदृश्यतेहिसत्तालक्षणोब्रह्मस्वभावआकाशादि।
ष्वनुवर्त्तमानइत्युक्तं॥तृतीयेतुदृष्टांताभावःकिंहियच्चैतन्येनानन्वितंतद्ब्रह्मप्रकृतिकंदृष्टमितिब्रह्मवादिनं सम॰
प्रत्युदाह्रियेतसमस्तस्यवस्तुजातस्यब्रह्मप्रकृतिकत्वाभ्युपगमात्॥ १७२

((दिना॥विलक्षणत्वंविकल्प्यदूषणांतरमाहविलक्ष।
णत्वेनेत्यादिना॥जगतिसमस्तस्यब्रह्मस्वभावस्यचेतनत्वादेरननुवर्त्तनाच्चब्रह्मकार्यत्वमितिपक्षेसर्वसाम्येप्रकृतिविकारत्वमित्युक्तंस्यात्त
दसंगतमित्याह प्रथमइति॥ तृतीयेतुदृष्टांताभावइति नचजगन्नब्रह्मप्रकृतिकमचेतनत्वादविद्यावदितिदृष्टांतोस्तीतिवाच्यं॥अनादि
त्वस्योपाधित्वात् नचध्वंसेसाध्याव्यापकतातस्यापिकार्यसंस्कारात्मकस्यभावत्वेनब्रह्मप्रकृतिकत्वादभावत्वाग्रहेचानादिभावत्वस्योपा।

कार्यमुत्पत्तेःप्रागसदेवस्यात्तच्चविरुद्धंकारणात्मनासत्त्वायोगादित्यपसिद्धांतापत्तिमाशंक्यमिथ्यात्वात्कार्यस्यकालत्रयेपिकारणात्मनासत्त्वमविरुद्धमितिसमाधत्ते असदितिचेदित्यादिना॥असत्त्वादितिसत्त्वप्रतिषेधोनिरर्थकइत्यर्थः॥कार्यसत्यत्वाभावेश्रुतिमाह॥सर्वंतमिति॥मिथ्यात्वमजानतःशंकामनूद्यपरिहरति॥नन्वित्यादिना॥विस्तरेणचैतदितिमिथ्यात्वमित्यर्थः॥७॥सत्कार्यवादसिद्ध्यर्थंकार्याभेदेकारणस्यापिकार्य

असदितिचेन्नप्रतिषेधमात्रत्वात्॥७॥यदिचेतनंशुद्धंशब्दादिहीनंचब्रह्मतद्विपरीतस्याचेतनस्याशुद्धस्यशब्दादिमतःकार्यस्यकारणमिष्येत॥असत्तर्हिकार्यंप्रागुत्पत्तेरितिप्रसज्येत अनिष्टंचैतत्सत्कार्यवादिनस्तवेतिचेन्नैषदोषःप्रतिषेधमात्रत्वात्प्रतिषेधमात्रंहीदंनास्यप्रतिषेधस्यप्रतिषेध्यमस्तिनह्ययंप्रतिषेधःप्रागुत्पत्तेःसत्त्वंकार्यस्यप्रतिषेद्धुंशक्नोतिकथंयथैवहीदानीमपीदंकार्यंकारणात्मनासदेवंप्रागुत्पत्तेरपीतिगम्यते॥नहीदानीमपिइदंकार्यं कारणात्मानमंतरेणस्वतंत्रमेवास्ति॥सर्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदेत्यादिश्रवणात्॥कारणात्मनातुसत्त्वंकार्यस्यप्रागुत्पत्तेरविशिष्टं॥ननुशब्दादिहीनंब्रह्मजगतःकारणं॥बाढंनतुशब्दादिमत्कार्यंकारणात्मनाहीनंप्रागुत्पत्तेरिदानींवास्तितेनननशक्यतेवक्तुंप्रागुत्पत्तेरसत्कार्यमितिविस्तरेणचैतत्कार्यकारणानन्यत्ववादेवक्ष्यामः॥७॥अपीतौतद्वत्प्रसंगादसमंजसं॥८॥अत्राह॥यदिस्थौल्यसावयवत्वाचेतनत्वपरिछिन्नत्वाशुद्ध्यादिधर्मकंकार्यंब्रह्मकारणकमभ्युपगम्येत॥तदपीतौप्रलयेप्रतिसंसृज्यमानंकार्यंकारणाविभागमापद्यमानंकारणमात्मीयेनधर्मेणदूषयेदित्यपीतौकारणस्यापिब्रह्मणःकार्यस्येवाशुद्ध्यादिरूपप्रसंगात्सर्वज्ञंब्रह्मजगत्कारणमितिअसमंजसमिदंऔपनिषदंदर्शनं॥अपिचसमस्तस्यविभागस्याविभागप्राप्तेःपुनरुत्पत्तौनियमकारणाभावात्भोक्तृभोग्यादिविभागेनोत्पत्तिर्नप्राप्नोतिइत्यसमंजसं॥

वदशुद्ध्यादिप्रसंगइतिशंकासूत्रंव्याचष्टे॥अत्राहेति॥प्रतिसंसृज्यमानपदस्यव्याख्याकारणेतियथाजलेलीयमानंलवणद्रव्यंजलंदूषयतितद्वदित्यर्थः॥सूत्रस्ययोजनांतरमाह॥अपिचेति॥सर्वस्यकार्यस्यापीतौकारणवदेकरूपत्वप्रसंगइत्यर्थः॥ अर्थांतरमाह॥

अर्थांतरमाह। अपिचेति॥ कर्मादीनामुत्पत्तिनिमित्तानांप्रलयेपिभोक्तृणांउत्पत्तौतद्वदेवमुक्तानामप्युत्पत्तिप्रसंगादित्यर्थः॥ शंकापूर्वकंव्याख्यांतरमा
ह॥ अथेति॥ यदिलयकालेपिकार्यंकारणाद्विभक्तंनहिस्थितिकालवल्लयाभावप्रसंगात्कार्येणहेतापत्तेश्चासमंजसमिदंदर्शनमित्यर्थः॥८॥ अपीतौ
जगत्स्वकारणंनदूषयतिकारणेलीनत्वान्मृदादिषुलीनघटादिवदितिसिद्धांतसूत्रंव्याचष्टे॥ नैवेत्यादिना॥ अपिगच्छल्लीयमानं॥ विभागावस्थास्थि

अपिचभोक्तृणांपरेणब्रह्मणाऽविभागंगतानांकर्मादिनिमित्तप्रलयेपिपुनरुत्पत्तौअभ्युपगम्यमानायांमुक्तानामपिपु
नरुत्पत्तिप्रसंगात्असमंजसं॥ अथेदंजगदपीतावपिविभक्तमेवपरेणब्रह्मणाऽवतिष्ठेतैवमप्यपीतिश्चनसंभवतिकार
णाव्यतिरिक्तंचकार्यंनसंभवतीत्यसमंजसमेवेति॥८॥ अत्रोच्यते॥ नतुदृष्टांतभावात्॥९॥ नैवास्मदीयेदर्शनेकिंचिद
सामंजस्यमस्ति॥ यत्तावदभिहितंकारणमपिगच्छत्कार्यंकारणमात्मीयेनधर्मेणदूषयेदितितददूषणंकस्मात्दृष्टांत
भावात्॥ संतिहिदृष्टांतायथाकारणमपिगच्छत्कार्यंकारणमात्मीयेनधर्मेणनदूषयंतितद्यथाशरावादयोमृत्प्रकृति
काविकाराविभागावस्थायामुच्चावचमध्यमप्रभेदाःसंतःपुनःप्रकृतिमपिगच्छंतोनतामात्मीयेनधर्मेणसंसृजंति॥ रु
चकादयश्चसुवर्णविकाराअपीतौनसुवर्णमात्मीयेनधर्मेणसंसृजंति॥ पृथिवीविकारश्चतुर्विधोभूतग्रामोनपृथिवीम
पीतावात्मीयेनधर्मेणसंसृजति॥ त्वत्पक्षस्यतुनकश्चिद्दृष्टांतोस्ति॥ अपीतिरेवहिनसंभवेत्यदिकारणेकार्यंस्वधर्म
णैवावतिष्ठेत॥ अनन्यत्वेपिकार्यकारणयोःकार्यस्यकारणात्मत्वंनतुकारणस्यकार्यात्मत्वंआरंभणशब्दादिभ्यइतिवक्ष्या

तिकारः॥ त्वत्पक्षस्येति॥ मधुरजलंलवणस्याकारणमितिअदृष्टांतः॥ किंचदूषकत्वेकार्यस्यस्थितिःस्यान्नलवणवदित्याह॥ अपीतिरेवेति॥
असतिकार्येतद्धर्मेणकारणस्ययोगोनसंभवतिधर्म्यसत्त्वेधर्माणामप्यसत्त्वादितिभावः॥ ननुसत्कार्यवादेलयेपिकार्यस्यकारणाभेदेनस
त्त्वात्दूषकत्वंस्यादित्यतआह॥ अनन्यत्वेपीति॥ कल्पितस्याधिष्ठानधर्मवत्त्वमभेदान्नत्वधिष्ठानस्यकल्पितकार्यधर्मवत्त्वंतस्यकार्यात्पृथक्

संप्रतिकल्पत्रयसाधारणंदोषमाह॥ आगमेतिपूर्वोक्तमनूद्यब्रह्मणःशुष्कतर्कविषयत्वासंभवात्तर्केणाक्षेपइत्याह॥ यत्तूक्तमित्यादिवा॥
लिंगसादृश्यपरप्रवृत्तिनिमित्तानांअभावादनुमानोपमानशब्दानामगोचरोब्रह्मलक्षणायावेदैकवेद्यमित्यर्थः॥एषाब्रह्मणिमतिस्तर्के-
णस्वतंत्रेणनापनेयानसंपादनीयायद्वाकुतर्केणनबाधनीयाकुताकिंकादन्येनैववेदविदाचार्येणप्रोक्तामतिःसुज्ञानायानुभवायफला

आगमविरोधस्तुप्रसिद्धएवचेतनंब्रह्मजगतःकारणंप्रकृतिश्चेत्यागमतात्पर्यस्यप्रसाधितत्वात्॥ यत्तूक्तंपरिनि-
ष्पन्नत्वात्ब्रह्मणिप्रमाणांतराणिसंभवेयुरितितदपिमनोरथमात्रंरूपाद्यभावाद्धिनायमर्थःप्रत्यक्षस्यगोचरःलिं-
गाद्यभावाच्चनानुमानादीनामागममात्रसमधिगम्यएवत्वयमर्थोधर्मवत्॥तथाचश्रुतिर्नैषातर्केणमतिरापनेया
प्रोक्तान्येनैवसुज्ञानायप्रेष्ठेति॥कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः॥अर्वाग्देवाअस्यविसर्ज-
नेनाथाकोवेदयतआबभुवेतिइयंविसृष्टिर्यतआबभूवेतिचैतेऋचौसिद्धानामपीश्वराणांदुर्बोधतांजगत्कारणस्य
दर्शयतः॥स्मृतिरपिभवत्यचिंत्याःखलुयेभावाननास्तर्केणयोजयेदितिअव्यक्तोयमचिंत्योयमविकार्योयमुच्यत
इतिच॥नमेविदुःसुरगणाःप्रभवंनमहर्षयः॥अहमादिर्हिदेवानांमहर्षीणांचसर्वशइतिचैवंजातीयका॥यदपि
श्रवणव्यतिरेकेणमननंविदधच्छब्दएवतर्कमप्यादर्तव्यंदर्शयतीत्युक्तंनानेनमिषेणशुष्कतर्कस्यात्रात्मलाभः
संभवतिश्रुत्यनुगृहीतएवह्यत्रतर्कोनुभवांगत्वेनाश्रीयते॥स्वप्नांतबुद्धांतयोरुभयोरितरेतरव्यभिचारादात्मनोनन्वा-
गतत्वं॥ः

यभवतिहेप्रेष्ठप्रियतमेतिनचिकेतःसंप्रतिमृत्योर्वचनं इयंविविधासृष्टिर्यतःआसमंताद्भूवनंकोवाअद्धासाक्षाद्वेदेति
इतुवेदनंकइहलोकेतंप्रवोच तमावोचत्छांदसोदीर्घलोपः यथावद्ज्ञापिनास्तीत्यर्थः प्रभवंजन्मनविदुर्ममसर्वादित्वेनजन्माभावान्निषे-
धामननविधिव्याजेनशुष्कःश्रुत्यनपेक्षः॥श्रुत्यानत्वेनिश्चितेसत्यनुपश्चात्पुरुषदोषस्यासंभावनादेर्निरासायगृहीतःश्रुत्यनुगृहीतस्तमा-

जीवस्यावस्थावतो देहादिप्रपंचयुक्तस्य निष्प्रपंचब्रह्मैक्यमसंभवि द्वैतग्राहिप्रमाणविरोधाद्ब्रह्मणश्चाद्वितीयत्वमयुक्तमित्येवं श्रौताऽर्थासंभावनायां तन्निरासाय सर्वास्ववस्थास्वात्मनोऽनुगतस्याव्यभिचारिणीभिरवस्थाभिरनन्वागतत्वमसंसृष्टत्वं अवस्थानां स्वाभाविकत्वे वन्हेरौष्ण्यवदात्मव्यभिचारायोगात्सुषुप्तौ प्रपंचभ्रांत्यभावे सता सोम्येत्युक्ताभेददर्शनान्निष्प्रपंचब्रह्मैक्यसंभवः यथा घटादयो मृदभिन्नास्तथा जगद्ब्रह्माभिन्नं तज्जत्वादित्यादिस्तर्क आश्रीयत इत्यर्थः इतोऽन्यादृशस्य तर्कस्यात्र ब्रह्मण्यप्रवेशादस्य चानुकूलत्वान्न तर्केणाक्षेपावकाश इति भावः ब्रह्मणि शुष्कतर्कस्याप्रवेशः सूत्रसंमत इत्याह॥ तर्काप्रतिष्ठानादिति॥ विप्रलंभकत्वमप्रमापकत्वं यदुक्तं एकदेशिना सर्वस्य जगतश्चेतनत्वोक्तौ विभागश्रुत्यनुपपत्तिरिति दूषणं सांख्येन तत्र तेनैकदेशिना विभागश्रुतेश्चैतन्याभिव्यक्त्यनभिव्यक्तिभ्यां योजयितुं शक्यत्वात्सांख्यस्य त्विदं दूषणं वज्रलेपायते प्रधानकार्यत्वे सर्वस्याचेतनत्वेन चेतनाचेतनकार्यविभागासंभवादित्याह॥ योपीत्यादिना॥ सिद्धांते चेतनाचेतनवैलक्षण्यांगीकारे कथं ब्रह्मणः प्रकृतित्वमित्यत आह॥ प्रत्युक्तत्वादिति॥ अप्रयोजकत्वव्यभिचाराभ्यां निरस्तत्वादित्यर्थः॥६॥

संप्रसादे च प्रपंचपरित्यागेन सदात्मना संपत्तेर्निष्प्रपंचसदात्मत्वं॥ प्रपंचस्य च ब्रह्मप्रभवत्वात्कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः तर्कः तर्काप्रतिष्ठानादिति केवलस्य तर्कस्य विप्रलंभकत्वं दर्शयिष्यति॥ योपि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षेत तस्यापि विज्ञानं चाविज्ञानं चेति चेतनाचेतनविभागश्रवणं विभावनाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुं॥ परस्यैव त्विदमपि विभागश्रवणं न युज्येत॥ कथं परमकारणस्य ह्यत्र समस्तजगदात्मना समवस्थानं श्राव्यते विज्ञानं चाविज्ञानं चाभवदिति तत्र यथा चेतनस्याचेतनभावो नोपपद्यते विलक्षणत्वादेवमचेतनस्यापि चेतनभावो नोपपद्येत॥ प्रत्युक्तत्वाद्विलक्षणत्वस्य यथाश्रुत्यैव चेतनं कारणं गृहीतव्यं भवति॥६॥

राम॰
१७२

किंचापीतावितिविशेषणंव्यर्थमितिप्रतिबंद्यासमाधत्तेअनन्यत्वंचेदिति॥परिणामदृष्टांतंव्याख्यायविवर्तदृष्टांतंव्याचष्टे॥अस्तिचेति॥मायाव्यनुपादानमित्यरुच्यादृष्टांतांतरमाह॥यथाचेति॥अस्त्येवस्वप्नकालेद्रष्टुःसंसर्गइत्यतआह॥प्रबोधेति॥जाग्रत्सुषुप्त्योःस्वप्नेनात्मनोऽस्पर्शात्तत्कालेप्यस्पर्शइत्यर्थः॥य

२४२

अनन्यत्वंचेदमुच्यतेकार्यमपीतावात्मीयेनधर्मेणकारणंसंसृजेदितिस्थितावपिसमानोयंप्रसंगःकार्यकारणयोरनन्यत्वाभ्युपगमात्इदंसर्वंयदयमात्माआत्मैवेदंसर्वंब्रह्मैवेदममृतंपुरस्तात्सर्वंखल्विदंब्रह्मेत्येवमाद्याभिर्हिश्रुतिभिरविशेषेणत्रिष्वपिकालेषुकार्यस्यकारणानन्यत्वंश्राव्यतेतत्रयःपरिहारःकार्यस्यतद्धर्माणांचाविद्याध्यारोपितत्वान्नतैःकारणंसंसृज्यतइतिअपीतावपिससमानोऽस्तिचायमपरोदृष्टांतोयथास्वयंप्रसारितयामाययामायावीत्रिष्वपिकालेषुनसंस्पृश्यतेअवस्तुत्वात्॥एवंपरमात्मापिसंसारमाययानसंस्पृश्यतइति॥यथाचस्वप्नदृगेकःस्वप्नदर्शनमाययानसंस्पृश्यतेप्रबोधसंप्रसादयोरनन्वागतत्वात्॥एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेणव्यभिचारिणानसंस्पृश्यतेमायामात्रंह्येतद्यत्परमात्मनोऽवस्थात्रयात्मनावभासनंरज्ज्वाइवसर्पादिभावेनेति॥अत्रोक्तंवेदांतार्थसंप्रदायविद्भिराचार्यैः॥अनादिमाययासुप्तोयदाजीवःप्रबुध्यते॥अजमनिद्रमस्वप्नमद्वैतंबुध्यतेतदेति॥तत्रयदुक्तमपीतौकारणस्यापिकार्यस्येवस्थौल्यादिदोषप्रसंगइत्येतदयुक्तं॥यत्पुनरेतदुक्तंसमस्तस्यविभागस्याविभागप्राप्तेःपुनर्विभागेनियमकारणंनोपपद्यतइत्ययमप्यदोषः॥दृष्टांतभावादेवयथाहिसुषुप्तिसमाध्यादिसमयेसत्यांस्वाभाविक्यामविभागप्राप्तौमिथ्याज्ञानस्यानपोदितत्वात्पूर्ववत्पुनःप्रबोधेविभागोभवत्येवमिहापिभविष्यति॥

((द्यज्ञस्यजीवस्यावस्थाभिरसंसर्गस्तदासर्वज्ञस्यकिंवाच्यमितिदार्ष्टांतिकमाह॥एवमिति॥जगज्जन्मस्थितिलयाईश्वरस्यावस्थात्रयंतदसंगित्वेवृद्धसंमतिमाह॥अत्रोक्तमिति॥यदातत्त्वमसीत्युपदेशकालेप्रबुध्यतेमायानिद्रांत्यजति॥तदाजन्मलयस्थित्यवस्थाशून्यमद्वैतमीश्वरमात्मत्वेनानुभवतीत्यर्थः॥फलितमाह॥तत्रेति॥

द्वितीयमसामंजस्यमनूद्यतेनैवसूत्रेणपरिहरति॥यत्पुनरिति॥

सुषुप्तावज्ञानसत्त्वे पुनर्विभागोत्पत्तौ च मानमाह॥ श्रुतिश्चेति॥ सति ब्रह्मण्येकीभूय न विदुरित्यज्ञानोक्तिः इह सुषुप्तेः प्राक् प्रबोधे येन येन जात्यादिना विभक्ता भवंति तदा पुनरुत्थानकालेन तथैव भवंतीति विभागोक्तिः॥ ननु सुषुप्तौ पुनर्विभागशक्त्यज्ञानसत्त्वेपि सर्वप्रलये न तत्सत्त्वं कुत इत्यत आह॥ यथाहीति॥ यथा सुषुप्तौ परमात्मनि सर्वकार्याणामविभागेपि पुनर्विभागहेत्वज्ञानशक्तिरस्ति एवमपीतौ महाप्रलयेपि मिथ्याभूताज्ञानसम्बन्धात्पुनः सृष्टिविभागशक्तिरनुमास्यते यतः स्थिताविदानीं मिथ्याज्ञानकार्यो विभागव्यवहारस्तत्त्वबोधाभावात्स्वप्नवदबा-

श्रुतिश्चात्र भवति इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति॥ त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंतीति॥ यथा ह्यविभागेपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते॥ एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते॥ एतेन मुक्तानां पुनरुत्पत्तिप्रसंगः प्रत्युक्तः सम्यक्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात्॥ यः पुनरयमंतेऽपरो विकल्प उत्प्रेक्षितो यथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतेति सोप्यनभ्युपगमादेव प्रतिषिद्धस्तस्मात्समंजसमिदमौपनिषदं दर्शनं॥ ९॥ स्वपक्षदोषाच्च॥ १०॥ स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुष्युः कथमित्युच्यते॥ यत्तावदभिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामपि समानमेतच्छब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात्॥ अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात्समानः प्रागुत्पत्तेरसत्कार्यवादप्रसंगः॥ ॥

धितो दृश्यते अतः कार्यदर्शनात्कारणसत्त्वसिद्धिरित्यर्थः अज्ञानां जीवानां महाप्रलयेप्यज्ञानशक्तिनियमात्पुनर्जन्मनियम इति भावः॥ एतेनेति॥ जन्मकारणाज्ञानशक्त्यभावेनेत्यर्थः॥ ९॥ वैलक्षण्यादीनां सांख्यपक्षेपि दोषत्वाच्चास्माभिस्तन्निरासप्रयासः कार्य इत्याह॥ स्वपक्षेति॥ सूत्रं व्याचष्टे॥ स्वेति॥ प्रादुष्युः प्रादुर्भवेयुः॥ अत एवेति॥ सत्यकार्यस्य विरुद्धकारणात्मनासत्त्वायोगात् सांख्यस्यैवायं दोषो न कार्यमिथ्यात्ववा-

अपीतावितिसूत्रोक्तदोषचतुष्टयमाह॥ तथापीतावितिः॥ कार्यवत्प्रधानस्यरूपादिमत्त्वप्रसंगः इदंकर्मादिकमस्योपादानंभोग्यमस्येत्यनि
यमः बद्धमुक्ताव्यवस्थाचयदिव्यवस्थार्थंमुक्तानांभेदाः संघातविशेषाः प्रधानेलीयंतेबद्धानांभेदास्तुनलीयंतइत्युच्येततर्हि अलीना

तथापीतौकार्यस्यकारणाविभागाभ्युपगमात्तद्वत्प्रसंगोपिसमानः तथामृदितसर्वविशेषेषुविकारेष्वपीताव
विभागात्मतांगतेष्विदमस्यपुरुषस्योपादानमिदमस्येतिप्राक्प्रलयात्प्रतिपुरुषंयेनियताभेदानतेतथैवपुनरु
त्पत्तौनियंतुंशक्यंतेकारणाभावाद्विनैवकारणेननियमेभ्युपगम्यमानेकारणाभावसाम्यान्मुक्तानामपिपुन।
र्बंधप्रसंगः अथकेचिद्भेदाअपीतावविभागमापद्यंतेकेचिन्नेतिचेद्येनापद्यंतेतेषांप्रधानकार्यत्वंनप्राप्नोतीत्ये
वमेतेदोषाःसाधारणत्वान्नान्यतरस्मिन्पक्षेचोदयितव्याभवंतीत्यदोषतामेवैषांद्रढयति॥अवश्याश्रयितव्यत्वात्
॥१०॥तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसंगः॥११॥ इतश्चनागमगम्येऽर्थेकेवलेनतर्के
णप्रत्यवस्थातव्यं॥यस्मान्निरागमाःपुरुषोत्प्रेक्षामात्रनिबंधनास्तर्काअप्रतिष्ठिताभवंत्युत्प्रेक्षायानिरंकुशत्वात्त
थाहिकैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्काअभियुक्ततरैरन्यैराभास्यमानादृश्यंतेतैरप्युत्प्रेक्षिताःसंतस्ततोन्यैराभास्यं
तइतिनप्रतिष्ठितत्वंतर्काणांशक्यमाश्रयितुंपुरुषमतिवैश्वरूप्यादथकस्यचित्प्रसिद्धमाहात्म्यस्यकपिलस्यान्यस्यवा
संमतस्तर्कःप्रतिष्ठितइत्याश्रीयेतएवमपिअप्रतिष्ठितत्वमेवप्रसिद्धमाहात्म्यानुमतानामपितीर्थकारणांकपिलकण
भुक्प्रभृतीनांपरस्परविप्रतिपत्तिदर्शनात्॥

नांपुरुषवत्कार्यत्वव्याघातइत्यर्थः॥१०॥ किंचतर्कस्यसंभावितदोषत्वात्तेननि
र्दोषवेदांतसमन्वयोनबाध्यतइत्याह तर्काप्रतिष्ठानादिति॥पुरुषमतीनांविचित्रत्वेपिकपिलस्यसर्वज्ञत्वात्तदीयतर्केविश्वासइतिशंकते॥
॥अथेति॥कपिलोयदिसर्वज्ञःकणादोनेतिकाप्रमेतिन्यायेनपरिहरति॥एवमपीति॥

सूत्रमध्यस्थशंकाभागं व्याचष्टे अथोच्येतेति ॥ विलक्षणत्वादितर्काणामप्रतिष्ठितत्वेपि व्याप्तिपक्षधर्मतासंपन्नः कश्चित्तर्कः प्रतिष्ठितो भ
विष्यति तेन प्रधानमनुमेयमित्यर्थः ॥ ननु सोप्यप्रतिष्ठितस्तर्कजातीयत्वाद्विलक्षणत्वादिवदित्यत आह ॥ नहीति तर्कजातीयत्वादिति त
र्कः प्रतिष्ठितो न वा आद्ये तेषामप्रतिष्ठितत्वसाध्याभावाद्व्यभिचारः ॥ द्वितीयेपि न सर्वतर्काणां अप्रतिष्ठितत्वं हेत्वभावादित्यभिसंधिमाना
ह एतदपीति ॥ किंचानागतपाक इष्टसाधनं पाकत्वादतीतपाकवदित्यादिदृष्टानिष्टसाधनानुमानात्मकतर्कस्य प्रवृत्तिनिवृत्तिव्यवहारहे

अथोच्येतान्यथा वयमनुमास्यामहे यथानाऽप्रतिष्ठादोषो भविष्यति ॥ नहि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते व
क्तुं ॥ एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते केषांचित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जा
तीयकानां तर्काणामप्रतिष्ठितत्वप्रकल्पनात् ॥ सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसंगः ॥ अतीतवर्तमा
नाध्वसामान्येन ह्यनागतेप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते ॥ श्रुत्यर्थविप्रतिपत्तौ चा
र्थाभासनिराकरणेन सम्यगर्थनिर्धारणं तर्केणैव वाक्यवृत्तिनिरूपणरूपेण क्रियते ॥ मनुरपि चैवं मन्यते ॥ प्रत्य
क्षमनुमानं च शास्त्रं च त्रिविधागमं ॥ त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सतेति आर्षं धर्मोपदेशं च वेदशास्त्रावि
रोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति च ब्रुवन्नयमेव तर्कस्यालंकारो यदप्रतिष्ठितत्वं नामैवं हि साव
द्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति ॥

तुल्यात्वाप्रतिष्ठेत्याह सर्वतर्केति ॥ अध्वा विषयः पाकभोजना
दिर्विषभक्षणादिश्च तत्सामान्येन पाकत्वादिनाऽनागतविषये पाकादौ सुखदुःखहेतुत्वानुमित्या प्रवृत्त्यादिरित्यर्थः ॥ किंच पूर्वोत्तरमीमांसयो॥
स्तर्केणैव वाक्यतात्पर्यनिर्णयस्य ——— क्रियमाणत्वात्तर्कः प्रतिष्ठित इत्याह ॥ श्रुत्यर्थेति ॥ मनुरपि केषांचित्तर्काणामप्रतिष्ठां मन्यत इ
त्याह ॥ मनुरिति ॥ धर्मस्य शुद्धिरधर्माद्भेदनिर्णयः ॥ कस्यचित्तर्कस्याप्रतिष्ठितत्वमंगीकरोति ॥ अयमेवेति ॥ सर्वतर्काणां प्रतिष्ठायां पूर्वपक्ष एव

पूर्वपक्षतर्कवत्सिद्धांततर्कोप्यप्रतिष्ठितस्तर्कत्वाविशेषादितिवदंतंउपहसति॥नहीति॥क्वचित्तर्कस्यप्रतिष्ठायामपिजगत्कारणविशेषेतर्कस्यस्वातंत्र्यंनास्तीतिसूत्रशेषंव्याचष्टे॥यद्यपीत्यादिना॥भावस्यजगत्कारणस्ययाथात्म्यमद्वयत्वंमुक्तिनिबंधनंमुक्त्यालंबनंपरमानंदचित्प्रभं॥अतिगंभीरत्वंब्रह्मणोवेदान्यमानागम्यत्वंदर्शयति॥रूपादिति॥अविमोक्षोमुक्त्यभावइत्यर्थांतरमाह॥

नहिपूर्वजोमूढआसीदित्यात्मनापिमूढेनभवितव्यंइतिकिंचिदस्तिप्रमाणंतस्मान्नतर्काप्रतिष्ठानंदोषइतिचेदेवमप्यविमोक्षप्रसंगोयद्यपिक्वचिद्विषयेतर्कस्यप्रतिष्ठितत्वमुपलक्ष्यतेतथापिप्रकृतेतावद्विषयेप्रसज्यतएवाप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्यनहीदमतिगंभीरंभावयाथात्म्यंमुक्तिनिबंधनमागममंतरेणोत्प्रेक्षितुमपिशक्यंरूपाद्यभावाद्धिनायमर्थःप्रत्यक्षगोचरोलिंगाद्यभावाच्चनानुमानादीनामितिचावोचामअपिचसम्यक्ज्ञानान्मोक्षइतिसर्वेषांमोक्षवादिनामभ्युपगमः॥तच्चसम्यक्ज्ञानमेकरूपंवस्तुतंत्रत्वादेकरूपेणह्यवस्थितोयोर्थःसपरमार्थोलोकेतद्विषयंज्ञानंसम्यक्ज्ञानमित्युच्यतेयथाग्निरुष्णइतितत्रैवंसतिसम्यक्ज्ञानेपुरुषाणांविप्रतिपत्तिरनुपपन्नातर्कज्ञानानांतुअन्योन्यविरोधात्प्रसिद्धाविप्रतिपत्तिः॥यद्धिकेनचित्तार्किकेणेदमेवसम्यक्ज्ञानमितिप्रतिपादितं॥तदपरेणव्युत्थाप्यतेतेनापिप्रतिष्ठापितंततोपरेणव्युत्थाप्यतइतिप्रसिद्धंलोकेकथमेकरूपाऽनवस्थितविषयंतर्कप्रभवंसम्यक्ज्ञानंभवेत्नचप्रधानवादीतर्कविदामुत्तमइतिसर्वैस्तार्किकैःपरिगृहीतोयेनतदीयंमतंसम्यग्ज्ञानमितिप्रतिपद्येमहि॥

अपिचेत्यादिना॥एकरूपवस्तुज्ञानस्यसम्यग्ज्ञानत्वेपितर्कजन्यत्वंकिंनस्यादित्यतआह॥तत्रैवंसतीति॥तर्कोत्थज्ञानानांमिथोविप्रतिपत्तेर्नसम्यक्ज्ञानत्वंसम्यक्ज्ञानेविप्रतिपत्त्ययोगादित्यर्थः॥एकरूपेणानवस्थितोविषयोयस्यतत्तर्कप्रभवंकथंसम्यक्ज्ञानंभवेदितियोजनाननुसांख्यस्यश्रेष्ठत्वात्तज्ज्ञानंसम्यगित्याशंक्यहेत्वसिद्धिमाह॥नचप्रधानेति॥ ९ ६ ९॥

ननुसर्वैस्तार्किकैर्मिलित्वानिश्चितस्तर्कोन्यामतिर्मुक्तिहेतुरित्यतआहनचशक्यंतइति॥तस्मात्तर्कोन्यज्ञानानुकूलयोगात्तर्केणवेदांतसमन्वय
बाधोनयुक्तस्तद्बाधेसम्यग्ज्ञानालाभेनानिर्मोक्षप्रसंगादितिसूत्रांशार्थमुपसंहरतिअतोन्यत्रेति॥समन्वयस्यतर्केणाविरोधेफलितमधिकरणार्थमु
पसंहरति॥अत॥आगमेति॥२॥११॥ब्रह्मजगदुपादानमितितुवेदांतसमन्वयोविषयःसकिंयद्भिन्नंतद्द्रव्योपादानमितिवैशेषिकादिन्यायेनविरु

नचशक्यंतेअतीतानागतवर्त्तमानास्तार्किकाएकस्मिन्देशेकालेचसमाहर्त्तुंयेननस्तन्मतिरेकरूपैकार्थविषयासम्यक्
मतिरितिस्यात्॥ वेदस्यतुनित्यत्वेविज्ञानोत्पत्तिहेतुत्वेचसतिव्यवस्थितार्थविषयत्वोपपत्तेः॥ तज्जनितस्यज्ञा
नस्यसम्यक्त्वमतीतानागतवर्त्तमानैःसर्वैरपितार्किकैरपन्होतुमशक्यं॥ अतःसिद्धमस्यैवौपनिषदस्यज्ञानस्यसम्यक्
ज्ञानत्वं॥ अतोन्यत्रसम्यग्ज्ञानत्वानुपपत्तेःसंसाराविमोक्षएवप्रसज्येत॥ अतआगमवशेनागमानुसारितर्कवशेन
चचेतनंब्रह्मजगतःकारणंप्रकृतिश्चेतिस्थितं॥११॥ एतेनशिष्टापरिग्रहाअपिव्याख्याताः॥१२॥ वैदिकस्यदर्शनस्यप्र
त्यासन्नत्वाद्गुरुतरतर्कबलोपेतत्वाद्वेदानुसारिभिश्चकैश्चिच्छिष्टैःकेनचिदंशेनपरिगृहीतत्वात्प्रधानकारणवादं
तावद्व्यपाश्रित्ययस्तर्कनिमित्तआक्षेपोवेदांतवाक्येषूद्भावितःसपरिहृतइदानीमण्वादिवादव्यपाश्रयेणापिकैश्चिन्मंदम
तिभिर्वेदांतवाक्येषुपुनस्तर्कनिमित्तआक्षेपआशंक्यतइत्यतःप्रधानमल्लनिबर्हणन्यायेनातिदिशतिपरिगृह्यंतइतिप
रिग्रहाःनपरिग्रहाअपरिग्रहाःशिष्टानामपरिग्रहाःशिष्टापरिग्रहाःएतेनप्रकृतेनप्रधानकारणवादनिराकरणकारणेन
शिष्टैर्मनुव्यासप्रभृतिभिःकेनचिदप्यंशेनापरिगृहीतायेअण्वादिकारणवादास्तेपिप्रतिषिद्धतयाव्याख्यातानिराकृता
द्रष्टव्याः॥

ध्यतेनवेतिसंदेहेसांख्यमहतांतर्ककुशलमतित्वेपिवैशेषिकादीनांतर्कमतिकुशलत्वप्रसिद्धेस्तदीयन्यायस्याबाधितत्वाद्विरुध्यतइतिप्रत्युदाह
रणेनमासेऽतिदिशति॥एतेनेति॥फलंपूर्ववत्॥ननुसांख्यमतस्योपदेशास्तांकिंकमतस्यातिदेशःकिमितिकृतोवैपरीत्यस्यापिसंभवादित्याशंक्यापू
येतिन्योरुपदेशातिदेशभावेकारणमाह॥वैदिकस्येति॥

सत्कार्यत्वा३ त्वा३ संगतत्वस्वप्रकाशत्वाद्यंशैर्वेदांतशास्त्रस्यप्रत्यासन्नः प्रधानवादः शिष्टैर्देवलादिभिः सत्कार्यत्वांशेनस्वीकृतइतिप्रबलत्वादुपदेशः अण्वादिवादानांनिर्मूलत्वेनदुर्बलत्वादनिदेशइतिभावः॥ किंनिराकरणकारणमितिप्रष्टव्यंनास्तीत्याह॥ तुल्यत्वादिति॥ कारणमेवाह॥ तुल्यमिति॥ यदुक्तंविभुत्वान्नद्रव्योपादानंब्रह्मेतितत्रपक्षसाधकत्वेनश्रुतेरुपजीव्यत्वात् तयाबाधः महापरिमाणवत्त्वस्यसर्वसंयोगित्वरूपविभुत्वस्यनिर्गुणेब्रह्मण्यसिद्धेश्चेतिद्रष्टव्यं अतः समन्वयस्यतार्किकन्यायेननविरोधइतिसिद्धं॥१२॥४॥ अद्वितीयात्ब्रह्मणोजगत्सर्गादिवादीवेदांतसमन्वयोविषयः सकिंयन्मिथोभिन्नंतन्नाद्वितीयकारणाभिन्नंयथामृत्तंतुजौघटपटाविनितर्कसहितभेदः

तुल्यत्वान्निराकरणकारणस्यनात्रपुनराशंकितव्यंकिंचिदस्तितुल्यमत्रापिपरमगंभीरस्यजगत्कारणस्यतर्कानवगाह्यत्वंतर्कस्यचाप्रतिष्ठितत्वमन्यथानुमानेप्यविशेषःआगमविरोधश्चेत्येवंजातीयकंनिराकरणकारणं॥१२॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्॥१३॥ अन्यथापुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते यद्यपिश्रुतिःप्रमाणंस्वविषयेभवति॥ तथापिप्रमाणांतरेणविषयापहारेन्यपराभवितुमर्हतियथामंत्रार्थवादौ॥ तर्कोपिस्वविषयादन्यत्राप्रतिष्ठितःस्यात्तयथाधर्माधर्मयोःकिमतोयद्येवमतइदमयुक्तंयत्प्रमाणांतरप्रसिद्धार्थबाधनंश्रुतेः॥ प्रत्यक्षादिनाविरुध्य

तेनवेतिसंदेहेब्रह्मणितर्कस्याप्रतिष्ठितत्वेपिजगद्भेदप्रतिष्ठितत्वाद्विरुध्यतइतिपूर्वपक्षयतिभोक्त्रापत्तेरितिविरोधादद्वैतासिद्धिःपूर्वपक्षफलंसिद्धांतेतत्सिद्धिरितिभेदः॥ अनपेक्षश्रुत्यास्वार्थनिर्णयात्तर्केणाक्षेपोनयुक्तइत्युक्तमितिशंकते॥ यद्यपीतिमानांतरायोग्यश्रुत्यर्थेभवत्वनाक्षेपः॥ यस्तद्वितीयब्रह्माभेदाद्भूजलादीनामभेदोब्रह्मोपादानकत्वश्रुतिविषयः सआदित्योयूपइत्यर्थवादवन्मानांतरयोग्यस्सचेतिद्वैतप्रामाण्यैरपह्रियतइतिसमाधत्ते॥ तथापीति॥ अन्यपरत्वंगौणार्थकत्वं॥ स्वविषयेजगद्भेदेतर्कस्यप्रतिष्ठितत्वात्तेनाक्षेपइत्याह॥ तर्कोपीति॥ तर्काद्द्वैतेप्रामाण्येपितत्त्वतः समन्वयविरोधंकिमायातमितिशंकते॥ किमतइति॥ पूर्वपक्षीसमाधत्ते॥ अतइतितर्कादेःप्रामाण्यात्द्वैतबाधकत्वंश्रुतेस्तोमिथ्याद्वैतेनसमन्वयबाधोयुक्तइत्यर्थः॥

इममर्थंशंकापूर्वकंस्पष्टयति॥ कथमित्यादिना॥ ननुभोक्तृभोग्ययोर्मिथएकत्वंकेनोक्तमित्याशंक्यश्रुतार्थापत्त्येत्याह तयोश्चेति तयोरे-
कब्रह्माभेदश्रवणादेकत्वंकल्प्यतेएकस्मादभिन्नयोर्भेदेएकस्यापिभेदापत्तेस्ततश्चभेदोबाध्येतेत्यर्थः॥ इष्टापत्तिंवारयति नचास्येति॥ श्रु-
तेर्गौणार्थत्वेनसावकाशत्वान्निरवकाशद्वैतमानबाधोनयुक्तइत्यर्थः॥ ननुविभागस्याधुनिकत्वादनाद्यद्वैतश्रुत्याबाधइत्यतआह॥

कथंपुनःप्रमाणांतरप्रसिद्धोर्थःश्रुत्याबाध्यतइत्युच्यतेप्रसिद्धोह्ययंभोक्तृभोग्यविभागोलोकेभोक्ताचेतनःशारीरःभो-
ग्याःशब्दादयोविषयाइति॥ यथाभोक्तादेवदत्तोभोज्यओदनइति॥ तस्यचविभागस्याभावःप्रसज्येतयदिभोक्ताभोग्य-
भावमापद्येतभोग्यंवाभोक्तृभावमापद्येततयोश्चेतरेतरभावापत्तिःपरमकारणात् ब्रह्मणोऽनन्यत्वात्प्रसज्येतनचा-
स्यप्रसिद्धस्यविभागस्यबाधनंयुक्तं॥ यथाचाद्यत्वेभोक्तृभोग्ययोर्विभागोदृष्टस्तथातीतानागतयोरपिकल्पयित-
व्यस्तस्मात्प्रसिद्धस्यास्यभोक्तृभोग्यविभागस्याभावप्रसंगात् अयुक्तमिदंब्रह्मकारणतावधारणमितिचेत्कश्चिच्चोद-
येत्तंप्रतिब्रूयात्स्याल्लोकवदिति॥ उपपद्यतएवायमस्मत्पक्षेपिविभागः॥ एवंलोकेदृष्टत्वात्॥ तथाहिसमुद्रादुदकात्म-
नोऽनन्यत्वेपितद्विकाराणांफेनवीचीतरंगबुद्बुदादीनामितरेतरविभागइतरेतरसंश्लेषादिलक्षणश्चव्यवहारउपलभ्यते
नचसमुद्रादुदकात्मनोऽनन्यत्वेपितद्विकाराणांफेनतरंगादीनांइतरेतरभावापत्तिर्भवति॥ नचतेषामितरेतरभावानाप-
त्तावपिसमुद्रात्मनोऽन्यत्वंभवत्येवमिहापिनचभोक्तृभोग्ययोरितरेतरभावापत्तिःनचपरस्माद्ब्रह्मणोऽन्यत्वंभविष्यति॥

यथेति॥ अतीतानागतकालौभोक्त्रादिविभागाश्रयौकालत्वाद्वर्तमानकालवदित्यनुमानाद्विभागोऽनाद्यनंतइत्यर्थः॥ एवंप्राप्तेपरिणामदृ-
ष्टांतेनापाततःसिद्धांतमाह॥ स्याल्लोकवदिति दृष्टांतेपिकथमेकसमुद्राभिन्नानांपरिणामानांमिथोभेदःकथंवातेषांभेदेसत्येकस्माद-
भिन्नत्वमित्याशंक्यनहि दृष्टेऽनुपपत्तिरितिन्यायेनाह नचेति॥ एवंभोक्तृभोग्ययोर्मिथोभेदोब्रह्माभेदश्चेत्याह॥ एवमिहेति॥ ६॥

जीवस्य ब्रह्मविकारत्वाभावान्न दृष्टान्तवैषम्यमिति शंकते यद्यपीति ॥ औपाधिकं जन्मास्तीति तरंगादिसाम्यमाह ॥ तथापीति ॥ विभागो जन्म यद्वा तथापीतिशब्देनैवोक्तः परिहारः ॥ ननु भोक्तुः प्रतिदेहं विभागः कथमित्यत आह कार्यमनुप्रविष्टस्येति ॥ औपाधिकविभागे फलितमुपसंहरति ॥ इत्यत इति ॥ एकब्रह्माभिन्नत्वेपि भोक्त्रादेस्तरंगादिवद्भेदांगीकारान्न द्वैतमानेनाद्वैतसमन्वयस्य विरोध इत्यर्थः ॥ १३ ॥ पूर्वस्मिन्नेव पूर्वपक्षे विवर्त्तवादेन मुख्यं समाधानमाह तदनन्यत्वमिति ॥ समानविषयत्वं संगति वदन्नुभयोः परिहारयोः परिणामविवर्त्ताश्रयत्वेनार्थभेदमाह ॥ अभ्युपगम्येति ॥

यद्यपि भोक्ता न ब्रह्मणो विकारः तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात् ॥ तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभागः आकाशस्येव घटाद्युपाधिनिमित्त इत्यतः परमकारणाद्ब्रह्मणोऽनन्यत्वेप्युपपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरंगादिन्यायेनेत्युक्तं ।२३।५॥ तदनन्यत्वमारंभणशब्दादिभ्यः ॥ ॥ १४ ॥ अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितो न त्वयं विभागः परमार्थतोऽस्ति ॥ यस्मात्तयोः कार्यकारणयोरनन्यत्वमवगम्यते ॥ कार्यमाकाशादिकं बहुप्रपंचं जगत् कारणं परं ब्रह्म तस्मात् कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते ॥ कुतः ॥ आरंभणशब्दादिभ्यः आरंभणशब्दस्तावदेकविज्ञानेन सर्वं विज्ञाय दृष्टांतापेक्षायामुच्यते ॥ यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ॥

ज्ञानंप्रति२

प्रत्यक्षादीनामौत्सर्गिकप्रामाण्यमंगीकृत्य स्थूलबुद्धिसमाधानार्थं परिणामदृष्टांतेन भेदाभेदावुक्तौ संप्रत्यर्थतत्कृतं प्रामाण्यं तत्त्वावेदकत्वात्मच्याव्य व्यावहारिकत्वेस्याप्यनेन तथा च मिथ्याद्वैतग्राहिप्रमाणैरद्वैतश्रुतेर्न बाधः एकस्यां रज्ज्वां दंडस्रगादिद्वैतदर्शनादित्ययं मुख्यः परिहार इति भावः ॥ एवमद्वैतसमन्वयस्याविरोधार्थं द्वैतस्य मिथ्यात्वं साधयति ॥ यस्मात्तयोरिति ॥ स्वरूपैक्ये कार्यकारणत्वव्याघात इत्यत आह ॥ व्यतिरेकेणेति ॥ कारणात्पृथक्सत्त्वशून्यत्वं कार्यस्य साध्यते नैक्यमित्यर्थः ॥ वागारभ्यं नाममात्रं विकारो न कारणात्पृथगस्तीत्येवकारार्थ इति ॥

॥ श्रुतिंयोजयति एतदुक्तमिति ॥ आरंभणशब्दार्थांतरमाह ॥ पुनश्चेति ॥ अपागात् अग्नित्वमपगतं कारणमात्रत्वात् त्रीणितेजोबन्नानांरूपा
णिरूपतन्मात्रात्मकानिसत्यंतेषामपिसन्मात्रत्वात्सदेवशिष्यतइत्यभिप्रायः जीवजगतोर्ब्रह्मान्यत्वेप्रतिज्ञाबाधइत्याह ॥ नचान्यथेति न

एतदुक्तंभवतिएकेनमृत्पिंडेनपरमार्थतोमृदात्मनाविज्ञातेनसर्वंमृन्मयंघटशरावोदंचनादिकं
मृदात्मत्वाविशेषाद्विज्ञातंभवेत् ॥ यतोवाचारंभणंविकारोनामधेयंवाचैवकेवलमस्तीत्यारभ्यतेविका
रोघटःशरावउदंचनंचेति नतुवस्तुवृत्तेनविकारोनामकश्चिदस्तिनामधेयमात्रंह्येतदनृतंमृत्तिकेत्येवसत्यमि
तिएषब्रह्मणोदृष्टांतआम्नातः ॥ तत्रश्रुताद्वाचारंभणशब्दात्दार्ष्टांतिकेपिब्रह्मव्यतिरेकेणकार्यजातस्या
भावइतिगम्यते ॥ पुनश्चतेजोबन्नानांब्रह्मकार्यतामुक्त्वातेजोबन्नकार्याणांतेजोबन्नव्यतिरेकेणाभावंब्रवीत्य
पागादग्नेरग्नित्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यमित्यादिना ॥ आरंभणशब्दादिभ्यइत्या
दिशब्दादैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिइदंसर्वंयदयमात्मा ब्रह्मैवेदंसर्वंआत्मैवेदंसर्वंनेहनानास्ति
किंचनेत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरंवचनजातमुदाहर्तव्यं ॥ नचान्यथाएकविज्ञानेनसर्वविज्ञानंसंप
द्येत ॥ तस्माद्यथाघटकरकाद्याकाशानांमहाकाशादनन्यत्वं ॥ यथाचमृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्य
त्वंदृष्टनष्टस्वरूपत्वात्स्वरूपेणानुपाख्यत्वात् ॥ एवमस्यभोग्यभोक्त्रादिप्रपंचजातस्यब्रह्मव्यतिरेकेणाभावइति
द्रष्टव्यं ॥ नन्वनेकात्मकंब्रह्मयथावृक्षोऽनेकशाखएवमनेकशक्तिप्रवृत्तियुक्तंब्रह्म अतएकत्वंनानात्वंचोभयमपि

सत्यमेव॥

योरनन्यत्वेक्रमेणदृष्टांतावाह ॥ तस्माद्यथेति ॥ प्रतिज्ञाबलादित्यर्थः ॥ दृष्टंप्रातीतिकंनष्टमनित्यंयत्स्वरूपंतद्रूपेणानुपाख्यत्वात्सत्तास्फूर्तिशून्य।
त्वादनन्यत्वमितिसम्बन्धः ॥ श्रुत्याद्वैतंस्वमतमुक्त्वाभेदाभेदमतमुत्थापयति ॥ नन्विति ॥ अनेकाभिःशक्तिभिस्तदधीनप्रवृत्तिभिःपरिणामैर्युक्तमि

पर्यः॥

भेदाभेदमते सर्वव्यवस्थासिद्धिरत्यंताभेदे द्वैतमानबाध इत्यभिमानः॥ दूषयति॥ नैवं स्यादिति एवकारवाचारंभणशब्दाभ्यां विकारसत्यानिषेधात्परिणामवादः श्रुतिबाह्य इत्यर्थः॥ किंच संसारस्य सत्यत्वे न हि शिष्टस्य जीवस्य ब्रह्मैक्योपदेशेन स्याद्विरोधादित्याह॥ स आत्मेति॥ एकत्वं ज्ञानकर्मसमुच्चयसाध्यमित्युपदेशार्थ इत्याशंक्यासीति पदविरोधान्नैवमित्याह॥ स्वयमिति॥ अतस्तत्व

यथा वृक्ष इत्येकत्वं शाखा इति नानात्वं यथा च समुद्रात्मनैकत्वं फेनतरंगाद्यात्मना नानात्वं॥ यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वं॥ तत्रैकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकांडाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इत्येवं च मृदादिदृष्टांता अनुरूपा भविष्यंतीति॥ नैवं स्यान्मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टांते सत्यत्वावधारणाद्वाचारंभणशब्देन च विकारजातस्यानृतत्वाभिधानात्॥ दार्ष्टांतिकेऽप्यैतदात्म्यमिदं सर्वं तत्सत्यमिति च परमकारणस्यैवैकस्य सत्यत्वावधारणात्॥ स आत्मा तत्त्वमसि श्वेतकेतो इति च शारीरस्य ब्रह्मभावोपदेशात्॥ स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नांतरप्रसाध्यं॥ अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनां बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत दर्शयति च यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना ब्रह्मात्मत्वदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावं।

ज्ञानबाध्यत्वात्संसारित्वं मिथ्येत्याह॥ अतश्चेति॥ स्वतः सिद्धोपदेशादित्यर्थः यदुक्तं व्यवहारार्थं नानात्वं सत्यमिति तत्किं ज्ञानादूर्ध्वं व्यवहारार्थं प्राग्वा नाद्य इत्याह॥ बाधिते चेति॥ स्वभावोऽत्राविद्या तत्प्राप्तः स्वाभाविकः ज्ञानादूर्ध्वं प्रमातृत्वादिव्यवहारस्याभावान्नानात्वं न कल्प्यमित्यर्थः न द्वितीयः ज्ञानात्प्राक्कल्पितनानात्वेन व्यवहारोपपत्तेर्नानात्वस्य सत्यत्वासि

यत्तु प्रमातृत्वादिव्यवहारः सत्य एव मोक्षावस्थायां निवर्त्तत इति तत्रेत्याह॥ नचायमिति॥ संसारसत्यत्वे तदवस्थायां जीवस्य ब्रह्मत्वं न स्यात् भेदाभेदयोरेकदैकत्र विरोधात् ततः संसारिब्रह्माभेदस्य सदातनत्वावगमात्संसारोऽपि मिथ्यैवेत्यर्थः॥ किंच यथा लोके कश्चित् तस्करबुद्ध्या भटैर्गृहीतोऽनृतवादी चेत्तप्तपरशुं गृह्णाति स दह्यते बध्यते च तथा नानात्ववादी बध्यते सत्यवादी चेन्न दह्यते मुच्यते च तथैतदात्म्यमिदं सर्वमित्येकत्वदर्शी मुच्यत इति श्रुतदृष्टान्तेनैकत्वं सत्यं नानात्वं मिथ्येत्याह॥ तस्करेति॥ व्यवहारगोचरो नानात्वव्यवहाराश्रयः नानात्वनिंदया एक

नचायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुं तत्त्वमसीति ब्रह्मात्मभावस्याऽनवस्थाविशेषनिबंधनत्वात् तस्करदृष्टांतेन चानृताभिसंधस्य बंधनं सत्याभिसंधस्य च मोक्षं दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति मिथ्याज्ञानविजृंभितं च नानात्वं॥ उभयसत्यतायां हि कथं व्यवहारगोचरोऽपि जंतुरनृताभिसंध इत्युच्येत॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति च भेददृष्टिमपवदन्नेवैतद्दर्शयति नचास्मिन्दर्शने ज्ञानान्मोक्ष इत्युपपद्यते॥ सम्यक्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात्॥ उभयसत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्येत॥ नन्वेकत्वैकांताभ्युपगमे नानात्वाभावात्प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन् निर्विषयत्वात्स्थाण्वादिष्विव पुरुषादिज्ञानानि तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात्तदभावे व्याहन्येत मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात्तदभावे व्याघातः स्यात्॥

११ त्वमेव सत्यमित्याह॥ मृत्योरिति॥ किंचास्मिन्भेदाभेदमते जीवस्य ब्रह्माभेदज्ञानाद्भेदज्ञाननिवृत्तेर्मुक्तिरिष्टा सा न युक्ता भेदज्ञानस्य भ्रमत्वानभ्युपगमात्प्रमायाः प्रमांतराऽबाध्यत्वादित्याह॥ नचास्मिन्निति॥ वैपरीत्यस्यापि संभवादिति भावः॥ इदानीं प्रत्यक्षादिप्रामाण्यान्यथानुपपत्त्या नानात्वस्य सत्यत्वमिति पूर्वपक्षबीजमुद्घाटयति॥ नन्वित्यादिना॥ एकत्वस्यैकान्तः कैवल्यं व्याहन्येरन्नप्रमाणानि स्युः उपजीव्यप्रत्यक्षादिप्रामाण्याय वेदानां भेदाभेदपरत्वमुचितमिति भावः॥ ९

ननुकर्मकारकाणांयजमानादीनांविद्याकारकाणांशिष्यादीनांचकल्पितभेदमाश्रित्यकर्मज्ञानकांडयोः प्रवृत्तेः स्वप्रमेयस्यधर्मादेरबाधात्प्रामाण्यमव्याहतमित्याशंक्याह ॥ कथंचानृतेनेति ॥ धूलिकल्पितधूमेनानुमितस्यवन्हेरिवप्रमेयबाधापत्तेरितिभावः ॥ नत्वद्वैतविषयेप्रत्यक्षादीनांयावद्बाधंव्यावहारिकंप्रामाण्यमुपपद्यतइत्याह ॥ अत्रोच्यतइत्यादिना ॥ सत्यत्वंबाधाभावः ॥ बाधोमिथ्यात्वनिश्चयः ॥ वस्तुनोमिथ्यात्वेपिविकारेषुतन्निश्चयाभावेनप्रत्यक्षादिव्यवहारोपपत्तावुक्तदृष्टांतंविवृणोति ॥ यथासुप्तस्यप्राकृतस्ये

कथंचानृतेनमोक्षशास्त्रेणप्रतिपादितस्यात्मैकत्वस्यसत्यत्वमुपपद्यतइति ॥ अत्रोच्यते ॥ नैषदोषःसर्वव्यवहाराणामेवप्राग्ब्रह्मात्मताविज्ञानात्सत्यत्वोपपत्तेः ॥ स्वप्नव्यवहारस्येवप्राक्प्रबोधात् ॥ यावद्धिनसत्यात्मैकत्वप्रतिपत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषुविकारेष्वनृतत्वबुद्धिर्नकस्यचिदुत्पद्यते ॥ विकारानेवत्वहंममेत्यविद्ययात्मात्मीयेनभावेनसर्वोजंतुःप्रतिपद्यते ॥ स्वाभाविकींब्रह्मात्मतांहित्वातस्मात्प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वोलौकिकोवैदिकश्चव्यवहारः यथासुप्तस्यप्राकृतस्यजनस्यस्वप्नउच्चावचान्भावान्पश्यतोनिश्चितमेवप्रत्यक्षाभिमतंज्ञानंभवतिप्राक्प्रबोधात् ॥ नचप्रत्यक्षाभासाभिप्रायस्तत्कालेभवतितद्वत् ॥ कथंत्वसत्येनवेदांतवाक्येनसत्यस्यब्रह्मात्मत्वस्यप्रतिपत्तिरुपपद्येतनहिरज्जुसर्पेणदष्टोम्रियतेनापिमृगतृष्णिकांभसापानावगाहनादिप्रयोजनंक्रियतइतिनैषदोषः ॥ शंकाविषादिनिमित्तमरणादिकार्योपलब्धेः ॥

त्यमिः

((निएवंद्वैतप्रमाणानांव्यवहारकालेबाधशून्यार्थबाधकत्वंव्यावहारिकंप्रामाण्यमुपपाद्याद्वैतप्रमाणानांवेदांतानांसर्वकालेषुबाधशून्यब्रह्मबोधकत्वंतात्विकंप्रामाण्यमुपपादयितुमुक्तशंकामनुवदति ॥ कथंत्वसत्येनेति ॥ किमसत्यात्सत्यंनजायतेकिमुतसत्यस्यज्ञानंन आद्यइष्टएवनहिवयंवाक्योत्थज्ञानंसत्यंगीकुर्मः अंगीकृत्यापिदृष्टांतमाह ॥ नैषदोषइति ॥ सर्पेणादष्टस्यापिदष्टत्वभ्रांतिकल्पितविषात्सत्यमरणमूर्छादिदर्शनादसत्यात्सत्यंनजायतइत्यनियमइत्यर्थः ॥

दृष्टांतांतरमाह ॥ स्वप्नेनेति ॥ असत्यात्सर्पोदकादेः सत्यस्य दंशनस्नानादिज्ञानस्य कार्यस्य दर्शनाद्व्यभिचार इत्यर्थः ॥ यथाश्रुतमादाय शंकते ॥ तत्कार्यमपीति ॥ उक्तमर्थं प्रकटयति ॥ अत्र ब्रूम इत्यादिना अवगतिर्वृत्तिः ॥ घटादिवत्सत्यापि प्रातिभासिकस्वप्नदृष्टवस्तुनः फलं चैतन्यं वा वृत्त्यभिव्यक्तमवगतिशब्दार्थः प्रसंगाद्देहात्मवादोपि निरस्त इत्याह ॥ एतेनेति ॥ स्वप्नस्यावगतेः स्वप्नदेहधर्मत्वे उत्थितस्य मया तादृशः स्वप्नोवगत इत्यवाधितावगतिप्रतिसंधानं न स्यात् ॥ अतो देहभेदेपि अनुसंधानदर्शनाद्देहादन्योनुसंधातेत्यर्थः ॥ असत्या

स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात् ॥ तत्कार्यमप्यनृतमेवेति चेत् अत्र ब्रूमः ॥ यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमप्यनृतं तथापि तदवगतिः सत्यमेव फलं प्रतिवुद्धस्याप्यवाध्यमानत्वात् ॥ नहि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित् ॥ एतेन स्वप्नदृशोवगत्यवाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः ॥ तथा च श्रुतिः ॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने इति ॥ असत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्रतिपत्तिं दर्शयति ॥ तथा प्रत्यक्षदर्शनेषु केचिदरिष्टेषु जातेषु न चिरमेव जीविष्यतीति विद्यादित्युक्त्वा अथ स्वप्ने पुरुषं कृष्णं कृष्णदंतं पश्यति स एनं हंतीत्यादिना ॥ तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति ॥ प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानां ईदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते ईदृशेनाऽसाध्वागम इति ॥

त्सत्यस्य ज्ञानं न जायत इति द्वितीयनियमस्य श्रुत्याव्यभिचारमाह ॥ तथा च श्रुतिरिति ॥ न च स्त्रियो मिथ्यात्वेपि तद्दर्शनादसत्यादेव सत्यायाः समृद्धेर्ज्ञानमिति वाच्यं ॥ विषयविशिष्टत्वेन दर्शनस्यापि मिथ्यात्वात्प्रकृतेपि सत्ये ब्रह्मणि मिथ्यावेदानुगतचैतन्यात् ज्ञानं संभवादिति भावः ॥ असत्यात्सत्यस्येष्टस्य ज्ञानमुक्त्वाऽनिष्टस्य ज्ञानमाह ॥ तथेति ॥ असत्यात्सत्यस्य ज्ञाने दृष्टांतांतरमाह ॥ ॥

तथाकारादीति ॥ रेखास्वकारत्वादिभ्रांत्या सत्या आकारादयो ज्ञायंत इति प्रसिद्धमित्यर्थः ॥ एवमसत्यात्सत्यस्य जन्मोक्त्वा यदर्थक्रियाकारि तत्सत्यमिति नियमो भग्नः अनृतात्सत्यस्य ज्ञानोक्त्या यदनृतकरणगम्यं तद्बाध्यं कूटलिंगानुमितवह्निवदिति व्याप्तिर्भग्ना ॥ तथा च कल्पितानामपि वेदांतानां सत्यब्रह्मबोधकत्वं संभवतीति तात्त्विकं प्रामाण्यमिति भावः ॥ यदुक्तं एकत्वनानात्वव्यवहारसिद्ध्येउभयं सत्यमिति तन्न भेदस्य लोकसिद्धस्यापूर्ववत्फलवदभेदविरोधेन सत्यत्वकल्पनायोगात् ॥ किंच यद्युभयोरेकदा व्यवहारः स्यात्तदा स्यादपि सत्यत्वं नैवमस्ति एकत्वज्ञानेन चरमेणानपेक्षेण नानात्वस्य निःशेषबाधात् शुक्तिज्ञानेनेव रजतस्येत्याह ॥

तथाऽकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः ॥ अपि चांत्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकं नातः परं किंचिदाकांक्ष्यमस्ति ॥ यथा हि लोके यजेतेत्युक्ते किं केन कथंइत्याकांक्ष्यते नैवं तत्वमस्यहंब्रह्मास्मीत्युक्ते किंचिदन्यदाकांक्ष्यमस्ति ॥ सर्वात्मैकत्वविषयत्वावगतेः ॥ सति ह्यन्यस्मिन्नवशिष्यमाणेर्थे आकांक्षा स्यात् न त्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोन्योर्थोस्ति य आकांक्ष्येत ॥ न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुं ॥ तद्धास्य विजज्ञावित्यादिश्रुतिभ्योऽवगतिसाधनानां च श्रवणादी — नां वेदानुवचनादीनां च विधानात् ॥ न चेयमवगतिरनर्थिका भ्रांतिर्वेति शक्यं वक्तुं अविद्यानिवृत्तिफलदर्शनात् बाधकज्ञानांतराभावाच्च ॥ ६ ॥

अपि चांत्यमि ॥ ननूपजीव्यद्वैतप्रमाणविरोधादेकत्वावगतिर्नोत्पद्यत इत्यत आह ॥ न चेयमिति ॥ तत्किलात्मतत्वमस्य पितुर्वाक्यात् श्वेतकेतुर्विज्ञानवान् इतिदानोत्पन्नेः श्रुतत्वात्सामग्रीसत्वाच्चेत्यर्थः ॥ व्यावहारिकगुरुशिष्यादिभेदमुपजीव्य जायमानवाक्यार्थावगतेः प्रत्यक्षादिगतं व्यावहारिकं प्रामाण्यमुपजीव्यं तच्च पारमार्थिकैकत्वावगत्या न विरुध्यते किंतु तयाविरोधादनुपजीव्यं प्रत्यक्षादेस्तात्विकप्रामाण्यं बाध्यत इति भावः ॥ किंचैकत्वावगतेः फलवत्प्रमात्वान्निष्फलो द्वैतभ्रमो बाध्य इत्याह ॥ न चेयमिति ॥ ॥

शा॰भा॰
रत्न॰टी॰
१८२

अ॰२पा॰
१

ननु सर्वस्य द्वैतस्य मिथ्यात्वे स्वप्नो मिथ्या जाग्रत्सत्यमित्यादिर्लौकिको व्यवहारः सत्यं चानृतं च सत्यमभवदिति वैदिकश्च कथमित्याशंक्य यथा स्वप्ने इदं सत्यमिदमनृतमिति तात्कालिकबाधाबाधाभ्यां व्यवहारस्तथा दीर्घस्वप्नेपीत्युक्तस्वप्नदृष्टांतं स्मारयति ॥ प्राक्चेति ॥ व्यवहारार्थं नानात्वं सत्यमिति कल्पनमयुक्तमित्युपसंहरति ॥ तस्मादिति ॥ नेदं कल्पितं किंतु श्रुतमिति शंकते ॥ नन्विति ॥ कार्यकारणयोरनन्यत्वांशेऽयं दृष्टांतो न परिणामित्वे ब्रह्मणः कूटस्थत्वश्रुतिविरोधादिति परिहरति नेत्युच्यत इति ॥ सृष्टौ परिणामित्वं प्रलये तद्राहित्यं

प्राक्चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम ॥ तस्मादनेन प्रमाणेन प्रतिपादित आत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्म कल्पनावकाशोऽस्ति ॥ ननु मृदादिदृष्टांतप्रणयनात्परिणामवत् ब्रह्म शास्त्रस्याभिमतमिति गम्यते ॥ परिणामिनो हि मृदादयोऽर्था लोके समधिगता इति ॥ नेत्युच्यते ॥ स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म स एष नेति नेत्यात्माऽस्थूलमनण्वित्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमात् ॥ न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुं स्थितिगतिवत्स्यादिति चेत् न कूटस्थस्येति विशेषणात् ॥ न हि कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं संभवति ॥ कूटस्थं च नित्यं ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम ॥ न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनमेवं जगदाकारपरिणामित्वदर्शनमपि स्वतंत्रमेव कस्मैचित्फलायाभिप्रेयते ॥

च क्रमेणाविरुद्धमिति दृष्टांतेन शंकते स्थितीति कूटस्थस्य कदाचिदपि विक्रिया न युक्ता कूटस्थत्वव्याघातादित्याह ॥ नेति ॥ कूटस्थत्वासिद्धिमाशंक्याह ॥ कूटस्थं चेति ॥ कूटस्थस्य निरवयवस्य पूर्वरूपत्यागेनावस्थांतरात्मकपरिणामायोगात् शुक्तिरजतवद्विवर्त एव प्रपंच इति भावः किंच निष्फलस्य जगतः फलवन्निष्प्रपंचब्रह्मधीशेषत्वेनानुवादान्न सत्यतेत्याह न च यथेत्यादिना ॥

राम॰
१८२

तं यथा यथोपासते तदेव भवतीति श्रुतेर्ब्रह्मणः परिणामित्वविज्ञानात्तत्प्राप्तिर्विदुषः फलमित्याशंक्याह नहि परिणामवत्त्वेति ब्रह्मविदा
प्नोति परमिति श्रुतकूटस्थनित्यमोक्षफलसंभवे दुःखानित्यपरिणामित्वफलकल्पनायोगादिति भावः ननु पूर्वं जन्माद्यस्य यत इतीश्वरकार
णप्रतिज्ञा कृता अधुना तदनन्यत्वमित्यनेनाभेदप्रतिपादने ईशित्रीशितव्यभेदाभावात्तद्विरोधः स्यादिति शंकते॥ कूटस्थेति॥ कल्पितं द्वैतम

प्रमाणाभावात् कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रं स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जन
कप्राप्तोसीत्येवंतीयकं तत्रैतत्सिद्धं भवति ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्त
त्राऽफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद्ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते फलवत्सन्निधावफलं
तदंगमितिवत् न तु स्वतंत्रं फलाय कल्प्यत इति॥ नहि परिणामवत्त्वविज्ञानात्परिणामवत्त्वमात्मनः फलं स्यादिति
वक्तुं युक्तं कूटस्थनित्यत्वान्मोक्षस्य॥ कूटस्थब्रह्मात्मवादिन एकत्वैकांत्यादीशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञा
विरोध इति चेतनाऽविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्सर्वज्ञत्वस्य॥ तस्माद्वा एतस्मादात्मन आकाशः संभू
त इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात्सर्वज्ञात्सर्वशक्तेरीश्वराज्जगज्जनिस्थितिप्रलयाः॥ नाचेतनात्प्रधाना
दन्यस्माद्वेत्ययोर्थः प्रतिज्ञातो जन्माद्यस्य यत इति सा प्रतिज्ञा तदवस्थैव न तद्विरुद्धोर्थः पुनरिहोच्यते॥ कथं नोच्यतेऽत्यं
तमात्मन एकत्वमद्वितीयत्वं च ब्रुवता॥ शृणु यथा नोच्यते सर्वज्ञस्येश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्य
त्वाभ्यामनिर्वचनीये संसारप्रपंचबीजभूते सर्वज्ञस्येश्वरस्य॥ पेक्ष्येश्वरत्वादिकं परमार्थतोऽनन्यत्वमित्यविरोधमाह॥ नेत्या
दिना॥ अविद्यात्मके चिदात्मनि लीने नामरूपे एव बीजं तस्य व्याकरणं स्थूलात्मनास्थितिस्तदपेक्षत्वादीश्वरत्वादेर्न विरोध इत्यर्थः॥ संगृहीता
र्थं विवृणोति॥ तस्मादित्यादिना॥ तत्त्वान्यत्वाभ्यामिति॥ नामरूपयोरीश्वरत्वं वक्तुमशक्यं जडत्वान्नापीश्वरादन्यत्वं कल्पितस्य पृथक्सत्तास्फूर्त्योर भावादित्यर्थः॥

संस्कारात्मकनामरूपयोरविद्यैक्यविवक्षयाभूते मायेति॥ नामरूपे चेदीश्वरस्यात्मभूते तर्हीश्वरो जड इत्यत आह॥ नाभ्यामन्य इति॥ अन्यत्वे व्याकरणे च श्रुतिमाह॥ आकाश इत्यादिना॥ अविद्याद्युपाधिना कल्पितभेदेन बिंबस्थानस्येश्वरत्वं प्रतिबिंबभूतानां जीवानां नियम्यत्वमित्याह॥ स च स्वात्मभूतानिति॥ न चात्र नाना जीवा भाष्योक्ता इति भ्रमितव्यं बुद्ध्यादिसंघातभेदेन भेदोक्तेः॥ अविद्याप्रतिबिंबस्यैकस्यैव जीवत्वमित्युक्तं परमार्थत ईश्व

मायाशक्तिःप्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते॥ ताभ्यामन्यः सर्वज्ञ ईश्वरः॥ आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रुतेः॥ नामरूपे व्याकरवाणि॥ सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते। एकं बीजं बहुधा यः करोतीत्यादिश्रुतिभ्यश्च॥ एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति॥ व्योमेव घटकरकाद्युपाध्यनुरोधि स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान्विज्ञानात्मनः प्रतीष्टे व्यवहारविषये तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्ययापास्तसर्वोपाधिस्वरूप आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते॥ तथा चोक्तं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदंति वेदांताः सर्वे तथेश्वरगीतास्वपि॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति परमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते॥

रत्वादिद्वैताभावे श्रुतिमाह तथा चेति॥ कथं तर्हि कर्तृत्वादिकमित्यत आह स्वभावस्त्विति॥ अनाद्यविद्यैव कर्तृत्वादिरूपेण प्रवर्तत इत्यर्थः भक्ताभक्तयोः पापसुकृतनाशकत्वादीश्वरस्य वास्तवमीश्वरत्वमित्यत आह नादत्त इति न संहरतीत्यर्थः तेन स्वरूपज्ञानावरणेन कर्ताहमीश्वरो मे नियंतेत्येवं भ्रमंति॥ ॥

उक्तार्थःसूत्रकारसंमतइत्याह॥ सूत्रकारोपीति॥ नकेवलंलौकिकव्यवहारार्थंपरिणामिप्रक्रियाश्रयणंकिंतूपासनार्थंचेत्याह॥ परिणामप्रक्रियांचेति॥ तदुक्तंकृपणधीःपरिणाममुदीक्षतेक्षपितकल्मषधीस्तुविवर्ततामिति॥१४॥ एवंतदनन्यत्वेप्रत्यक्षादिविरोधंपरिहृत्यानुमानमाह॥ भावेचेति॥ कारणस्यभावेसत्वेउपलब्धौचकार्यस्यसत्वादुपलब्धेश्चानन्यत्वमितिसूत्रार्थः॥ घटोमृदनन्यः मृत्सत्वोपलब्धिलक्षणनियतसत्वोपलब्धिमत्वात् मृद्वत्॥ अन्यत्वेप्ययंहेतुःकिंनस्यादित्यप्रयोजकत्वमाशंक्यनिरस्यति॥ न-

व्यवहारावस्थायांतूक्तःश्रुतावपीश्वरादिव्यवहारः एषसर्वेश्वरएषभूताधिपतिरेषभूतपालएषसेतुर्विधारणएषांलोकानामसंभेदायेति॥ तथाचेश्वरगीतास्वपिईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठतिभ्रामयन्सर्वभूतानियंत्रारूढानिमाययेतिसूत्रकारोपिपरमार्थाभिप्रायेणतदनन्यत्वमित्याहव्यवहाराभिप्रायेणतुस्याल्लोकवदितिमहासमुद्रस्थानीयतांब्रह्मणःकथयतिअप्रत्याख्यायैवकार्यप्रपंचंपरिणामप्रक्रियांचाश्रयतिसगुणेषूपासनेषूपयोक्ष्यतइति॥१४॥ भावेचोपलब्धेः॥१५॥ इतश्चकारणादनन्यत्वंकार्यस्ययत्कारणंभावएवकारणस्यकार्यमुपलभ्यतेनाभावेनयथासत्यांमृदिघटउपलभ्यतेसत्सुचतंतुषुपटउपलभ्यते॥ नचनियमेनाऽन्यभावेऽन्यस्योपलब्धिर्दृष्टानह्यश्वोगोरन्यःसन्गोभावएवोपलभ्यते॥ नचकुलालभावएवघटउपलभ्यतेसत्यपिनिमित्तनैमित्तिकभावेऽन्यत्वात्॥ १ ॥

चेति॥ मृद्घटयोरन्यत्वेगवाश्वयोरिवहेतूच्छित्तिःस्यादित्यर्थः॥ गवाश्वयोर्निमित्तनैमित्तिकत्वाभावाद्धेत्वभावः अतोमृद्घटयोस्तेनहेतुनानिमित्तादिभावःसिध्यतिनानन्यत्वमित्यर्थांतरतामाशंक्याह॥ नचकुलालेति॥ नचोपादानोपादेयभावेनार्थांतरतामृद्दृष्टांतेनतद्भावाभावेपिहेतुसत्वादन्यत्वेगवाश्ववत्तद्भावायोगाच्चेतिभावः॥ कुलालघटयोर्निमित्तादिभावेसत्यप्यन्यत्वात्कुलालसत्वनियतोपलब्धिर्घटस्यनैव

यथाश्रुतसूत्रस्य स्वहेतोर्व्यभिचारं शंकते नन्विति॥ अग्निभावस्यैव धूमोपलब्धिरिति नियमात्मको हेतुस्तत्र नास्तीत्याह॥ नेति॥ अविच्छिन्नमूलदीर्घरेखावस्थधूमे नियमोस्तीति व्यभिचार इत्याशंकते॥ अथेति तद्भावनियतभावत्वे सति तद्बुद्ध्यनुरक्तबुद्धिविषयत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याह॥ नैवमिति॥ आलोकबुद्ध्यनुरक्तबुद्धिग्राह्ये रूपे व्यभिचारनिरासाय सत्यंतं आलोकाभावेपि घटादिरूपसत्वान्न व्यभिचारः॥ उक्तधूमविशेषस्याग्निबुद्धिं विनाप्युपलंभान्न तत्र व्यभिचार इत्यर्थः तथाच तयोः कार्यकारणयोर्भावे न सत्तया अनुरक्तां सहकृतनामिति भाष्यार्थः॥ यद्वा तद्भावः सामानाधिकरण्यं तद्विषयकबुद्धिग्राह्यत्वं हेतुं वदामः॥ मृद्वदिति सा-

नन्वन्यस्य भावेपि अन्यस्योपलब्धिर्नियता दृश्यते यथाग्निभावे धूमस्येति नेत्युच्यते॥ उद्धापितेप्यग्नौ गोपालघटिकादिधारितस्य धूमस्य दृश्यमानत्वात्॥ अथ धूमं कयाचिदवस्थया विशिंष्यादीदृशो धूमो नासत्यग्नौ भवतीति॥ नैवमपि कश्चिद्दोषः॥ तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः नचासावग्निधूमयोर्विद्यते॥ भावाच्चोपलब्धेरिति वा सूत्रं॥ नकेवलं शब्दादेव कार्यकारणयोरनन्यत्वं प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः॥ भवति हि प्रत्यक्षोपलब्धिः कार्यकारणयोरनन्यत्वे॥ तद्यथा तंतुसंस्थाने पटे तंतुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते केवलास्तु तंतव आतानवितानवंतः प्रत्यक्षमुपलभ्यंते॥ तथाच तंतुष्वंशवोंऽशुषु तदवयवाः॥१

मानाधिकरण्यबुद्धिदर्शनादग्निर्धूम इत्यदर्शनादित्यर्थः अनुमानार्थत्वेन सूत्रं व्याख्याय पाठांतरेण प्रत्यक्षपरतया व्याचष्टे॥ भावाच्चेति॥ पूर्वसूत्रोक्तारंभणशब्दसमुच्चयार्थश्चकार॥ नचैकः पट इति प्रत्यक्षं पटस्य तंतुभ्यः पृथक्सत्वे प्रमाणं अपृथक्सत्ताकमिथ्याकार्यविषयत्वेनाप्युपपत्तेः॥ अतः आतानवितानसंयोगवंतस्तंतव एव पट इति प्रत्यक्षोपलब्धेः सत्वादनन्यत्वमित्यर्थः॥५ पटन्यायं तंत्वादावतिदिशति॥ तथेत्यादिना॥ प्रत्यक्षोपलब्ध्या तत्तत्कार्यकारणमात्रं परिशिष्यत इत्यर्थः॥ ॥

यत्रप्रत्यक्षंनास्तितत्रकार्यंविमतकारणादभिन्नंकार्यत्वात्पटवदित्यनुमेयमित्याह अनयेति॥ कारणपरिशेषेप्रधानादिकंपरिशिष्यतांनब्रह्मेत्यतआह॥ तत्रसर्वेतिब्रह्मणिवेदांतानांसर्वेषांतात्पर्यस्योक्तत्वात्तदेवाद्वितीयंपरिशिष्यतेनकारणांतरंअप्रामाणिकत्वादितिभावः॥१५॥ इदंजगत्सदात्मैवेति। सामानाधिकरण्यश्रुत्यासृष्टेःप्राक्कार्यस्यकारणात्मनासत्त्वंश्रुतंतदन्यथानुपपत्त्योत्पन्नस्यापिजगतःकारणादनन्यत्वंइत्याहसूत्रकारःसत्त्वाच्चेति॥ श्रुत्यर्थेयुक्तिमप्याह॥ यच्चयदात्मनेति॥ घटादिकंप्राक्मृदाद्यात्मनावर्त्ततेनततउत्पद्यमानत्वात्सामान्यतोव्यतिरेकेणसिकताभ्यस्तैलवदित्यर्थः कारणवत्कार्यस्यापिसत्त्वात्सत्त्वभेदेमानाभावात्कार्यस्यकारणादभिन्नसत्ताकत्वमितिसूत्रस्यार्थांतरमाह॥ यथाचेति॥ इदानींसतः कार्यस्यप्रागुत्तरकाल-

अनयाप्रत्यक्षोपलब्ध्यालोहितशुक्लकृष्णानित्रीणिरूपाणिततोवायुमात्रमाकाशमात्रंचेति अनुमेयंततःपरंब्रह्मैकमेवाद्वितीयं॥ तत्रसर्वप्रमाणानांनिष्ठामवोचाम॥१५॥ सत्त्वाच्चावरस्य॥१६॥ इतश्चकारणात्कार्यस्यानन्यत्वंयत्कारणंप्रागुत्पत्तेः कारणात्मनैवकारणेसत्त्वमवरकालीनस्यकार्यस्यश्रूयतेसदेवसोम्येदमग्रआसीदात्मावाइदमेकएवाग्रआसीदित्यादाविदंशब्दगृहीतस्यकार्यस्यकारणेनसामानाधिकरण्यात्॥ यच्चयदात्मनायत्रनवर्त्ततेनतत्ततउत्पद्यते यथासिकताभ्यस्तैलंतस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेवकारणात्कार्यमित्यवगम्यते॥ यथाचकारणंब्रह्मत्रिषुकालेषुसत्त्वंनव्यभिचरतिएवंकार्यमपिजगत्त्रिषुकालेषुसत्त्वंनव्यभिचरतिएकंचपुनःसत्त्वंअतोप्यनन्यत्वंकारणात्कार्यस्य॥ १६॥

योरसत्त्वायोगात्सत्त्वाव्यभिचारस्तच्चसत्त्वंसर्वानुस्यूतचिन्मात्रमेकम्॥ तदभेदेनसतीमृत्सन्घटइतिभासमानयोः कार्यकारणयोरनन्यत्वमित्यर्थः॥ नचैवंघटपटयोरप्येकसत्त्वाभेदादनन्यत्वंस्यादितिवाच्यम् वस्तुनएकसत्त्वात्मनाऽनन्यत्वस्येष्टत्वात्तर्हिमृद्घटयोः कोविशेषः तादात्म्यमितिब्रूमः॥ वस्तुतः सर्वत्रसत्त्वैक्येपिघटपटयोर्भेदेनसत्तायाभिन्नत्वान्नतादात्म्यंकार्यकारणयोर्भेदस्यसत्ताभेदकत्वाभावादभिन्नसत्ताकत्वंतादात्म्यमितिविशेषः॥ १६॥ ॥

उक्तंकार्यस्यप्राक्कारणात्मनासत्त्वमसिद्धमित्याशंक्यसमाधत्ते॥असदिति॥अक्ताःशर्कराउपदध्यादित्युपक्रमेकेनाक्ताइतिसंदेहेतेजोवैघृतमितिवाक्यशेषात् घृतेनेति यथानिश्चयः एवमत्रापितत्सदितिवाक्यशेषात्सन्निश्चयइत्यर्थः॥आसीदित्यतीतिकालसंबन्धोक्तेश्चास

असद्व्यपदेशान्नेतिचेन्नधर्मान्तरेणवाक्यशेषात्॥१७॥ननुक्वचिदसत्त्वमपिप्रागुत्पत्तेः कार्यस्यव्यपदिशतिश्रुतिरसदेवेदमग्रआसीदिति॥ असद्वाइदमग्रआसीदितिचतस्मादसद्व्यपदेशान्नप्रागुत्पत्तेःकार्यस्यसत्त्वमितिचेत् नेतिब्रूमः॥ नह्ययमत्यन्तासत्त्वाभिप्रायेणप्रागुत्पत्तेःकार्यस्याऽसद्व्यपदेशः॥किंतर्हिव्याकृतनामरूपत्वाद्धर्मादव्याकृतनामरूपत्वंधर्मान्तरंतेनधर्मान्तरेणायमसद्व्यपदेशःप्रागुत्पत्तेःसतएवकार्यस्यकारणरूपेणानन्यस्य॥ कथमेतदवगम्यते॥वाक्यशेषात्॥यदुपक्रमेसंदिग्धार्थंवाक्यंतच्छेषान्निश्चीयते॥इहचतावदसदेवेदमग्रआसीदित्यसच्छब्देनोपक्रमेनिर्दिष्टंयत्तदेवपुनस्तच्छब्देनपरामृश्यसदितिविशिनष्टितत्सदासीदिति॥असतश्चपूर्वापरकालासंबन्धादासीच्छब्दानुपपत्तेश्च॥असद्वाइदमग्र आसीदित्यत्रापितदात्मानंस्वयमकुरुतेतिवाक्यशेषेविशेषणान्नात्यन्तासत्त्वं॥तस्माद्धर्मान्तरेणैवायमसद्व्यपदेशःप्रागुत्पत्तेःकार्यस्यनामरूपंव्याकृतंहिवस्तुसच्छब्दार्हंलोकेप्रसिद्धंअतःप्राङ्नामरूपव्याकरणादसदिवासीदित्युपचर्यते॥ १७॥युक्तेःशब्दान्तराच्च॥१८॥युक्तेश्चप्रागुत्पत्तेःकार्यस्यसत्त्वमनन्यत्वंचकारणादवगम्यते।॥शब्दान्तराच्च॥युक्तिस्तावद्वर्ण्यते॥ दधिघटरुचकाद्यर्थिभिःप्रतिनियतानिकारणानिक्षीरमृत्तिकासुवर्णादीन्युपादीयमानानिलोकेदृश्यन्ते ॥ नहिदध्यर्थिभिर्मृत्तिकोपादीयते॥नघटार्थिभिःक्षीरं॥तदसत्कार्यवादेनोपपद्येत॥ ॥

दव्याकृतमेवनशून्यमित्याह॥असतश्चपूर्वापरेतिउक्तन्यायंवाक्यान्तरेनिर्दिशत्यसद्वाइतिक्रियमाणत्वविशेषणंशून्यस्यासंभवतीतिभावः॥१७॥
सत्त्वानन्यत्वयोर्हेत्वन्तरमाहसूत्रकारः॥युक्तेरिति॥दध्याद्यर्थिनांक्षीरादौप्रवृत्त्यन्यथानुपपत्तिर्युक्तिस्तयाकार्यस्यप्राक्कारणानन्यत्वेनसत्त्वंसिध्यती

असतोपिकार्यस्यनस्यादुत्पत्तेःकारणत्वधियानतत्रप्रवृत्तिरित्यन्यथोपपत्तिमाशंक्याह॥ अविशिष्टेहीति॥ असतउत्पत्त्यभावादुत्पत्तौवासर्वस्मात्सर्वोत्पत्तिप्रसंगात्ततदुपादानविशेषेप्रवृत्तिर्नस्यादित्यर्थः तदुक्तंसांख्यवृद्धैरसदकरणादुपादानग्रहणात्सर्वसंभवाभावात्॥ शक्तस्यशक्यकरणात्कारणभावाच्चसत्कार्यमिति शक्तस्यकारणस्यशक्यकार्यकारित्वाच्छक्तिविषयस्यकार्यस्यसत्त्वमसतोऽशक्यत्वात्किंचसत्कारणाभेदात्कार्यंसदित्युत्तरार्धार्थः॥ कार्यस्यासत्वेपिकुतश्चिदतिशयात्प्रवृत्तिनियमोपपत्तिरितिशंकते॥ अथेति॥ अतिशयः कार्यधर्मः कारणधर्मोवाआद्येधर्मित्वात्प्रागवस्थारूपस्यकार्यस्यसत्त्वंदुर्वारमित्याह॥ नत्वतिशयवत्वादिति॥ द्वितीयेपिकार्यसत्वमा

अविशिष्टेहिप्रागुत्पत्तेःसर्वस्यसर्वत्राऽसत्वेकस्मात्क्षीरादेवदध्युत्पद्यतेनमृत्तिकायाःमृत्तिकायाएवचघटउत्पद्यतेनक्षीरात्॥ अथाविशिष्टेपिप्रागसत्वेक्षीरएवदध्नःकश्चिदतिशयोनमृदिमृत्तिकायामेवघटस्यकश्चिदतिशयोनक्षीरइत्युच्यते॥ तर्हिअतिशयवत्वात्प्रागवस्थायाअसत्कार्यवादहानिःसत्कार्यवादसिद्धिश्च॥ शक्तिश्चकारणस्यकार्यनियमार्थाकल्प्यमानानान्याऽसतीवाकार्यंनियच्छेत्असत्वाऽविशेषादन्यत्वाऽविशेषाच्चतस्मात्कारणस्यात्मभूताशक्तिःशक्तेश्चात्मभूतंकार्यं॥ अपिचकार्यकारणयोर्द्रव्यगुणादीनांवाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगंतव्यं॥ समवायकल्पनायामपिसमवायस्यसमवायिभिःसम्बन्धेऽभ्युपगम्यमानेतस्यतस्यान्योन्यसंबंधःकल्पयितव्यइत्यनवस्थाप्रसंगः॥

ऽऽयातीत्याह॥ शक्तिश्चेति॥ कार्यकारणाभ्यामन्याकार्यवदसतीवाशक्तिर्नकार्यनियामिकायस्यकस्यचिदन्यस्यनरशृंगस्यवानियामकत्वप्रसंगादन्यत्वासत्वयोःशक्तावन्यत्रचाविशेषात्तस्मात्कारणात्मनालीनंकार्यमेवाभिव्यक्तिनियामकतयाशक्तिरित्येष्टव्यंततःसत्कार्यसिद्धिरित्यर्थः किंचकार्यकारणयोरन्यत्वेमृद्घटौभिन्नौसंतावितिभेदबुद्धिःस्यादित्याह॥ अपिचेति॥ तयोरन्यत्वेपिसमवायवशात्तथाबुद्धिर्नोदेतीत्याशंक्यसमवायंदूषयति॥ समवायेति॥ समवायःसमवायिभिःसंबद्धोनवाआद्येसंबंधःकिंसमवायःउतस्वरूपमाद्येसमवायानवस्थाद्वितीयेमृद्घटयोरपिस्वरूपसंबन्धादेवोपपत्तेःसमवायासिद्धिः॥

प्रा·भा· असंबद्ध इति पक्षे दोषमाह ॥ अनभ्युपगम्यमान इति ॥ द्रव्यगुणादीनां विशिष्टधीविरहप्रसंगः असंबद्धस्य विशिष्टधीनियामकत्वायोगादि- अ·स्पा· १
स·म·टी· त्यर्थः ॥ विशिष्टधीनियामको हि संबन्धः न तस्य नियामकांतरापेक्षा अनवस्थानादतः स्वपरनिर्वाहकः समवाय इति शंकते ॥ अथेति ॥ संबध्य-
१८६ ते स्वस्य स्वसंबंधिनश्च विशिष्टधियं करोतीत्यर्थः ॥ प्रतिबंद्या दूषयति ॥ संयोगोपीति ॥ यत्तु गुणत्वात्संयोगस्य समवायापेक्षा न संबंध-
त्वादिति तन्न धर्मत्वात्समवायस्यापि संबंधांतरापत्तेरसंबद्धस्याश्रयत्वस्य गोधर्मत्वादर्शनात् किंच निष्पापत्वादयो गुणा इति श्रुतिस्मृ-
त्यादिषु व्यवहारादिष्टधर्मो गुण इति परिभाषया समवायस्यापि गुणत्वाच्च जातिविशेषो गुणत्वमिति परिभाषा तु समवायसिद्ध्युत्त-

अनभ्युपगम्यमाने वा विच्छेदप्रसंगः अथ समवायः स्वयं संबंधरूपत्वादनपेक्ष्यैवापरं संबंधं संबध्येत संयोगो-
पि न हि स्वयं संबंधरूपत्वादनपेक्ष्यैव समवायं संबध्येत ॥ तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पना-
नर्थकं ॥ कथं च कार्यमवयवि द्रव्यं कारणेष्ववयवद्रव्येषु वर्त्तमानं वर्त्तेत किं समस्तेष्ववयवेषु वर्त्तेतोत प्रत्य-
वयवं ॥ यदि तावत्समस्तेषु वर्त्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत समस्तावयवसन्निकर्षस्याशक्यत्वात् ॥ न हि
बहुत्वं समस्तेषु आश्रयेषु वर्त्तमानं व्यस्ताश्रयग्रहणेन गृह्यते ॥

रकालीनानित्यानेकसमवेता जातिरिति ज्ञानस्य समवा-
यज्ञानाधीनत्वादतः समवायसिद्धेः प्राक् संयोगस्य गुणत्वमसिद्धमिति दिक् ॥ किंच प्रतीत्यनुसारेण वस्तुस्वीकार्यमन्यथा गोप्रतीतेरश्वा-
लंबनमित्यपि सुवचत्वात्तथा च मृद्घट इति अभेदप्रतीतेरभेद एव स्वीकार्यः ताभ्यां अत्यंतभिन्नस्य समवायस्य तन्नियामकत्वासंभवादि- सम·
त्याह ॥ तादात्म्येति ॥ एवं प्रतीत्यनुसारेण कार्यस्य कारणात्मना सत्त्वं स्वरूपेण तु मिथ्यात्वमित्युक्तं ॥ द्रव्यनिरूपणाच्च तस्य मिथ्यात्वमित्या- १८६
ह कथं चेति ॥ तत्राद्यमनूद्यावयविनः पटादेस्तंत्वादिष्ववयवेषु त्रित्वादिवत्स्वरूपेण वृत्तिरुतावयवश इति विकल्प्याद्यं दूषयति य-
दीत्यादिना व्यासज्यवृत्तिवस्तुप्रत्यक्षस्य यावदाश्रयप्रत्यक्षजन्यत्वात्संप्रति पटादेर्यावदवयवानां अप्रत्यक्षत्वादप्रत्यक्षत्वं प्रसज्येतेत्यर्थः ॥

द्वितीयं शंकते अथेति यथा हस्ते कोशे चावयवशः खड्गो वर्त्तमानो हस्तमात्रग्रहेपि गृह्यते एवं यत्किंचिदवयवग्रहेणावयविनो ग्रहसंभवेपि अवयवानामनवस्था स्यादिति दूषयति॥ तदापीति॥ आद्यद्वितीयमुद्भाव्य दूषयति॥ अथ प्रत्यवयवमित्यादिना॥ एकस्मिंस्तंतौ पटवृत्तिकाले तंत्वंतरे वृत्तिर्न स्यात् वृत्तावनेकत्वापत्तेरित्यर्थः॥ यथा युगपदनेकव्यक्तिषु वृत्तावपि जातेरनेकत्वदोषो नास्ति तथावयविन इत्याशंकते गोत्वेति जातिवदवयविनो वृत्तिरसिद्धा अनुभवाभावादिति परिहरति। न तथेति॥ दोषांतरमाह॥ प्रत्येकेति अधिकारात्संबंधाद्यथा देवदत्तः

अथावयवशः समस्तेषु वर्त्तेत तदाप्यारंभकाऽवयवव्यतिरेकेणावयविनोवयवाः कल्प्येरन्यैरारंभकेष्ववयवेषु अवयवशोऽवयवी वर्त्तेत॥ कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति॥ अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्त्तयितुमन्येषामवयवानां कल्पनीयत्वात्॥ अथ प्रत्यवयवं वर्त्तेत॥ तदैकत्र व्यापारेऽन्यत्राव्यापारः स्यात्॥ नहि देवदत्तः स्रुघ्ने सन्निधीयमानस्तदहरेव पाटलीपुत्रेपि सन्निधीयते॥ युगपदनेकत्र वृत्तावनेकत्वप्रसंगः स्यात् देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलीपुत्रनिवासिनोः गोत्वादिवत्प्रत्येकं परिसमाप्तेर्न दोष इति चेत्॥ न तथा प्रतीत्यभावात्॥ यदि गोत्वादिवत्प्रत्येकं परिसमाप्तोऽवयवी स्यात्॥ यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवमवयव्यपि प्रत्यवयवं प्रत्यक्षं गृह्येत न चैवं नियतं गृह्यते॥ प्रत्येकपरिसमाप्तौ चावयविनः कार्येणाधिकारात्तस्य चैकत्वात् शृंगेणापि स्तनकार्यं कुर्यात् उरसा च पृष्ठकार्यं न चैवं दृश्यते॥ प्रागुत्पत्तेश्च कार्यस्यासत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात्॥ ९ ॥

स्वकार्यमध्ययनं ग्रामेरण्ये वा करोति॥ तथा गोरवयवी स्वकार्यं क्षीरादिकं शृंगपुच्छादावपि कुर्यादित्यर्थः॥ एवं वृत्त्यनिरूपणादनिर्वाच्यत्वं कार्यस्य दर्शितं संप्रत्यसत्कार्यवादे दोषांतरमाह॥ प्रागिति॥ यथा घटस्स्खलतीत्युक्ते चलनक्रियां प्रत्याश्रयत्वरूपं कर्तृत्वं घटस्य भाति तथा पटो जायत इति जनिक्रियाकर्तृत्वं अनुभूयते॥ अतो जनिकर्तुर्जनेः प्राक् सत्त्वं वाच्यं कर्तुरसत्त्वे क्रियाया अप्यसत्त्वापत्तेरित्यर्थः॥

जनेरनुभवसिद्धेपि सकर्तृकत्वे क्रियात्वेनानुमानमाह॥ उत्पत्तिश्चेति॥ असतो घटस्योत्पत्तौ कर्तृत्वासंभवेपि कुलालादेः सत्वात्कर्तृत्वमित्याशंक्याह॥ घटस्य चेति॥ घटोत्पत्तिवदसत्कपालाद्युत्पत्तिरित्यतिदिशति॥ तथेति॥ शंकामनूद्य दोषमाह॥ तथा चेति अनुभवविरोधइत्यर्थः॥ उत्पत्तिर्भावस्याद्याविक्रियेति स्वमतेन कार्यसत्वमानीतं संप्रति कार्यस्योत्पत्तिर्नाम स्वकारणे समन्वयः स्वस्मिन्सत्तासमवायो वेति तार्किकमतमाशंकते॥ अथे

उत्पत्तिश्च नाम क्रिया सा सकर्तृकैव भवितुमर्हति गत्यादिवत् क्रिया च नाम स्यात् अकर्तृका चेति विप्रतिषिध्येत॥ घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किं तर्हि अन्यकर्तृकेति कल्प्या स्यात्॥ तथा कपालादीनामप्युत्पत्तिरुच्यमानान्यकर्तृकैव कल्प्येत॥ तथा च सति घट उत्पद्यत इत्युक्ते कुलालादीनि कारणान्युत्पद्यंत इत्युक्तं स्यात्॥ न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामप्युत्पद्यमानता प्रतीयते॥ उत्पन्नताऽप्रतीतेश्च॥ अथ स्वकारणसत्तासंबंध एवोत्पत्तिरात्मलाभश्च कार्यस्येति चेत्॥ कथमलब्धात्मकं संबध्येतेति वक्तव्यं॥ सतोर्हि द्वयोः संबंधः संभवति न सदसतोरसतोर्वा अभावस्य च निरुपाख्यत्वात्प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नं सतां हि लोके क्षेत्रगृहादीनां मर्यादा दृष्टा नाभावस्य॥ न हि वंध्यापुत्रो राजा बभूव प्राक्पूर्णवर्मणोऽभिषेकादित्येवंजातीयकेन मर्यादाकरणेन निरुपाख्यो वंध्यापुत्रो राजा बभूव भवति भविष्यतीति वा विशिष्यते॥ यदि च वंध्यापुत्रोपि कारकव्यापारादूर्ध्वमभविष्यत्तत इदमपि उपपत्स्यत कार्याभावोपि कारकव्यापारादूर्ध्वं भविष्यतीति॥

ति॥ तन्मतेनापि कार्यस्य सत्वमावश्यकं असतः संबंधित्वायोगादित्याह॥ कथमिति॥ असतोर्वेति दृष्टांतोक्तिः ननु नरशृंगादिवत्कार्यं सर्वदा सर्वत्रासत्वं भवति किंतूत्पत्तेः प्राग्ध्वंसानंतरं चासन्मध्ये तु सदेवेति वैषम्यात्संबंधित्वोपपत्तिरित्याशंक्याह॥ अभावस्येति॥ अत्राभावशब्दा असच्छब्दापरपर्याया व्याख्येयाः॥ असतः कालेनासंबंधान्मात्वं न युक्तमित्यर्थः॥ ननु कारकव्यापारादूर्ध्वं भाविनः कार्यस्य वंध्यापुत्रतुल्यत्वं कथमित्यत आह यदि चेति कार्यभावः असत्कार्यमित्यर्थः॥

[illegible]

॥ कस्तर्हि निर्णयस्तत्राह ॥ वयंत्विति ॥ नासतो विद्यते भाव इति स्मृतेरिति भावः सत्कार्यवादे कारकवैयर्थ्यं शंकते नन्विति
॥ सिद्धकारणानन्यत्वाच्च कार्यस्य सिद्धत्वमित्याह ॥ तदनन्यत्वाच्चेति ॥ अनिर्वाच्यकार्यात्मनाकारणस्याभिव्यक्त्यर्थः कारकव्यापार इत्याह ॥ नैष दोष इति ॥ कार्यसत्यत्वमिच्छतां सांख्यानां सत्कार्यवादे कारकवैयर्थ्यं दोष आपतति अभिव्यक्तेरपि सत्वादद्वैतवादिनां तु घटितघटनावभासनचतुरमायामहिम्ना स्वप्नवद्यथादर्शनं सर्वमुपपन्नं विचार्यमाणे सर्वमयुक्तं युक्तत्वे द्वैतापत्ते।

वयंतु पश्यामो वंध्यापुत्रस्य कार्याभावस्य चाभावत्वाविशेषान्न यथा वंध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यति एवं कार्याभावोपि कारकव्यापारादूर्ध्वं न भविष्यतीति ॥ नन्वेवं सति कारकव्यापारोनर्थकः प्रसज्येत न यथैव हि प्राक्सिद्धत्वात्कारणस्वरूपसिद्धये न कश्चिद्व्याप्रियते ॥ एवं प्राक्सिद्धत्वात्तदनन्यत्वाच्च कार्यस्य स्वरूपसिद्धयेपि न कश्चिद्व्याप्रियेत ॥ व्याप्रियते च अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्यस्येति ॥ नैष दोषः ॥ यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते ॥ कार्याकारोपि कारणस्यात्मभूत एव अनात्मभूतस्यानारभ्यत्वादित्यभाणि ॥ न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति ॥ न हि देवदत्तः संकोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानो वस्त्वन्यत्वं गच्छति स
((एवेति प्रत्यभिज्ञानात् ॥

रितिमुख्यं समाधानं समाधानांतराभावात् ॥ ननु कारणाद्भिन्नमसदेवोत्पद्यत इति समाधानं किं न स्यादित्याशंकासत्पक्षस्य दूषणमुक्तं स्मारयत्याह ॥ कार्याकारोपीति ॥ अतः कारणाद्भेदाभेदाभ्यां दुर्निरूपस्य सदसद्विलक्षणस्यानिर्वाच्याभिव्यक्तिरनिर्वाच्यकारकव्यापाराणां फलमिति पक्ष एव श्रेयानिति भावः ॥ ननु मृद्घटः पृथुबुध्नत्वाद्यवस्थाविशेषो घटो दृश्यते न तथा च घटो मृद्भिन्नस्तद्विरुद्धविशेषवत्त्वान्नृसवदित्यत आह ॥ नचेति ॥ वस्तुनोन्यत्वं सत्यो भेदः ॥ ६ ॥

॥ हेतोर्व्यभिचारस्थानांतरमाह ॥ तथाप्रतिदिनमिति ॥ प्रत्यहं पित्रादिदेहस्यावस्थाभेदेपि जन्मनाशयोरभावादभेदो युक्तः ॥ दार्ष्टांतिके तु मृदादिनाशे सति घटादिकं जायत इति जन्मविनाशरूपविरुद्धधर्मवत्वात् कार्यकारणयोरभेदो न युक्त इति शंकते जन्मेति ॥ कारणस्य नाशाभावाद्धेत्वसिद्धिरिति परिहरति ॥ नेति ॥ दधिघटादिकार्यान्वितत्वेन क्षीरमृदादीनां प्रत्यक्षत्वान्नाशासिद्धिरित्यर्थः ॥ ननु यत्रान्वयो दृश्यते तत्र हेत्वसिद्धावपि यत्रांकुरादौ वटबीजादीनामन्वयो न दृश्यते तत्र हेतुसत्वाद्वस्त्वन्यत्वं स्यादि-

॥ तथा प्रतिदिनमनेकसंस्थानानां पित्रादीनां न वस्त्वन्यत्वं भवति मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात् ॥ जन्मोच्छेदानंतरितत्वात्तत्र युक्तं नान्यत्रेति चेन्न क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात् ॥ अदृश्यमानानामपि वटधानादीनां समानजातीयावयवांतरोपचितानामंकुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा ॥ तत्रेदृग्जन्मोच्छेदांतरितत्वाच्चेदसतः सत्वापत्तिः सतश्चासत्वापत्तिस्तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसंगः तथा च बाल्ययौवनस्थविरेष्वपि भेदप्रसंगः पित्रादिव्यवहारलोपप्रसंगश्च एतेन क्षणभंगवादः प्रतिवेदितव्यः ॥ यस्य पुनः प्रागुत्पत्तेरसत्कार्यं तस्य निर्विषयः कारकव्यापारः स्यात् ॥ अभावस्य विषयत्वानुपपत्तेः आका-

शहननप्रयोजनखड्गाद्यनेकायुधप्रसक्तिवत्

त्यत आह ॥ अदृश्येति ॥ तत्राप्यंकुरादौ बीजाद्यवयवानामन्वयात्तत्सत्व एव जन्मविनाशौ किंत्ववयवांतरोपचयाभ्यां तद्व्यवहार इत्यर्थः ॥ अस्तूपचयापचयलिंगेन वस्तुभेदानुमानं ततोऽसत उत्पत्तिः सतो नाश इत्याशंक्य व्यभिचारमाह ॥ तत्रेदृगिति ॥ पितृदेहेपि भेदसत्वान्न व्यभिचार इत्यत्र बाधकमाह ॥ पित्रादीति ॥ एतेनेति कारणस्य सर्वकार्येष्वन्वयकथनेनेत्यर्थः ॥ स्वपक्षे दोषं परिहृत्य परपक्षे प्रसंजयति ॥ यस्य पुनरिति ॥

असतः कार्यस्य कारकव्यापाराद्धि नातिशयाश्रयत्वायोगाद्विषयत्वेपि मृदादेर्विषयत्वं स्यादिति शंकते समवायीति॥ समवायि॥ कारणात्कार्यं भिन्नमभिन्नं वेति विकल्प्याद्यं निरस्यति॥ नेत्यादिना द्वितीयमाशंक्येष्टापत्तिमाह॥ समवायीति॥ कार्याणामवांतरकारणान

समवायिकारणविषयः कारकव्यापारः स्यादिति चेन्नान्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसंगात् समवायिकारणस्यैवात्मातिशयः कार्यमिति चेन्न तर्हि सत्कार्यतापत्तिस्तस्मात्क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्त इति न कारणादन्यत्कार्यं वर्षशतेनापि शक्यं निश्चेतुं॥ तथा मूलकारणमेवांत्यात्कार्यात्तेन तेन कार्याकारेण नटवत्सर्वव्यवहारास्पदत्वं प्रतिपद्यते॥ एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वं अनन्यत्वं च कारणादवगम्यते॥ शब्दांतराच्चैतदवगम्यते॥ पूर्वसूत्रेऽसद्व्यपदेशिनः शब्दस्योदाहृतत्वात्ततोन्यः सद्व्यपदेशी शब्दः शब्दांतरं॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि॥ तद्धैक आहुरसदेवेदमग्र आसीदिति चाऽसत्पक्षमुपक्षिप्य कथमसतः सज्जायेतेति आक्षिप्य सदेव सोम्येदमग्र आसीदित्यवधारयति॥ तत्रेदंशब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात्सत्त्वानन्यत्वे प्रसिध्यतः॥ यदि तु प्रागुत्पत्तेरसत्कार्यं स्यात्पश्चाच्चोत्पद्यमानं कारणे समवेयात् तदान्यत्कारणात्स्यात्॥ तत्र येनाश्रुतं श्रुतं भवतीतीयं प्रतिज्ञा पीड्येत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते॥१८॥ पटवच्च॥१९॥ यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किं वान्यद्द्रव्यमिति स एव प्रसारितो यत्संवेष्टितं द्रव्यं तत् पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते॥

न्यत्वमुपसंहरति॥ तस्मादिति॥ परमकारणानन्यत्वं फलितमाह॥ तथा मूलेति॥ असत्कार्यवादे प्रतिज्ञाबाधः स्यादित्याह॥ यदि तु प्रागुत्पत्तेरिति॥१८॥ कार्यमुपादानाद्भिन्नं तदुपलब्धावप्यनुपलभ्यमानत्वात्ततोधिकपरिमाणत्वाच्च मशकादिवश्शश इत्यत्र व्यभिचारार्थं

सूत्रं पटवच्चेति॥

द्वितीयहेतोर्व्यभिचारं स्फुटयति यथा च संवेष्टनेति॥ आयामो दैर्घ्यं॥१९॥ ननैव विलक्षणकार्यकारित्वं कार्यमुपादानाद्भिन्नं भिन्नकार्यकरत्वात्संमतवत् इति हेतुमाशंक्य व्यभिचारमाह सूत्रकारः॥ यथा च प्राणादीति एवं जीवजगतोर्ब्रह्मानन्यत्वात्प्रतिज्ञासिद्धिरित्यधिकरणार्थमुपसंहरति॥ अनन्य

यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादन्योऽयं भिन्नः पट इति॥ एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुंविन्दादिकारकव्यापारादभिव्यक्तं स्पष्टं गृह्यते॥ अतः संवेष्टितप्रसारितपटन्यायेनैवानन्यत्कारणात्कार्यमित्यर्थः॥१९॥ यथा च प्राणादि॥२०॥ यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु कारणमात्रेण रूपेण वर्त्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते नाकुंचनप्रसारणादिकं कार्यान्तरं तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुंचनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते॥ न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं समीरणस्वभावाविशेषात्॥ एवं कार्यस्य कारणादनन्यत्वं॥ अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति॥२०॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥२१॥ अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते॥ चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते॥ कुतः इतरव्यपदेशात् इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः॥ स आत्मा तत्त्वमसि श्वेतकेतो इति प्रतिबोधनात्॥ यद्वा इतरस्य ब्रह्मणः शारीरात्मत्वं व्यपदिशति॥ तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात्॥

कृत्स्नस्येति॥२०॥ जीवाभिन्नं ब्रह्म जगत्कारणमिति वदन्वेदान्तसमन्वयो विषयः स यदि तादृक् ब्रह्म जगज्जनयेत्तर्हि स्वानिष्टं नरकादिकं न जनयेत्स्वतंत्रचेतनत्वादिति न्यायेन विरुध्यते न वेति संदेहे पूर्वोक्तजीवानन्यत्वमुपजीव्य जीवदोषाः ब्रह्मणि प्रसज्येरन्निति पूर्वपक्षसूत्रं गृहीत्वा व्याचष्टे॥ इतरव्यपदेशादित्यादिना पूर्वपक्षे जीवाभिन्ने

सिद्धं तेन तत्सिद्धिरिति फलं हिताकरणेत्यत्र नञ्व्यत्यासेनाहितकरणं दोषो व्याख्यातः॥ आदिपदोक्तं भ्रांत्यादिकं आपादयति न च स्वय-
मित्यादिना॥२१॥ जीवेशयोरभेदाज्जीवगतदोषाः ब्रह्मणि स्युः ब्रह्मगतास्य सृष्टिसंहारशक्ति सर्वस्मर्तृत्वादयो गुणा जीवे स्युर्न चे

॥ अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च परादेवता जीवमात्मशब्देन व्यपदिशंती न ब्रह्मणो
भिन्नः शारीर इति दर्शयति॥ तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति॥ अतः स स्वतंत्रः कर्ता सन् हितमेवात्मनः सौम-
नस्यकरं कुर्यात्॥ नाहितं जन्ममरणाजरारोगाद्यनेकानर्थजालं॥ नहि कश्चिदपरतंत्रो बंधनागारमात्मनः कृत्वानुप्रवि-
शति॥ न च स्वयमत्यंतनिर्मलः सन्नत्यंतमलिनं देहमात्मत्वेनोपेयात् कृतमपि कथंचिद्यत् दुःखकरं तदिच्छया जा-
ह्यात् सुखकरं चोपाददीत स्मरेच्च मयेदं जगद्बिंबं विचित्रं विरचितमिति सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मये-
दं कृतमिति॥ यथा च मायावी स्वयंप्रसारितां मायामिच्छयाऽनायासेनैवोपसंहरति॥ एवं शारीरोपीमां सृष्टिमुपसं-
हरेत् स्वयमपि तावच्छरीरं शारीरो न शक्नोत्यनायासेनोपसंहर्तुं एवं हितक्रियाद्यदर्शनादन्याय्या चेतनाज्ज-
गत्प्रक्रियेति मन्यंते॥२१॥ अधिकं तु भेदनिर्देशात्॥२२॥ तुशब्दः पक्षं व्यावर्त्तयन् सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशु-
द्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्तद्वयं जगतः स्रष्टृ ब्रूमः॥ न तस्मिन् हिताकरणादयो दोषाः प्रसज्यंते न
हि तस्य हितं किंचित्कर्त्तव्यमस्ति अहितं वा परिहर्त्तव्यं नित्यमुक्तस्वभावत्वात् न हि तस्य ज्ञानप्रतिबंधः शक्तिप्र-
तिबंधो वा क्वचिदप्यस्ति॥ सर्वज्ञत्वात्सर्वशक्तित्वाच्च शारीरस्त्वनेवंविधस्तस्मिन्प्रसज्यंते हिताकरणादयो दोषाः

श्चापत्तिः॥ जीवस्य स्वशरीरेपि संहारसामर्थ्यादर्शनादिति प्राप्ते सिद्धांतसूत्रं व्याचष्टे तुशब्द इत्यादिना॥ जीवेश्वरयोर्लोके बिंबप्रतिबिंबयो-
रिव कल्पितभेदांगीकाराद्धर्मव्यवस्थेति सिद्धांतग्रंथार्थः॥

शा.भा.
र.प्र.टी.
१९०

यदिवयंजीवंस्रष्टारंब्रूमस्तदादोषाःप्रसज्यंतेनतुतंब्रूमइत्यन्वयःकिंचाभेदज्ञानादूर्ध्वंवादोषाआपाद्यंतेपूर्वंवानाद्यइत्याह॥अपिचेति उक्तंमिथ्याज्ञानविजृंभितत्वंस्फुटयति॥अविद्येति॥कर्तृत्वादिबुद्धिधर्माध्यासेदेहधर्माध्यासंदृष्टांतयति॥जन्मेतिद्वितीयंप्रत्याह॥अबा

अ.२पा.
१

नतुतंवयंजगतःस्रष्टारंब्रूमः॥कुतएतत्॥भेदनिर्देशात्॥आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यःसोन्वेष्टव्यःसविजिज्ञासितव्यःसतासोम्यतदासंपन्नोभवतिशारीरआत्माप्राज्ञेनात्मनान्वारूढइत्येवंजातीयकःकर्तृकर्मादिभेदनिर्देशोजीवादधिकंब्रह्मदर्शयति॥नन्वभेदनिर्देशोपिदर्शितस्तत्त्वमसीत्येवंजातीयकःकथंभेदाभेदौविरुद्धौसंभवेयातांनैषदोषः॥आकाशघटाकाशन्यायेनोभयसंभवस्यतत्रतत्रप्रतिष्ठापितत्वात्॥अपिचयदातत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदःप्रतिबोधितोभवतिअपगतंभवतितदाजीवस्यसंसारित्वंब्रह्मणश्चस्रष्टृत्वंसमस्तस्यमिथ्याज्ञानविजृंभितस्यभेदव्यवहारस्यसम्यक्ज्ञानेनबाधितत्वात्तत्रकुतएवसृष्टिःकुतोवाहिताकरणादयोदोषाः॥अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्यविवेककृताहिभ्रांतिर्हिताऽकरणादिलक्षणःसंसारोनतुपरमार्थतोस्तीत्यसकृदवोचाम॥जन्ममरणच्छेदनभेदनवेदनाद्यभिमानवत्॥अबाधितेतुभेदव्यवहारेसोन्वेष्टव्यःसविजिज्ञासितव्यइत्येवंजातीयकेनभेदनिर्देशेनावगम्यमानंब्रह्मणोधिकत्वंहिताकरणादिदोषप्रसक्तिंनिरुणद्धि॥२२॥अश्मादिवच्चतदनुपपत्तिः॥२३॥यथाचलोकेपृथिवीत्वसामान्यान्वितानामप्यश्मनांकेचिन्महार्हामणयोवज्रवैडूर्यादयोऽन्येमध्यमवीर्याःसूर्यकांतादयोऽन्येप्रहीणाःश्ववायसप्रक्षेपणार्हाःपाषा((णाइत्यनेकविधंवैचित्र्यंदृश्यते॥

राम.
१९०

धितेतिज्ञानादूर्ध्वंस्रष्टृत्वादिधर्माणांबाधात्पूर्वंचकल्पितभेदेनव्यवस्थोपपत्तेर्नकिंचिदवद्यमित्यर्थः॥२२॥नन्वखंडैकरूपेब्रह्मणिकथंजीवेश्वरवैचित्र्यंकथंचतत्कार्यवैचित्र्यमित्यनुपपत्तिंदृष्टांतैःपरिहरतिसूत्रकारः॥अश्मादिवदि

किंपाकोमहानालफलं तत्तत्कार्यसंस्काररूपानादिशक्तिभेदाद्वैचित्र्यमितिभावः॥ सूत्रस्यचकारार्थमाह श्रुतेश्चेति॥ ब्रह्मजीवगतदोषवत् जीवाभिन्नत्वाज्जीववदित्याद्यनुमानं स्वतः प्रमाणनिरवद्यत्वादिश्रुतिबाधितं किंच कर्तृत्वभोक्तृत्वादिविकारस्य मिथ्यात्वाज्जीवस्यैवतावद्दोषोनास्तिकुतोबिंबस्थानीयस्याशेषविशेषदर्शिनः परमेश्वरस्यदोषप्र सक्तिः॥ यत्तुब्रह्मनविचित्रकार्यप्रकृतिः एकरूपत्वाद्व्यतिरेकेणमृत्तत्वादिति॥ तन्न॥ एकरूपेस्वप्नदृशीव विचित्रदृश्यवस्तुवैचित्र्यदर्शनेनव्यभिचारादित्यर्थः॥ तस्मान्नन्यग-
वदि

यथाचैकपृथिवीव्यपाश्रयाणामपिबीजानांबहुविधंपत्रपुष्पफलगंधरसादिवैचित्र्यंचंदनकिंपाकादिषूपलक्ष्यते॥ यथाचैकस्याप्यन्नरसस्यलोहितादीनिकेशलोमादीनिचविचित्राणिकार्याणिभवंति॥ एवमेकस्यापिब्रह्मणोजीवप्राज्ञपृथक्त्वंकार्यवैचित्र्यंचोपपद्यतइति॥ अतस्तदनुपपत्तिःपरपरिकल्पितदोषान्नुपपत्तिरित्यर्थः॥ श्रुतेश्चप्रामाण्याद्विकारस्यचवाचारंभणमात्रत्वात्स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः॥७॥ उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि॥२४॥ चेतनंब्रह्मैकमद्वितीयंजगतःकारणमितियदुक्तंतन्नोपपद्यते॥ कस्मादुपसंहारदर्शनात्॥ इहहिलोकेकुलालादयोघटपटादीनांकर्त्तारोमृद्दंडचक्रसूत्राद्यनेककारकोपसंहारेणसंगृहीतसाधनाःसंतस्तत्तत्कार्यंकुर्वाणादृश्यंते॥ ब्रह्मचासहायंतवाभिप्रेतंतस्यसाधनांतराणुपसंग्रहेसतिकथंस्रष्टृत्वमुपपद्येत॥ तस्मान्नब्रह्मजगत्कारणमितिचेत्न॥ ६ ॥

भिन्नेब्रह्मणिसमन्वयस्याविरोधइतिसिद्धं॥२३॥ उपसंहारदर्शनात्॥ असहायाद्ब्रह्मणोजगत्सर्गंब्रुवन्समन्वयोविषयः सकिंयदसहायंनत्वकारणमितिलौकिकन्यायेनविरुध्यतेनवेतिसंदेहेपूर्वमौपाधिकजीवभेदाद्ब्रह्मणिजीवदोषानप्रसज्यंतइत्युक्तंसंप्रतिउपाधितोपिविभक्तंब्रह्मणःप्रेरकादिकंसहकारिनास्तीशनानात्वाभावादितिप्रत्युदाहरणेनपूर्वपक्षसूत्रांशंव्याचष्टे॥ चेतनमित्यादिनाफलंपूर्ववत्कारकाणामुपसंहारोमेलनं॥

उक्तन्यायस्यक्षीरादौव्यभिचारइतिसिद्धांतयति नैषइति॥शुद्धस्यब्रह्मणोऽकारणत्वमिष्टमेवविशिष्टस्येश्वरस्यतुमायैवसहायइति।
भावेनाह॥बाह्येति॥क्षीरस्याप्यातंचनादिसहायोस्तीत्यसहायत्वहेतोर्नव्यभिचारइत्याशंक्यसहायाभावेपियस्यकस्यचित्परिणाम।
स्यक्षीरेदर्शनाद्व्यभिचारतादवस्थ्यमित्याह॥नन्वित्यादिना॥तर्हिसहायोव्यर्थस्तत्राह॥त्वार्यतइति॥ननुत्वार्यतेक्षीरंदधिभावायशे
घ्रंकार्यतइतिकिमर्थंकल्प्यतेस्वतोऽशक्तंक्षीरंसहायेनशक्तंक्रियतइतिकिंनस्यात्तत्राह॥यदिचेति॥शक्तस्यसहायसंपदाकिंकार्यमि

नैषदोषः॥यतःक्षीरवत्द्रव्यस्वभावविशेषादुपपद्यते॥यथाहिलोकेक्षीरंजलंवास्वयमेवदधिहिमभावेनप
रिणमतेऽनपेक्ष्यबाह्यंसाधनंतथेहापिभविष्यति॥ननुक्षीराद्यपिदध्यादिभावेनपरिणममानमपेक्षतए
वबाह्यंसाधनं औष्ण्यादिकंकथमुच्यतेक्षीरवद्धीति॥नैषदोषःस्वयमेवहिक्षीरंयांचयावतींचपरिणाम
मात्रामनुभवत्येव॥त्वार्यतेत्वौष्ण्यादिनादधिभावाय॥यदिचस्वयंदधिभावशीलतानस्यान्नैवौष्ण्यादिनाऽ
पिबलाद्दधिभावमापद्येत॥नहिवायुराकाशोवौष्ण्यादिनाबलाद्दधिभावमापद्यतेसाधनसामग्र्याचतस्यपू
र्णतासंपाद्यते॥परिपूर्णशक्तिकंतुब्रह्मनतस्यान्येनकेनचित्पूर्णतासंपादयितव्या॥श्रुतिश्चभवतिनतस्यका
र्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते॥परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति
॥तस्मादेकस्यापिब्रह्मणोविचित्रशक्तियोगात्क्षीरादिवद्विचित्रपरिणामउपपद्यते॥२४॥देवादिवदपिलोके॥२५

त्यत्राह॥साधनेति॥सहायविशेषाभावेकश्चिद्विकारःक्षीरस्यभवतितत्रआतंचनप्रक्षेपौष्ण्याभ्यांतूत्तमदधिभावसामर्थ्यंव्यज्य।
तइत्यर्थःतर्हिशक्तिव्यंजकोपिसहायोब्रह्मणोवाच्यस्तत्राह॥परिपूर्णेतिनिरपेक्षमायाशक्तिकमित्यर्थः॥तादृशशक्तौमानमाह॥
श्रुतिश्चेति॥२४॥ननुब्रह्मनकारणंचेतनत्वेसत्यसहायत्वान्मृदादिशून्यकुलालादिवदितिनक्षीरादौव्यभिचारइतिसूत्रव्यावर्त्यांश

स्यादेतदिति॥ तस्यापि हेतोर्देवादौ व्यभिचार इत्याह॥ देवादिवदिति लोक्यते ज्ञायतेऽर्थोऽनेनेति लोको मंत्रार्थवादादिशास्त्रं वृद्धव्यवहारश्च अभिध्यानं संकल्पः॥ ननु देवाद्यूर्णनाभांतदृष्टांतेषु शरीरेषु चेतनत्वं नास्ति बलाकापद्मिनीचेतनयोर्गर्भप्रस्थानकर्तृत्वे मेघश

स्यादेतत् उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः दृष्टत्वात्॥ चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना दृश्यंते॥ कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति देवादिवदिति ब्रूमः॥ यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाश्चेतना अपि संतोऽनपेक्ष्यैव किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वतएव ह्यभूतपूर्वाण्येव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यंते मंत्रार्थवादेतिहासपुराणप्रामाण्यात् तंतुनाभश्च स्वतएव तंतून्सृजति बलाका चांतरेणैव शुक्रं स्तनयित्नुरवश्रवणात् गर्भं धत्ते॥ पद्मिनी चानपेक्ष्य किंचित्प्रस्थानसाधनं सरोंतरात्सरोंतरं प्रतिष्ठते॥ एवं चेतनमपि ब्रह्म अनपेक्ष्य बाह्यं साधनं स्वतएव जगत्स्रक्ष्यति॥ स यदि ब्रूयाद्य एते देवादयो ब्रह्मणो दृष्टांता उपात्तास्ते दार्ष्टांतिकेन ब्रह्मणा न समाना भवंति शरीरमेव ह्यचेतनं देवादीनां शरीरांतरादिविभूत्युत्पादने उपादानं न तु चेतन आत्मा तंतुनाभस्य क्षुद्रतरजंतुभक्षणाल्लाला कठिनतामापद्यमाना तंतुर्भवति॥ बलाका च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते पद्मिनी च चेतनप्रयुक्ता सती अचेतनेनैव शरीरेण सरोंतरात्सरोंतरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेव चेतना सरोंतरोपसर्पणे व्याप्रियते॥ तस्मान्नैते ब्रह्मणो दृष्टांता इति॥ तं प्रति ब्रूयान्नायं दोषः॥ कुलालादिदृष्टांतवैलक्षण्यमात्रस्य विवक्षितत्वादिति यथा हि कुलालादीनां देवादीनां च समाने चेतनत्वे कुलालादयः कार्यारंभे बाह्यं साधनमपेक्षंते॥ ९

ब्दः शरीरं च सहायोऽस्ति अतो विशिष्टहेतोर्न व्यभिचार इति शंकते॥ स यदि ब्रूयादित्यादिना॥ व्यभिचारोऽस्तीति परिहरति॥ तं प्रति ब्रूयादिति॥ अयं दोषः दृष्टां

ब्र॰भा॰ र॰प्र॰टी॰ १८९

अत्रहिहेतौचेतनत्वंअहंधीविषयत्वरूपंचित्तादात्म्यापन्नदेहसाधारणंग्राह्यंनतुमुख्यात्मत्वंनचकुलालदृष्टान्तेसाधनवैकल्यापत्तेः॥असहाय
त्वंचेतनस्यस्वातिरिक्तहेतुशून्यत्वंतदुभयंदेवादिषुअस्तीतिनव्यभिचारःदेहस्यस्वान्तःपातित्वेनस्वातिरिक्तत्वाभावात्तथाचकुलालवैलक्षण्यंदे
वादीनांघटादिकार्येस्वातिरिक्तानपेक्षत्वाद्दृष्टंवैलक्षण्यंब्रह्मणःदेहस्याप्यनपेक्षणात्नरदेवादीनांकार्यारंभेनास्त्येकरूपासामग्रीश्रूयतेहिमहा
भारते॥श्रीकृष्णस्यसंकल्पमात्रेणद्रौपद्याःपटपरंपरोत्पत्तिः॥अतःसिद्धमसहायस्यापिब्रह्मणःकारणत्वम्॥२५॥कृत्स्नप्रसक्तिःक्षीरदृष्टान्तेनत्र॥

अ॰२पा॰१

नदेवादयस्तथाब्रह्मचेतनमपिनबाह्यंसाधनमपेक्षतइत्येतावद्वयंदेवाद्युदाहरणेनविवक्षामस्तस्माद्यथैकस्य
सामर्थ्यंदृष्टंनतथासर्वेषामेवभवितुमर्हतीतिनास्त्येकांतइत्यभिप्रायः॥८॥२५॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा
॥२६॥चेतनमेकमद्वितीयंब्रह्मक्षीरादिवद्देवादिवच्चानपेक्ष्यबाह्यसाधनंस्वयंपरिणममानंजगतःकारणमितिस्थितंशा
स्त्रार्थपरिशुद्धयेतुपुनराक्षिपति॥कृत्स्नप्रसक्तिः॥कृत्स्नस्यब्रह्मणःकार्यरूपेणपरिणामःप्राप्नोतिनिरवयवत्वात्॥यदि
ब्रह्मपृथिव्यादिवत्सावयवमभविष्यत्ततोऽस्यैकदेशःपर्यणंस्यदेकदेशश्चावास्थास्यत्निरवयवंतुब्रह्मश्रुतिभ्योऽ
वगम्यते॥निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं॥दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः॥इदंमहद्भूतमनंतम
पारंविज्ञानघनएवसएषनेतिनेत्यात्माऽस्थूलमनण्वित्याद्याभ्यःसर्वविशेषप्रतिषेधिनीभ्यः॥ ह्मपरिणामीतिभ्रमो

राम॰ १८९

त्पत्त्यापूर्वपक्षप्राप्तेःशास्त्रार्थोविवर्त्तोनपरिणामइतिनिर्णयार्थमिदमधिकरणमितिपूर्वाधिकरणेनोत्तराधिकरणस्यकार्यत्वंसंगतिमा
ह॥चेतनमिति॥निरवयवाद्ब्रह्मणोजगत्सर्गंवदन्समन्वयोविषयःसकिंयन्निरवयवंतत्परिणामीतिन्यायेनविरुध्यतेनवेतिसंदेहेवि
रुध्यतइतिपूर्वपक्षसूत्रंव्याचष्टे॥कृत्स्नेति॥ब्रह्मपरिणामीतिवदतावक्तव्यंब्रह्मनिरवयवंसावयवंवाआद्येसर्वस्यब्रह्मणःपरिणामात्म
नास्थितिःस्यादित्युक्तंव्यतिरेकदृष्टान्तेनविवृणोति॥यदिब्रह्मेत्यादिना॥पर्यणंस्यत्परिणतोऽभविष्यदेकदेशश्चावास्थास्यदपरिणतोऽभविष्य

उक्तश्रुतिभ्योनिरवयवत्वसिद्धेःफलितंदोषमाह ॥ ततश्चेति ॥ यदापरिणामव्यतिरेकेणमूलब्रह्मात्मानास्तितदात्माद्रष्टव्यइत्युपदेशोऽर्थशून्यःस्यादितिदोषांतरमाह ॥ द्रष्टव्यतेति ॥ ब्रह्मणःपरिणामात्मनाजन्मनाशांगीकारेऽजोऽमरइतिविरोधश्चेत्याह ॥ अजत्वादीति ॥ सावयवत्वपक्षमाशंक्यसूत्रशेषेणपरिहरति ॥ अथेत्यादिना ॥ २६ ॥ परिणामपक्षोदुर्घटइतियदुक्तंतदस्मदिष्टमेवेतिविवर्त्तवादेनसिद्धांतयति ॥ श्रुतेरि

ततश्चैकदेशपरिणामासंभवात्कृत्स्नपरिणामप्रसक्तौसत्यांमूलोच्छेदःप्रसज्येत द्रष्टव्यतोपदेशानर्थक्यंचापद्येत अयत्नदृष्टत्वात्कार्यस्यतद्व्यतिरिक्तस्यचब्रह्मणोऽसंभवात् ॥ अजत्वादिशब्दकोपश्च ॥ अथैतद्दोषपरिजिहीर्षयासावयवमेवब्रह्माभ्युपगम्येत ॥ तथापियेनिरवयवत्वस्यप्रतिपादकाःशब्दाउदाहृतास्तेप्रकुप्येयुःसावयवत्वेचानित्यत्वप्रसंगइति ॥ सर्वथायंपक्षोनघटयितुंशक्यतइत्याक्षिपति ॥ २६ ॥ श्रुतेस्तुशब्दमूलत्वात् ॥ २७ ॥ तुशब्देनाक्षेपंपरिहरति ॥ नखल्वस्मत्पक्षेकश्चिदपिदोषोऽस्ति ॥ नतावत्कृत्स्नप्रसक्तिरस्तिकुतःश्रुतेःयथैवहिब्रह्मणोजगदुत्पत्तिःश्रूयतएवंविकारव्यतिरेकेणापिब्रह्मणोऽवस्थानंश्रूयतेप्रकृतिविकारयोर्भेदेनव्यपदेशात् ॥ सेयंदेवतैक्षतहंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतितावानस्यमहिमाततोज्यायांश्चपूरुषःपादोऽस्यसर्वाभूतानित्रिपादस्यामृतंदिवीतिचैवंजातीयकात् तथाहृदयायतनत्ववचनात्सत्संपत्तिवचनाच्चयदिचकृत्स्नंब्रह्मकार्यभावेनोपयुक्तंस्यात्सतासोम्यतदासंपन्नोभवतीतिसुषुप्तिगतंविशेषणमनुपपन्नंस्यात्विकृतेनब्रह्मणानित्यसंपन्नत्वात्अविकृतस्यचब्रह्मणोऽभावात् ॥

((निस्वपक्षेपूर्वोक्तदोषद्वयंनास्तीतिसूत्रयोजनयादर्शयतितुशब्देनेत्यादिनाईक्षितृत्वेनव्याकर्तृत्वेनचेक्षणीयव्याकर्त्तव्यप्रपंचात्पृथगीश्वरसत्वश्रुतेर्नकृत्स्नप्रसक्तिरित्याह ॥ सेयंदेवतेति ॥ न्यूनाधिकभावेनापिपृथक्सत्वश्रुतमित्याह ॥ तावानिति इतश्चास्त्यविकृतंब्रह्मेत्याह ॥ तथेति ॥ सवाएषआत्माहृदीतिश्रुतेरस्तिदृश्यातिरिक्तंब्रह्मतदेतिसुषुप्तिकालरूपविशेषणाच्चेत्यर्थः ॥

शा·भा· लिंगांतरमाह॥ तथेंद्रियेति॥ भूम्यादेर्विकारस्येंद्रियगोचरत्वान्न चक्षुषा गृह्यत इत्यादिश्रुत्या ब्रह्मणस्तत्प्रतिषेधाद्वाङ्मनसगोचरत्वश्रु अ·२पा·
र·प्र·टी· तेश्चास्ति कूटस्थं ब्रह्मेत्यर्थः॥ कृत्स्नप्रसक्तिदोषो नास्तीत्युक्त्वा द्वितीयदोषोपि नास्तीत्याह॥ न चेति॥ ननु ब्रह्म कार्यात्मनाप्यस्ति पृथगा १
१९१ प्यस्ति चेत्सावयवत्वं दुर्वारं निरवयवस्यैकस्य द्विधासत्त्वायोगादतो यद्द्विधाभूतं तत्सावयवमिति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमि
ति विवर्त्तमजानतः शंकां गुढाशय एव परिहरति॥ शब्दमूलं चेति॥ यदा लौकिकानां प्रत्यक्षदृष्टानामपि शक्तिरचिंत्या तदा शब्दैकसम

गो

तथेंद्रियगोचरत्वप्रतिषेधात् ब्रह्मणो विकारस्य चेंद्रियमोचरत्वापत्तेः तस्मादविकृतं ब्रह्म न च निरवयवत्वश
ब्दकोपोस्ति॥ श्रूयमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात्॥ शब्दमूलं च ब्रह्म शब्दप्रमाणकं नेंद्रियादिप्रमा
णकं तद्यथाशब्दमभ्युपगंतव्यं॥ शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयत्यकृत्स्नप्रसक्तिं निरवयवत्वं च॥ लौकि
कानामपि मणिमंत्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यंते ता
अपि तावन्नोपदेशमंतरेण केवलेन तर्केणावगंतुं शक्यंते अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्र
योजनाश्च शक्तय इति किमुताचिंत्यस्वभावस्य ब्रह्मणो रूपं विना शब्देन निरूप्येत तथा चाहुः पौराणिकाः अचिंत्याः
खलु ये भावा न तांस्तर्केण योजयेत्॥ प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणमिति तस्माच्छब्दमूल एवातींद्रियार्थ
याथात्म्याधिगमः॥ ननु शब्देनापि न शक्यते विरुद्धोर्थः प्रत्याययितुं निरवयवं च ब्रह्म परिणमते न च कृत्स्नमिति ॥६

धिगम्यस्य ब्रह्मणः किमु वक्तव्यं अतो ब्रह्मणो निरवयवत्वं द्विधाभावश्चेत्युभयं यथाशब्दमभ्युपगंतव्यं न तर्केण बाधनीयमित्यर्थः॥ प्र राम·
कृतिभ्यः प्रत्यक्षदृष्टवस्तुस्वभावेभ्यो यत्परं विलक्षणं केवलोपदेशगम्यं तदचिंत्यस्वरूपमिति स्मृत्यर्थः॥ आशयाऽनवबोधेन शंकते॥ ननु शब्दे १९१
नापीति॥ यद्वा ब्रह्मपरिणामीत्येकदेशिनामियं सिद्धांतसूत्रव्याख्या दर्शितानामाक्षिपति नन्विति शब्दस्य योग्यताज्ञानसापेक्षत्वादित्यर्थः

॥ ननु ब्रह्म सावयवं निरवयवं चेति विकल्पाश्रयणे सर्वश्रुतिसमाधानं स्यादित्यत आह ॥ क्रियेति ॥ निरवयवत्वे ब्रह्मणः प्रकृतित्वश्रु।
नित्वश्रुतिविरोधः सावयवत्वे निरवयवत्वशब्दविरोधः विकल्पश्च वस्तुन्ययुक्तः ॥ अतः प्रकारांतरानुपलंभाच्छ्रुतीनां प्रामाण्यं दुर्घट
मिति निष्प्राप्तेस्त्वाशयमुद्घाटयति नैष दोष इति ॥ निरवयवस्य वस्तुनः कूटस्थस्याप्यविद्याकल्पितनामरूपविकारांगीकारान्न दु।

यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत कृत्स्नमेव वा परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेतेति।
रूपभेदकल्पनात्सावयवमेव प्रसज्येत ॥ क्रियाविषये ह्यतिरात्रे षोडशिनं गृण्हाति नातिरात्रे षोडशिनं गृह्णातीत्ये
वंजातीयिकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति ॥ पुरुषतंत्रत्वादनुष्ठानस्य ॥ इह तु।
विकल्पाश्रयणेनापि न विरोधपरिहारः संभवत्यपुरुषतंत्रत्वाद्वस्तुनस्तस्माद्दुर्घटमेतदिति ॥ नैष दोषोऽविद्याक।
ल्पितरूपभेदाभ्युपगमात् नह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते ॥ न हि तिमिरोपहतनयनेनानेक इव
चंद्रमा दृश्यमानोऽनेक एव भवति ॥ अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वा
न्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ पारमार्थिकेन च रूपेण सर्वव्यवहारातीत
मपरिणतमवतिष्ठते वाचारंभणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्येति न निरवयवत्वं ब्रह्मणः कुप्यति ॥
न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था तत्प्रतिपत्तौ फलाऽनवगमात् ॥ सर्वव्यवहारहीनब्रह्मात्मभावप्रति।
पादनार्था त्वेषा ॥ तत्प्रतिपत्तौ फलावगमात् ॥ स एष नेति नेत्यात्मेत्युपक्रम्याहाऽभयं वै जनक प्राप्तोसीति ॥ ॥

र्घटत्वदोषो नास्ति वास्तवकौटस्थ्यस्य कल्पितविकारप्रकृतित्वेनाऽविरोधादित्यर्थः ॥ रूपभेदांगीकारे सावयवत्वं स्यादित्याशंक्योक्तं वि
वृणोति ॥ नहीत्यादिना ॥ कृत्स्नप्रसक्तिं निरस्य दोषांतरं निरस्यति ॥ वाचारंभणेति । ननु श्रुतिप्रतिपाद्यस्य परिणामस्य कथं मिथ्यात्मत्वं
तत्राह न चेयमिति ॥

॥ निष्प्रपंचब्रह्मधीशेषत्वेन सृष्टिरनूद्यते न प्रतिपाद्यत इत्यसकृदावेदितं अतो विवर्तवादे न कश्चिद्दोष इत्युपसंहरति ॥ तस्मादिति ॥ ॥२७॥ पूर्वावस्थानाशेनावस्थांतरं परिणामः यथा दुग्धस्य दधिभावः पूर्वरूपानुपमर्देनावस्थांतरं विवर्तः ॥ यथा शुक्तेः रजतभावः ॥ तत्र ब्रह्मणो विवर्तोपादानत्वं स्वप्नसाक्षिदृष्टांतेन दृढयन् मायावादं स्फुटयति सूत्रकारः आत्मनि चेति ॥ रथयोगाः अश्वाः ॥ २८ ॥ किंच कृत्स्नप्रसक्त्यादीनां सांख्यादिपक्षेपि दोषत्वान्नास्मान्प्रत्युद्भावनीयत्वं यत्रोभयोः समो दोष इति न्यायादित्याह सूत्रकारः स्वपक्षेति

तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसंगोस्ति ॥२७॥ आत्मनि चैवं विचित्राश्च हि ॥२८॥ अपि च नैवात्र विवदितव्यं कथमेकस्मिन्ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति ॥ यत आत्मन्यप्येकस्मिन्स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते ॥ न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादिना ॥ लोकेपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यंते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति ॥२८॥ स्वपक्षदोषाच्च ॥२९॥ परेषामप्येष समानः स्वपक्षे दोषः प्रधानवादिनोपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्यपरिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षस्तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात्प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमव्याकोपो वा ॥ ननु नैवैतैर्निरवयवं प्रधानमभ्युपगम्यते ॥ सत्वरजस्तमांसि त्रयो गुणा नित्यास्तेषां साम्यावस्था प्रधानं तैरेवावयवैस्तत्सावयवमिति ॥ ९

॥ प्रधानस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युपगमविरोध इत्यत्र शंकते ॥ नन्विति ॥ किं साम्यावस्था गुणानां विकारः समुदायो वा आद्ये तस्या न मूलप्रकृतित्वं विकारत्वात् ॥ द्वितीये प्रपंचाभावः समुदायस्यावस्तुत्वेन मूलाभावात् अथ निरवयवा गुणा एव विविधपरिणामानां प्रकृतिरिति चेत्तर्हि कृत्स्नप्रसक्तेर्मूलोच्छेदो दुर्वार इत्यभिप्रेत्य परिहरति ॥ ९ ६ ९ ॥

नैवमित्यादिना॥ इतियतः अतः समानत्वान्नवयंपर्यनुयोज्याइत्यन्वयः॥ प्रत्येकंसत्वादिकमितरगुणद्वयसचिवंनिरवयवंयद्गुपादानंतर्हि कृत्स्नस्योपादानस्यकार्यरूपत्वप्रसक्तेर्मूलोच्छेद इत्युक्तेर्निरवयवत्वसाधकतर्कस्याभासत्वाद्गुणानांसावयवत्वमेवपरिणामित्वेनमृदादिवदतोनकृत्स्नप्रसक्तिरेकदेशपरिणामसंभवादितिशंकते॥ तर्केति॥ एतद्दोषाभावेपिदोषांतरंस्यादितिपरिहरति॥ एवमपीति॥ ननुगुणानामवयवास्तंतुवदारंभकानभवंति किंतुकार्यवैचित्र्यानुमितास्तद्गताः शक्तयइत्याशंकमायिकशक्तिभिर्ब्रह्मणोपिसावयवत्वंतुल्यमित्याह॥ अथेत्यादिना॥ अणुवादेपिदोषसाम्यमाह॥ तथेति॥ सांख्यवद्दोषः स

नैवंजातीयकेनसावयवत्वेनप्रकृतोदोषः परिहर्तुंपार्यते॥ यतःसत्वरजस्तमसामप्येकैकस्यसमानंनिरवयवत्वं॥ एकैकमेवचेतरद्वयानुगृहीतंस्वजातीयस्यप्रपंचस्योपादानमिति॥ समानत्वात्स्वपक्षेदोषप्रसंगस्यतर्कोप्रतिष्ठानात्सावयवमेवेतिचेत्॥ एवमप्यनित्यत्वादिदोषप्रसंगः अथशक्तयएवकार्यवैचित्र्यसूचिताअवयवाइत्यभिप्रायः॥ तास्तुब्रह्मवादिनोप्यविशिष्टाः॥ तथाणुवादिनोप्यणुरण्वंतरेणसंयुज्यमानोनिरवयवत्वाद्यदिकार्त्स्न्येनसंयुज्येततत्तःप्रथिमानुपपत्तेरणुमात्रत्वप्रसंगः॥ अथैकदेशेनसंयुज्येत तथापिनिरवयवत्वाभ्युपगमकोपइतिस्वपक्षेपिसमानएषदोषःसमानत्वाच्चनान्यतरस्मिन्पक्षेउपक्षेप्तव्योभवति॥ परिहृतस्तुब्रह्मवादिनास्वपक्षेदोषः

२॥१॥२९॥ सर्वोपेताचतद्दर्शनात्॥ ३०॥ ६

मानइतिसंबंधः निरवयवयोःपरमाण्वोःसंयोगोव्याप्यवृत्तिरव्याप्यवृत्तिर्वा आद्येतत्कार्यस्यद्व्यणुकस्यैकपरमाणुमात्रत्वापत्तिः प्रथिम्नोधिकपरिमाणस्यानुपपत्तेः नह्यणोरण्वंतरेणोपर्यधःपार्श्वतश्चव्याप्तौतदधिकद्रव्यंसंभवति द्वितीयेपरमाण्वोःसावयवत्वापत्तिरित्यर्थः ननुत्वंचोरइत्युक्तेत्वमपिचोरइतिवद्दोषसाम्योक्तिरयुक्तेत्यतआह परिहृतस्त्विति उक्तंहिमायावादेस्वमतस्यसर्वसामंजस्यं॥ अतोनिरवयवेब्रह्मणिसमन्वयस्याविरोधइतिसिद्धं॥ २९॥ सर्वो

मायाशक्तिमतोब्रह्मणोजगत्सर्गवदतःसमन्वयस्याशरीरस्यनमायेतिन्यायेनविरोधोस्तिनवेतिसंदेहेन्यायस्याभासत्वादस्तीतिपूर्वपक्षेपूर्वोक्तशक्तिमत्त्वसमर्थनादेकविषयत्वसंगतिंवदन्सिद्धांतसूत्रंव्याचष्टे॥एकस्येत्यादिना॥पूर्वोत्तरपक्षयोर्विरोधाविरोधौफलमित्युक्तमेवापादसमाप्तेरवगंतव्यं॥अभ्यात्तःअभितोव्याप्तःअवाकीवागिंद्रियशून्यः॥अनादरोनिष्कामः॥३०॥पूर्वपक्षन्यायमनूद्यदूषयतिविकरणत्वादिति॥देवादिचेतना

एकस्यापिब्रह्मणोविचित्रशक्तियोगादुपपद्यतेविचित्रोविकारप्रपंचइत्युक्तं॥तत्पुनःकथमवगम्यतेविचित्रशक्तियुक्तंपरंब्रह्मेतितदुच्यते॥सर्वोपेताचतद्दर्शनात्॥सर्वशक्तियुक्ताचपरादेवतेत्यभ्युपगंतव्यं॥कुतस्तद्दर्शनात्तथाहिदर्शयतिश्रुतिःसर्वशक्तियोगंपरस्यादेवतायाः॥सर्वकर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोवाक्यनादरःसत्यकामःसत्यसंकल्पोयःसर्वज्ञःसर्वविदेतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतइत्येवंजातीयिका॥३०॥विकरणत्वान्नेतिचेत्तदुक्तं॥३१॥स्यादेतद्विकरणांपरांदेवतांशास्तिशास्त्रमचक्षुष्कमश्रोत्रमवागमनइत्येवंजातीयकं॥कथंससर्वशक्तियुक्तापिसतीकार्यायप्रभवेत्॥देवादयोहिचेतनाःसर्वशक्तियुक्ताअपिसंतआध्यात्मिककार्यकरणसंपन्नाएवतस्मैतस्मैकार्यायप्रभवंतोविज्ञायंते॥कथंचनेतिनेतीतिप्रतिषिद्धसर्वविशेषायादेवतायाःसर्वशक्तियोगःसंभवेदितिचेत्॥यदत्रवक्तव्यंतत्पुरस्तादेवोक्तं॥श्रुत्यवगाह्यमेवेदमतिगंभीरंब्रह्मनतर्कावगाह्यं॥नचयथैकस्यसामर्थ्यंदृष्टंतथाऽन्यस्यापिसामर्थ्येनभवितव्यमितिनियमोस्तीतिप्रतिषिद्धसर्वविशेषस्यापिब्रह्मणःसर्वशक्तियोगःसंभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव॥तथाचशास्त्रं॥अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णइत्यकरणस्यापिब्रह्मणःसर्वसामर्थ्ययोगंदर्शयति॥३१॥

नांशक्तानामपिदेहाभिमानेसत्येवकर्तृत्वंदृष्टंतदभावेसुषुप्तेतन्नदृष्टंअतोब्रह्मणःशक्तत्वेप्यदेहत्वान्नकर्तृत्वंनाप्यदेहस्यशक्तिःसंभवतीतिशंकार्थः॥विकरणस्यजीवस्यकर्तृत्वासंभवेपीश्वरस्यसंभवतीतिदेवादिवदपिलोकइत्यत्रोक्तंसशरीरस्यकल्पितस्यमायाश्रयत्वायोगान्निर्विशेषचिन्मात्रस्यैवमायाधिष्ठानत्वंयुक्तमितिसमाधानार्थः॥३१॥

॥ न प्रयोजनवत्त्वात् परितृप्तात् ब्रह्मणो जगत्सर्गवदन्समन्वयो विषयः स किं अभ्रान्तश्चेतनो यः स निष्फलं वस्तु न रचयतीति न्या
येन विरुध्यते न वेति संदेहे पूर्वमदेहस्यापि श्रुतिबलात् शक्तत्वोक्त्या कर्तृत्वमुक्तं तदाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे ॥ अन्यथे
त्यादिना ॥ ईश्वरस्य फलाभावेपि परप्रयोजनाय सृष्टौ प्रवृत्तिरस्त्वित्याशंक्य श्रुतिमाह ॥ भवति चेति ॥ या प्रेक्षावत्प्रवृत्तिः सा स्वफला

न प्रयोजनवत्त्वात् ॥ ३२ ॥ अन्यथा पुनश्चेतनकर्तृकत्वं जगत आक्षिपति ॥ न खलु चेतनः परमात्मेदं जग
द्बिंबं विरचयितुमर्हति ॥ कुतः प्रयोजनवत्त्वात्प्रवृत्तीनां ॥ चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्त्तमानो
न मंदोपक्रमामपि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरंभां ॥ भवति च
लोकप्रसिद्ध्यनुवादिनी श्रुतिः ॥ न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीति ॥ गुरुतर
संरंभा चेयं प्रवृत्तिः यदुच्चावचप्रपंचं जगद्बिंबं विरचयितव्यं ॥ यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयो
जनोपयोगिनी परिकल्प्येत परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत प्रयोजनाभावे वा प्रवृत्त्यभावोपि
स्यात् ॥ अथ चेतनोपि सन्नुन्मत्तो बुद्ध्यपराधादंतरेणैवात्मप्रयोजनं प्रवर्त्तमानो दृष्टस्तथा परमात्मा
पि प्रवर्त्तिष्यत इत्युच्येत ॥ तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत ॥ तस्मादश्लिष्टा चेतनात्सृ
ष्टिरिति ॥ ३२ ॥ लोकवत्तु लीलाकैवल्यं ॥ ३३ ॥

र्थेति लोकप्रसिद्धिः न च दयालुप्रवृत्तौ व्यभिचारस्तस्यापि परदुःखासहनप्र
युक्तस्वचित्तव्याकुलतानिवृत्त्यर्थित्वादिति भावः किं च गुरुतरायासस्य फलं वाच्यमित्याह । गुरुतरेति ॥ तर्हि अस्त्वीश्वरस्यापि प्रवृत्तिः स्वार्थे
त्वत आह ॥ यदीयमपीति ॥ अस्वार्थत्वे प्रवृत्त्यभावः पूर्वोक्तः स्यादित्यर्थः ईश्वरः प्रेक्षावान्न भवतीत्याशंक्य श्रुतिविरोधमाह ॥ अथेत्यादिना ॥ बुद्धेरप
राधो विवेकाभावः ॥ ३२ ॥ उक्तन्यायस्य राज्ञां लीलायां व्यभिचार इति सिद्धांतसूत्रं व्याचष्टे ॥ ॥

नुशब्देनेति॥ व्यतिरिक्तं लीलातिरिक्तं॥ क्रीडारूपविहारायेषु रम्यदेशेषु ते ष्वित्यर्थः कदाचिद्राजादीनां लीलाया अपि किंचित्फलं सुखोल्ला-
सादिकं संभाव्येत तथापि निश्वासादौ प्रेक्षावत्प्रवृत्तित्वमस्ति न तु स्वस्य तत्रोद्देश्यं फलं किंचिदस्तीति व्यभिचारस्थलांतरमाह॥ यथा चेति प्राणस्य स्व
भावश्चलत्वं प्रारब्धं वोच्छ्वासादिहेतुरीश्वरस्य स्वभावः कालकर्मसहितमाया॥ नन्वीश्वरस्य जगद्रचनायाः केवललीलात्वं किमित्यु
च्यते फलमेव किंचित्कल्प्यतां तत्राह॥ नहीति॥ आप्तकामत्वव्याघातादित्यर्थः॥ नन्वीश्वरस्तूष्णीं किमिति न तिष्ठति किमिति स्वस्य

नुशब्देनाक्षेपं परिहरति॥ यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किंचित्प्रयोजनमन
भिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवंति॥ यथा चोच्छ्वासप्रश्वासादयोऽनभिसंधाय बाह्यं किंचित्प्र-
योजनं स्वभावादेव संभवंत्येवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनांतरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भवि
ष्यति॥ नहीश्वरस्य प्रयोजनांतरं निरूप्यमाणं न्यायतः श्रुतितो वा संभवति॥ न च स्वभावः पर्यनुयोक्तुं शक्यते॥ यद्य
प्यस्माकमियं जगद्बिंबविरचना गुरुतरसंरंभेवाभाति तथापि परमेश्वरस्य लीलैव केवलेयमपरिमितशक्तित्वात्॥
यदि नाम लोके लीलास्वपि किंचित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत॥ तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षितुं शक्यते आ
प्तकामश्रुतेः नाप्यप्रवृत्तिः उन्मत्तप्रवृत्तिर्वा सृष्टिश्रुतेः सर्वज्ञत्वश्रुतेश्च न चेयं परमार्थविषया सृष्टिश्रुतिः॥ अ
विद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यं॥ ३१॥ ३३॥

फलां परेषां दुःखावहां सृष्टिं करोतीति तत्राह न च स्वभावइति॥ कालधर्मादिसामग्र्यां सत्यां सृष्टेरपरिहार्यत्वादित्यर्थः॥ यदुक्तं गुरुतरा
रायासत्वात्फलं वाच्यमिति तत्र हेत्वसिद्धिमाह यद्यपीत्यादिना अल्पप्रवृत्तेरपि फलं वाच्यं लोके तथा दर्शनादित्यादि तर्कस्यागमबाधमाह॥ यदि
नामेति॥ सृष्टिश्रुतेरप्रवृत्तिर्नास्ति सर्वज्ञत्वश्रुतेरुन्मत्तता नास्तीति विभागः॥ स्वप्नसृष्टिवदस्याः सृष्टेर्मायामात्रत्वान्न फलापेक्षेत्याह न चेयमिति॥

नच निष्फलसृष्टिश्रुतीनामानर्थक्यं सफलब्रह्मधीशेषत्वेनार्थवत्त्वादित्युक्तं न विस्मर्त्तव्यमित्यर्थः ॥ ३३ ॥ वैषम्यनैर्घृण्येन ॥ निर्दोषाद्ब्रह्मणो जगत्सर्वं ब्रुवन्समन्वयो बिषयः स किं यो बिषमकारी स दोषवानिति न्याये न विरुध्यते न वेति संदेहे पूर्वत्र लीलया यत्स्रष्टृत्वमुक्तं तदेव कर्मादिसापेक्षस्य न युक्तं ॥ अनीश्वरत्वापत्तेर्निरपेक्षत्वे रागादिदोषापत्तेरित्याक्षेपसंगत्या पूर्वपक्षयति ॥ पुनश्चे

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥ पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय नेश्वरो जगतः कारणमुपपद्यते कुतो वैषम्यनैर्घृण्यप्रसंगात् ॥ कांश्चिदत्यंतसुखभाजः करोति देवादीन् कांश्चिदत्यंतदुःखभाजः पश्वादीन् कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सर्वप्रजोपसंहाराच्च प्रसज्येत ॥ तस्माद्वैषम्यनैर्घृण्यप्रसंगान्नेश्वरः कारणमिति ॥ एवं प्राप्ते ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते कस्मात्सापेक्षत्वात् यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च न तु निरपेक्षस्य निर्मातृत्वमस्ति सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते ॥ किमपेक्षत इति चेत् ॥ धर्माधर्मावपेक्षत इति वदामः ॥ अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः ॥

त्यादिना ॥ ब्रह्मैव जगत्कारणमिति जन्मादिसूत्रे प्रतिज्ञातोर्थः ॥ पृथग्जनः पामरः ॥ निरवद्यं निरंजनमिति श्रुतिः ॥ न मे द्वेष्योस्ति न प्रिय इति स्मृतिः ॥ स्वच्छत्वादीत्यादिपदेन कूटस्थत्वग्रहः स्वच्छत्वादिश्चासावीश्वरस्वभावश्चेति विग्रहः ॥ निमित्तमनपेक्ष्य विषमकारित्वं वैषम्यादिदोषः स्यान्न त्वनपेक्षत्वमीश्वरस्यास्तीति सिद्धांतयति एवं प्राप्त इत्यादिना न च सापेक्षत्वे ऽनीश्वरत्वं सेवामपेक्ष्य फलदातरि राज्ञीश्वरत्वानपायात् ॥

ननुतर्हिधर्माधर्माभ्यामेवविचित्रासृष्टिरस्तुकिमीश्वरेणेत्यतआह ईश्वरस्तुपर्जन्यवदिति॥साधारणहेतुसहितस्यैवासाधारणहेतोःकार्यकारित्वान्नेश्वरवैयर्थ्यं अन्यथापर्जन्यवैयर्थ्यप्रसंगादितिभावः॥यंजनमुन्निनीषते ऊर्ध्वंनेतुमिच्छति तंसाधुकारयति एषईश्वरइत्यन्वयः॥नचकंचिज्जनंसाधुकंचिदसाधुकर्मकारयतोवैषम्यंतदवस्थमितिवाच्यं अनादिपूर्वार्जितसाध्वसाधुवासनयास्वभावेनजनस्यतत्तत्कर्मसुप्रवृत्तावीश्वरस्यसाधारणहेतुत्वात्ततोनदोषईश्वर

ईश्वरस्तुपर्जन्यवत् द्रष्टव्यः॥यथाहिपर्जन्योव्रीहियवादिसृष्टौसाधारणंकारणंभवति॥व्रीहियवादिवैषम्येतुतत्तद्बीजगतान्येवासाधारणानिसामर्थ्यानिकारणानिभवंति॥एवमीश्वरोदेवमनुष्यादिसृष्टौसाधारणंकारणंभवति॥देवमनुष्यादिवैषम्येतुतत्तज्जीवगतान्येवासाधारणानिकर्माणिकारणानिभवंत्येवमीश्वरःसापेक्षत्वान्नवैषम्यनैर्घृण्याभ्यांदुष्यति॥कथंपुनरवगम्यतेसापेक्षईश्वरोनीचमध्यमोत्तमंसंसारंनिर्मिमीतइति॥तथाहिदर्शयतिश्रुतिः॥एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवासाधुकर्मकारयतितंयमेभ्योलोकेभ्योऽधोनिनीषतइति॥पुण्योवैपुण्येनकर्मणाभवतिपापःपापेनेतिच॥स्मृतिरपिप्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वंनिग्रहीतृत्वंचदर्शयति॥येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमित्येवंजातीयका॥३४॥नकर्माविभागादितिचेन्नाऽनादित्वात्॥३५॥सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमिति॥प्राक्सृष्टेरविभागावधारणान्नास्तिकर्मयदपेक्ष्यविषमासृष्टिःस्यात्॥सृष्ट्युत्तरकालंहिशरीरादिविभागापेक्षंकर्मकर्मापेक्षश्चशरीरादिविभागइतीतरेतराश्रयत्वंप्रसज्येत॥अतोविभागादूर्ध्वंकर्मापेक्षईश्वरःप्रवर्ततांनामप्राक्तुविभागाद्वैचित्र्यनिमित्तस्यकर्मणोऽभावात्तुल्यैवाद्यासृष्टिःप्राप्नोतीतिचेत्॥नैषदोषोऽनादित्वात्संसारस्य॥भवेदेषदोषोयद्यादिमान्संसारःस्यात्॥अनादौतुसंसारेबीजांकुरवद्धेतुहेतुमद्भावेनकर्मणःसर्गवैषम्यस्यचप्रवृत्ति

नविरुध्यते ३५॥

इतिभावः॥३४॥ प्रथमसर्गस्यवैषम्यहेतुकर्माभावादेकरूपत्वंस्यात्तथातदुत्तरकल्पानामपीत्याक्षिप्यसमाधत्तेसूत्रकारः॥नकर्मेति॥प्रथमसृष्टेःपश्चाद्भाविकर्मकृतवैषम्यमित्याशंक्यान्योन्याश्रयमाह॥सृष्ट्युत्तरेति॥आद्यासृष्टिरित्युपलक्षणंआद्यावेकरूपत्वेमध्येविषमकर्मोत्पत्तौहेत्वभावेनोत्तरसृष्टीनामपितुल्यत्वस्यदुर्वारत्वादितिद्रष्टव्यं॥परिहारःसुगमः॥३५॥

॥ प्रथमसर्गः कश्चिन्नास्तीत्यत्र प्रमाणं पृच्छति ॥ कथं पुनरिति ॥ उपपत्तिसहितश्रुत्यादिकं प्रमाणमिति सूत्रव्याख्यया दर्शयति ॥ उपपद्यत इति हेतुं विनैव सर्गांगीकारे ज्ञानकर्मकांडवैयर्थ्यं स्यादित्यर्थः ॥ ननु सुखादिवैषम्ये ईश्वरोऽविद्या वा हेतुरस्त्वित्याशंक्य क्रमेण दूषयति ॥ न चेश्वर इत्यादिना ॥ कस्तर्हि हेतुस्तत्राह ॥ रागादीति ॥ रागद्वेषमोहाः क्लेशास्तेषां वासनाभिराक्षिप्तानि कर्माणि धर्माधर्मव्यामिश्ररूपाणि तदपेक्षा त्वविद्या सुखादिसर्गवैचित्र्यहेतुः तस्मादविद्यासहकारित्वेन क्लेशकर्मणामनादिप्रवाहोऽङ्गीकर्तव्य इति भावः किंच सृष्टेः सादित्वे प्रथमशरीरस्योत्पत्तिर्न संभवति हे

कथं पुनरवगम्यते अनादिरेषः संसार इति अत उत्तरं पठति ॥ उपपद्यते चाप्युपलभ्यते च ३६ उपपद्यते च संसारस्यानादित्वं ॥ आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्तानामपि पुनः संसारोद्भूतिप्रसंगोऽकृताभ्यागमप्रसंगश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात् ॥ न चेश्वरो वैषम्यहेतुरित्युक्तं ॥ न चाऽविद्या केवला वैषम्यस्य कारणं एकरूपत्वात् ॥ रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात् ॥ न च कर्मांतरेण शरीरं संभवति ॥ न च शरीरमंतरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसंगः ॥ अनादित्वे तु बीजांकुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः ॥ श्रुतौ तावदनेन जीवेनात्मनेति सर्गप्रमुखे शरीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति ॥ आदिमत्त्वे तु प्रागनवधारितप्राणः सन् कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत ॥ न च धारयिष्यतीत्यतोऽभिलप्येत ॥ अनागताद्धि संबंधादतीतः संबंधो बलवान्भवति अभिनिष्पन्नत्वात् सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति च मंत्रवर्णः पूर्वकल्पसद्भावं दर्शयति स्मृतावप्यनादित्वं संसारस्योपलभ्यते ॥

त्वभावात् न च कर्म हेतुः शरीरात्प्राक् कर्मासंभवात् ॥ तस्मात्कर्मशरीरयोः अन्योन्याश्रयपरिहाराय सर्वैरेव वादिभिः संसारस्यानादित्वमंगीकार्यमित्याह न चेति ॥ सर्गमुखे सृष्ट्यादौ प्रागनवधारितप्राणोऽपि सन्प्रत्यगात्मा भाविधारणनिमित्तेन जीवशब्देनोच्यतामित्यत्राह ॥ न च धारयिष्यतीति ॥ गृहस्थः सदृशीं भार्यामुपेयादित्यादावगत्या भाविवृत्त्याश्रयणमिति भावः ॥ ॥

अस्यसंसारवृक्षस्यस्वरूपंसत्यंमिथ्यावेत्युपदेशंविनानोपलभ्यतेज्ञानंविनांतोपिनास्तिनाप्यादिरुपलभ्यतेअसत्त्वादेवनचसंप्रतिष्ठामध्येस्थितिःदृष्टनष्टस्वरूपत्वादितिगीतावाक्यार्थःसंसारस्यानादित्वेपिमिथ्यात्वादेकमेवाद्वितीयमित्यवधारणमुपपन्नंतस्मान्निरवद्येब्रह्मणिसमन्वयाविरोधइतिसिद्धं॥ ३६॥ सर्वधर्मोपपत्तेश्चनिर्गुणस्यब्रह्मणोजगदुपादानत्ववादिवेदांतसमन्वयोविषयःसकिंयन्निर्गुणंनतदुपादानंयथारूपमितिन्यायेनविरुध्यतेनवेतिसंदेहेभवतीश्वरस्यविषमसृष्टिनिमित्तत्वंतत्प्रयोजकस्यकर्मणःसत्त्वान्नतूपादानत्वंतद्व्यापकस्यसगुणत्वस्याभावादितिप्रत्युदाहरणेनप्राप्तेसिद्धांतसूत्रतात्पर्यमाह॥ चेतनमिति॥ विवर्त्तोपादानत्वंनिर्गुणस्याप्यविरुद्धंअज्ञानत्वस्यभ्रमाधिष्ठानत्वप्रयोजकस्यसत्त्वात्सगुणत्वंत्वव्या-

नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठेति॥ पुराणेचाऽतीतानागतानांचकल्पानांनपरिमाणमस्तीतिस्थापितं॥ १२॥ सर्वधर्मोपपत्तेश्च॥ ३७॥ चेतनंब्रह्मजगतःकारणंप्रकृतिश्चेत्यस्मिन्नवधारितेवेदार्थेपरैरुपक्षिप्तान्विलक्षणत्वादीन्दोषान्पर्यहार्षीदाचार्यः॥ इदानींपरपक्षप्रतिषेधप्रधानंप्रकरणंप्रारिप्समाणःस्वपक्षपरिग्रहप्रधानंप्रकरणमुपसंहरति॥ यस्मादस्मिन्ब्रह्मणिकारणेपरिगृह्यमाणेप्रदर्शितेनप्रकारेणसर्वेकारणधर्माउपपद्यंते॥ सर्वज्ञंसर्वशक्तिमहामायंचब्रह्मेति॥ तस्मादनतिशंकनीयमिदमौपनिषदंदर्शनमिति॥ १३॥ इतिशारीरकमीमांसाभाष्येश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौद्वितीयाध्यायस्यप्रथमःपादःसमाप्तः॥ भाष्य ९५०। टीका ९७५॥ ०—०—० ॥

पकंशब्दादिगुणेष्वनित्यत्वादिभ्रमदर्शनादितिभावः॥ यद्यपिसर्वज्ञत्वंसर्वशक्तित्वंचलोकेकारणधर्मत्वेनाप्रसिद्धं॥ तथापियोयस्यकर्तासतस्यसर्वस्यज्ञाताशक्तश्चेतिप्रसिद्धं॥ ईश्वरस्यापिसर्वकर्तृत्वश्रवणात्प्रसिध्यनुसारेणार्थान्निरतिशयसर्वज्ञत्वंसर्वशक्तित्वंचसिध्यतीत्यभिसंधायाह॥ सर्वज्ञंसर्वशक्तीति॥ महामायमितिकर्तृत्वोपादानत्वकथनेसर्वशंकापंकक्षालनयोक्तंतस्मादौपनिषत्सिद्धांतेनकश्चिद्दोषइतिसिद्धं॥ ३७॥ श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतौशारीरकव्याख्यायांभाष्यरत्नप्रभायांद्वितीयस्याध्यायस्यप्रथमःपादःसमाप्तः॥ १॥ ग्रंथसंख्या॥ १९२५॥

॥ अधिकरणानि॥ १३॥ गौणसूत्राणि २४॥ समग्रसूत्राणि ३७॥

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत्

ॐ तत्सत् ॥ ॐ तत्सत् ॥ श्रीकृष्णानन्दरामसमर्थ ॥ ॐ

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

अथ शारीरकसूत्रभाष्ये रत्नप्रभायां द्वितीयाध्यायस्य द्वितीयपादप्रारम्भः

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत्

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

ॐ तत्सत् ॐ तत्सत्

शा॰भा॰ ॥श्रीगणेशाय नमः॥ सांख्यतार्किकबौद्धाश्च जैनाः पाशुपतादयः यस्य तत्त्वं न जानंति तं वंदे रघुपुंगवं॥१॥ ब्रह्मणि सर्वधर्मोपपत्तिव॥ अ॰२पा॰२
र॰प्र॰टी॰ त्प्रधानेपि तदुपपत्तिमाशंक्य निराचष्टे रचनानुपपत्तेश्च नानुमानं ननु मुमुक्षूणां वाक्यार्थनिर्णयप्रतिबंधनिरासाय वेदांतानां तात्पर्यं
१९९ निश्चेतुमिदं शास्त्रमारब्धं तच्च निर्दोषं तया निश्चितं॥ ततः परपक्षनिरासात्मकोऽयं पादोऽस्मिन् शास्त्रे न संगतः तन्निरासस्य मुमुक्ष्व
नपेक्षितत्वादित्याक्षिपति यद्यपीति परपक्षनिराकरणं विना स्वपक्षस्थैर्याऽयोगात्तत्कर्तव्यमित्याह॥ तथापीति॥ न हि स्वपक्षस्थापना
त्प्रागेव परपक्षप्रत्याख्यानं कार्यमित्यत आह॥ वेदांतार्थेति॥ वेदांततात्पर्यनिर्णयस्य फलवज्ज्ञानकरणांतर्भावादभ्यर्हितत्वं तत्तु

श्रीगणेशाय नमः॥ रचनानुपपत्तेश्च नानुमानं॥१॥ यद्यपीदं वेदांतवाक्यानामैदंपर्यं निरूपयितुं शास्त्रं प्रवृत्तं न
तर्कशास्त्रवत्केवलाभिर्युक्तिभिः कंचित्सिद्धांतं साधयितुं दूषयितुं वा प्रवृत्तं तथापि वेदांतवाक्यानि व्याचक्षाणैः
सम्यग्दर्शनप्रतिपक्षभूतानि सांख्यादिदर्शनानि निराकरणीयानीति तदर्थः परः पादः प्रवर्तते वेदांतार्थनि
र्णयस्य च सम्यग्दर्शनार्थत्वात्तन्निर्णयेन स्वपक्षस्थापनं प्रथमं अंगीकृतं तद्ध्यभ्यर्हितं परपक्षप्रत्याख्यानादिति
ननु मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तं किं परपक्षनिरा
करणेन परद्वेषकरेण॥ बाढमेवं तथापि महाजनपरिगृहीतानि महांति सांख्यादितंत्राणि सम्यग्दर्शनापदेशे सम॰
((न प्रवृत्तान्युपलभ्य भवेत्॥ १९९

रागद्वेषकरत्वात्परमतनिराकरणं न कार्यमिति शंकते नन्विति तत्त्वनिर्णयप्रधाना खल्वि
यं कथाऽऽरब्धा तत्त्वनिर्णयश्च परमतेष्वश्रद्धां विना न सिध्यति सा च तेषु भ्रांतिमूलत्वनिश्चयं विना न सिध्यति स च इमं पादं विना ने
ति स्वसिद्धांतसंरक्षणार्थत्वात्प्रधानसिद्ध्यर्थत्वादयं पादोऽस्मिन् शास्त्रे संगतः संगतत्वाद्धीनरागेणापि कर्तव्य इत्यभिसंधायोक्तं अंगीका
रेण समाधत्ते॥ बाढमित्यादिना अपदेशेन व्याजेन मंदमतीनां तेषु श्रद्धानिमित्तानि बहूनि संतीति तन्निरासाय यत्नः क्रियत इत्यर्थः

स्वमतश्रद्धापरमतद्वेषौतुप्रधानसिध्यर्थत्वादंगीकृतौनाप्ययंद्वेषःपरपक्षतत्वबुद्ध्याहिनिरासोद्वेषमावहति॥नतुतत्वनिर्णयेच्छयाकृतइतिमंत-
व्यं॥पौनरुक्त्यंशंकते॥नन्वीक्षतेरिति॥पूर्वंसांख्यादीनांश्रुत्यर्थानुग्राहकतर्कनिरासाद्श्रौतत्वमुक्तं॥संप्रतिश्रुत्यनपेक्षास्तदीयाःस्वतंत्रायुक्तयो
निरस्यंतइत्यर्थभेदान्नपुनरुक्तिरित्याह॥तदुच्यतइति॥प्रधानमचेतनंजगदुपादानमितिसांख्यसिद्धांतोऽत्रविषयःसकिंप्रमाणमूलोभ्रांतिमू-
लोवेतिसंदेहेसर्वधर्मोपपत्तेश्चेत्युक्तधर्माणांप्रधानेसंभवात्तदेवोपादानमित्याक्षेपसंगत्याप्रमाणमूलत्वंदर्शयन्पूर्वपक्षमाह॥तत्रसांख्याइति॥

केषांचित्तुमंदमतीनामेतान्यपिसम्यग्दर्शनायोपादेयानीत्यपेक्षा तथायुक्तिगाढत्वसंभवेनसर्वज्ञभाषितत्वाच्च
श्रद्धाचतेष्वित्यतस्तदसारतोपपादनायप्रयत्यते॥नन्वीक्षतेर्नाशब्दंकामाच्चनानुमानापेक्षाएतेनसर्वेव्याख्याता
व्याख्याताइतिचपूर्वत्रापिसांख्यादिपक्षप्रतिक्षेपंकृतः किंपुनःकृतकरणेनेति॥तदुच्यतेसांख्यादयःस्वपक्षस्था-
पनायवेदांतवाक्यान्यप्युदाहृत्यस्वपक्षानुगुण्येनैवयोजयंतोव्याचक्षते॥तेषांयद्व्याख्यानंतद्व्याख्यानाभासंन
सम्यक्व्याख्यानमित्येतावत्पूर्वंकृतंइहतुवाक्यनिरपेक्षःस्वतंत्रस्तद्युक्तिप्रतिषेधःक्रियतइत्येषविशेषः॥
तत्रसांख्यामन्यंतेयथाघटशरावादयोभेदामृदात्मतयान्वीयमानाःमृदात्मकसामान्यपूर्वकालोकेदृष्टाःतथासर्वए-
वबाह्याध्यात्मिकाभेदाःसुखदुःखमोहात्मतयान्वीयमानाःसुखदुःखमोहात्मकसामान्यपूर्वकाभवितुमर्हंतियत्सुख-
दुःखमोहात्मकसामान्यंतत्त्रिगुणंप्रधानंमृद्वदचेतनम्॥ ॥ स्वसिद्धांतज्ञानस्यपरमतनिरासंप्रत्युपजीव्यत्वात्पादयोःसंगतिः
परमतनिरासात्मकत्वात्सर्वेषामधिकरणानामेतत्पादसंगतिःपूर्वपक्षेप्रमाणमूलमतविरोधादुक्तश्रुत्यर्थसमन्वयासिद्धिःफलंसिद्धांते
तत्सिद्धिरिति आपादंद्रष्टव्यम्। श्रौतसमन्वयदार्ढ्यार्थत्वादस्यपादस्यश्रुतिसंगतिरितिविवेकः॥भिद्यंतइतिभेदाविकाराःयेविकाराये
नान्वितास्तेतत्प्रकृतिकाइतिव्याप्तिमाह॥यथेति॥सर्वंकार्यंसुखदुःखमोहात्मकवस्तुप्रकृतिकंतदन्वितत्वात्घटवदित्यनुमानमाहतथे

सा·भा·
स·प्र·टी·
२०१

॥ किमर्थं प्रधानं परिणमते तत्राह ॥ चेतनस्येति अर्थो भोगापवर्गरूपः तदर्थं स्वभावत एव प्रवर्त्तते ॥ ननु केनचिच्चेतनेन प्रेर्यत इत्यर्थः तदु-
क्तं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति ॥ अनुमानांतराणि तैरुक्तानि स्मारयति ॥ तथेति ॥ उक्तं हि भेदानां परिमाणात् समन्वयात् शक्ति-
तः प्रवृत्तेश्च कार्यकारणविभागादविभागात् वैश्वरूप्यस्येति अत्र कारिकायां समन्वयादिति लिंगं व्याख्यातं शिष्टानि व्याख्यायंते ॥ तथा हि क्षित्या-
दीनां भेदानां कारणमव्यक्तमस्ति परिमितत्वात् घटवत् न च दृष्टांते साध्यवैकल्यं घटोत्पत्तेः प्रागनभिव्यक्तघटादिरूपकार्यविशिष्टत्वे-
न मृदोऽप्यव्यक्तत्वात् तथा घटादीनां कारणशक्तितः प्रवृत्तेर्महदादिकार्याणामपि कारणशक्तितः प्रवृत्तिर्वाच्या तच्छक्तिमत्कारणमव्यक्तं ॥
किंच कारणात्कार्यस्य विभागो जन्म दृश्यते ॥ क्षितेर्मृत्तिका जायते ततो घट इति एवमविभागः प्रातिलोम्येन प्रलयो दृश्यते घटस्य मृत्तिकायां ।

चेतनस्य पुरुषस्यार्थं साधयितुं स्वभावेनैव विचित्रेण विकारात्मना विवर्त्तत इति ॥ तथा परिमाणादिभिर-
पि लिंगैस्तदेव प्रधानमनुमिमते ॥ तत्र वदामः यदि दृष्टांतबलेनैवैतन्निरूप्येत नाचेतनं लोके चेतनानधि-
ष्ठितं स्वतंत्रं किंचिद्धि शिष्टपुरुषार्थनिर्वर्त्तनसमर्थान् विकारान् विरचयद्दृष्टं गेहप्रासादशयनासनविहार-
भूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यंते ॥

लयः तस्याः क्षितौ ।
क्षितेरप्सु आपां तेजसीत्येतौ विभागाविभा- गौ वैश्वरूप्यस्य विचित्रस्वभावजातस्य दृश्यमानौ पृथक्कृपसीकृतौ क्वचित्कारणे विश्रांतौ विभा-
गत्वादविभागत्वाच्च मृदि घटविभागाविभागवदित्यर्थः ॥ सिद्धांतयति ॥ तत्र वदाम इति ॥ किमनुमानैः अचेतनप्रकृतिकत्वं जगतः साध्यते स्वतंत्राचेत-
नप्रकृतिकत्वं वा आद्ये । सिद्धसाधनता अस्माभिरनादित्रिगुणमायांगीकारात् । द्वितीये घटादिदृष्टांते साध्याप्रसिद्धिरित्याह ॥ यदीति ॥ स्वतंत्रमचेतनं
प्रकृतिरित्येतद्दृष्टांतबलेन तदा निरूप्येत यदि दृष्टांतः क्वचित्स्यात् न तु दृष्टः क्वचिदित्यन्वयः । स्वतंत्रपदार्थमाह चेतनानधिष्ठितमिति । परकी-
यस्य साध्यस्याप्रसिद्धिमुक्त्वा सत्प्रतिपक्षं वक्तुं यद्धि चित्ररचनात्मकं कार्यं तच्चेतनाधिष्ठिताचेतनप्रकृतिकमिति व्याप्तिमाह गेहेति । इत्थं ज-
॥ ॥ गच्चेतनाधिष्ठिताचेतनप्रकृतिकं कार्यत्वात् गेहवदिति प्रयोगः ॥

अ·पा·
२

रम·
२००

विपक्षेविचित्ररचनानुपपत्तिरूपंसत्त्वोक्तंबाधकतर्कंवक्तुंजगतोवैचित्र्यमाह॥तथेति॥बाह्यंपृथिव्यादिभोग्यंआध्यात्मिकंशरीरादिभोगाधिष्ठानमितिविभागःप्रतिनियतोसाधारणोवयवानांविन्यासोरचनायस्यतत्तदित्यर्थः।इत्थंविचित्रंजगच्चेतनानधिष्ठिताजडप्रकृतिःकथंरचयेत्कथमपीत्यर्थः॥यच्चेतनानधिष्ठितमचेतनंतन्नकार्यकारीतिव्याप्तिमुक्ततर्कमूलभूतामाह॥लोष्टेति॥चेतनाःप्रेरितेषुलोष्टादिषुकार्यकारित्वादर्शनादित्यर्थः।किंचानादिजडप्रकृतिःचेतनाधिष्ठितापरिणामित्वान्मृदादिवदित्याह॥मृदिति ननुमृदादिदृष्टा

तथेदंजगदखिलंपृथिव्यादिनानाकर्मफलोपभोग्यंबाह्यमाध्यात्मिकंचशरीरादिनानाजात्यन्वितंप्रतिनियतावयवविन्यासमनेककर्मफलानुभवाधिष्ठानंदृश्यमानंप्रज्ञावद्भिःसंभाविततमैःशिल्पिभिर्मनसापि आलोचयितुमशक्यंसत्कथमचेतनंप्रधानंरचयेत्।लोष्टपाषाणादिष्वदृष्टत्वात्।मृदादिष्वपिकुंभकाराद्यधिष्ठितेषुविशिष्टाकाररचनादृश्यते।तद्वत्प्रधानस्यापिचेतनाधिष्ठितत्वप्रसंगः।नचमृदाद्युपादानस्वरूपव्यपाश्रयेणैवधर्मेणमूलकारणमवधारणीयंनबाह्यकुंभकारादिव्यपाश्रयेणेतिकिंचिन्नियामकमस्ति॥नचैवंसतिकिंचिद्विरुध्यतेप्रत्युतश्रुतिरनुगृह्यतेचेतनकारणतासमर्पणादतोरचनानुपपत्तेश्चहेतोर्नाचेतनंजगत्का((रणमनुमातव्यंभवति॥

न्तेद्वयमप्यस्तिअचेतनत्वंचेतनाधिष्ठितत्वंचेतितत्रपरिणामित्वहेतोरचेतनत्वमेवव्यापकंमृदादिस्वरूपत्वेनान्तरंगत्वात् ननुचेतनाधिष्ठितत्वंव्यापकंतस्यमृदादिबाह्यकुलालादिसापेक्षत्वेनबहिरंगत्वात् तथाचपरिणामित्वेपिमूलप्रकृतेरचेतनत्वधर्मेणेवयोगोनचेतनाधिष्ठितत्वेनेत्याशंक्यनिषेधयति॥नचेति॥महानसदृष्टान्तेऽन्तरंगस्यापिमहानसस्वरूपस्यधूमव्यापकत्वंनास्तितद्भिन्नस्यबहिरंगस्यापिवन्हेस्तदस्तीत्यंतरंगत्वंव्यापकत्वेप्रयोजकंनभवतीतिभावः॥किंचयदचेतनंतच्चेतनाधिष्ठितमेवपरिणमतेइत्यंगीकारेबाधकाभावात्प्रत्युतश्रुत्यनुग्रहाच्चतथांगीकार्यमित्याह॥नचैवंसतीति॥

सा·भा·
स·प्र·टी·
२०१

॥ सुखदुःखमोहान्वयादितिहेतोरसिद्धिद्योतनार्थः सूत्रे चकार इत्याह ॥ अन्वयाद्यनुपपत्तेश्चेति ॥ नानुमानं युक्तमित्यर्थः ॥ आदि-
शब्दः परिमाणादिग्रहार्थः शब्दादीनां बाह्यत्वानुभवादांतरसुखाद्यात्मकत्वमसिद्धं तन्निमित्तत्वाच्च । नहि निमित्तनैमित्तिकयोरभेदे ।
नयोगोक्तिः । दंडघटयोरदर्शनादित्यर्थः ॥ किंच यदि घटे मृद्वत्सुखादिकं शब्दादावन्वितं स्यात्तर्हि सर्वैरविशेषेण सुखादिकमुपल-
भ्येत घटे मृद्वन्न तथोपलब्धिरस्तीति योग्यानुपलब्ध्या हेत्वभावनिश्चय इत्याह ॥ शब्दादीति ॥ विषयस्यैकत्वेपि पुरुषवासनावै-
चित्र्यात्कस्यचित्सुखबुद्धिः कस्यचिद्दुःखबुद्धिः कस्यचिन्मोहबुद्धिर्दृश्यतेऽतो विषयाः सुखाद्यात्मका न भवंतीत्यर्थः ॥ एवं सम-

॥ अन्वयाद्यनुपपत्तेश्चेति चशब्देन हेतोरसिद्धिं समुच्चिनोति ॥ नहि बाह्याध्यात्मिकानां भेदा-
नां सुखदुःखमोहात्मकतयान्वय उपपद्यते । सुखादीनां चांतरत्वप्रतीतेः शब्दादीनां चानतद्रू-
पत्वप्रतीतेः तन्निमित्तत्वप्रतीतेश्च शब्दाद्यविशेषेपि च भावनाविशेषात्सुखादिविशेषोपलब्धेः ॥
तथा परिमितानां भेदानां मूलांकुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमित-
त्वात्संसर्गपूर्वकत्वमनुमिमानस्य सत्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसंगः परिमितत्वावि-

न्वयादितिहेतुं दूषयित्वा परिमाणादिहेतून्दूषयति तथेति ॥ बुद्ध्यादीनां परिमितत्वेन संसर्गपूर्वकत्वसिद्धौ संसृष्टान्यनेकानि स-
त्वरजस्तांसि सिध्यंति ॥ एकस्मिन्संसर्गासंभवात् न ब्रह्मसिद्धिरिति सांख्यस्य भावः ॥ किमिदं परिमितत्वं न तावद्देशतः परिच्छेदः पसां-
नर्गताकाशे तस्याभावेन भागासिद्धेः । नापि कालतः परिच्छेदः सांख्यैः कालस्यानंगीकारात् ॥ अविद्यागुणसंसर्गेण सिद्धसाध-
नाच्च । नापि वस्तुतः परिच्छेदः सत्वादीनां परस्परं भिन्नत्वे सत्यपि साध्याभावेन व्यभिचारादित्याह ॥ सत्वेति ॥ ॥

अ·पा·
२ २

राम·
२०१

यदुक्तंकार्यकारणाविभागोयत्रसमाप्यतेतत्प्रधानमितितन्नब्रह्मणिमायायांवासमाप्तिसंभवात् नचयःकार्यस्यविभागःसचेतनानधिष्ठिताचेतन
नेसमाप्तइतिव्याप्तिरस्तिसर्वत्राचेतनेषुचेतनाधिष्ठानत्वदर्शनादित्याह॥कार्येति॥एतेनाविभागोपिव्याख्यातः।यत्तुयत्परिमितंतदव्यक्तप्रकृति
पूर्वकमितिव्याप्त्यंतरंतस्यापिगुणेष्वनादिषुपरिमितेष्वव्यभिचारः।एतेनसदृशयोरेवप्रकृतिविकारभावादचेतनविकाराणामचेतनमेवप्रकृतिरिति
निरस्तं।चेतनाधिष्ठिताचेतनप्रकृतिकत्वेपिसादृश्योपपत्तेः।नविलक्षणत्वादित्यत्रसादृश्यनियमस्यनिरस्तत्वाच्च।एवंचेतनाधीनकारणशक्तितः
कार्यप्रवृत्तिसंभवात्शक्तितःप्रवृत्तिलिंगमन्यथासिद्धमितिभावः॥१॥स्वतंत्रमचेतनंकारणत्वेननानुमातव्यं॥नस्यसस्वार्थप्रवृत्तेरनुपपत्तेरिति।

**कार्यकारणभावस्तुप्रेक्षापूर्वकनिर्मितानांशयनासनादीनांदृष्टइति नकार्यकारणभावात्बाह्याध्यात्मिकानांभेदाना
मचेतनपूर्वकत्वंशक्यंकल्पयितुं।१।प्रवृत्तेश्च।२।आस्तांतावदियंरचनातत्सिद्ध्यर्थायाप्रवृत्तिः॥साम्यावस्थानात्प्रच्यु
तिःसत्त्वरजस्तमसामंगांगिभावरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिता॥सापिनाचेतनस्यप्रधानस्यस्वतंत्रस्योपप
द्यते।मृदादिष्वदर्शनाद्रथादिषुच।नहिमृदादयोरथादयोवास्वयमचेतनाःसंतःचेतनैःकुलालादिभिरश्वादिभिर्वा
नधिष्ठिताविशिष्टकार्याभिमुखप्रवृत्तयोदृश्यंते॥**

चकारेणानुपपत्तिपदमनुषज्यसूत्रंयोजनीयं।रचनाप्रवृत्त्योःकोभेदइत्याशं
क्यप्रवृत्तिस्वरूपमाह॥साम्येति॥गुणानांकिलसाम्यावस्थानत्वानांप्रलयःतदानकिंचित्कार्यंभवतिप्रलयाभावप्रसंगात्किंत्वादौसाम्यप्रच्युतिरूपंवै
षम्यंभवतिततःकस्यचिद्गुणस्यांगित्वमुद्भूतत्वेनप्राधान्यंकस्यचिदंगत्वंशेषत्वमित्यंगांगिभावोभवति।तस्मिन्सतिमहदादिकार्योत्पादनात्मिकाप्रवृत्ति
स्तयाविविधकार्यविन्यासोरचनेतिभेदइत्यर्थः॥गुणानांप्रवृत्तिःचेतनाधिष्ठानपूर्विकाप्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्याह॥सापीति॥विपक्षेभ
स्वतंत्रेप्रवृत्त्यनुपपत्तिरित्यर्थः।केचित्तुभेदानांप्रवृत्तिशक्तिमत्त्वाच्चेतनानधिष्ठिताचेतनप्रकृतिकत्वमितिशक्तितःप्रवृत्तेरितिलिंगंव्याचक्षते।अ
स्यापिगुणेष्वव्यभिचारःकार्यत्वविशेषणेचविरुद्धताप्रवृत्तिशक्तिमत्त्वेसतिकार्यत्वस्यघटादिषुचेतनाधिष्ठितप्रकृतिकत्वेनोक्तसाध्यविरुद्धेनव्याप्तिदर्श

नारितिपदंनेत्येतिसूत्रेणज्ञापिता॥

ननुलोकेस्वतंत्राऽचेतनानांप्रवृत्त्यदर्शनेपिप्रधानेसाप्रवृत्तिःसिध्यतुतत्राह॥दृष्टान्तेति॥अनुमानशरणस्यतवदृष्टांतंविनाऽतींद्रियार्थसिध्ययोगादितिभावः॥ननुप्रधानस्यप्रवृत्तिंखंडयताचेतनस्यसृष्टौप्रवृत्तिर्वाच्यासानयुक्तेतिसांख्यःशंकते॥नन्विति॥शुद्धचेतनस्यप्रवृत्त्ययोगमंगीकरोति॥सत्यमिति॥तर्हिकेवलस्याचेतनस्यप्रवृत्तिसिद्धिरन्यथासृष्ट्ययोगात्तत्राह॥तथापीति॥केवलस्यचेतनस्याप्रवृत्तावपिचेतनाचेतनयोर्मिथःसंबंधात्सृष्टिप्रवृत्तिरितिभावः॥इमंवेदांतसिद्धांतंसांख्योदूषयति॥नन्विति॥सर्वाप्रवृत्तिरचेतनाश्रयैवदृष्टा॥नत्वचेतनसंबन्धेनापिचेतनस्यक्वचित्प्रवृत्तिर्दृष्टा।तस्मान्नचेतनात्सृष्टिरित्यर्थः॥मतद्वयंश्रुत्वामध्यस्थःपृच्छति॥किंपुनरितियस्मिन्नचेतनेरथादौप्रवृत्तिर्दृष्टातस्यैवसानचेतन

दृष्टाच्चादृष्टसिद्धिः अतःप्रवृत्त्यनुपपत्तेरपिहेतोर्नाचेतनंजगत्कारणमनुमातव्यंभवति॥ ननुचेतनस्यापिप्रवृत्तिःकेवलस्यनदृष्टा।सत्यमेतत्।तथापिचेतनसंयुक्तस्यरथादेरचेतनस्यप्रवृत्तिर्दृष्टा।नत्वचेतनसंयुक्तस्यचेतनस्यप्रवृत्तिर्दृष्टा।किंपुनरत्रयुक्तं।यस्मिन्प्रवृत्तिर्दृष्टातस्यसाउतयत्संयुक्तस्यदृष्टातस्यसेति।ननुयस्मिन्दृश्यतेप्रवृत्तिस्तस्यैवसेतियुक्तमुभयोःप्रत्यक्षत्वात्।ननुप्रवृत्त्याश्रयत्वेनकेवलश्चेतनोरथादिवत्प्रत्यक्षः।प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैवतुचेतनस्यसद्भावसिद्धिःकेवलाचेतनरथादिवैलक्षण्यंजीवद्देहस्यदृष्टमिति॥

तत्रहेतुरितिकिंसांख्यमतंसाधु॥उतयेनचेतनेनाश्वादिनासंयोगादचेतनस्यप्रवृत्तिस्तस्ययुक्तासेतिवेदांतिमतंवासाध्वितिप्रश्नार्थः॥सांख्यआह॥नन्विति॥उभयोःप्रवृत्तितदाश्रययोरित्यर्थः॥दृष्टाश्रयेणैवप्रवृत्तेरुपपन्नत्वाददृष्टचेतनप्रयुक्तिर्नकल्प्येतिभावः॥आत्मनोऽप्रत्यक्षत्वेकथंसिद्धिस्तत्राह॥प्रवृत्तीति॥जीवद्देहस्यरथादिभ्योवैलक्षण्यंप्राणादिमत्त्वंलिंगंदृष्टमितिदृष्ट्वाचेतनस्यसिद्धिरित्यन्वयः।जीवद्देहःसात्मकःप्राणादिमत्त्वाद्व्यतिरेकेणरथादिवदित्यात्मसिद्धिरित्यर्थः॥देहप्रवृत्तिःस्वाश्रयादन्येनज्ञानवतासहभूताप्रवृत्तित्वाद्रथप्रवृत्तिवदित्यनुमानांतरसूचनायप्रवृत्त्याश्रयेत्युक्तं।सद्भावसिद्धिरेवनप्रवर्त्तकत्वमित्येवकारार्थः॥अनुमितस्यसद्भावमात्रेणप्रवृत्तिहेतुत्वेसर्वत्राकाशस्यापिहेतुत्वप्रसंगादि

॥ आत्मनोऽप्रत्यक्षत्वेचार्वाकाणांभ्रमोपिलिंगमित्याह अतएवेति॥ अप्रत्यक्षत्वादेवेत्यर्थः॥ देहान्यात्मनःप्रत्यक्षत्वेभ्रमासंभवादितिभावः॥ दर्शनात्प्रवृत्तिचैतन्ययोरितिशेषः॥ प्रवृत्तिंप्रत्याश्रयत्वमचेतनस्यैवेत्युक्तमंगीकृत्यचेतनस्यप्रयोजकत्वंसिद्धांतीसा

अतएवचप्रत्यक्षेदेहेसतिदर्शनात् असतिचादर्शनात् देहस्यैवचैतन्यमपीति लोकायतिकाःप्रतिपन्नाः। तस्मादचेतनस्यैवप्रवृत्तिरिति तदभिधीयते॥ नब्रूमोयस्मिन्नचेतनेप्रवृत्तिर्दृश्यतेनतस्यसेति भवतुतस्यैवसातुचेतनाद्भवतिइतिब्रूमः। तद्भावेभावात् तदभावेचाभावात्। यथाकाष्ठादिव्यपाश्रयापिदाहप्रकाशलक्षणाविक्रियानुपलभ्यमानापिचकेवलेज्वलने ज्वलनादेवभवति। तत्संयोगेदर्शनात् तद्वियोगेचादर्शनात् तद्वत्। लोकायतिकानामपिचेतनएवदेहोऽचेतनानांरथादीनांप्रवर्त्तकोदृष्टइत्यविप्रतिषिद्धंचेतनस्यप्रवर्त्तकत्वं। ननुतवदेहादिसंयुक्तस्याप्यात्मनोविज्ञानस्वरूपमात्रव्यतिरेकेणप्रवृत्त्यनुपपत्तेः अनुपपन्नंप्रवर्त्तकत्वमितिचेत्। नअयस्कान्तवद्रूपादिवच्चप्रवृत्तिरहितस्यापिप्रवर्त्तकत्वोपपत्तेः। यथायस्कान्तोमणिःस्वयंप्रवृत्तिरहितोप्ययसःप्रवर्त्तकोभवतियथावारूपादयोविषयाः स्वयंप्रवृत्तिरहिताअपिचक्षुरादीनांप्रवर्त्तकाभवंतिएवंप्रवृत्तिरहितोपीश्वरःसर्वज्ञःसर्वगतःसर्वात्मासर्वशक्तिश्चसन्सर्वंप्रवर्त्तयेदित्युपपन्नं। एकत्वात्प्रवर्त्याभावेप्रवर्त्तकत्वानुपपत्तिरितिचेत्॥

धयति।तदभिधीयतइति॥ रथादिप्रवृत्तावश्वादिचेतनस्यान्वयव्यतिरेकौस्फुटौताभ्यांचेतनस्यप्रवर्त्तकत्वंबाह्यानामपिसंमतमित्याह॥ लोकायतिकानामपीति॥ यःप्रवर्त्तकःसःस्वयंप्रवृत्तिमानश्वादिवदितिव्याप्तेरात्मनिव्यापकाभावान्नप्रवर्त्तकत्वमितिकश्चिच्छंकते॥ नन्विति॥ मण्यादौव्यभिचारान्नव्याप्तिरितिपरिहरति॥ नेति॥ ॥

शा॰भा॰ वस्तुनस्सकत्वेपि कल्पितं द्वैतं प्रवर्त्यमस्तीत्याह नाविद्येति॥ अविद्ययाकल्पिते नामरूपप्रपंचे तयैवाविद्यारूपया मायया यः आवेशश्चिदात्मनः कल्पितः स अ॰पा॰
र॰प्र॰टी॰ म्ब न्धः तस्य वशः सामर्थ्यं तेनांतर्यामित्वादिकमीश्वरस्येत्युक्तत्वाच्च चोद्यावसर इत्यर्थः॥२॥ अनादिजडस्य प्रवृत्तिश्चेतनाधीना प्रवृत्तित्वादित्यादिप्र २ २
२०३ वृत्तिवदिति स्थिते। तत्र क्षीरादौ व्यभिचारमाशंक्य तस्यापि पक्षसमत्वेनोक्तानुमानादागमेन च साध्यसिद्धेर्न व्यभिचार इति सूत्रं व्याचष्टे॥ स्यादेतदि

न अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात्॥ तस्मात्संभवति प्रवृत्तिः सर्वज्ञकारणत्वे
।नत्वचेतनकारणत्वे।२। पयोंबुवच्चेत्तत्रापि॥३॥ स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्ध्यर्थं प्रवर्त्तते
यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यंदते एवं प्रधानमचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्त्तिष्यते
इति। नैतत्साधूच्यते। यतस्तत्रापि पयोंबुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरिति अनुमिमीमहे। उभयवादिप्रसिद्धे
रथादावचेतने केवले प्रवृत्तेरदर्शनात् शास्त्रं च योऽप्सु तिष्ठन्योऽपोंऽतरो यमयति। एतस्य वा अक्षरस्य प्रशासने
गार्गि प्राच्योऽन्या नद्यः स्यंदंत इत्येवंजातीयकं समस्तस्य लोकपरिस्यंदितस्येश्वराधिष्ठिततां श्रावयति तस्मात्
साध्यपक्षनिक्षिप्तत्वात्पयोंबुवदित्यनुपन्यासः। चेतनायाश्च धेन्वाः स्नेहेच्छया पयसः प्रवर्त्तकत्वोपपत्तेः वत्सचोष
णेन च पयस आकृष्यमाणत्वाच्च नांबुनोप्यत्यंतमनपेक्षा। निम्नभूम्याद्यपेक्षत्वात्स्यंदनस्य चेतनापेक्षत्वं तु सर्वत्रो
पदर्शितं। उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या
निदर्शितं। शास्त्रदृष्ट्या तु पुनः सर्वत्रैवेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते।३। व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥४॥

त्यादिना॥ साध्यपक्षेति साध्यवता पक्षेण तुल्यत्वादित्यर्थः। अनुपन्यासो न व्यभिचारभूमिरिति यावत्। क्षीरे प्रवर्त्तकत्वेन धेन्वादेः सत्त्वाच्च न व्यभिचार
इत्याह चेतनायाश्चेति। उपदर्शितमनुमानागमाभ्यामिति शेषः। सूत्रकारस्य क्षीरवद्धि न चापीति च वक्तुः पूर्वापरविरोधमाशंक्य लोकदृष्ट्या शास्त्रदृष्ट्या

च सूत्रद्वयमित्यविरोधमाह॥ उपसंहारेति॥३॥

अस्तुप्रधानस्यापिधर्मादिकर्मपुरुषोवाप्रवर्त्तकइत्याशंक्यसूत्रंप्रवृत्तंतद्व्याचष्टे॥सांख्यानामित्यादिना॥प्रधानव्यतिरेकेणकर्मणोनवस्थितेःपु
रुषस्योदासीनत्वात्कदाचित्सृष्टिप्रवृत्तिःकदाचित्प्रलयइत्ययुक्तमित्यर्थः।कर्मणोपिप्रधानात्मकस्याचेतनत्वात्सदासत्वाच्चनकदाचित्कप्रवृ

सर्वज्ञत्वात्२

सांख्यानांत्रयोगुणाःसाम्येनावतिष्ठमानाःप्रधानंनतुतद्व्यतिरेकेणप्रधानस्यप्रवर्त्तकंनिवर्त्तकंवाकिंचिद्बाह्यमपे
क्ष्यमवस्थितमस्ति।पुरुषस्तूदासीनोनप्रवर्त्तकोननिवर्त्तकइत्यतोऽनपेक्षंप्रधानमनपेक्षत्वाच्चकदाचित्प्रधानंमहदा
द्याकारेणपरिणमतेकदाचिन्नपरिणमतइत्येतदयुक्तं।ईश्वरस्यतुसर्वशक्तित्वान्महामायत्वाच्चप्रवृत्त्यप्रवृत्तीन।
रुद्धेते।४।अन्यत्राभावाच्चनतृणादिवत्।५।स्यादेतत्यथातृणपल्लवोदकादिनिमित्तांतरनिरपेक्षंस्वभावादेवक्षीरा
द्याकारेणपरिणमते।एवंप्रधानमपिमहदाद्याकारेणपरिणंस्यतइति।कथंचनिमित्तांतरनिरपेक्षंतृणादीतिगम्य
तेनिमित्तांतरानुपलंभात्।यदिहिकिंचिन्निमित्तमुपलभेमहिततोयथाकामंतेनतेननिमित्तेनतृणाद्युपादायक्षीरंसंपाद
येमहि।नतुसंपादयामहे।तस्मात्स्वाभाविकस्तृणादेःपरिणामः।तथाप्रधानस्यापिस्यादिति।अत्रोच्यते।भवेत्तृणा
दिवत्स्वाभाविकःप्रधानस्यापिपरिणामोयदितृणादेरपिस्वाभाविकःपरिणामोऽ भ्युपगम्येतनत्वभ्युपगम्यतेनि
मित्तांतरोपलब्धेःकथंनिमित्तांतरोपलब्धिरन्यत्राभावात्।धेन्वैवह्युपयुक्तंतृणादिक्षीरीभवति।नप्रहीणमन
डुहाद्युपभुक्तंवा।यदिहिनिर्मित्तमेतत्स्याद्धेनुशरीरसंबंधादन्यत्रापितृणादिक्षीरीभवेत्।नचयथाकामंमानुषैर्न
शक्यंसंपादयितुमित्येतावतानिनिमित्तंभवति॥ २ तिनियामकत्वमितिभावः।४।पुनरपिदृष्टांतबलात्प्रधानस्यस्वतएवका
र्नि
दाचित्कप्रवृत्तिरित्याशंक्यनिषेधतिसूत्रकारः अन्यत्रेत्यादिनापृच्छति॥ कथमितिउत्तरं।निमित्तांतरेति।धेन्वादिनिमित्तांतरंक्षीरीतिसि
द्धांतयति अत्रोच्यतेइति।प्रहीणंनष्टंयदुक्तंक्षीरस्यस्वेच्छयासंपादयितुमशक्यत्वात्स्वाभाविकत्वमितितत्राह॥नचयथाकाममिति॥ ५॥६

प्रधानस्य न स्वतः प्रवृत्तिः स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्याप्यपेक्षाभावप्रसंगादित्येकोर्थः॥ तत्रेष्टापत्तिं निरस्यति॥ इत्यतः प्रधानमिति उक्त॥ प्रसंगस्येष्टत्वे प्रतिज्ञाहानिः स्यादित्यर्थः। अर्थासंभवान्न स्वतः प्रवृत्तिरित्यर्थान्तरं शंकापूर्वकमाह॥ स यदीत्यादिना॥ प्रयोजनमपेक्षितं चेद्वक्तव्यमित्याह॥ तथापीति॥ कूटस्थे पुरुषे स्वतः सुखादिरूपस्यातिशयस्याधातुमशक्यत्वादध्यासानंगीकाराच्च भोगो न युक्तः॥ किंच॥

भवति हि किंचित्कार्यं मानुषसंपाद्यं किंचिद्दैवसंपाद्यं मनुष्या अपि शक्नुवन्त्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं संपादयितुं। प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयन्ति। ततश्च प्रभूतं क्षीरं लभन्ते। तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य परिणामः॥४॥ अभ्युपगमेऽप्यर्थाभावात्॥५॥ स्वाभाविकी प्रधानप्रवृत्तिर्न भवतीति स्थापितं। अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव कुतोऽर्थाभावात्। यदि तावत्स्वाभाविकी प्रधानस्य प्रवृत्तिः न किंचिदन्यदिहापेक्षत इत्युच्येत। ततो यथैव सहकारि किंचिन्नापेक्षते। एवं प्रयोजनमपि किंचिन्नापेक्षेतेत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्तत इतीयं प्रतिज्ञा हीयेत स यदि ब्रूयात्सहकार्येव केवलं नापेक्षते न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं। भोगो वा स्यादपवर्गो वोभयं वेति भोगश्चेत्कीदृशोऽनाधेयातिशयस्य पुरुषस्य भोगो भवेदनिर्मोक्षप्रसंगश्चापवर्गश्चेत्प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्यात् शब्दाद्यनुपलब्धिप्रसंगश्च उभयार्थताभ्युपगमेपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसंग एव॥ २२

प्रधानप्रवृत्तेर्भोगार्थत्वे मोक्षहेतुविवेकख्यात्यभावादनिर्मोक्षप्रसंगश्च अपवर्गार्थत्वे स्वरूपावस्थानरूपमुक्तेः स्वतः सिद्धत्वात्प्रवृत्तिवैयर्थ्यं भोगाभावप्रसंगश्चेत्यर्थः। तृतीयं दूषयति उभयार्थेनेति॥ मीयंते भुज्यंत इति मात्रा भोग्याः औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तन्ते लोकः पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तमिति कारिकोक्तं दूषयति॥

न चेति॥ औत्सुक्यमिच्छाविशेषः केवलजडस्यात्मनो वा न युक्त इत्यर्थः॥ अस्ति पुरुषस्य दृक्शक्तिः चिद्रूपत्वात्। अस्ति च प्रधानस्य सर्गशक्तिः त्रिगुणत्वात् तयोः शक्त्योः दृश्यसृष्टिं विना सार्थक्यायोगात्प्रधानस्य सृष्टौ प्रवृत्तिरिति चेन्न शक्त्योर्नित्यत्वान्मुक्तिनित्यत्वापत्तिरित्याह॥ दृक्शक्तीति॥ ६॥ पुरुषस्य प्रवर्त्तकत्वं निरस्तमपि दृष्टांतेन पुनराशंकां निषेधति पुरुषाश्मवदिति चेत्तथापि॥ प्रधानस्य स्वातंत्र्यं पुरुषस्योदासीन्यं चाऽभ्युपेतं॥

न चौत्सुक्यान्निवृत्त्यर्था प्रवृत्तिर्न हि प्रधानस्याचेतनस्यौत्सुक्यं संभवति॥ न च पुरुषस्य निर्मलस्य निष्कलस्यौत्सुक्यं दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिः न हि दृक्शक्त्यनुच्छेदवत्सर्गशक्त्यनुच्छेदात्संसारानुच्छेदादनिर्मोक्षप्रसंग एव तस्मात्प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तं। ६। पुरुषाश्मवदिति चेत्तथापि। ७। स्यादेतत् यथा कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिशक्तिविहीनः पंगुरपरं पुरुषं प्रवृत्तिशक्तिसंपन्नं दृक्शक्तिविहीनमंधमधिष्ठाय प्रवर्त्तयति॥ यथा वाऽयस्कांतोऽश्मस्वयमप्रवर्त्तमानोऽप्ययः प्रवर्त्तयति॥ एवं पुरुषः प्रधानं प्रवर्त्तयिष्यतीति दृष्टांतप्रत्ययेन पुनः प्रत्यवस्थानमत्रोच्यते॥ तथापि नैव दोषाद्विनिर्मोक्षोऽस्ति॥ अभ्युपेतहानं तावद्दोष आपतति प्रधानस्य स्वतंत्रस्य प्रवृत्त्यभ्युपगमात्पुरुषस्य च प्रवर्त्तकत्वानभ्युपगमात्॥ कथं चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत्॥ पंगुरपि हि अंधं वागादिभिः पुरुषं प्रवर्त्तयति नैवं पुरुषस्य कश्चिदपि प्रवर्त्तनव्यापारोऽस्ति निष्क्रियत्वान्निर्गुणत्वाच्च॥ नाप्ययस्कांतवत्सन्निधिमात्रेण प्रवर्त्तयेत् सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसंगात्॥ अयस्कांतस्य तु अनित्यसन्निधिरस्ति स्वव्यापारः परिमार्जनाद्यपेक्षा चास्यास्तीत्यनुपन्यासः पुरुषाश्मवदिति॥ तथा प्रधानस्याचैतन्यात्पुरुषस्य चौदासीन्यात्तृतीयस्य च तयोः संबंधयितुरभावात्संबंधानुपपत्तिः॥

स्यादेतदिति वदंतं सांख्यं प्रत्याह॥ कथं चेति॥ पुरुषस्य परिस्पंदः प्रयत्नगुणो वा नास्तीति वक्तुं हेतुद्वयं॥ प्रधानपुरुषयोर्नित्यत्वाद्व्यापित्वाच्च नित्यः सन्निधिः अश्मनस्तु परिमार्जनमृजुत्वेन स्थापनमनित्य सन्निधिश्चेति व्यापारोऽस्तीत्यनुपन्यासः समदृष्टांतोपन्यासो न भवतीत्य

गौ२ या

शा॰भा॰ ॥ ननुचिज्जडयोर्द्रष्टृदृश्यभावयोग्यतास्तितयातद्भावः संबंधइत्यतआह ॥ योग्यतेति ॥ चिज्जडत्वरूपायायोग्यतायानित्यत्वात्संबंधनित्यत्वाप॰ अ॰ पा॰ २ २
र॰प्र॰टी॰ त्तिरित्यर्थः यथास्वतंत्रप्रधानप्रवृत्तिपक्षोभोगापवर्गउभयंवाफलमितिविकल्प्यदूषितः ॥ एवंपुरुषाधीनप्रधानप्रवृत्तिपक्षोपिफलाभावेन
२०५ दूषणीयइत्याह ॥ पूर्ववच्चेति ॥ सिद्धांतेपरमात्मनउदासीनस्यकथंप्रवर्तकत्वमित्याशंक्याह ॥ परमात्मेति ॥ सांख्यमतेउभयंविरुद्धंसत्य॰
त्वात् ॥ अस्मन्मतेकल्पिताकल्पितयोरविरोधइत्यतिशयः ॥ ७ ॥ किंप्रधानावस्थाकूटस्थवन्नित्याउतविकारिणीआद्येदोषमाह ॥ तस्यामिति ॥

योग्यतानिमित्तेचसंबन्धेयोग्यतानुच्छेदादनिर्मोक्षप्रसंगः पूर्ववच्चेहाप्यर्थाभावोविकल्पयितव्यः ॥ परमात्मन
स्तुस्वरूपव्यपाश्रयमौदासीन्यंमायाव्यपाश्रयंचप्रवर्तकत्वमित्यस्तिअतिशयः ॥ ७ ॥ अंगित्वानुपपत्तेश्च ॥ ८ ॥ इत
श्चनप्रधानस्यप्रवृत्तिरवकल्प्यतेयद्धिसत्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्यसाम्येनस्वरूपमात्रेणा
वस्थानंसाप्रधानावस्था ॥ तस्यामवस्थायामनपेक्षस्वरूपाणांस्वरूपप्रणाशभयात्परस्परंप्रत्यंगांगिभावानुप
पत्तेः बाह्यस्यचकस्यचित्क्षोभयितुरभावाद्गुणवैषम्यनिमित्तोमहदाद्युत्पादोनस्यात् ॥ ८ ॥ अन्यथानुमितौचज्ञ
शक्तिवियोगात् ॥ ९ ॥ अथापिस्यादन्यथावयमनुमिमीमहे यथानायमनंतरोदोषःप्रसज्येत ॥ नह्यनपेक्षस्व॰
भावाः कूटस्थाअस्माभिर्गुणा अभ्युपगम्यंतेप्रमाणाभावात्। कार्यवशेनतुगुणानांस्वभावोभ्युपगम्यते ॥ यथा
यथाकार्योत्पादउपपद्यतेतथातथाएषांस्वभावोभ्युपगम्यते चलंगुणवृत्तमितिचास्त्यभ्युपगमः ॥ ॥ एम॰ २०५

अंगांगिभावेसाम्यस्वरूपनाशः स्यात् ततः कौटस्थ्यभंगइतिभयादंगांगित्वानुपपत्तेः सृष्ट्यनुपपत्तिरित्यर्थः ॥ द्वितीयंदूषयति ॥ बाह्येति ॥ विरका
लंस्थितस्यसाम्यस्यच्युतौनिमित्तंवाच्यंतच्चास्तीत्यर्थः ॥ ८ ॥ गुणानांमिथोनपेक्षस्वभावत्वान्नस्वतोवैषम्यमित्युक्तंतत्रहेत्वसिद्धिमाशंक्यसूत्रकारःप
रिहरति ॥ अन्यथेति ॥ अनपेक्षस्वभावादन्यथासापेक्षत्वेनगुणानामनुमानात्पूर्वसूत्रोक्तोदोषोनप्रसज्यते। नचैवमपसिद्धांतःकार्यानुसारेण
गुणस्वभावांगीकारादित्याह ॥ चलंगुणवृत्तमिति ॥ ॥

पूर्वसूत्रोक्तांगांगित्वानुपपत्तिदोषाभावमंगीकृत्यपरिहरति॥ एवमपीति॥ कार्यार्थंज्ञानशक्तिकल्पनेब्रह्मवादःस्यादित्यर्थः॥ अंगीकारंत्यजति॥ वैषम्येति॥ सूत्रंव्याचष्टे॥ परस्परेति॥ त्वङ्मात्रमेवज्ञानेंद्रियमेकमनेकशब्दादिज्ञानकारणंपंचकर्मेंद्रियाणिमनश्चेतिसप्तेंद्रियाणि॥ ज्ञानेंद्रियाणिपंचकर्मेंद्रियाणिपंचमनश्चेत्येकादश बुद्धिरहंकारोमनइतित्रीणि॥ एकमितिबुद्धिरेव एवंपूर्वाप

तस्मात्साम्यावस्थायामपिवैषम्योपगमयोग्याएवगुणाअवतिष्ठंतइति॥ एवमपिप्रधानस्यज्ञशक्तिवियोगाद्रचनानुपपत्त्यादयःपूर्वोक्तादोषास्तदवस्थाएवज्ञशक्तिमपित्वनुमिमानःप्रतिवादित्वान्निवर्तेत॥ चेतनमेकमनेकप्रपंचस्यजगतउपादानमितिब्रह्मवादप्रसंगात्॥ वैषम्योपगमयोग्या अपिगुणाःसाम्यावस्थायांनिमित्ताभावान्नैववैषम्यंभजेरन्भजमानावानिमित्ताभावाविशेषात्सर्वदैववैषम्यंभजेरन्नितिप्रसज्यतएवायमनंतरोपिदोषः॥९॥ विप्रतिषेधाच्चासमंजसं॥१०॥ परस्परविरुद्धश्चायंसांख्यानामभ्युपगमः॥ क्वचित्सप्तेंद्रियाण्यनुक्रामंतिक्वचिदेकादश॥ तथाक्वचिन्महतस्तन्मात्रसर्गमुपदिशंति॥ क्वचिदहंकारात्तथाक्वचित्त्रीण्यंतःकरणानिवर्णयंति॥ क्वचिदेकमिति॥ प्रसिद्धएवतुश्रुत्येश्वरकारणवादिन्याविरोधः॥ तदनुवर्तिन्याश्चस्मृतेस्तस्मादप्यसमंजसंसांख्यानांदर्शनमिति॥ अत्राहनन्वौपनिषदानामप्यसमंजसमेवदर्शनं तप्यतापकयोर्जात्यंतरभावानभ्युपगमात्॥ एकंहिब्रह्मसर्वात्मकंसर्वस्यप्रपंचस्यकारणमभ्युपगच्छतामेकस्यैवात्मनोविशेषौतप्यतापकौनजात्यंतरभूतावित्यभ्युपगंतव्यं

रविरोधादितिव्याख्यायश्रुतिस्मृतिविप्रतिषेधाच्चेत्यर्थांतरमाह॥ प्रसिद्धइति॥ तस्माद्भ्रांतिमूलत्वात्सांख्यशास्त्रस्यतेननिर्दोषवेदांतसमन्वयस्यनविरोधइतिसिद्धं। एवमनासामंजस्यमसहमानःसांख्यःप्रत्यवतिष्ठते॥ अत्राहेति॥ तप्योजीवस्तापकःसंसारस्तयोर्भेदानंगीकाराल्लोकप्रसिद्धस्तप्यतापकभावोलुप्येतेत्यर्थः॥ विवृणोति॥ एकंहीति॥ तथाचभेदव्यवहारलोपइत्यसमंजसमित्यर्थः॥ ९

शा॰भा॰ र॰प्र॰टी॰ २०६

ननु तयोरुपादानैक्येऽपि मिथो भेदोऽस्त्येव यथैकवन्ह्यात्मकयोरौष्ण्यप्रकाशकयोरतो न व्यवहारलोप इत्याशंक्य वन्हेरिव ताभ्यामात्मनो मोक्षो न स्यादित्याह ॥ यदि चेदित्यादिना ॥ ननु सत्यपि धर्मिणि स्वभावनाशो मोक्ष उपपद्यते सत्येव जले वीच्यादिनाशदर्शनादित्याशंक्य दृष्टांतासिद्धिमाह ॥ योऽपीति ॥ किंच भेदांगीकारेऽपसिद्धांतः अनंगीकारे लोकप्रसिद्धिबाध इत्याह ॥ प्रसिद्धश्चेति ॥ अर्थो ह्यर्जनाऽलाभादिनार्थिनं तापयतीति तापकः अर्थी तप्यस्तयोरभेदे बाधकमाह ॥ यदीति ॥ अर्थिनोऽन्यस्यार्थस्याभावादर्थित्वाभाववदर्था

अ॰पा॰ २ १

यदि चैतौ तप्यतापकावेकस्यात्मनो विशेषौ स्यातां सताभ्यां तप्यतापकाभ्यां न निर्मुच्यत इति ॥ तापोपशांतये सम्यक्दर्शनमुपदिशत् शास्त्रमनर्थकं स्यात् ॥ नह्यौष्ण्यप्रकाशधर्मस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते। योऽपि जलतरंगवीचीफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरोभावरूपेण नित्या एवेति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः प्रसिद्धश्चायं तप्यतापकयोर्जात्यंतरभावो लोके। तथा हि अर्थी चार्थश्चान्योन्यभिन्नौ लक्ष्येते। यद्यर्थिनः स्वतोऽन्योऽर्थो न स्याद्यस्यार्थिनो यद्विषयमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं स्याद्यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं भवत्यप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति। तथार्थस्याप्यर्थिनोऽर्थत्वं न स्याद्यदि स्यात्स्वार्थत्वमेव स्यात् ॥ नचैतदस्ति ॥ संबंधिशब्दौ ह्येतावर्थी चार्थश्चेति द्वयोश्च संबंधिनोः संबंधः स्यान्नैकस्यैव ॥ तस्माद्भिन्नावेतावर्थार्थिनौ। तथा

शा॰भा॰ २०६

ऽनर्थानर्थिनावपि ॥

दन्यस्यार्थिनोऽसत्वादर्थत्वाभावः प्रसज्येतेत्याह ॥ तथार्थस्यापीति ॥ प्रसंगस्येष्टत्वं निराकरोति ॥ नचैतदस्तीति ॥ अर्थत्वं हि कामनाविषयत्वं तच्च काम्यादन्यस्य कामयितुरसत्वान्न स्याच्च हि स्वस्य स्वार्थत्वमस्ति काम्यस्यैव कामयितृत्वायोगात् तस्माद्भेदोऽगीकार्य इत्यर्थः इतश्च भेद इत्याह ॥ सम्बन्धीति ॥ तथाऽनर्थानर्थिनावपि भिन्नावित्यन्वयः ॥ ॥ ॥

अर्थानर्थयोः स्वरूपोक्तिपूर्वकं तापकत्वं स्फुटयति अर्थिनोऽनुकूल इति ॥ अद्वैतमते मुक्तेरयोगमुक्त्वा स्वमते योगमाह ॥ जात्यंतरेति ॥ तयानय्यया बुद्ध्या पुरुषस्य संयोगः स्वस्वामिभावः तस्य हेतुरनादिरविवेकस्तस्य परिहारो विवेकस्तस्मान्नित्यमुक्तस्यापि पुरुषस्य कथंचिदुपचारान्मोक्षोपपत्ति॥ रित्यर्थः ॥ यथा योधगतौ जयपराजयौ राजन्युपचर्येते ॥ तथा पुरुषादत्यंतभिन्नबुद्धिगतौ बंधमोक्षौ पुरुषे उपचर्येते ॥ तदुक्तं सैव च बध्यते मुच्य

अर्थिनोऽनुकूलोऽर्थः प्रतिकूलोऽनर्थस्ताभ्यामेकः पर्यायेणोभाभ्यां संबध्यते तत्रार्थस्याल्पीयस्त्वान्भूयस्त्वाच्चानर्थस्यो भावेऽपि अर्थोऽनर्थ एवेति तापकः स उच्यते ॥ तप्यस्तु पुरुषो य एकः पर्यायेणोभाभ्यां संबध्यत इति तयोः तप्यतापकयोरेकात्मतायां मोक्षानुपपत्तिः ॥ जात्यंतरभावे तु तत्संयोगहेतुपरिहारात्स्यादपि कदाचिन्मोक्षोपपत्तिरिति ॥ अत्रोच्यते ॥ नैकत्वादेव तप्यतापकभावानुपपत्तेर्भवेद्दोषो यद्येकात्मतायां तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातां न त्वेतदस्ति एकत्वादेव ॥ नह्यग्निरेकः सन्स्वमात्मानं दहति प्रकाशयति वा सत्यप्यौष्ण्यप्रकाशादिधर्मभेदे परिणामित्वे च ॥ किमु कूटस्थे ब्रह्मण्येकस्मिन् तप्यतापकभावः संभवेत् ॥ क्व पुनरयं तप्यतापकभावः स्यादिति उच्यते ॥ किं न पश्यसि कर्मभूतो जीवद्देहस्तप्यस्तापकः सवितेति ॥ ननु तप्तिर्नाम दुःखं सा चेतयितुर्नाऽचेतनस्य देहस्य ॥ यदि हि देहस्यैव तप्तिः स्यात्तस्माद्देहनाशे स्वयमेव नश्यतीति तन्नाशाय साधनं नैषितव्यं स्यादिति उच्यते देहाभावेऽपि केवलस्य चेतनस्य तप्तिर्न दृष्टा न च तयापि तप्तिर्नाम विक्रिया चेतयितुः केवलस्येष्यते ॥ ११

नेच इति सिद्धांतयति ॥ अत्रेति ॥ किं परमार्थदृष्ट्या तप्यतापकभावानुपपत्तिरुच्यते व्यवहारदृष्ट्या वा नाद्य इत्याह ॥ नैकत्वादेवेति ॥ दोषत्वमिति शेषः तस्या अदोषत्वं विवृणोति ॥ भवेदित्यादिना ॥ एतत्तात्विकं विषयविषयित्वं न त्वस्तीत्यर्थः ॥ यत्र तप्यतापकभावो दृष्टस्तत्रैवेति व्यवहारपक्षमादाय सिद्धांती ब्रूते ॥ किं न पश्यसीति ॥ देहस्य तप्यत्वे देहात्मवादापत्तिरिति शंकते ॥ नन्विति ॥ अचेतनस्यैव देहस्य तप्तिर्नेति वदता सांख्येन वक्तव्यं किं चेतनस्य केवलस्य तप्तिः किं वा देहसंहतस्य उत तन्मतेः आहोस्वित्तत्त्वस्य

नाद्य इत्याह ॥ उच्यते इति ॥

॥नद्वितीयतृतीयावित्याह॥नापीत्यादिना॥चतुर्थंशंकते॥सत्त्वमिति॥सत्त्वरजसोस्तप्यतापकत्वेपुरुषस्यसंबंधाभावाच्छास्त्रारंभवैयर्थ्यमिति।
परिहरति॥ताभ्यामिति॥असंगत्वेपिपुरुषस्यतप्यसत्त्वप्रतिबिंबत्वात्तप्तिरितिशंकते॥सत्त्वेति॥तर्हिजलचंद्रस्यचलनवन्मिथ्यैवतप्तिरि
त्यसत्यत्वआगतइत्याह।परमार्थतइति॥इवशब्दमात्रेणकथंमिथ्यात्वप्राप्त्यागमइतिचेदुच्यते इवशब्दस्तप्यबुद्धिसत्त्वसादृश्यंब्रूतेतच्चसादृ।
श्यंपुरुषस्यतप्यत्वरूपंचेत्कल्पितमेववस्तुतस्तप्यत्वाभावादित्युपपादयति।नचेदिति॥पुरुषोवस्तुतस्तप्तिशून्यश्चेदिवशब्दोनदोषायमिथ्यात

नापिदेहचेतनयोःसंहतत्वमशुद्ध्यादिदोषप्रसंगात्॥नचतप्तेरेवतप्तिमभ्युपगच्छति॥कथंतवापितप्यताप
कभावः॥सत्त्वंतप्यंतापकंरजइतिचेन्न॥ताभ्यांचेतनस्यसंहतत्वानुपपत्तेः॥सत्त्वानुरोधित्वाच्चेतनोपितप्यतइवे
तिचेत्॥परमार्थतस्तर्हिनैवतप्यतइत्यापततीवशब्दप्रयोगात्॥नचेत्तप्यतेनेवशब्दोदोषाय॥नहिडुंडुभः
सर्प्पइवेत्येतावतासविषोभवति।सर्प्पोवाडुंडुभइवेत्येतावतानिर्विषोभवति।अतश्चाविद्याकृतोयंतप्यताप
कभावःनपारमार्थिकइत्यभ्युपगंतव्यमितिनैवंसतिममापिकिंचित्दुष्यति॥अथपारमार्थिकमेवचेतनस्यतप्य
त्वमुपगच्छसि॥तवैवसुतरामनिर्मोक्षःप्रसज्येत॥नित्यत्वाभ्युपगमाच्चतापकस्य॥तप्यतापकशक्त्योर्नित्यत्वेपिस तिचेत्॥
निमित्तसंयोगापेक्षत्वात्तप्तेःसंयोगनिमित्तादर्शननिवृत्तावात्यंतिकःसंयोगोपरमस्ततश्चात्यंतिकोमोक्षउपपन्नइ

ज्ञप्तिपरत्वादित्यर्थः॥मिथ्यासादृश्यमेवदोषइतिचेन्नेत्याह॥नहीति॥सविषत्वंनिर्विषत्वंचेवशब्दार्थःकल्पितस्यवद्द्रष्टव्यः॥सांख्यस्याविद्यकेतप्यता
पकत्वेसतिममापिकिंचिन्नदुष्यतिकिंतुइष्टमेवसंपन्नमित्यर्थः॥यदिमिथ्यातप्यत्वांगीकारेऽपसिद्धांतःस्यादितिभीत्यासत्यंतप्यत्वंपुरुषस्यो।
च्यतेतथाप्यपसिद्धांतःकौटस्थ्यहानादनिर्मोक्षश्चसत्यस्यात्मवन्निवृत्त्ययोगादित्याह॥अथेत्यादिना॥किंचरजसोनित्यत्वात्दुःखसातत्यमित्या
हनित्यत्वेति॥अत्रसांख्यःशंकते॥तप्येति॥सत्त्वंपुरुषोवातप्यशक्तिःतापकशक्तिस्तुरजोनिमित्तमविवेकात्मकमदर्शनंतमःतेनसहितःसनिमि
त्तःसंयोगःपुरुषस्यगुणस्वामित्वरूपःतदपेक्षत्वादित्यर्थः॥

मोक्षः न ह्यभावः निमित्तस्य निवृत्त्यभावात् नमोक्ष इति सिद्धांतीपरिहरति॥ नेति॥ नतमसो निवृत्त्यभावेपि विवेकेनोपरमान्मोक्ष इत्यतआह॥ गुणानांचेति चलंगुणवृत्तमित्यंगीकारादितिभावः॥ परपक्षेबंधमोक्षानुपपत्तिमुक्त्वास्वपक्षमुपसंहरति॥ औपनिषदस्यत्विति॥ वस्तुतस्सकत्वेनबंधाभावात् नमुक्त्यभावशंकावसरः॥ व्यवहारेतुभेदांगीकारात्तप्यतापकभावोबंधस्तत्त्वज्ञानान्निवृत्तिश्चोपपद्य

नादर्शनस्यतमसोनित्यत्वाभ्युपगमात्॥ गुणानांचोद्भवाभिभवयोरनियतत्वादनियतनिमित्तः संयोगनिमित्तोपरमइति वियोगस्यापिअनियतत्वात्सांख्यस्यैवानिर्मोक्षोऽपरिहार्यः स्यात्॥ औपनिषदस्यत्वात्मैकत्वाभ्युपगमादेकस्यचविषयविषयिभावानुपपत्तेः॥ विकारभेदस्यचवाचारंभणमात्रत्वश्रवणादनिर्मोक्षशंकास्वप्नेपिनोपजायते॥ व्यवहारेतुयत्रयथादृष्टस्तप्यतापकभावस्तत्रतथैवसइतिनचोदयितव्यःपरिहर्तव्योवाभवति॥ १०॥ प्रधानकारणवादोनिराकृतःपरमाणुकारणवादइदानींनिराकर्तव्यः॥ तत्रादौतावद्योऽणुवादिनाब्रह्मवादिनिदोषउत्प्रेक्ष्यतेसप्रतिसमाधीयते॥ तत्रायंवैशेषिकाणामभ्युपगमःकारणद्रव्यसमवायिनोगुणाःकार्यद्रव्येसमानजातीयंगुणांतरमारभंतेशुक्लेभ्यस्तंतुभ्यःशुक्लस्यपटस्यप्रसवदर्शनात्तद्विपर्ययादर्शनाच्च॥ तस्माच्चेतनस्यब्रह्मणोजगत्कारणत्वेऽभ्युपगम्यमानेकार्येपिजगतिचैतन्यंसमवेयात्तददर्शनात्तुनचेतनंब्रह्मजगत्कारणंभवितुमर्हतीति॥ इममभ्युपगमंतदीययैवप्रक्रिययाव्यभिचारयति॥

तइति नचोद्यावसरः॥ १०॥ वृत्तानुवादेनमहद्दीर्घवदितिस्वमतस्थापनात्मकाधिकरणसंगतिमाह॥ प्रधानेति॥ यद्यपिसांख्यमतनिरासानंतरंपरमाणुवादोनिराकर्तव्यः॥ स्वमतस्थापनस्यस्मृतिपादेसंगतत्वात्तथापिपूर्वत्रप्रधानगुणानांसुखादीनांजगत्यनन्वयात्प्रधानस्यानुपादानत्वमुक्तंतथाब्रह्मगुणचैतन्यानन्वयाद्ब्रह्मणोपिनोपादानत्वमितिदोषोदृष्टांतसंगतिलाभादत्र समाधीयतइत्यर्थः॥

चेतनात् ब्रह्मणो जगत्सर्गवादी वेदांतसमन्वयो विषयः स किं यः समवायिकारणगुणः स कार्यद्रव्ये स्वसमानजातीयगुणारंभकस्तंतुशौक्ल्यवदितिन्यायेनविरुध्यतेनवेतिसंदेहेन्यायस्याव्यभिचाराद्विरुध्यतइतिप्राप्तेव्यभिचारान्ननत्रविरोधइतिसिद्धांतसूत्रंव्याचष्टे॥ एवेत्यादिना॥ यद्यपिनविलक्षणत्वादित्यत्रचेतनसर्गः साधितः तथापिवैशेषिकन्यायस्यतदीयप्रक्रियया व्यभिचारोक्त्यर्थत्वादस्यसूत्रस्यनगतार्थता प्रलयकालेपरमाणवोनिश्चलाअसंयुक्तास्तिष्ठंतिसर्गकालेचादृष्टवदात्मसंयोगा-

महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां॥ ११॥ एषातेषांप्रक्रियापरमाणवः किलकंचित्कालमनारब्धकार्याः यथायोगंरूपादिमंतः पारिमांडल्यपरिमाणाश्चतिष्ठंति॥ तेचपश्चाददृष्टादिपुरःसराः संयोगसचिवाश्चसंतोद्व्यणुकादिक्रमेणकृत्स्नंकार्यजातमारभंतेकारणगुणाश्चकार्येगुणांतरं॥ यदाद्वौपरमाणूद्व्यणुकमारभेतेतदा परमाणुगतरूपादिगुणविशेषाः शुक्लादयोद्व्यणुकेशुक्लादीनपरानारभंते॥ परमाणुगुणविशेषस्तुपारिमांडल्यंनद्व्यणुकेपारिमांडल्यमपरमारभंते द्व्यणुकस्यपरिमाणांतरयोगाभ्युपगमात् अणुत्वह्रस्वत्वेहिद्व्यणुकवर्तिनीपरिमाणेवर्णयंति॥ यदापिद्वेद्व्यणुकेचतुरणुकमारभेतेतदापिसमानंद्व्यणुकसमवायिनांशुक्लादीनामारंभकत्वंअणुत्वह्रस्वत्वेतुद्व्यणुकसमवायिनीअपिनैवारभेते॥ चतुरणुकस्यमहत्त्वदीर्घत्वपरिमाण-योगाभ्युपगमात्॥

तेषुकर्मभवतितेनसंयोगात् द्रव्यांतरस्यसृष्टिर्भवतिकारणगुणाः कार्येगुणांतरमारभंतइतिसामान्येनप्रक्रियामुक्त्वाविशेषतस्तामाह॥ यदाद्वाविति॥ परमाणुः परिमंडलः तद्गतंपरिमाणंपारिमांडल्यमित्युच्यते नचस्वसमानजातीयगुणारंभकंनभवतीत्युक्तन्यायस्यव्यभिचारइतिभावः॥ व्यभिचारस्थलांतरमाह॥ यदापिद्वेइति द्वेद्वेइतिशब्दद्वयंपठितव्यंएवंसतिचतुर्भिर्द्व्यणुकैश्चतुरणुकारंभउपपद्यतेयथाश्रुतेतुद्वाभ्यांद्व्यणुकाभ्यांमहतश्चतुरणुकस्यारंभोनयुज्यतेकारणगतंमहत्वंबहुत्वंवाविनाकार्येमहत्वायोगादितिमंत

प्रकटार्थकारास्तु यत् द्वाभ्यां द्व्यणुकाभ्यामारब्धं कार्यं महत्त्वं दृश्यते तत्तस्य हेतुः प्रचयो नाम प्रसिथिलावयवसंयोग इति रावणप्रणीते भाष्ये दृश्यत इति चिरंतनवैशेषिकदृष्टेदं भाष्यमित्याहुः॥ सर्वथापि द्व्यणुकगतह्रस्वत्वाणुत्वपरिमाणयोरनारंभकत्वाद्व्यभिचारः॥ यद्यपि तार्किकाः द्वाभ्यामेव परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैः त्र्यणुकमिति कल्पयंति तथापि तर्कस्याप्रतिष्ठानात् नियम इति मत्वा ब्रूते॥ यदापि बहव इति॥ कारणगुणाः शुक्लादयः समानजातीयगुणारंभकाः कार्यद्रव्यपरिमाणं तु न कारणपरिमाणारब्धं किंतु कारणगतसं

त१

यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते॥ तदापि समानैषा योजना॥ तदेवं यथा परमाणोः परिमंडलात्सतोऽणु ह्रस्वं च द्व्यणुकं जायते महद्दीर्घं च त्र्यणुकादि न परिमंडलं॥ यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकं जायते नाणु नो ह्रस्वं॥ एवं चेतनात् ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे किं तवच्छिन्नं। अथ मन्यसे विरोधिना परिमाणांतरेणाक्रांतं कार्यद्रव्यं द्व्यणुकादीत्यतोऽनारंभकाणि कारणगतानि पारिमांडल्यादीनीत्यभ्युपगच्छामि॥ न तु चेतनाविरोधिना गुणांतरेण जगत आक्रांतत्वमस्ति येन कारणगता चेतना कार्ये चेतनांतरं नारभेत॥ न ह्यचेतना नाम चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात्। तस्मात्पारिमांडल्यादिवैषम्यात्प्राप्नोति चेतनाया आरंभकत्वमिति॥

१ एवमारभ्यमिति प्रक्रिये तुल्ये इत्यर्थः

॥एवं प्रक्रियां दर्शयित्वा सूत्रं योजयन् व्यभिचारमाह॥ तदेवमिति॥ परमाणुभ्य एव महद्दीर्घं चेत्यनियतप्रक्रियामाश्रित्योक्तं। नियतप्रक्रियामाश्रित्य व्यभिचारमाह॥ यथा वेति॥ अणुह्रस्वेभ्यो द्व्यणुकेभ्योऽणुद्रव्यं न जायते ह्रस्वमपि न जायत इति व्यभिचार इत्यर्थः॥ सूत्रे वाशब्दस्यार्थोऽनुक्ताणुसमुच्चयार्थः॥ तथा च ह्रस्वपरिमंडलाभ्यां द्व्यणुकपरमाणुभ्यां एव महद्दीर्घाणुवच्चेतनादचेतनं जायत इति सूत्रयोजना॥ तत्र ह्रस्वात् महद्दीर्घं त्र्यणुकं॥ परिमंडलाद्व्यणुकमिति विभागः॥ दृष्टांतवैषम्यं शंकते॥ अथ मन्यस इति॥ अचेतनत्वेनैव विरोधिगुण इत्यत आह॥ न ह्यचेत

कार्यद्रव्यस्यपरिमाणांतराक्रांतत्वमंगीकृत्यविवक्षितांशसाम्यमाह॥मैवमिति॥अंगीकारंत्यजति॥नचेति॥उत्पन्नंहिपरिमाणांतरंविरोधिभ
वतितदुत्पत्तेःप्राग्विरोध्यभावात्द्व्यणुकेपारिमांडल्यारंभःकिंनस्यादित्यर्थः॥ननुविरोधिपरिमाणेनसहैवद्रव्यंजायतइत्यतआह॥आरब्धमपीति॥
सहोत्पत्तावपसिद्धांतः अतोविरोध्यभावंसिद्धइतिभावः अणुत्वाद्यारंभेव्यग्रत्वात्पारिमांडल्यादेःस्वसमानगुणानारंभकत्वमित्याशंक्यनिषेधति॥
नचेति॥व्यग्रत्वमन्यथासिद्धिः तत्रहेतुः॥परिमाणांतरस्येति॥अन्यहेतुकत्वेसूत्राण्युदाहरति॥कारणेति॥कारणानांद्व्यणुकानांबहुत्वात्त्र्यणुकेम

मैवंमंस्थाः यथाकारणेविद्यमानानामपिपारिमांडल्यादीनामनारंभकत्वमेवंचैतन्यस्यापीत्यस्यांशस्यसमानत्वा
त्॥नचपरिमाणांतराक्रांतत्वंपारिमांडल्यादीनामनारंभकत्वेकारणं।प्राक्परिमाणांतरारंभात्पारिमांडल्यादी
नामारंभकत्वोपपत्तेः॥आरब्धमपिकार्यद्रव्यंप्राग्गुणारंभात्क्षणमात्रमगुणंतिष्ठतीत्यभ्युपगमात्॥नचपरिमा
णांतरारंभेव्यग्राणिपारिमांडल्यादीन्यतःस्वसमानजातीयंपरिमाणांतरंनारभंते॥परिमाणांतरस्यान्यहेतुत्वाभ्यु
पगमात्॥ कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्चमहत्॥तद्विपरीतमणु॥एतेनदीर्घत्वह्रस्वत्वेव्याख्या।-
ते इतिहिकाणभुजानिसूत्राणि॥नचसन्निधानविशेषात्कुतश्चित्कारणबहुत्वादीन्येवारभंतेनपारिमांडल्यादी
नीत्युच्येत।द्रव्यांतरेगुणांतरेवारभ्यमाणेसर्वेषामेवकारणगुणानांस्वाश्रयसमवायाविशेषात्॥ हत्त्वंमृदोमहत्त्वाद्घटेम

हत्त्वंहितूलपिंडारब्धेऽतिस्थूलतूलपिंडेप्रचयादवयवसंयोगविशेषान्महत्त्वमित्यर्थः॥महत्त्वविरुद्धमणुत्वंपरमाणुगतद्वित्वसंख्ययाद्व्य
णुकेभवतीत्याह॥तदिति॥यन्महत्त्वस्यासमवायिकारणंतदेवमहत्त्वसमानाधिकरणस्यदीर्घत्वस्य॥यच्चाणुत्वस्यासमवायिकारणंतदे
वाणुत्वाविनाभूतह्रस्वत्वस्यासमवायिकारणमित्यतिदिशति॥एतेनेति॥अतोमहत्त्वादेरहेतुत्वात्पारिमांडल्यादीनांव्यग्रत्वमसिद्धमिति।
भावः॥तेषांसन्निधिविशेषाभावात्समानगुणारंभकत्वमित्यपिनवाच्यमित्याह॥नचेति।पारिमांडल्यादीनामपिबहुत्वादिवत्समवायिकारणगत

[illegible]
राम
२०९

॥ तेषामनारंभकत्वेकार्यद्रव्यस्यविरोधिगुणाक्रांतत्वंव्यग्रत्वमसन्निधिर्वानहेतुरित्युक्तिफलमाह॥ तस्मादिति॥ यत्तुकारणगुणः स्वसमानगुणारंभकइतिव्याप्तिः सामान्यगुणेषुपारिमांडल्यादिषुव्यभिचारेपियोद्रव्यसमवायिकारणगतोविशेषगुणः सस्वसमानजातीयगुणारंभकइति व्याप्तिश्चैतन्यस्यविशेषगुणत्वादारंभकत्वंदुर्वारमितितन्मंदं। चित्रपटहेतुतंतुगतेषुनीलादिरूपेषुविजातीयचित्ररूपहेतुषुव्यभिचाराच्चैतन्यस्यात्मत्वेनगुणत्वाभावाच्चेतिमंतव्यं॥ तस्माच्चेतनाद्विजातीयारंभोयुक्तइति।

तस्मात्स्वभावादेवपारिमांडल्यादीनामनारंभकत्वं॥ तथाचेतनाया अपीतिद्रष्टव्यं॥ संयोगाच्चद्रव्यादीनांविलक्षणानामुत्पत्तिदर्शनात्॥ समानजातीयोत्पत्तिव्यभिचारः॥ द्रव्येप्रकृतेगुणोदाहरणमयुक्तमितिचेत्॥ नदृष्टांतेनविलक्षणारंभमात्रस्यविवक्षितत्वात्॥ नचद्रव्यस्यद्रव्यमेवोदाहर्तव्यंगुणस्यवागुणएवेतिकश्चिन्नियमेहेतुरस्तिसूत्रकारोपिभवतांद्रव्यस्यगुणमुदाजहार॥ प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात्संयोगस्यपंचात्मकंनविद्यतइति॥ यथाप्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयत्संयोगोऽप्रत्यक्षएवंप्रत्यक्षाप्रत्यक्षेषुपंचसुभूतेषुसमवयच्छरीरमप्रत्यक्षंस्यात्प्रत्यक्षंहिशरीरंतस्माच्चपांचभौतिकमिति॥ एतदुक्तंभवतिगुणश्चसंयोगोद्रव्यंशरीरंदृश्यतेत्वितिचात्रापिविलक्षणोत्पत्तिः प्रपंचिता॥ नन्वेवंसतितेनैवैतत्कृतंनेतिब्रूमः तत्सांख्यप्रत्युक्तमेतत्तुवैशेषिकंप्रति।

स्थितं॥ तत्रोदाहरणांतरमाह॥ संयोगाच्चेति॥ ननुचेतनंब्रह्मकार्योपादानत्वात्द्रव्यंतच्चविलक्षणस्योपादानमितिप्रकृतेकिंचिद्द्रव्यमेवविलक्षणकार्यकरमुदाहर्तव्यंनसंयोगस्यगुणस्योदाहरणमितिशंकते॥ द्रव्यइति॥ गुणाद्द्रव्यवच्चेतनादचेतनारंभ इतिविलक्षणारंभकत्वांशेऽयंदृष्टांतइति परिहरति॥ नेति॥ अनियमः कणादसंमतइत्याह॥ सूत्रकारोपीति॥ एतावताकथमनियमस्तत्राह॥ एत

शा·भा·
र·प्र·टी·
२१०

अ·पा·
२ २

नविलक्षणत्वन्यायेनपुनरुक्त्यभावेतिदेशाधिकरणेनपुनरुक्तिरितिशंकनेनन्वतिदेशइति॥समानगुणारंभनियमस्यपारिमांडल्यादिदृष्टांतेनभं
गार्थमस्यारंभइत्याह॥सत्यमिति॥तस्यैवातिदेशस्येत्यर्थः॥११॥वैशेषिकमतपरीक्षामारभते॥उभयथापिनकर्मातस्तदभावः॥नास्यप्रासंगिकेनपूर्वा
धिकरणेनसंगतिरपेक्षितेतिमत्वानः प्रधानस्येश्वरानधिष्ठितस्याऽकारणत्वेपिपरमाणूनांतदधिष्ठितानांकारणत्वमस्त्वितिप्रत्युदाहरणसंगत्यासां
स्याधिकरणानंतर्यमस्यवदन्तात्पर्यमाह॥इदानीमिति॥द्व्यणुकादिक्रमेणपरमाणुभिर्जगदारभ्यतइतिवैशेषिकराद्धांतोत्रविषयः॥सकिंमानमू
लोभ्रांतिमूलोवेतिसंदेहेपूर्वपक्षयति॥सचेतितैःपटादिभिःसामान्यंक्षित्यादेःकार्यद्रव्यत्वंतेनेत्यर्थः॥विमतंसावयवंक्षित्यादिकंस्वन्यूनपरिमाणसं

नन्वतिदेशोपिसमानन्यायतयाकृतएतेनशिष्टापरिग्रहाअपिव्याख्याताइतिसत्यमेतत्तस्यैवत्वयंवैशेषिकप्र
क्रियारंभेतत्प्रक्रियानुगतेननिदर्शनेनप्रपंचःकृतः।११।उभयथापिनकर्मातस्तदभावः॥१२॥इदानींपरमाणुकारण
वादंनिराकरोति॥सचवादइत्थंसमुत्तिष्ठतेपटादीनिहिलोकेसावयवानिद्रव्याणिस्वानुगतैरेवसंयोगसचिवैस्तंत्वा
दिभिर्द्रव्यैरारभ्यमाणानिदृष्टानितत्सामान्येनयावत्किंचित्सावयवंतत्सर्वंस्वानुगतैरेवसंयोगसचिवैस्तैस्तैर्द्रव्यैरारब्ध
मितिगम्यते॥सचायमवयवावयविविभागोयतोनिवर्त्ततेसोपकर्षपर्यंतगतःपरमाणुःसर्वंचेदंजगत्गिरिसमुद्रादिकं
सावयवंसावयवत्वाच्चाद्यंतवत्॥नचाकारणेनकार्येणभवितव्यमित्यतःपरमाणवोजगतःकारणमितिकणभुगभिप्रा

न२

योगसचिवानेकद्रव्यारब्धंकार्यद्रव्यत्वात्पटादिवदितिप्रयोगःस्वेष्टपरमाणुसिद्ध्यर्थानिसाध्यविशेषणानि॥नन्वेतावताकथंपरमाणुसि।
द्धिस्तत्राह॥सचायमिति॥विमतंसावयवत्वंपक्षतावच्छेदकंयतोनिवर्त्ततेसन्यूनपरिमाणस्यापकर्षस्यपर्यंतत्वेनावसानभूमित्वेनावगतःपरमा
णुरित्यर्थः॥यावत्सावयवमनुमानप्रवृत्तेःद्व्यणुकन्यूनद्रव्यंनिरवयवंसिध्यतीतिभावः॥जगन्नित्यत्ववादात्कार्यद्रव्यत्वहेत्वसिद्धिरितिवदं।
तंप्रत्याह॥सर्वंचेति॥विमतमाद्यंतवत्सावयवत्वात्पटवदित्यर्थः॥हेतोरसिद्धिंनिरस्याप्रयोजकत्वंनिरस्यति॥नचेति॥ ९ ॥

राम
२१०

तेकतिविधाइत्याकांक्षायामाह नानीति॥ प्रलयेतेषामपिनाशान्नजगत्कारणत्वमित्याशंक्याह॥ तेषांचेति॥ अवयवानांविभागान्ना
शाद्वाऽवयविनोनाशःपरमाणूनांनिरवयवत्वेनावयवविभागादेर्नाशहेतोरसंभवान्ननाशइत्यर्थः तेषांनित्यत्वेफलितंसृष्टिक्र
ममाह॥ ततइति॥ एवंकाणादमतस्यमानमूलत्वात्तेनवेदांतसमन्वयस्यविरोधादसिद्धिरितिपूर्वपक्षेफलंतस्यभ्रांतिमूलत्वा

तानीमानिचत्वारिभूतानिभूम्यप्तेजःपवनाख्यानिसावयवान्युपलभ्यचतुर्विधाःपरमाणवःपरिकल्प्यं
ते॥ तेषांचापकर्षपर्यंतगतत्वेनपरतोविभागासंभवाद्विनश्यतांपृथिव्यादीनांपरमाणुपर्यंतोविभागोभवतिसप्र
लयकालः॥ ततःसर्गकालेचवायवीयेष्वणुष्वदृष्टापेक्षंकर्मोत्पद्यते॥ तत्कर्मस्वाश्रयमणुमण्वंतरेणसंयुनक्तित
तोद्व्यणुकादिक्रमेणवायुरुत्पद्यते॥ एवमग्निरेवमापएवंपृथिवीएवमेवशरीरंसेंद्रियमित्येवंसर्वमिदंजगदणुभ्यःसं
भवतिअणुगतेभ्यश्चरूपादिभ्योद्व्यणुकादिगतानिरूपादीनिसंभवंति॥ तंतुपटन्यायेनेतिकाणादामन्यंते॥ तत्रेदमभि
धीयते॥ विभागावस्थानांतावदणूनांसंयोगःकर्मापेक्षोऽभ्युपगंतव्यःकर्मवतांतंत्वादीनांसंयोगदर्शनात्कर्मणश्चका
र्यत्वान्निमित्तंकिमप्यभ्युपगंतव्यं॥ अनभ्युपगमेनिमित्ताभावान्नाणुष्वाद्यंकर्मस्यादभ्युपगमेपियदिप्रयत्नोऽभि
घातादिर्वायथादृष्टंकिमपिकर्मणोनिमित्तमभ्युपगम्येततस्यासंभवान्नैवाणुष्वाद्यंकर्मस्यात्॥ नहितस्यामव
स्थायामात्मगुणःप्रयत्नःसंभवति॥ शरीराभावाच्छरीरप्रतिष्ठेहिमनस्यात्मनःसंयोगेसत्यात्मगुणःप्रयत्नोजायते॥
एतेनाभिघाताद्यपिदृष्टंनिमित्तंप्रत्याख्यातव्यंसर्गोत्तरकालंहितत्सर्वंनाद्यस्यकर्मणोनिमित्तंसंभवति॥ दृष्टविरोधइतिसि

द्धांतयति॥ तत्रेदमितिप्रलयेविभक्तानांपरमाणूनामन्यतरकर्मणोभयकर्मणावासंयोगोवाच्यःकर्मणश्चनिमित्तंप्रयत्नादिकंदृष्टंयथाप्रयत्न
वदात्मसंयोगाद्देहचेष्टावाय्वाद्यभिघाताद्वृक्षादिचलनंहस्तनोदनादिष्वादिगमनंतद्वदणुकर्मणोदृष्टंनिमित्तमभ्युपगम्यतेनवाद्वितीयेकर्मानु

नाद्यःप्रयत्नादेः स्वस्यपुनरकालीनत्वादित्युभयथापिनकर्मसंभवतिअतः कर्मासंभवात्तस्यसंयोगपूर्वकद्व्यणुकादिसर्गस्याभावइतिसूत्रा
र्थः स्थिरस्यवेगवत् द्रव्यसंयोगविशेषोऽभिघातः सएवचलस्यनोदनमितिभेदः दृष्टनिमित्ताऽभावेपिअदृष्टवदात्मसंयोगादणुषुक
र्मेतिशंकते॥ अथादृष्टमितिविकल्पपुरःसरंदूषयति॥ तत्पुनरिति॥ जडात्मवदणोराश्रयत्वंकिंनस्यादितिमत्वाविकल्पः कृतइति
मंतव्यं अत्रापिसूत्रंयोजयति॥ उभयथेति॥ जीवाधिष्ठितमदृष्टंनिमित्तमस्त्वित्यतआह॥ आत्मनश्चेति॥ अचेतनत्वान्नाधिष्ठातृत्व

अथादृष्टमाद्यस्यकर्मणोनिमित्तमित्युच्येत॥ तत्पुनरात्मसमवायिवास्यादणुसमवायिवा उभयथापिनादृष्ट
निमित्तमणुषुकर्मावकल्प्येतादृष्टस्याचेतनत्वात्॥ नह्यचेतनंचेतनेनानधिष्ठितंस्वतंत्रंप्रवर्त्ततेप्रवर्त्तयतिवेतिसां।
ख्यप्रक्रियायामभिहितं॥ आत्मनश्चानुत्पन्नचैतन्यस्यतस्यामवस्थायामचेतनत्वात्॥ आत्मसमवायित्वाभ्युप
गमाच्चनादृष्टमणुषुकर्मणोनिमित्तंस्यादसंबंधाददृष्टवतापुरुषेणास्त्यणूनांसबन्धइतिचेत्॥ संबंधसातत्या
त्प्रवृत्तिसातत्यप्रसंगोनियामकांतराभावात्तदेवंनियतस्यकस्यचित्कर्मनिमित्तस्याभावात् नाणुष्वाद्यंकर्म
स्यात्कर्माभावात्तन्निबन्धनःसंयोगोनस्यात्संयोगाभावाच्चतन्निबन्धनंद्व्यणुकादिकार्यजातंनस्यात्॥ सं
योगश्चाणोरण्वंतरेणसर्वात्मनावास्यादेकदेशेनवा॥ ११ मितिशेषः भिन्नेश्वरस्याधिष्ठातृत्वमग्रेनिराकरिष्यते॥ अचेतन
तै॰
त्वमदृष्टस्यकर्मनिमित्तत्वाभावेहेतुरुक्तः हेत्वंतरमाह॥ आत्मसमवायित्वेति॥ गुरुत्ववददृष्टमपिस्वाश्रयसंयुक्तेक्रियाहेतुरितिशंक
ते॥ अदृष्टवैतिविभुसंयोगस्याणुषुसदासत्वात्क्रियासातत्येप्रलयाभावःस्यादितिदूषयति॥ संबंधेतिकादाचित्कप्रवृत्तेरदृष्टनियम्य
त्वायोगेपीश्वरान्नियमइत्यतआह॥ नियामकांतरेति॥ यत्ज्ञानंतच्छरीरजन्यमितिव्याप्तिविरोधेननित्यज्ञानासिद्धेस्तद्गुणईश्वरोना।
स्ति॥ अस्तित्वेपिसदासत्वान्ननियामकत्वमितिभावः सूत्रार्थंनिगमयति॥ तदेवमिति॥ संयोगस्यहेतुत्वंखंडयित्वास्वरूपंखंडयति॥ संयो

संयोगस्याव्याप्यवृत्तित्वएकस्मिन्नितरस्यांतर्भावात्कार्यस्य पृथुत्वायोगात्सर्वंकार्यंपरमाणुमात्रंस्यादित्यर्थः॥ किंचसांशद्रव्येसंयोगस्यैकांशवृत्तित्वंदृष्टंनहिविरोधादव्याप्यवृत्तित्वंनकल्प्यमित्याह॥ दृष्टेति॥ परमाणोःसंयोगएकदेशेनचेदितिसंबंधः दिग्भेदेनकल्पितप्रदेशस्यसंयोगस्यापिकल्पितत्वात्ततःकार्यंनोत्पद्येतउत्पन्नंवामिथ्यास्यादित्यपसिद्धांतइत्यर्थः॥ काणादानांसर्गप्रत्युक्तौसूत्रंयोजयित्वाप्रलयनिरासेपिसूत्रंयोजयति॥ यथाचेति॥ परमाणूनांकर्मणासंयोगात्सर्गःविभागात्प्रलयइतिप्रक्रियानयुक्तायुग

सर्वात्मनाचेदुपचयानुपपत्तेरणुमात्रत्वप्रसंगोदृष्टविपर्ययप्रसंगश्च॥प्रदेशवतोद्रव्यस्यप्रदेशवताद्रव्यांतरेणसंयोगस्यदृष्टत्वादेकदेशेनचेत्सावयवत्वप्रसंगः परमाणूनांकल्पिताःप्रदेशाःस्युरितिचेत्॥ कल्पितानामवस्तुत्वात्॥ अवस्त्वेवसंयोगइतिवस्तुनःकार्यस्यासमवायिकारणंनस्यात्॥ असतिचासमवायिकारणेद्व्यणुकादिकार्यद्रव्यंनोत्पद्येत॥ यथाचादिसर्गेनिमित्ताभावात्संयोगोत्पत्त्यर्थंकर्मनाणूनांसंभवति॥ एवंमहाप्रलयेपिविभागोत्पत्त्यर्थंकर्मनैवाणूनांसंभवेत्॥ नहितत्रापिकिंचिन्नियतंतन्निमित्तंदृष्टंअस्त्यदृष्टमपिभोगप्रसिद्ध्यर्थंनप्रलयप्रसिद्ध्यर्थमित्यतोनिमित्ताभावान्नस्यादणूनांसंयोगोत्पत्त्यर्थंविभागोत्पत्त्यर्थंवाकर्मातश्चसंयोगविभागाभावात्तदायत्तयोःसर्गप्रलययोरभावःप्रसज्येततस्मादनुपपन्नोयंपरमाणुकारणवादः॥१२॥ समवायाभ्युपगमाच्चसाम्यादनवस्थितेः॥१३॥ समवायाभ्युपगमाच्चतदभावइतिप्रकृतेनाणुवादनिराकरणेनसंबध्यते॥

पदनंतपरमाणूनांविभागेनियतस्याभिघातादेर्दृष्टस्यनिमित्तस्यासत्त्वाद्धर्माधर्मरूपादृष्टस्यसुखदुःखार्थत्वेनसुखदुःखशून्यप्रलयप्रयोजकत्वायोगाच्चादृष्टनिमित्तेनकर्मणाविभागःसंभवति॥ तथाचदृष्टादृष्टनिमित्तयोरसत्त्वादुभयथापिसंयोगार्थत्वेनविभागार्थत्वेनचकर्मनास्तिअतःकर्माभावात् तयोःसंयोगविभागपूर्वकयोःसर्गप्रलययोरभावइतिसूत्रयोजना॥१२॥ समवायाभ्युपगमाच्चतदभावः॥

अणुवादासंभव इतियोग्यतयासंबध्यते॥ द्व्यणुकसमवाययोःपरमाणुभिन्नत्वसाम्यात् द्व्यणुकवत्समवायस्यापिसमवायांतरंसि-
त्यनवस्थितिरित्यर्थः॥ नन्विहतंतुषुपटइत्यादिविशिष्टधीनियामकःसमवायोनसंबंधांतरमपेक्षतेस्वरूपेणैवनित्यसंबद्धत्वादितिशंक-
ते॥ नन्विहेति॥ संयोगस्यापिस्वरूपसंबंधोपपत्तेःसमवायोनस्यादितिदूषयति॥ नेति॥ संबंधिभिन्नत्वाच्चेदपेक्षासमवायस्यापितुल्या

द्वाभ्यांचाणुभ्यांद्व्यणुकमुत्पद्यमानमत्यंतंभिन्नमणुभ्यामण्वोःसमवैतीत्यभ्युपगम्यतेभवता॥ नचैवमभ्युपग-
न्तुंनाशक्यतेऽणुकारणतासमर्थयितुंकुतःसाम्यादनवस्थितेः॥ यथैवह्यणुभ्यामत्यंतभिन्नंसत् द्व्यणुकंसमवाय-
लक्षणेनान्येनसंबंधेनताभ्यांसंबध्यते॥ एवंसमवायोपिसमवायिभ्योऽत्यंतभिन्नःसन्समवायलक्षणेनान्येनै-
वसंबंधेनसमवायिभिःसंबध्येतात्यंतभेदसाम्यात्॥ ततश्चतस्यतस्यान्योन्यःसंबंधःकल्पयितव्यइत्यनवस्थैवप्रस-
ज्येत॥ नन्विहप्रत्ययग्राह्यःसमवायोनित्यसंबद्धएवसमवायिभिर्गृह्यते॥ नासंबद्धःसंबंधांतरापेक्षोवाततश्चनतस्या-
न्यःसंबंधःकल्पयितव्योयेनानवस्थाप्रसज्येतेति॥ नेत्युच्यते॥ संयोगोप्येवंसतिसंयोगिभिर्नित्यसंबद्धएवेतिसमवाय-
वत्नान्यंसंबंधमपेक्षते॥ अथार्थांतरत्वात्संयोगःसंबंधांतरमपेक्षेत॥ समवायोपितर्ह्यर्थांतरत्वात्संबंधांतरमपेक्षे-
त॥ नचगुणत्वात्संयोगःसंबंधांतरमपेक्षतेनसमवायोऽगुणत्वादितियुज्यतेवक्तुं॥ अपेक्षाकारणस्यतुल्यत्वात्॥
गुणपरिभाषायाश्चातंत्रत्वात्॥ तस्मादर्थांतरंसमवायमभ्युपगच्छतःप्रसज्येतैवानवस्थाप्रसज्यमानायांचानवस्था-
यामेकासिद्धौसर्वासिद्धेर्द्वाभ्यामणुभ्यांद्व्यणुकंनैवोत्पद्येततस्मादप्यनुपपन्नःपरमाणुकारणवादः॥१३॥ गुणपरिभाषा-

याश्चेति॥ गुणत्वाभावेपिकर्मसामान्यादीनांसमवायांगीकाराद्गुणत्वंसमवायित्वेनव्यापकं॥ नापिव्याप्यंगुणस्यापिसमवायवत्स्वरूपसं-
बंधसंभवेनव्याप्त्यनुकूलतर्काभावात्तस्मात्संबंधिभिन्नत्वमेवसंबंधांतरापेक्षायांकारणंतस्यसमवायेपितुल्यत्वादनवस्थादुर्वारासाचमूल-

समवाया १
क्षयकरीतयासिद्धौसमवेतद्व्यणुकासिद्धिरित्यर्थः॥१३॥

॥सूत्रंव्याचष्टे॥ अपिचेति॥ अनुभयस्वभावत्वेनैमित्तिकीप्रवृत्तिर्वाच्यानिमित्तंचकालादृष्टादिकंनित्यसन्निहितमितिनित्यमेवप्रवृत्तिप्रसंगः तस्यानिमित्तत्वे प्रवृत्त्यभाववदित्यर्थः॥ किंचपरमाणवः समवायिकारणवंतः कारणापेक्षयास्थूलाअनित्याश्चरूपव

नित्यमेवचभावात्॥१४॥ अपिचाणवः प्रवृत्तिस्वभावावानिवृत्तिस्वभावावाउभयस्वभावावाऽनुभयस्वभावावाभ्युपगम्यंतेगत्यंतराभावात् चतुर्धापिनोपपद्यते॥ प्रवृत्तिस्वभावत्वेपिनित्यमेवप्रवृत्तेर्भावात्प्रलयाभावप्रसंगः। निवृत्तिस्वभावत्वेपिनित्यमेवनिवृत्तेर्भावात्सर्गाभावप्रसंगः॥ उभयस्वभावत्वंचविरोधादसमंजसं अनुभयस्वभावत्वेतुनिमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्यनित्यसन्निधानान्नित्यप्रवृत्तिप्रसंगादतंत्रत्वेप्यदृष्टादेर्नित्याऽप्रवृत्तिप्रसंगात्। तस्मादप्यनुपपन्नः परमाणुकारणवादः।१४। रूपादिमत्त्वाच्चविपर्ययोदर्शनात्॥१५॥ सावयवानांद्रव्याणामवयवशोविभज्यमानानांयतःपरोविभागोनसंभवतितेचतुर्विधारूपादिमंतःपरमाणवःचतुर्विधस्यरूपादिमतोभूतभौतिकस्यारंभकाःनित्याश्चेतियद्वैशेषिकाअभ्युपगच्छंतिसतेषामभ्युपगमोनिरालंबनएव॥ यतोरूपादिमत्त्वात्परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येतपरमकारणापेक्षयास्थूलत्वमनित्यत्वंचतेषामभिप्रेतविपरीतमापद्येतेत्यर्थः कुतएवंलोकेदृष्टत्वात् यद्धिलोकेरूपादिमद्वस्तुतत्स्वकारणापेक्षयास्थूलमनित्यंचदृष्टं॥ तद्यथापटस्तंतूनपेक्ष्यस्थूलोऽनित्यश्चभवति॥ तंतवश्चांशूनपेक्ष्यस्थूलाअनित्याश्चभवंति॥ तथाचामीपरमाणवोरूपादिमंतस्तैरभ्युपगम्यंते॥

त्त्वाद्रसवत्त्वाद्गंधवत्त्वात्स्पर्शवत्त्वात् घटवदितिसूत्रंयोजयितुंपरप्रक्रियामाह। सावयवानामित्यादिना॥ नन्वत्रपरमाणुत्वंपक्षतावच्छेदकं तद्विरुद्धंस्थूलत्वंकथंसाध्यतइतिचेन्नवायुत्वतेजस्त्वादेःपृथगवच्छेदकत्वात्॥

प्रा॰भा॰ नचाप्रयोजकता॥कारणशून्यत्वेनित्यत्वेचात्मवद्रूपादिमत्त्वायोगान्नचतर्हिवायुः कारणवानितिपृथक्साधनेरूपादिहेतूनांभागासिध्यभा। अ॰पा॰
र॰प्रदी॰ वेपिसिद्धसाधनतास्यादितिवाच्यं॥ यत्रस्पर्शस्तत्रकारणंयत्ररूपंतत्रकारणमितिव्याप्तिग्रहकालेवायुत्वाद्यवच्छेदेनसाध्यसिध्यभा। २ २
२१३ वादितिभावः।परमाणवोनित्याःसत्त्वेसत्यकारणवत्त्वादात्मवदितिसत्प्रतिपक्षमुत्थाप्यविशेष्यासिध्यादूषयति॥ यत्तुनित्यत्वइतिसत्त्वं
भावत्वंप्रागभावनिरासार्थंनित्यत्वप्रतिषेधःसप्रतियोगिकोऽभावत्वात् घटाभाववदितिनित्यस्यकचित्सिद्धौकार्यमनित्यमितिविशेषतः

तस्मात्तेपिकारणवंतस्तदपेक्षयास्थूलाअनित्याश्चप्राप्नुवंति॥यच्चनित्यत्वेकारणंतैरुक्तं सदकारणवन्नित्यमिति तदप्येवंसत्यणुषुनसंभवतिउक्तेनप्रकारेणाणूनामपिकारणवत्त्वोपपत्तेः॥यदपिनित्यत्वेद्वितीयंकारणंउक्तमनित्यमितिचविशेषतःप्रतिषेधाभावइतितदपि नावश्यंपरमाणूनांनित्यत्वंसाधयत्यसतिहियस्मिन्कस्मिंश्चिन्नित्येवस्तुनिनित्यशब्देननञः समासोनोपपद्यते नपुनःपरमाणुनित्यत्वमेवापेक्ष्यतेतच्चास्त्येवनित्यंपरमकारणंब्रह्म॥ नचशब्दार्थव्यवहारमात्रेणकस्यचिदर्थस्यप्रसिद्धिर्भवति प्रमाणांतरसिद्धयोःशब्दार्थयोर्व्यवहारावतारात्॥यदपिनित्यत्वेतृतीयंकारणमुक्तमविद्याचेति॥तद्यद्येवंविविच्येतसतांपरिदृश्यमानकार्याणांकारणानांप्रत्यक्षेणाग्रहणमविद्येतिततोद्व्यणुकनित्यतांप्यापद्येत॥

ऽऽ कार्येनित्यत्वप्रतिषेधात्कारणभूतपरमाणुषुनित्यत्वंसि एम॰
ध्यतिअन्यथाप्रतियोग्यभावेप्रतिषेधानुपपत्तेरितिकणादोक्तमनूद्यान्यथासिद्ध्या दूषयति॥ यदपीति॥कार्येनित्यत्वप्रतिषेधव्यवहारमं २१३
गीकृत्यब्रह्मणिप्रतियोगीप्रसिद्धिरुक्तावस्तुतस्तुविशेषव्यवहारएवासिद्धःकारणनित्यत्वस्यप्रमाणांतरेणज्ञानंविनाकार्यमनित्यमितिव्य
वहारायोगादित्याह॥नचशब्देति॥यदिप्रमाणांतरंकारणनित्यत्वेस्यात्तदाऽयंव्यवहारःसमूलोभवतिततोमूलज्ञानात्प्राग्व्यवहारमात्रान्न
वस्तुसिद्धिःघटेयस्यव्यवहारादपितत्सिद्धिप्रसंगान्मूलज्ञानेतुतेनैवविशेषसिद्धेर्व्यवहारोपन्यासवैयर्थ्यमितिभावःएवंपरमाणुनित्यत्वेकाण

हसूत्रद्वयेनिरस्यतृतीयंनिरस्यतियदपीति॥

सतामणूनांदृश्यमानस्थूलकार्याणांप्रत्यक्षेणकारणाऽज्ञानमविद्येतियदिसूत्रार्थःतर्हिप्रत्यक्षकारणत्वंनित्यत्वेहेतुःस्यात् तच्चद्व्यणुकेव्यभिचारादित्यर्थः॥ यद्यारंभकद्रव्यशून्यत्वंहेतुविशेषणंतदाविशेष्यवैयर्थ्यआपद्येतपुनरुक्तिश्चेत्याह। अथेत्यादिना॥ परमाणवोनित्याःनाशकानुपलंभादात्मवदितिसूत्रार्थमाशंकते॥ अथापीति॥ तंत्वाद्यवयवानांविभागान्नाशाद्वापटादिनाशोदृष्टः तच्चद्वयंनिरवयवाणूनांनास्तीतिनित्यत्वमित्यर्थः॥ परिणामवादमाश्रित्याणूनांनाशकंकिंचित्संभवतीतिपरिहरति॥ नेति॥ अवयवानांसंयोगेनद्रव्यांतरोत्पत्तिरारंभइतियदिमतंस्यात् तदाद्रव्यविनाशोद्वाभ्यामेवेतिनियमःस्यान्नारंभेमानमस्तिसंयुक्ततंतुत्वपटादर्शनादतःकारणमेवसतोनिर्विशेषवदवस्थात्मनाकार्यमित्यनुभवबलात्स्थैर्यंतथाचाणूना

षविश१ द्रा

व

अथाद्रव्यत्वेसतीतिविशेष्येनतथाप्यकारणवत्त्वमेवनित्यतानिमित्तमापद्येत तस्यचप्रागेवोक्तत्वात्॥ अविद्याचेतिपुनरुक्तंस्यात्। अथापिकारणविभागात्कारणविनाशाद्वान्यस्यतृतीयस्यविनाशहेतोरसंभवोऽविद्यासापरमाणूनां। नित्यत्वंख्यापयतीतिव्याख्यायेत॥ नावश्यंविनश्यद्वस्तुद्वाभ्यामेवहेतुभ्यांविनष्टुमर्हतीतिनियमोऽस्ति। संयोगसचिवेहि अनेकस्मिंश्चद्रव्यांतरस्यारंभकेऽभ्युपगम्यमानेएतदेवंस्यात् यदात्वयास्तविशेषंसामान्यात्मकंकारणंविशेषवदवस्थांतरमापद्यमानंआरंभकमभ्युपगम्यतेतदाघृतकाठिन्यविलयनवन्मूर्त्यवस्थाविलयनेनापिविनाशउपपद्यते॥ तस्माद्रूपादिमत्त्वात्स्यादभिप्रेतविपर्ययःपरमाणूनां॥

द्रव्ये१

मप्यविद्यापरिणामरूपाणांप्रलयनिमित्तेनकालादिनापिंडात्मकस्वरूपतिरोभावेनकारणभावापत्तिर्विनाशउपपद्यतेयथाग्निसंपर्कात् घृतकाठिन्यमवयवसंयोगस्यावयवानांचनाशंविनैवलीयतेतद्वत् नचकाठिन्यस्यसंयोगविशेषत्वेनगुणत्वात्द्रव्यनाशेऽनुदाहरणत्वमितिशंक्यं। गुणवत् द्रव्यस्यापिकुतश्चिद्विनाशइत्यंशेनोदाहरणाद्गुणपरिभाषायाश्चातंत्रत्वाद्वस्तुतस्तुघृतंकठिनंद्रव्यमित्यनुभूतघृतपरिणामविशेषोद्रव्यमेवकाठिन्यं। नचद्रव्यत्वे।पिअवयवविभागादेवतस्यनाशइतिवाच्यं॥ घृतस्यपरिणामिनएकत्वेनविभागासंभवात्परमाणुकाठिन्यनाशेतदसंभवाच्चेतिभावः॥

शा·भा·
र·प्र·टी·
२१४

॥ किंच प्रलये नासीद्रजो नान्यत्किंचनेत्यणूनां नाशसिद्धिस्तस्मान्न तेषां परमकारणत्वमित्युपसंहरति ॥ तस्मादिति ॥ यद्य-
स्मादधिकगुणवत्तत्तस्मात्स्थूलमिति व्याप्तिमुक्त्वा विकल्पयति ॥ तद्वदिति पार्थिवः परमाणुः अधिकगुणस्तत एकैकन्यूनगुणा

अ·पा·
२ २

तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥१५॥ उभयथा च दोषात् ॥१६॥ गंधरसरूपस्पर्शगुणा स्थूला पृथिवी रूपरसस्पर्शगुणाः सूक्ष्मा आपः रूपस्पर्शगुणं सूक्ष्मतरं तेजः स्पर्शगुणः सूक्ष्मतमो वायुरिति ॥ एवमेतानि चत्वारि भूतानि उपचितापचितगुणानि स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमतारतम्योपेतानि च लोके लक्ष्यंते ॥ तद्वत्परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन् न वा उभयथापि च दोषानुषंगोऽपरिहार्य एव स्यात् ॥ कल्प्यमाने तावदुपचितापचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्वप्रसंगः ॥ न चांतरेणापि मूर्त्युपचयं गुणोपचयो भवतीत्युच्यते कार्येषु भूतेषु गुणोपचये मूर्त्युपचयदर्शनात् ॥ अकल्प्यमाने तूपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत्सर्व एकैकगुणा एव कल्प्येरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात् । अप्सु रूपस्पर्शयोः पृथिव्यां च रसरूपस्पर्शानां कारणगुणपूर्वकत्वात्कार्यगुणानां अथ सर्वे चतुर्गुणा एव कल्प्येरन् ततोऽप्स्वपि गंधस्योपलब्धिः स्यात् तेजसि गंधरसयोर्वायौ गंधरूपरसानां न चैवं दृश्यते

राम·
२१५

((तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥

जलादिपरमाणव इति कल्प्यते न वा आद्ये दोषमाह । कल्प्यमान इति ॥ मूर्त्युपचयात् । स्थौल्यादित्यर्थः ॥ पार्थिवोऽणुराप्यात्स्थूलः अधिकगुणत्वात् घटवदित्येवं प्रयोक्तव्यः अप्रयोजकत्वं निरस्यति ॥ न चांतरेणेति ॥ दृष्टविरोधः स्यादिति भावः ॥ नेतिपक्षे सर्वेषां अणूनां साम्यार्थमेकैकगुणवत्त्वं वा स्याच्चतुर्गुणवत्त्वं वा उभयथापि दोषमाह ॥ अकल्प्यमानेत्यादिना ॥१६॥

नकेवलमणुवादस्यायुक्तत्वादुपेक्षा किंतु शिष्टबहिष्कृतत्वात् ग्रंथतोऽर्थतश्चाग्राह्यत्वमित्याह अपरिग्रहाच्चेति॥ चकारार्थं प्रपंचयितु
मुपक्रमते॥ अपिचेति॥ अत्यंतभेदज्ञापकमाह॥ भिन्नलक्षणानीति॥ द्रव्यगुणकर्मणां द्रव्यत्व गुणत्वकर्मत्वजातयो लक्षणानि गुणा।
श्रयत्वाद्युपाधयो वा निर्गुणत्वे सति जातिमदक्रियत्वं गुणलक्षणं। संयोगविभागयोर्निरपेक्ष कारणं कर्म नित्यमेकमनेकसमवेतं सामा
न्यं नित्यद्रव्यवृत्तयो विशेषाः नित्यसंबन्धः समवाय इति भिन्नानि लक्षणानि तैर्मिथोऽत्यंतभेदसिद्धिरित्यर्थः॥ तथात्वमत्यंतभिन्नत्वं तेन विरु।

अपरिग्रहाच्चात्यंतमनपेक्षा १७ प्रधानकारणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवना
भिप्रायेणोपनिबद्धः अयं तु परमाणुकारणवादो न कैश्चिदपि शिष्टैः केनचिदप्यंशेन परिगृहीत इत्यत्यंतमेवनाद
रणीयो वेदवादिभिः॥ अपि च वैशेषिकाः तंत्रार्थभूतान्षडपदार्थान् द्रव्यगुणकर्मसामान्यविशेषसमवायाख्या
नत्यंतभिन्नान् भिन्नलक्षणानभ्युपगच्छंति। यथा मनुष्योऽश्वः शश इति तथात्वं चाभ्युपगम्य तद्विरुद्धं द्रव्याधी
नत्वं शेषाणामभ्युपगच्छंति तन्नोपपद्यते कथं यथाहि लोके शशकुशपलाशप्रभृतीनामत्यंतभिन्नानां सतां
नेतरेतराधीनत्वं भवति एवं द्रव्यादीनामत्यंतभिन्नत्वान्नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हतीति अथ भवति द्र।
व्याधीनत्वं गुणादीनां ततो द्रव्यभावे भावात् द्रव्याभावेऽभावात् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभा
भवति यथा देवदत्त एक एव सन्नवस्थांतरयोगादनेकशब्दप्रत्ययभाग्भवति तद्वत्॥ द्वयोर्धर्मधर्मिभावः गुणादयो न

धर्म

द्रव्यधर्माः स्युः तेनात्यंतभिन्नत्वाच्छशकुशादिवदित्यर्थः॥ भेदबाधकमुपन्यस्याभेदमाह॥ अथ भवतीति॥ गुणादिषु तदधीनत्वं तावदन्व
यव्यतिरेकसिद्धं॥ तथा च गुणादयो द्रव्याभिन्नाः द्रव्याधीनत्वात् यद्यस्माद्भिन्नं तन्न तदधीनं यथा शशाद्भिन्नः कुश इत्यर्थः अभेदे द्रव्य।
गुणादिशब्दप्रत्ययभेदः कथं तत्राह॥ द्रव्यमिति॥ कल्पितभेदोऽप्यस्तीत्याशयः अन्यथात्यंतभेदवदत्यंताभेदेऽपि धर्मधर्मित्वायोगादितिभं

हि

न्या·भा·
त·प्र·टी·
२१५

॥ अस्तुगुणादीनां द्रव्यतादात्म्यमिति यदुक्तं तत्किं कमन्यं प्रत्याह ॥ तथासतीति ॥ सांख्योऽत्र वेदांती ग्राह्यः यद्वा कापिलस्यापि तादात्म्यसिद्धां
त इति सांख्यग्रहणं । यद्यपि तदधीनत्वं तदुत्पन्नत्वं तच्च धूमेनास्ति अग्निं विनापि भावात् तथापि तत्कार्यत्वं तदधीनत्वं मत्वा व्यभिचारं शंकते ॥ नन्वि
ति ॥ कार्यत्वं चांगीकरोति ॥ सत्यमिति ॥ तथापि तादात्म्येन प्रतीयमानत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याशयः । असत्यहेतोरन्यथा

तमन्य१

तथासति सांख्यसिद्धांतप्रसंगः स्वसिद्धांतविरोधश्चापद्येयातां ॥ नन्वग्नेरन्यस्यापि सतो धूमस्याग्न्यधीन
त्वं दृश्यते ॥ सत्यं दृश्यते भेदप्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्चीयते इह तु शुक्लः कंबलो रोहिणी धेनु
र्नीलमुत्पलमिति द्रव्यस्यैव तस्य तस्य तेन तेन विशेषणप्रतीयमानत्वान्नैव द्रव्यगुणयोरग्निधूमयोरिव भेदप्रती
तिरस्ति तस्माद्द्रव्यात्मकता गुणस्य एतेन कर्मसामान्यविशेषसमवायानां द्रव्यात्मकता व्याख्याता ॥ गुणादी
नां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्येत तत्पुनरयुतसिद्धत्वमपृथक्देशत्वं वा स्यादपृथक्काल
त्वं वा अपृथक्स्वभावत्वं वा सर्वथापि नोपपद्यते ॥ अपृथग्देशत्वे तावत्स्वाभ्युपगमो विरुध्येत कथं तंत्वार
ब्धो हि पटः तंतुदेशोऽभ्युपगम्यते न पटदेशः पटस्य तु गुणाः शुक्लादयः पटदेशा अभ्युपगम्यंते न तंतुदेशाः यथा चा
हुः द्रव्याणि द्रव्यांतरमारभंते गुणाश्च गुणांतरमिति ॥ तंतवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभंते तंतुगता
श्च गुणाः शुक्लादयः कार्यद्रव्ये पटे शुक्लादिगुणांतरमारभंत इति हि तेऽभ्युपगच्छंति सोऽभ्युपगमो द्रव्यगुणयोरपृ
((थक्देशत्वेऽभ्युपगम्यमाने बाध्येत ॥

सिद्धिमाशंकते ॥ गुणादीनामिति ॥ गुणादीनां द्रव्येणाभेदाभावेपि अयुतसिद्धत्वेन ता
दात्म्यप्रतीतिसिद्धिरित्यर्थः । दूषयितुं विकल्पयति ॥ तत्पुनरिति ॥ शौक्ल्यस्य पटनिष्ठत्वात्पटस्य तंतुदेशत्वात्पटशौक्ल्ययोरपृथग्देशत्वा
भावाच्छुक्लः पट इति सामानाधिकरण्यप्रतीतिर्न स्यादित्याद्यं दूषयति ॥ अपृथग्देशत्व इति काणादसूत्रद्वयं व्याचष्टे ॥ तंतवो हीति ॥ ९ ॥

अ·पा·
२

राम·
२१५

स्वभावो हि स्वरूपं तस्यापृथक्त्वेऽस्यादिष्टाभेदसिद्धिरित्याह ॥ अपृथक्स्वभावत्व इति ॥ अभेदे युक्तिमाह ॥ तस्येति ॥ गुणस्येत्यर्थः ॥ एवं षट्पदार्थाः अत्यंतभिन्ना इति परसिद्धांतोऽनुभवविरोधेन दूषितः सिद्धांतांतरं दूषयति ॥ युतेति ॥ अयुतसिद्धत्वं किमुभयोरुतान्यतस्य नाद्य इत्याह ॥ प्रागिति ॥ द्वितीयमाशंक्य दूषयति ॥ अथेत्यादिना ॥ कारणस्य पृथक्सिद्धत्वेपि कार्यमपृथक्सिद्धमित्युक्तमुपे

अथापृथक्कालत्वं अयुतसिद्धत्वमुच्येत सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत । तथाऽपृथक्स्वभावत्वे त्वयुतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः संभवति ॥ तस्य तादात्म्येनैव प्रतीयमानत्वात् ॥ युतसिद्धयोः संबन्धः संयोगोऽयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमो मृषैव तेषां ॥ प्राक्सिद्धस्य कार्यात्कारणस्यायुतसिद्धत्वानुपपत्तेः ॥ अथान्यतरापेक्ष एवायमभ्युपगमः स्यादयुतसिद्धस्य कार्यस्य कारणेन संबधः समवाय इति एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन संबन्धो नोपपद्यते ॥ द्व्यायत्तत्वात्संबंधस्य ॥ सिद्धं भूत्वा संबध्यत इति चेत् प्राक्कारणसंबन्धात्कार्यस्य सिद्धावभ्युपगम्यमानायामयुतसिद्ध्यभावात्कार्यकारणयोः संयोगविभागौ न विद्येते इति इदं दुरुक्तं स्यात् ॥ यथा चोत्पन्नस्याक्रियस्य कार्यद्रव्यस्य विभुभिराकाशादिभिर्द्रव्यांतरैः संबन्धः संयोग एवाभ्युपगम्यते न समवायः एवं कारणद्रव्येणापि संबन्धः संयोग एव स्यात् न समवायः नापि संयोगस्य समवायस्य वा संबंधस्य संबंधिव्यतिरेकेणास्तित्वे किंचिन्प्रमाणमस्ति ॥

त्यसंबन्धोऽसिद्धस्य सिद्धस्य वेति विकल्प्याद्यं दूषयित्वा द्वितीयं शंकते ॥ सिद्धं भूत्वेति ॥ सतोरप्राप्तयोः प्राप्तिः संयोग इत्यभ्युपगमात् तंतुपटयोरपि संयोगापत्तिरित्यपसिद्धांतः स्यादित्यर्थः ॥ सद्योजातपटस्य क्रियाऽभावात्कथं संयोगः तत्राह ॥ यथेति ॥ किंच संबंधस्यापि संबंधेऽनवस्थानादसंबद्धस्यानियामकत्वात् संबन्धोपि दुर्निरूप इत्याह ॥ नापीति ॥ ❦ ❦ ❦ ❦ ❦ ❦ ॥

संबन्धः संबन्धिभिन्नस्तद्विलक्षणशब्दधीगम्यत्वाद्वस्त्वंतरवदिति निशंकते संबंधीति॥ कल्पितभेदसाधने सिद्धसाधनता वस्तुभेद।
साधने तु व्यभिचार इति समाधत्ते॥ नैकत्वेपीति॥ स्वरूपेणैव मनुष्यादिशब्दभागेव पुत्राद्यपेक्षयापि पितेत्यादिविलक्षणशब्दधीग
म्यो भवति न च भिद्यत इति व्यभिचार इत्यर्थः॥ फलितमाह॥ इत्युपलब्धीति॥ विलक्षणशब्दधीगम्यत्वादित्युपलब्धिघटिते।
न लक्षणलिंगेन प्राप्तस्य वस्त्वंतरस्य संयोगादेः संबंधिव्यतिरेकेणानुपलब्धेरभावो निश्चीयत इत्यर्थः नह्यंगुलिद्वयस्य नैरं

संबंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न॥ नैकत्वेपि स्वरूप
बाह्यरूपापेक्षयानेकशब्द प्रत्ययदर्शनात् यथैकोपि सन्देवदत्तो लोके स्वरूपं संबंधिरूपं चापेक्ष्यानेकश
ब्दप्रत्ययभाग्भवति मनुष्यो ब्राह्मणः श्रोत्रियो वदान्यो बालो युवा स्थविरः पिता पुत्रः पौत्रो भ्राता जामातेति यथा।
चैकापि सती रेखा स्थानान्यत्वेन निविशमानैकदशशतसहस्रादिशब्दप्रत्ययभेदमनुभवति तथा संबंधिनोरेव
संबंधिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेनेति उपलब्धिल
क्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वंतरस्य॥ नापि संबंधिविषयत्वे संबंधशब्दप्रत्यययोः संततभावप्रसंगः।
स्वरूपबाह्यरूपापेक्षयेत्युक्तोत्तरत्वात्॥ तथाऽखात्ममनसामप्रदेशत्वान्न संयोगः संभवति प्रदेशवतो द्रव्यस्य प्र
देशवता द्रव्यांतरेण संयोगदर्शनात्॥ २१ तर्यातिरेकेण संयोग उपलभ्यते समवायस्तु न कस्यापि क्वचिदप्यनुभवमारोह।

तीति भावः॥ संबंधस्य संबंध्यभेदे संबंधिनः सदा सत्त्वात्सर्वदा संबंधबुद्धिप्रसंग इति शंकां निषेधति॥ नापीति॥ परापेक्षया नैरंतर्या।
वस्थायामंगुल्योः रूपरूपिणोश्च संबंधधीर्न स्वत इत्युक्तमित्यर्थः॥ पूर्वपरमाण्वोः संयोगनिरासेन द्व्यणुकादिसृष्टिर्निरस्ता संप्र
त्यदृष्टवदात्मनाऽणूनां संयोगोऽणुक्रियाहेतुरात्ममनसोः संयोगो बुद्ध्याद्यसमवायिकारणं निरस्यते॥ तथा खात्मेति॥ ०६० ॥

निरस्तमपिकल्पितप्रदेशपक्षमतिप्रसंगाख्यदोषांतरं वक्तुं पुनरुद्भावयति कल्पिता इति॥ कल्पनमूहः ऊहितार्थाः संतोऽसंतो वा द्वितीये न संयोगसिद्धिः स्वसाभावयोरेकत्रवृत्त्यवच्छेदकासत्वादाद्ये तूहमात्रेण सर्वार्थसिद्धिप्रसंगः ऊहस्य स्वाधीनत्वान्नभूतत्वं निरवधित्वं न तत्संभवाच्चेत्यर्थः॥ यद्यूहात्सर्वसिद्धिस्तदा पदार्थबंधमुक्तिनियमानुपपत्तिरित्याह॥ नचेत्यादिना॥ संयोगं दूषयित्वा समवायं दूषयति॥ किंचान्यदिति॥ तन्मते दूषणं

कल्पिताः प्रदेशा अएवान्समनसां भविष्यंतीति चेन्न नाविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसंगात् इयानेवाविद्यमानो विरुद्धोऽविरुद्धो वार्थः कल्पनीयो नातोऽधिक इति नियमहेत्वभावात्कल्पनायाश्च स्वायत्तत्वात् प्रभूतत्वसंभवाच्च॥ नचवैशेषिकैः कल्पितेभ्यः षड्भ्यः पदार्थेभ्योऽन्येऽधिकाः शतं सहस्रं वार्था न कल्पितव्या इति निवारको हेतुरस्ति तस्माद्यस्मै यस्मै यद्यद्रोचते तत्तत्सिद्ध्येत् कश्चित्कृपालुः प्राणिनां दुःखबहुलः संसार एव मा भूदिति कल्पयेत् अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत् कस्तयोर्निवारकः स्यात् किंचान्यत् द्वाभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः न ह्याकाशस्य पृथिव्यादीनां च जतुकाष्ठवत्संश्लेषोऽस्ति॥ कार्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यत इत्यवश्यं कल्प्यः समवाय इति चेन्न नेतरेतराश्रयत्वात्कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसिद्धौ च तयोर्भेदसिद्धिः कुंडबदरवदिती नरेतराश्रयता स्यात् नहि कार्यकारणयोर्भेदः आश्रिताश्रयभावो वा वेदांतवादिभिरभ्युपगम्यते ॥ १॥

तरं उच्यत इत्यर्थः संश्लेषः संग्रहः यत एकाकर्षणेनापराकर्षणं तस्यानुपपत्तिरित्यर्थः॥ द्व्यणुकं निरवयवासमवेतं सावयवत्वादाकाशाऽसमवेतभूमिवदिति भावः॥ ननु द्व्यणुकस्यासमवेतत्वेन दाश्रितत्वं न स्यात्संबंधं विना तदयोगात् नच संयोगादाश्रितत्वं कार्यद्रव्यस्य प्रक्रम्य संयोगादिति शंकते॥ कार्येति॥ प्रकृतिविकारयोरभेदाश्रयाश्रयिभावानुपपत्तिरिष्टेति परिहरति॥ नेति॥ भेदात्तद्भाव इति वदंतं प्रत्याह॥ इतरेतराश्रयत्वा

कथं तर्हि कार्यस्य कारणाभिन्नत्वव्यवहारः कल्पितभेदादित्याह ॥ कारणस्यैवेति ॥ परमाणूनां निरवयवत्वमप्ययुक्तमित्याह ॥ किंचेति ॥ परमाणवः सावयवाः अल्पत्वात् घटवद्विपक्षे तेषां दिग्भेदावधित्वं न स्यादात्मवदित्यर्थः ॥ ननु परमाण्वपेक्षया यो यं प्राचीदक्षिणेत्यादिदिग्भेदव्यवहारस्तदवधित्वेन येऽवयवास्त्वयोच्यंते त एव मम परमाणवस्तेपि सावयवाश्चेत्तदवयवा एवेत्येवं यतः परं न विभागः स एव निरवयवः परमाणुरिति शंकते ॥ यांस्त्वमिति ॥ परिहरति ॥ न स्थूलेति ॥ अयमर्थः ॥ यत्सर्वात्मना विभागायोग्यं वस्तु स परमाणुरिति यद्युच्येत तर्हि ब्रह्मण एव परमाणुसंज्ञा कृता स्यात्तदन्यस्याल्पस्य दिग्विभागार्हत्वेनावयवविभागावश्यंभावात् ॥

कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात् ॥ किंचान्यत्परमाणूनां परिच्छिन्नत्वाद्यावंत्यो दिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत ॥ यांस्त्वं दिग्भेदभेदिनोऽवयवान्कल्पयसि त एव परमाणव इति चेत् न स्थूलसूक्ष्मतारतम्यक्रमेणाऽऽपरमकारणाद्विनाशोपपत्तेः यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तुभूतापि विनश्यति । ततः सूक्ष्मं सूक्ष्मतरं च पृथिव्येकजातीयकं विनश्यति ततो द्व्यणुकं तथा परमाणवोपि पृथिव्येकजातीयकत्वाद्विनश्येयुः विनश्यंतोप्यवयवविभागेनैव विनश्यंतीति चेत् नायं दोषो यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम ॥

यदि पृथिव्यादिजातीयोऽल्पपरिमाणविश्रांतिभूमिर्यः स परमाणुरित्युच्येत तर्हि तस्य न मूलकारणत्वं विनाशित्वात् घटवन्न च हेत्वासिद्धिः अणवो विनाशिनः पृथिव्यादिजातीयत्वात् घटवदिति साधनादिति संप्रति निरवयवद्रव्यस्य नाशहेत्वभावादात्मवदविनाश इत्याशंक्य पूर्वोक्तं परिहारं स्मारयति ॥ विनश्यंत इत्यादिना ॥ ब्रह्मातिरिक्तस्य आज्ञानिकत्वाच्च द्रव्यस्य निरवयवत्वमसिद्धं निमित्तादृष्टादिनाशात् विनाशः प्रलये संभवति मुक्तौ ज्ञानादज्ञाननाशेन तत्कार्याणुनाशसंभव इति भावः ॥ ६ ६ ॥

यदुक्तं यत्कार्यद्रव्यं तत्संयोगसचिवानेकद्रव्यारब्धमिति तन्नेत्याह ॥ तथा कार्यारंभोपीति ॥ कैवल्यं प्राधान्यं कार्यद्रव्यस्थितावपि हे
तुत्वात्संयोगस्य क्षीरारंभकसंयोगाद्दध्यारंभकं न संयोगांतरं तथा च दध्यादौ व्यभिचारान्न व्याप्तिरित्यर्थः ॥ किंच यत्कार्यद्रव्यं तद्द्रव्यान
ारब्धमित्येव व्याप्तिरस्तु लाघवान्न तु संयोगसचिवस्वन्यूनपरिमाणानेकद्रव्यारब्धमिति गौरवाद्दीर्घविस्तृतदुकूलारब्धरज्जौ न्यून
परिमाणायां व्यभिचाराच्च न च रज्जुर्न द्रव्यांतरमिति वाच्यं अवयविमात्रविप्लवापातात् किंच निरवयवद्रव्यत्वस्यैकात्मवृत्तित्वे लाघ
वात्तन्निरवयवानेकाणुसिद्धिः यत्त्वणुत्वतारतम्यविश्रांतिभूमित्वेन तत्सिद्धिरिति तन्न त्र्यणुकत्वेनोक्तत्रुटिषु विश्रांतेः ॥ न च तत एव त्रुटि

यथा हि घनसुवर्णादीनामविभज्यमानावयवानामपि अग्निसंयोगात् द्रवभावापत्त्या काठिन्यविनाशो भवति ।
एवं परमाणूनामपि परमकारणभावापत्त्या मूर्त्यादिविनाशो भविष्यति ॥ तथा कार्यारंभोपि नावयवसंयोगेनैव ।
केवलेन भवति क्षीरजलादीनामंतरेणापि अवयवसंयोगांतरं दधिहिमादिकार्यारंभदर्शनात् ॥ तदेवमसार
तर्कसंदृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रवणैश्च शिष्टैर्मन्वादिभिरपरिगृहीतत्वादत्यंतमेवान ।
पेक्षास्मिन्परमाणुकारणवादे कार्या श्रेयोर्थिभिरिति वाक्यशेषः ॥ समुदाय उभयहेतुकेपि तदप्राप्तिः ॥१८॥

नामानो जगद्धेतव इति वाच्यं । पृथिवीत्वादिना सावयवत्वानित्यत्वयोरनुमानाच्च चावयवत्वस्य क्वचिद्विश्रांतौ परमाणुसिद्धिः अविश्रांतावन
वस्थेति वाच्यं मायायां ब्रह्मणि वावयवत्वविश्रांतिसंभवादतो न किंचिदणुसद्भावे प्रमाणं निरवयवानां संयोगसमवाययोरसंभवाच्च
मवेन द्व्यणुकाद्यारंभकत्वायोगादित्यादि बाधकमुक्तमेव । संप्रत्यपरिग्रहाच्चेति सूत्रवाक्यशेषं पूरयन्नधिकरणार्थमुपसंहरति ॥ तदे
वमिति ॥ तस्मादश्रुतिमूलेन वैशेषिकमतेन वेदांततात्पर्यस्याविरोध इति सिद्धं ॥१७॥ वैशेषिकं निरस्य वैनाशिकं निरस्यति ॥ समुदाय इति प
रिमाणभेदेन देहादेराशुतरविनाशांगीकारादर्द्धवैनाशिको वैशेषिकः तस्य निरासानंतरं सर्वक्षणिकवादी बुद्धिस्यो निरस्यत इति प्रसंगसंगतिमाह ॥

शा·भा·
र·प्र·टी·
२१८

भ·पा·
२२

वैशेषिकेतिनाभावउपलब्धेरितिनिरसनीयसिद्धांतादत्रनिरस्यसिद्धांतस्यभेदंवक्तुंतत्सिद्धांतंविभजते॥ सचेति॥ ननुसुगत
प्रोक्तागमस्यैकत्वात्कुतोबहुप्रकारतातत्राह॥प्रतिपत्तीति॥एकस्यैवागमव्याख्यातुःशिष्यस्यावस्थाभेदेनबुद्धिभेदान्मंदमध्यमो
त्तमधियांशिष्याणांवाभेदाद्बहुप्रकारतेत्यर्थः॥ तानेवप्रकारानाह॥तत्रेति॥सौत्रांतिकोवैभाषिकोयोगाचारोमाध्यमिकश्चे।
तिचत्वारःशिष्यास्तेष्वाद्ययोर्बाह्यार्थानांपरोक्षत्वापरोक्षत्वविवादेऽप्यस्तित्वसंप्रतिपत्तेस्तयोःसिद्धांतमेकीकृत्यनिरस्यतइत्याह
॥तत्रयेसर्वास्तित्वेतिभूतंभौतिकंवाह्यंचित्तंचैत्तंचकामाद्यांतरमितिविभागः तत्रसंदिह्यतेकिंमानमूलोभ्रांतिमूलोवायंसि।

वैशेषिकराद्धांतोदुर्युक्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्चनापेक्षितव्यइत्युक्तंसोऽर्द्धवैनाशिकइतिवैना
शिकत्वसाम्यात्सर्ववैनाशिकराद्धांतोनितरामपेक्षितव्यइतीदमिदानीमुपपादयामः॥ सचबहुप्रकारःप्रति
पत्तिभेदाद्विनेयभेदाद्वा॥ तत्रैतेत्रयोवादिनोभवंतिकेचित्सर्वास्तित्ववादिनःकेचिद्विज्ञानास्तित्वमात्रवा
दिनः अन्येपुनःसर्वशून्यत्ववादिनइतितत्रयेसर्वास्तित्ववादिनोबाह्यमांतरंचवस्त्वभ्युपगच्छंतिभूतं
भौतिकंचित्तंचैत्तंचतान्तावत्प्रतिब्रूमः तत्रभूतंपृथिवीधात्वादयोभौतिकंरूपादयश्चक्षुरादयश्च॥चतु
ष्टयेचपृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावास्तेपृथिव्यादिभावेनसंहन्यंतइतिमन्यंते॥ ६॥

द्धांतइतितत्रमानमूलइतिपूर्वपक्षयन्सिद्धांतंतदीयंदर्शयति॥ तत्रभूतमिति॥ स्थिरःप्रपंचोब्रह्महेतुकइतिवेदांतसिद्धांतस्य
मानमूलक्षणिकसिद्धांतविरोधादसिद्धिःपूर्वपक्षेफलं सिद्धांतेतदविरोधइतिज्ञेयं। पृथिव्यादिभूतचतुष्टयंविषयेंद्रियात्मकंभौ।
तिकंचपरमाणुसमुदायएवनावयव्यंतरमितिमत्वापरमाणून्विभजते। चतुष्टयेचेति॥चतुर्विधाइत्यर्थः॥ खरःकठिनःतत्स्वभा
वाःपार्थिवाःपरमाणवः स्निग्धाः आप्याः उष्णास्तैजसाःईरणंचलनंस्वभावोवायव्यानामिति ॥ ॥

राम·
२१८

बाह्यसमुदायमुक्त्वाऽध्यात्मिकसमुदायमाह ॥ तथेति ॥ सविषयेंद्रियाणि रूपस्कंधः विषयाणां बाह्यत्वेपि देहस्थेंद्रियग्राह्यत्वादध्यात्मिकत्वं। अहमहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः सुखाद्यनुभवो वेदनास्कंधः गौरश्व इत्येवं नामविशिष्टसविकल्पकप्रत्ययः संज्ञास्कंधः रागद्वेषमोहधर्माधर्माः संस्कारस्कंधः तत्र विज्ञानस्कंधश्चित्तमात्मेति गीयते। अन्ये चत्वारः स्कंधाश्चैत्तास्तेषां संघातः आध्यात्मिकः सकललोकयात्रानिर्वाहक इत्यर्थः॥ अवयवातिरिक्तावयव्यनुपलब्धेरवयवाः शिष्यंते यत्सत्तत्क्षणिकं यथा विद्युदिति तेषां क्षणिकत्वमिति मानमूलोयं सिद्धांत इति प्राप्ते सिद्धांतसूत्रं योजयति॥ योयमिति॥ सर्गादौ परमाणूनां च स्कंधानां च स्वतः संघातस्तावन्नसंभव

तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पंचस्कंधाः तेप्यध्यात्मं सर्वव्यवहारास्पदभावेन संहन्यंत इति मन्यंते। तत्रेदमभिधीयते॥ योयमुभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतोऽणुहेतुकश्च भूतभौतिकसंहतिरूपः स्कंधहेतुकश्च पंचस्कंधीरूपस्तस्मिन्नुभयहेतुकेपि समुदायेभिप्रेयमाणे तदप्राप्तिः स्यात्समुदायाप्राप्तिः समुदायभावानुपपत्तिरित्यर्थः कुतः समुदायिनामचेतनत्वात्॥ चित्ताभिज्वलनस्य च समुदायसिद्ध्यधीनत्वात् अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहंतुरनभ्युपगमात् निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसंगात्॥ आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात्॥

तिभचेतनत्वात्॥ नापि चित्ताख्यमभिज्वलनं विज्ञानं समुदायहेतुः संघाते देहाकारे जाते विज्ञानं विज्ञाने जाते संघात इत्यन्योन्याश्रयात् न च क्षणिकविज्ञानादन्यः कश्चिज्जीव ईश्वरो वा त्वयाभ्युपगम्यते यः संघातकर्ता भवेत् न च कर्तारमनपेक्ष्याऽणवः स्कंधाश्च स्वयमेव संघातार्थं प्रवर्तंत इति वाच्यं अनिर्मोक्षप्रसंगात् नन्वालयविज्ञानसंतानः संहंतास्त्वित्यत आह॥ आशयस्येति॥ आशेरतेस्मिन्रागादय इत्याशयः संतानः स किं संतानिभ्यो विज्ञानेभ्योऽन्य अनन्यो वा आद्ये स्थिरः क्षणिको वा नाद्यः अस्मदिष्टनित्यात्मवादप्र

स्य१

द्वितीयेदोषमाह॥ क्षणिकत्वेति॥ क्षणिकंजन्मातिरिक्तव्यापारोनास्तितस्मात्तस्यपरमाण्वादिमेलनार्थप्रवृत्तिरनुपपन्ना क्षणिकत्वव्याघातादित्यर्थः
॥एतेनानन्यःसंतानइतिपक्षोनिरस्तः क्षणिकस्यमेलकत्वानुपपत्तेः॥ तस्मात्संहंतुरसत्वात्संघातानुपपत्तिरित्यर्थ १८ संहंतुरभावेपिसंघातोप
पत्तिमाशंक्यनिषेधति॥ इतरेति॥ कार्यंप्रत्ययतेगच्छतीतिप्रत्ययःकारणंअविद्यादिभिरेवार्थात् संघातसिद्धौव्यवहारोपपत्तिरित्यर्थः॥ अ
विद्यादीनाह॥ तेचेति॥ क्षणिकेषुस्थिरत्वबुद्धिरविद्यातनोरागद्वेषमोहाःसंस्काराभवंति तेभ्योगर्भस्थस्याद्यंविज्ञानंउत्पद्यतेतस्माच्चालयविज्ञा॰
नात्पृथिव्यादिचतुष्टयंनामाश्रयत्वान्नामभवति ततोरूपंसितासितात्मकंशुक्रशोणितंनिष्पद्यते गर्भस्थकललबुद्बुदावस्थानामरूप॰

क्षणिकत्वाभ्युपगमाच्चनिर्व्यापारत्वात्प्रवृत्त्यनुपपत्तेः तस्मात्समुदायानुपपत्तिःसमुदायानुपपत्तौचतदाश्रया
लोकयात्रालुप्येत॥१८॥ इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात्॥१९॥ यद्यपिभोक्ताप्रशासितावा
कश्चिच्चेतनःसंहंतास्थिरोनाभ्युपगम्यते तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यतेलोकयात्रातस्यांचो
पपद्यमानायांनकिंचिदपरमपेक्षितव्यमस्ति॥ तेचाविद्यादयः अविद्यासंस्कारोविज्ञानंनामरूपंषडायतनंस्प
र्शोवेदनातृष्णोपादानंभवोजातिःजरामरणंशोकःपरिदेवनादुःखंदुर्मनस्तेत्येवंजातीयकाइतरेतरहेतुकाःसौ
गतेसमयेक्वचित्संक्षिप्तानिर्दिष्टाःक्वचित्प्रपंचिताः॥ सर्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः॥ शब्दार्थइतिनिष्कर्षः

विज्ञानंपृथिव्यादिचतुष्टयंरूपंचेतिषडायतनानियस्येंद्रियजातस्यतत्षडायतनं नामरूपेंद्रियाणांमिथःसंयोगःस्पर्शःततःसुखादिकावेद॰
ना तयापुनर्विषयतृष्णा तयाप्रवृत्तिरुपादानं तेनभवत्यस्माज्जन्मेतिभवोधर्मादिस्ततोजातिर्देहजन्मपंचस्कंधसमुदायइतियावत् जाता
नांस्कंधानांपरिपाकोजरा स्कंधनाशोमरणंम्रियमाणस्यपुत्रादिस्नेहादंतर्दाहःशोकःतेनहापुत्रेत्यादिप्रलापःपरिदेवना अनिष्टानुभवोदुः
खंतेनदुर्मनस्तामानसीव्यथाइतिशब्दोमानावमानादिक्लेशसंग्रहार्थःनकेवलंसुगतानामेवाविद्यादयःसंमताःकिंतुसर्ववादिनामपीत्याह॥ सर्वेषा

तदेवमविद्यादिकलापेपरस्परनिमित्तनैमित्तिकभावेनघटीयंत्रवदनिशमावर्त्तमानेऽर्थाक्षिप्तउपपन्नःसंघातइतिचेत्॥ तन्नकस्मात् उत्पत्तिमात्रनिमित्तत्वात् भवेदुपपन्नःसंघातोयदिसंघातस्यकिंचिन्निमित्तमवगम्येत नत्ववगम्यते यदितरेतरप्रत्ययत्वेप्यविद्यादीनांपूर्वंपूर्वमुत्तरोत्तरस्योत्पत्तिमात्रनिमित्तंभवद्भवेन्नतुसंघातोत्पत्तेःकिंचिन्निमित्तंसंभवति नन्वविद्यादिभिरर्थादाक्षिप्यतेसंघातइत्युक्तं॥ अत्रोच्यते यदि तावदयमभिप्रायः अविद्यादयःसंघातमंतरेणात्मानमलभमाना अपेक्षंतेसंघातमिति ततस्तस्यसंघातस्यनिमित्तंवक्तव्यं तच्चनित्येष्वप्यणुषु अभ्युपगम्यमानेष्वाशयाश्रयिभूतेषुचभोक्तृषुसत्सुनसंभवतीत्युक्तंवैशेषिकपरीक्षायां॥ किमंगपुनःक्षणिकेष्वपि अणुषुभोक्तृरहितेष्वाशयाश्रयिशून्येषुवाभ्युपगम्यमानेषुसंभवेत्॥ अथायमभिप्रायः अविद्यादयएवसंघातस्यनिमित्तमिति॥ कथंतमेवाश्रित्यात्मानं ऽलभमानास्तस्यैवनिमित्तंस्युः॥

अविद्यादिहेतुकाजन्मादयोजन्मादिहेतुकाश्चाविद्यादयइतिमिथोहेतुहेतुमद्भावादर्थात् संघातसिद्धिरितिशंकामुपसंहरति॥ तदेवमिति॥ सिद्धांतभागंव्याचष्टे॥ नचेति॥ अविद्यादीनांउत्तरोत्तरहेतुत्वमंगीकृत्यसंघातहेत्वभावात्संघातोनस्यादित्युक्तेपूर्वोक्तं स्मारयति॥ नन्विति॥ किमविद्यादयः संघातस्यगमकाउतोत्पादकाइतिविकल्प्याद्येसंघातस्योत्पादकंचिद्वाच्यंतच्चनास्तीत्याह॥ अत्रोच्यतेयदीति॥ आशयाश्रयिभूतेष्वितिभोक्तृविशेषणं अदृष्टाश्रयेष्वित्यर्थः॥ यदास्थिरेष्वणुषुसंघातयोग्येषुकर्तृषुचादृष्टसहायेषुसत्सुज्ञानाभावमात्रेणसंहतिकर्तृत्वायोगात्संघातापत्तेर्निमित्तंनास्तीत्युक्तंतदाक्षणिकपक्षेनचास्तीतिकिमुवक्तव्यमित्याह॥ किमिति॥ आशयाश्रयः संघातकर्तातच्छून्येष्वित्यर्थः आश्रयाश्रयिशून्येष्वितिपाठेउपकार्योपकारकत्वशून्येष्वित्यर्थः॥ द्वितीयंशंकते॥ अथायमिति॥ संघातस्याविद्यादीनांचोत्पत्तौअन्योन्याश्रयः स्यादितिदूषयति॥ कथमिति॥

स्वाभाविकःखल्वयंसंघातानांहेतुहेतुमद्भावेनप्रवाहोनसंहंतारमपेक्षतेपूर्वसंघाताश्रयाश्चविद्यादयउत्तरसंघातप्रवर्त्तकाइतिनान्योन्याश्रयदोषोपीत्याशंकते अथमन्यसइति॥स्वभावस्यनियमानियमयोरपसिद्धांतापातःस्यादितिपरिहारार्थः॥पूर्यतेगलतिचेतिपुद्गलोदेहः किंचभोक्तुःक्षणिकत्वपक्षेभोगापवर्गव्यवहारोपिदुर्घटइत्याह॥अपिचेति॥योयदिच्छतिसतत्कालेनास्तिचेत् इच्छाव्यर्था अस्तिचेत्क्षणिकत्वभंगइत्यर्थः॥प्रकृतंसंघातनिरास

अथमन्यसेसंघाताएवानादौसंसारेसंततयानुवर्त्ततेतदाश्रयाश्चाविद्यादयइति तदापिसंघातात्संघातांतरमुत्पद्यमानंनियमेनवासदृशमेवोत्पद्येतअनियमेनवासदृशंविसदृशंवोत्पद्येत नियमाभ्युपगमेमनुष्यपुद्गलस्यदेवतिर्यग्योनिनारकप्राप्त्यभावःप्राप्नुयात् अनियमाभ्युपगमेपिमनुष्यपुद्गलःकदाचित्क्षणेनहस्तीभूत्वादेवोवापुनर्मनुष्योवाभवेदितिप्राप्नुयात् उभयमप्यभ्युपगमविरुद्धं॥अपिचयद्भोगार्थःसंघातःस्यात्सनास्तिस्थिरोभोक्तेतितवाभ्युपगमःततश्चभोगोभोगार्थएवसनान्येनप्रार्थनीयस्तथामोक्षोमोक्षार्थएवेतिमुमुक्षुणानान्येनभवितव्यं अन्येनचेत्प्रार्थ्येतोभयंभोगमोक्षकालावस्थायिनातेनभवितव्यं अवस्थायित्वेक्षणिकत्वाभ्युपगमविरोधःतस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनांयदिभवेत्भवतुनाम नतुसंघातःसिध्येत् भोक्त्रभावादित्यभिप्रायः।१९। उत्तरोत्पादेचपूर्वनिरोधात्।२०। उक्तमेतदविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्नसंघातसिद्धिरस्तीतितदपितूत्पत्तिमात्रनिमित्तत्वंनसंभवतीतिइदमिदानीमुपपाद्यतेक्षणभंगवादिनोयमभ्युपगमःउत्तरस्मिन्क्षणेउत्पद्यमानेपूर्वःक्षणोनिरुध्यतइतिनचैवमभ्युपगच्छतापूर्वोत्तरयोःक्षणयोःहेतुफलभावःशक्यतेसंपादयितुंनिरुध्यमानस्यनिरुद्धस्यवापूर्वक्षणस्याभावग्रस्तत्वादुत्तरक्षणहेतुत्वानुपपत्तेः॥

मुपसंहरति॥तस्मादिति।१९। द्विविधोहिकार्यसमुत्पादःसुगतसंमतःहेत्वधीनःकारणसमुदायाधीनश्चेतितत्राविद्यातःसंस्कारःततोविज्ञानमित्येवंरूपःप्रथमःपृथिव्यादिसमुदायात्कायइत्येवंद्वितीयःतत्राद्यमंगीकृत्यद्वितीयःसंघातकर्त्रभावेनदूषितःसंप्रत्याद्यंदूषयतिसूत्रकारः॥उत्तरेति॥ क्षणिकोऽर्थःक्षणइत्युच्यतेनिरुध्यमानत्वंविनाशकसान्निध्यंनिरुद्धत्वमतीतत्वम्॥

॥ ननु कार्यकाले विनाशव्याप्तत्वेपि पूर्वक्षणे सत्वात् क्षणिकार्यस्य हेतुत्वमस्तनमितिनिशंकते अथभावेति ॥ सद्रूप इत्यर्थः ॥ किं हेतोरुत्पत्त्यतिरिक्तः कार्योत्पादनाख्यो व्यापारः अनतिरिक्तो वा नाद्य इत्युक्त्वा द्वितीयं शंकते ॥ अथेति ॥ भाव उत्पत्तिः उक्तं हि भूतिर्येषां क्रियासैव कारकं सैव चोच्यत इति येषां क्षणिकभावानां या भूतिः सैव क्रियाकारकं चेत्यर्थः ॥ नष्टस्यापि निमित्तत्वं स्यान्नोपादानत्वं।

अथ भावभूतः परिनिष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायस्तथापि नोपपद्यते भावभूतस्य पुनर्व्यापारकल्पनायां क्षणांतरसंबंधप्रसंगात् ॥ अथ भाव एवास्य व्यापार इत्यभिप्रायः तथापि नैवोपपद्यते हेतुस्वभावानुपरक्तस्य फलस्योत्पत्त्यसंभवात् स्वभावोपरागाभ्युपगमे च हेतुस्वभावस्य फलकालावस्थायित्वे सति क्षणभंगाभ्युपगमत्यागप्रसंगः ॥ विनैव वा स्वभावोपरागेण हेतुफलभावमभ्युपगच्छतः सर्वत्र तत्प्राप्तेरतिप्रसंगः अपि चोत्पादनिरोधौ नाम वस्तुनः स्वरूपमेव वा स्याताम् अवस्थांतरं वा वस्त्वंतरमेव वा सर्वथापि नोपपद्यंते यदि तावद्वस्तुनः स्वरूपमेवोत्पादनिरोधौ स्यातां ततो वस्तुशब्द उत्पादनिरोधशब्दौ च पर्यायाः प्राप्नुयुः ॥ अथास्ति कश्चिद्विशेष इति मन्येतोत्पादनिरोधशब्दाभ्यां मध्यवर्त्तिनो वस्तुन आद्यंताख्ये अवस्थे अभिलप्येते इति एवमप्याद्यंतमध्यक्षणत्रयसंबंधित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिः ॥

तथा च मृदादेर्घटादिकालासत्वे घटाद्यनुत्पत्तिः सत्वे च क्षणिकत्वहानिरिति परिहरति ॥ तथापीत्यादिना ॥ प्रथमपक्षोक्तदोषं दृढयति ॥ विनैवेति ॥ वस्तुनो जन्मध्वंसानिरूपणाच्च न क्षणिकत्वमित्याह ॥ अपि चेति ॥ तयोः स्वरूपत्वे वस्तुन्यंतर्भावात् वस्तुनोऽनाद्यनंतत्वमित्यपि द्रष्टव्यं। द्वितीयं शंकते॥ अथास्तीति॥ विशेषमेवाह॥ उत्पादेति॥ दूषयति॥ एवमपीति ॥

शा॰भा॰ ताभ्यांसंसर्गेवस्तुनःक्षणिकत्वभंगःस्यात्संसर्गएवनास्तीतितृतीयकल्पमुत्थाप्यदूषयति॥ अथात्यंतेनेति। २०।सूत्रंव्याख्यातुंस्मारयतिक्षणभं अ॰पा॰ २२
र॰प्र॰टी॰ गेतिकिंकार्योत्पत्तिर्निर्हेतुकासहेतुकावाआद्येप्रतिज्ञाहानिरित्याह॥ अथासत्येवेत्यादिना॥ विषयकरणसहकारिसंस्काराश्चतुर्विधाहेतवस्तान्प्र
२२१ तीत्यप्राप्यचित्तंरूपादिविज्ञानं चैताश्चितात्मकाःसुखादयश्चजायंतइतिप्रतिज्ञार्थः यथानीलविज्ञानस्यनीलवस्त्वालंबनप्रत्ययोविषयःच-
क्षुःकरणमधिपतिप्रत्ययः सहकारिप्रत्ययआलोकः समनंतरपूर्वप्रत्ययः संस्कारइतिभेदः प्रतिज्ञाहानिंपुरुषदोषमुक्त्वावस्तुदोष

मनं३

अत्यंतव्यतिरिक्तावेवोत्पादनिरोधौवस्तुनःस्यातांअश्वमहिषवत् ततोवस्तूत्पादनिरोधाभ्यामसंस्पृष्ट-
मितिवस्तुनःशाश्वतत्वप्रसंगःयदिचदर्शनादर्शनेवस्तुनःउत्पादनिरोधौस्यातांएवमपिद्रष्टृधर्मौतौनवस्तुध
र्माविति वस्तुनःशाश्वतत्वप्रसंगएव तस्मादप्यसंगतंसौगतं॥२०। असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा॥
२१ क्षणभंगवादेपूर्वक्षणोनिरोधग्र स्तत्वात्उत्तरस्यक्षणस्यहेतुर्भवतीत्युक्तं अथासत्येवहेतौफलोत्पत्तिंब्रू
यात् ततः प्रतिज्ञोपरोधःस्यात् चतुर्विधान्हेतून्प्रतीत्यचित्तचैत्ताउत्पद्यंतइ तीयंप्रतिज्ञाहीयेत॥ निर्हेतुकायां
चोत्पत्तावप्रतिबंधात्सर्वंसर्वत्रोत्पद्येत॥ अथोत्तरक्षणोत्पत्तिर्यावदवतिष्ठतेपूर्वक्षणइतिब्रूयात् ततोयौगपद्यं
हेतुफलयोःस्यात् तथापिप्रतिज्ञोपरोधएवस्यात्क्षणिकाःसर्वेसंस्काराइतीयंप्रतिज्ञोपरुध्येत।२१। प्रतिसंख्या राम॰
ऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥२२॥ अपिचवैनाशिकाःकल्पयंतिबुद्धिबोध्यंत्रयादन्यत्संस्कृतंक्षणिकंचेति॥ २२१

मप्याह॥ निर्हेतुकायांचेति॥ सहेतुकत्वपक्षेऽन्वयिकारणस्यमृदादेः कार्यसहभावापत्त्याक्षणिकत्वप्रतिज्ञाहानिरितिसूत्रशेषंव्याच-
ष्टे॥ अथोत्तरक्षणेत्यादिना॥ सम्यक्क्रियंतइतिसंस्काराः आद्यंतवंतोभावा इत्यर्थः॥२१॥ एवमाद्यसूत्राभ्यांसमुदायोनिरस्तः उत्तरसूत्राभ्यांकार्यकार्य हरिः
कारणभावक्षणिकत्वेनिरस्तेसंप्रतितदभिमतंद्विविधंविनाशंदूषयति॥ प्रतिसंख्येति॥ संस्कृतमुत्पाद्यंबुद्धिबोध्यंप्रमेयमात्रंत्रयात्तुच्छरूपादन्यदि-

॥किंतत्त्रयंतदाह॥ तदपीति॥ निरूपाख्यंनिःस्वरूपंप्रतीपाप्रतिकूलासंतंभावमसंतंकरोमीत्येवंरूपाबुद्धिः प्रतिसंख्यातयानिरोधःकस्यचिद्भावस्यभवति अबुद्धिपूर्वकस्तुस्तंभादीनांस्वरसभंगुराणामित्याह तद्विपरीतइति॥ परप्रक्रियामुक्त्वासूत्रंव्याचष्टे॥ तेषामिति॥ भावाःसंतानिनःसंतानोनामभावानांहेतुफलभावेनप्रवाहस्तस्मिन्संतानेचरमक्षणःक्षणांतरंकरोतिवानवा आद्येचरमत्वव्याघातःसंतानाविच्छेदात्॥ द्वितीयेचरमस्यासत्त्वप्रसंगः॥ अर्थक्रियाकारित्वंसत्त्वमितित्वत्सिद्धांताच्चरमस्यासत्त्वेपूर्वेषामप्यसत्त्वप्रसंगः अर्थक्रियाशून्यत्वात्॥

तदपिचत्रयंप्रतिसंख्याऽप्रतिसंख्यानिरोधावाकाशंचेत्याचक्षते त्रयमपिचैतदवस्त्वभावमात्रंनिरूपाख्यमितिमन्यंते बुद्धिपूर्वकःकिलविनाशोभावानांप्रतिसंख्यानिरोधोनामभाष्यते॥ तद्विपरीतोऽप्रतिसंख्यानिरोधःआवरणाभावमात्रमाकाशमिति॥ तेषामाकाशंपरस्तात्प्रत्याख्यास्यति निरोधद्वयमिदानींप्रत्याचष्टे प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसंभवइत्यर्थःकस्मादविच्छेदात् एतौहिप्रतिसंख्याप्रतिसंख्यानिरोधौसंतानगोचरौवास्यातांभावगोचरौवा नतावत्संतानगोचरौसंभवतः सर्वेष्वपिसंतानेषुसंतानिनामविच्छिन्नेनहेतुफलभावेनसंतानविच्छेदस्यासंभवात्॥ नापिभावगोचरौसंभवतःनहिभावानांनिरन्वयोनिरूपाख्योविनाशःसंभवतिसर्वास्वप्यवस्थासुप्रत्यभिज्ञानबलेनाऽन्वय्यविच्छेददर्शनात्॥ अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थासुक्वचिद्दृष्टेनान्वय्यविच्छेदेनान्यत्रापितदनुमानात् तस्मात्परपरिकल्पितस्यनिरोधद्वयस्यानुपपत्तिः।

तस्मात्संतानस्यविच्छेदासंभवान्निरोधाप्राप्तिरित्याह॥ नतावदिति॥ नद्वितीयइत्याह॥ नापीति॥ घटकपालचूर्णाद्यवस्थासुसेयंमृदिति प्रत्यभिज्ञानादन्वयिभावस्यमृदादेर्नात्यंतिकविनाशइत्यर्थः॥ बीजस्यांकुरादिषुप्रत्यभिज्ञानादर्शनादन्वयिनोविच्छेदइत्यतआह॥ अस्पष्टेति॥ अंकुरादयोऽनुस्यूतान्वयिभावस्याः कार्यत्वाद्घटवदित्यन्वय्यविच्छेदसिद्धिरित्यर्थः॥ यस्माद्भावानांस्थायित्वंतस्मात्प्रतिसंख्यानिरोधासंभवइत्युपसं

॥२२॥

शा·भा· ॥ अविद्यादीनांप्रतिसंख्यानिरोधंतदभिमतंदूषयति ॥ उभयथेति ॥ यमनियमादयः परिकराः सर्वंदुःखंक्षणिकमितिभावनोपदे- अ·पा·
र·प्र·टी· शो मार्गोपदेशः ॥२३॥ आगमप्रामाण्यादिति ॥ तत्राकाशस्यकार्यत्वोक्त्या घटादिवत् वस्तुत्वंप्रसिध्यतीत्यर्थः ॥ नन्वागमप्रामाण्येविप्रति- २ २
२२२ पन्नान्सुगतान्प्रत्याकाशस्यवस्तुत्वंकथंसिध्यतीत्यतआह ॥ विप्रतिपन्नानिति ॥ शब्दोवस्तुनिष्ठः गुणत्वाद्गंधादिवदित्यनुमानादाकाशस्यव-

उभयथा च दोषात् ।२३। योयमविद्यादिनिरोधः प्रतिसंख्यानिरोधांतःपातीपरपरिकल्पितः ससम्यग्ज्ञानाद्वासप-
रिकरात्स्यात्स्वयमेववापूर्वस्मिन्विकल्पेनिर्हेतुकविनाशाभ्युपगमहानिप्रसंगः उत्तरस्मिंस्तुमार्गोपदेशानर्थक्यप्र-
संगः एवमुभयथापिदोषप्रसंगादसमंजसमिदंदर्शनं ॥२३॥ आकाशे चाविशेषात् ।२४। यच्चैतेषामेवाभिप्रेतंनिरो-
२४ धद्वयमाकाशंनिरुपाख्यमितितत्रनिरोधद्वयस्यनिरुपाख्यत्वंपुरस्तान्निराकृतं आकाशस्येदानींनिराक्रियते
आकाशेचायुक्तोनिरुपाख्यत्वाभ्युपगमः प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरिववस्तुत्वप्रतिपत्तेरविशेषात् ॥
आगमप्रामाण्यात्तावदात्मनआकाशः संभूत इत्यादिश्रुतिभ्यआकाशस्यचवस्तुत्वप्रसिद्धिः ॥ विप्रतिपन्नान्प्रति
तुशब्दगुणानुमेयत्वंवक्तव्यंगंधादीनांगुणानांपृथिव्यादिवस्त्वाश्रयत्वदर्शनात् ॥ अपिचावरणाभावमात्रमा-
काशमिच्छतामेकस्मिन् सुपर्णेपतत्यावरणस्यविद्यमानत्वात्सुपर्णांतरस्योत्पित्सतोऽनवकाशत्वप्रसंगः यत्रा- राम·
वरणाभावः तत्रपतिष्यतीतिचेत् येनावरणाभावोविशेष्यतेतेनतर्हिवस्तुभूतमेवाकाशंस्यान्नावरणाभावमात्रं ॥६ २२२

स्तुत्वंसिध्यतिपृथिव्याद्यष्टद्रव्याणांश्रोत्रग्राह्यगुणाश्रयत्वायोगादित्यर्थः ॥ आकाशस्यभावत्वंप्रसाध्याभावत्वंदूषयति ॥ अपिचेति ॥ यथै-
कघटसत्वेपिघटसामान्याभावोनास्तितथैकपक्षिसत्वेपिमूर्तद्रव्यसामान्याभावात्मकाकाशोनास्त्येवेतिपक्ष्यंतरसंचारोनस्यादित्यर्थः ॥ दे- = शवि
शनिशेषावच्छेदेनावरणाभावोस्तीत्याशंक्याभावावच्छेदकदेशविशेषएवाकाशोनाभावइत्याह ॥ यत्रेत्यादिना ॥ पतिष्यतिपक्षीसंचरिष्यती-

आकाशस्यावस्तुत्वं स्वग्रंथविरुद्धं चेत्याह॥ अपि चेति॥ किंसम्यक्‌निश्चय आश्रयोस्यादिति किंसन्निश्रया अवस्तुनः शशविषाणस्याश्रयत्वाद्दर्शनादिति भावः व्याघातांतरमाह॥ अपि चेति॥ ध्वंसाप्रतियोगिताख्यो धर्मो नित्यत्वं नासति संभवति धर्मिणोऽसत्वव्याघातादित्यर्थः।२४। आत्मनः क्षणिकत्वं दूषयति॥ अनुस्मृतेरिति॥ अनुभवजन्या स्मृतिरनुस्मृतिस्तस्या अनुभवसमानाश्रयत्वात्तदुभया

अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत सौगतेन हि समये पृथिवी भगवः किंसन्निश्रयेत्यस्मिन्प्रश्ने प्रतिवचनप्रवाहे पृथिव्यादीनामंते वायुः किंसंनिश्रय इत्यस्य प्रश्नस्य प्रतिवचनं। भवति वायुराकाशसन्निश्रय इति तदाकाशस्यावस्तुत्वे न समंजसं स्यात् तस्मादप्ययुक्तमाकाशस्यावस्तुत्वं। अपि च निरोधद्वयमाकाशं च त्रयमप्येतन्निरुपाख्यमवस्तु नित्यं चेति विप्रतिषिद्धं न ह्यवस्तुनो नित्यत्वमनित्यत्वं वा संभवति वस्त्वाश्रयत्वाद्धर्मधर्मिव्यवहारस्य धर्मधर्मिभावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वं।२४। अनुस्मृतेश्च।२५। अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपेयन्नुपलब्धुरपि क्षणिकतामभ्युपेयात् न च सा संभवति अनुस्मृतेः अनुभवमुपलब्धिमनूत्पद्यमानं स्मरणमेवानुस्मृतिः सा चोपलब्ध्येककर्तृका सती संभवति पुरुषांतरोपलब्धिविषये पुरुषांतरस्य स्मृत्यदर्शनात्॥ कथं ह्यहमदोऽद्राक्षमिदं पश्यामीति च पूर्वोत्तरदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात्॥ अपि च दर्शनस्मरणयोः कर्त्तर्येकस्मिन्प्रत्यक्षः प्रत्यभिज्ञाप्रत्ययः सर्वस्य प्रसिद्धोऽ

((हमदोऽद्राक्षमिदं पश्यामीति॥

लोकेस्य२

श्रयात्मनः स्थायित्वमित्यर्थः॥ क्षणिकत्वे ज्ञानद्वयानुसंधानं च न स्यादित्याह॥ कथं ह्यहमिति॥ पूर्वदर्शनकर्तुरद्राक्षमिति स्मरणकर्त्रैक्यप्रत्यभिज्ञानाच्चात्मनः स्थायित्वमित्याह॥ अपि चेति॥ योहमदः पूर्वमद्राक्षं स एवाहमद्य तत्स्मरामीति प्रत्यभिज्ञानाऽऽकारो द्रष्टव्यः इदं पश्यामीति ज्ञानांतरसंबंधकथनं योहमद्राक्षं सोहं पश्यामीति प्रत्यभिज्ञानरद्योतनार्थं विपक्षे बाधकमाह॥

यदिहीति॥ द्रष्टृस्मर्त्रोर्भेदेऽहंस्मरामि अन्योऽद्राक्षीदितिप्रतीतिःस्यादित्यत्रदृष्टांतमाह॥ यत्रैवमिति॥ प्रत्ययमाह॥ स्मरामीति॥ स्मराम्यहमन्योद्राक्षीदितिप्रत्ययोयत्रनतत्रभिन्नमेवकर्त्तारंलोकोऽवगच्छतीत्यविवादमित्यर्थः॥ प्रकृतप्रत्यभिज्ञायांतादृशभेदप्रत्ययस्यबाधकस्यादर्शनादात्मनःस्थायित्वंदुर्वारमित्याह॥ इहत्वहमदइति॥ यथाग्नेःऔष्ण्यादिकंनबाधतेकश्चित्तथानाहमद्राक्षमितिपूर्वदर्शनंननिह्नुत। इत्यनेनबाधाभावात्प्रत्यभिज्ञाप्रमेत्युक्तंभवति तथाद्रष्टृस्मर्त्रोरैक्येसतिस्थायित्वंफलितमित्याह॥ तत्रैवंसतीति॥ क्षणद्वयसंबंधेप्यात्मनस्तृतीयक्षणे

यदिहितयोर्भिन्नःकर्त्तास्यात् ततोहंस्मराम्यद्राक्षीदन्यइतिप्रतीयात् नत्वेवंप्रत्येतिकश्चित्॥ यत्रैवंप्रत्ययःतत्रदर्शनस्मरणयोर्भिन्नमेवकर्त्तारंसर्वलोकोवगच्छति॥ स्मराम्यहमसावदोद्राक्षीदिति॥ इहत्वहमदोद्राक्षमितिदर्शनस्मरणयोर्वैनाशिकोप्यात्मानमेवैकंकर्त्तारमवगच्छति ननाहमित्यात्मनोदर्शनंनिवृत्तंनिह्नुते यथाग्निरनुष्णोऽप्रकाशइतिवा॥ तत्रैवंसत्येकस्यदर्शनस्मरणलक्षणक्षणद्वयसंबंधेक्षणिकत्वाभ्युपगमहानिरपरिहार्यावैनाशिकस्यस्यात्॥ तथानंतरामनंतरामात्मनएवप्रतिपत्तिंप्रत्यभिजानन्नेककर्त्तृकामोत्तमादुच्छ्वासादतीताश्चप्रतिपत्तीराजन्मनआत्मैककर्त्तृकाःप्रतिसंदधानःकथंक्षणभंगवादीवैनाशिकोनाऽपत्रपेत॥ सयदिब्रूयात्सादृश्यादेतत्संपत्स्यतइति॥ तंप्रतिब्रूयात् तेनेदंसदृशमितिद्वयायत्तत्वात्सादृश्यस्यक्षणभंगवादिनःसदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेकस्याभावात्सादृश्यनिमित्तंप्रतिसंधानमितिमिथ्याप्रलापएवस्यात्स्याच्चेत्पूर्वोत्तरयोःक्षणयोःसादृश्यस्यग्रहीतैकस्तथासत्येकस्यक्षणद्वयावस्थानात्क्षणिकत्वप्रतिज्ञापीड्येत॥ ः

भंगोस्त्वितिनिवदंतंप्रत्याह॥ तथेति॥ वर्त्तमानदशामारभ्योत्तमादुच्छ्वासादामरणादनंतरामनंतरांस्वस्यैवप्रतिपत्तिमात्मैककर्त्तृकांप्रत्यभिजानन्नाजन्मनश्चवर्त्तमानदशापर्यंतंअतीताःप्रतिपत्तीःस्वकर्त्तृकाःप्रतिसंदधानःसन्नितियोजना दीपज्वालास्विवात्मनिप्रत्यभिज्ञानंसादृश्यदोषादितिशंकते॥ सइति॥ सादृश्यज्ञानस्यधर्मिप्रतियोगिज्ञानाधीनत्वात्स्थिरस्यज्ञातुरसत्त्वान्नसादृश्यज्ञानंसंभवतिसत्त्वेवाऽपसिद्धांतःस्यादितिपरिहरतितमित्यादिना॥

॥ स्यादेतत् ॥ न सादृश्यप्रत्ययः पूर्वोत्तरवस्तुद्वयज्ञानजन्यस्तत् द्वयसादृश्यावगाही किंतर्हि कश्चिद्दोषविकल्पः स्वाकारमेव बाह्यत्वेन विषयीकुर्वाणः क्षणांतरास्पर्शी अतो न स्थिरद्रष्टृपेक्षेति शंकते ॥ तेनेदमिति ॥ अत्र वक्तव्यं सादृश्यप्रत्यये तेनेदं सदृशमिति वस्तुत्रयं भासते न वेति नेति वदतः स्वानुभवविरोधः किंचार्थभेदाभावात्पदत्रयप्रयोगो न स्यात् तस्मात् पदत्रयेण मिथः संसृष्टभिन्नार्थभानादभानमसिद्धमिति परिहरति ॥ न तेनेति ॥ अथ भासते वस्तुत्रयं तच्च प्रत्ययाभिन्नमेव न बाह्यमिति चेन्न त्रयाणामेकप्रत्ययाऽभेदे मिथोप्यभेदापत्तेः इष्टापत्तिरिति ब्रुवाणं विज्ञानवादिनं प्रत्याह ॥ यदाहीति ॥ वस्तुत्रयं ज्ञेयं सादृश्यप्र-

त्तमि१

तेनेदं सदृशमिति प्रत्ययांतरमेवेदं न पूर्वोत्तरक्षणद्वयग्रहणनिमिंति चेत् न तेनेदमिति भिन्नपदार्थोपादानात् प्रत्ययांतरमेवेति चेत्सादृश्यविषयं स्यात्तेनेदं सदृशमिति वाक्यप्रयोगो नर्थकः स्यात् ॥ सादृश्यमित्येव प्रयोगः प्राप्नुयात् ॥ यदाहि लोके प्रसिद्धः पदार्थः परीक्षकैर्न परिगृह्यते तदा स्वपक्षसिद्धिः परपक्षदोषो वा उभयमप्युच्यमानं परीक्षकाणामात्मनश्च यथार्थत्वेन न बुद्धिसंतानमारोहति ॥ एवमेवैषोर्थ इति निश्चितं यत्तदेव वक्तव्यं ततोन्यदुच्यमानं बहुप्रलापित्वमात्मनः केवलं ख्यापयेत् ॥ ः ॥

त्ययाद्भिन्नं सर्वलोकप्रसिद्धं तच्चेन्नांगीक्रियते स्थायिद्रष्टृप्रसंगभयेन तर्हि तत्तदाकाराणां क्षणिकविज्ञानानां मिथो वार्त्तानभिज्ञत्वादेकस्मिन्धर्मिणि विरुद्धानेकपक्षस्फुरणात्मकविप्रतिपत्त्यसंभवात्स्वपक्षसाधनादिव्यवहारो लुप्येत अतो यथानुभवं ज्ञानज्ञेयभेदोंगीकार्यः तथा च तेनेदं सदृशमिति बाह्यार्थयोर्ज्ञानपूर्वकं सादृश्यं जानत आत्मनः स्थायित्वं दुर्वारमित्यर्थः ॥ ननु संत्येव बाह्यार्थाः क्षणिकस्वलक्षणा निर्विकल्पकग्राह्याः सविकल्पाध्यवसेयास्तु स्थायित्वसादृश्यादयो बाह्याः कल्पिता अवभासंतेऽतो विप्रतिपत्त्यादिव्यवहार इति बाह्यार्थवादमाशंक्य निरस्यति ॥ एवमेवेति ॥ यत्प्रमाणसिद्धं तदेव वक्तव्यं न हि क्षणिकत्वे किंचित्प्रमाणमस्ति ॥ ॥

शा॰भा॰
र॰प्र॰टी॰
२२४

नचेदानींघटइतिप्रत्यक्षमवर्त्तमानकालासत्वंघटस्यगोचरयद्वर्तमानक्षणमात्रसत्वरूपेक्षणिकत्वेमानमितिवाच्यं॥ तस्यवर्त्तमानत्वमात्रगोचरत्वेनकालांतरासत्वासिद्धेः नचयत्सत्तत्क्षणिकमितिव्याप्तिरस्तिविद्युदादेरपिद्वित्रिक्षणस्थायित्वेनदृष्टांताभावान्नचस्थायिनमनुमातारमंतरेणानुमानंसंभवति तस्मादमानसिद्धार्थवक्तातथागतोऽश्रद्धेयवचनइत्यर्थः॥ किंचसादृश्यंप्रत्यभिज्ञायांदोषतयानिमित्तंविषयतयावाआद्येपिस्वरूपसत्ज्ञातंवानाद्यः मंदांधकारेशुक्तिमात्रग्रहेश्वेत्याज्ञानेपिरूप्याभेदभ्रमापत्तेः॥ नद्वितीयःस्थायिज्ञातारंविनातज्ज्ञानासंभवस्योक्तत्वात्॥ नापिविषयतयानिमित्तमित्याह॥नचेति॥ सोहमित्यु

नचायंसादृश्यात्संव्यवहारोयुक्तः तद्भावावगमात्तत्सदृशभावानवगमाच्च॥ भवेदपिकदाचित्वाह्यवस्तुनिविप्रलंभःसंभवात् तदेवेदंस्यात् तत्सदृशंवेतिसंदेहःउपलब्धरितुसंदेहोपिनकदाचिद्भवति। सएवाहंस्यांतत्सदृशोवेति यएवाहंपूर्वेद्युरद्राक्षंसएवाहमद्यस्मरामीतिनिश्चिततद्भावोपलंभात्॥ तस्मादप्यनुपपन्नोवैनाशिकसमयः॥२५॥ नासतोऽदृष्टत्वात्॥२६॥ इतश्चानुपपन्नोवैनाशिकसमयोयतःस्थिरमनुयायिकारणमनभ्युपगच्छतामभावात् भावोत्पत्तिरित्येतदापद्यते दर्शयंतिचाभावाद्भावोत्पत्तिं नानुपमृद्यप्रादुर्भावादितिविनष्टाद्धिकिलबीजादंकुरउत्पद्यते तथाविनष्टात्क्षीराद्दधिमृत्पिंडाच्च घटः॥

ल्लेखात्तेनाहंसदृशइत्यनुल्लेखादित्यर्थः॥ सोहमितिप्रत्यभिज्ञायाभ्रमत्वंनिरस्यसंशयत्वंनिरस्यति॥ भवेदिति॥ जडार्थप्रत्यभिज्ञानेपिवाधसंभावनयासंशयःकदाचित्स्यान्नात्मनीत्यर्थः असंदिग्धाविपर्यस्तप्रत्यभिज्ञाविरोधादात्मक्षणिकत्वमतमत्यंताऽसंगतमित्युपसंहरति॥ तस्मादिति॥२५॥ अभावःशशविषाणवदत्यंतासन् इत्यंगीकृत्यमृदादिनाशादसतोघटादिकंजायतइतिसुगतावदंतितद्दूषयति॥ नासतइति॥ नकेवलंबलादापद्यतेकिंतुस्वयंदर्शयंतिचेतिनैनप्रकृतार्थंगमयतः मृदादिकंउपमृद्यघटादेःप्रादुर्भावादितीममर्थमाह॥ विनष्टादिति॥

अ॰पा॰
२२

राम॰
२२४

कारणविनाशात्कार्यजन्मेत्यत्र युक्तिमाह॥ कूटस्थादिति॥ विनाशशून्यान्नित्यादित्यर्थः नित्यस्य निरतिशयस्य कार्यशक्तत्वे तत्कार्याणि सर्वाण्येकस्मिन्नेव क्षणे स्युस्तथा चोत्तरक्षणे कार्याभावादसत्त्वापत्तिः न च सहकारिकृतातिशयक्रमात्कार्यक्रम इति युक्तं अतिशयस्यातिशयान्तरापेक्षायां अनवस्थानादनपेक्षायां कार्यस्याप्यतिशयानपेक्षत्वेन सहकारिवैयर्थ्यात् तस्मान्न स्थायिभावात्कार्यजन्मेत्यर्थः॥ क्षणिकभावस्य हेतुत्वमुत्तरोत्पादे चेत्यत्र निरस्तं। अभावस्य हेतुत्वनिरासार्थं सूत्रं व्याचष्टे॥ तत्रेदमिति॥ यदि

कूटस्थाच्चेत्कारणात्कार्यमुत्पद्येत अविशेषात्सर्वं सर्वं न उत्पद्येत न तस्माद् भावग्रस्तेभ्यो बीजादिभ्योंकुरादीनामुत्पद्यमानत्वात् अभावाद्भावोत्पत्तिरिति मन्यन्ते॥ तत्रेदमुच्यते॥ नासतो दृष्टत्वादिति नाभावाद्भाव उत्पद्यते। यद्यभावाद्भाव उत्पद्येत अभावत्वाविशेषात्कारणविशेषाभ्युपगमोऽनर्थकः स्यात्। नहि बीजादीनामुपमृदितानां योऽभावस्तस्य अभावस्य शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे कश्चिद्विशेषोऽस्ति॥ येन बीजादेवांकुरो जायते क्षीरादेव दधीत्येवं जातीयकः कारणविशेषाभ्युपगमोर्थवान्स्यात्॥ निर्विशेषस्य त्वभावस्य कारणत्वाभ्युपगमे शशविषाणादिभ्योप्यंकुरादयो जायेरन् न चैवं दृश्यते। यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येत उत्पलादीनामिव नीलत्वादिस्ततो विशेषवत्त्वादेवाभावस्य भावत्वमुत्पलादिवत्प्रसज्येत॥ नाप्यभावः कस्यचिदुत्पत्तिहेतुः स्यात् अभावत्वादेव शशविषाणादिवत्॥

बीजाभावस्याभावान्तराद्विशेषः स्यात्तदा विशेषवदभावद्वारा बीजादेवांकुर इति लोकायतिकानामभ्युपगमोर्थवान्स्यान्न सोस्तीत्याह॥ येनेति॥ सूत्रं योजयति॥ निर्विशेषस्येति॥ शशविषाणादेः कार्यकारित्वस्यादृष्टत्वान्नाभावस्यासतो हेतुत्वमित्यर्थः॥ अस्त्वभावस्यापि विशेष इत्यत आह॥ यदीति॥ अभावस्य हेतुत्वेऽतिप्रसंग इति तर्कमुक्त्वाऽनुमानमाह नापीति अभावो न हेतुरसत्त्वात्संमतवदित्यर्थः॥

शा॰भा॰ ॥ अभावो न प्रकृतिः कार्यानन्वितत्वाद्यथा शरावाद्यनन्वितस्तंतुर्न शरावादिप्रकृतिरिति तर्कपूर्वकमाह ॥ अभावाच्चेति ॥ अतोऽन्वि अ॰पा॰
र॰प्र॰टी॰ तत्वान्मृदादिर्भावस्य प्रकृतिरित्याह ॥ मृदिति ॥ स्थायिनः कारणत्वायोगमुक्तमनूद्य दूषयति ॥ यत्तूक्तमित्यादिना ॥ अनुभवबला २ २
२२५ त् स्थिरस्वभावानामेव सहकारिसन्निधिक्रमेण कार्यक्रमहेतुत्वमंगीकार्यं न च शक्तस्य सहकार्यपेक्षा न युक्तेति वाच्यं यतोऽश
क्तस्यापि नापेक्षेत्यसहकारिविघ्वंस्यात् ततः स्वर्णादौ स्वतोऽतिशयशून्येऽग्निनापादिसहकारिकृतातिशयक्रमाद्रुचकादिकार्य।

अभावाच्च भावोत्पत्तावभावान्वितमेव सर्वं कार्यं स्यात् न चैवं दृश्यते सर्वस्य च वस्तुनः स्वेन स्वेन रूपेणाभावात्मनै
वोपलभ्यमानत्वात् न च मृदन्विनाः शरावादयो भावास्तंत्वादिविकाराः केनचिदभ्युपगम्यंते मृद्विकारानेव तु।
मृदन्वितान्भावाँल्लोकः प्रत्येति ॥ यत्तूक्तं स्वरूपोपमर्दमंतरेण कस्यचित्कूटस्थस्य वस्तुनः कारणत्वानुपपत्तेरभावा
द्भावोत्पत्तिर्भवितुमर्हतीति तद्दुरुक्तं स्थिरस्वभावानामेव स्वर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकारणभावदर्श
नात् येष्वपि बीजादिषु स्वरूपोपमर्दो लक्ष्यते तेष्वपि नासावुपमृद्यमाना पूर्वावस्थोत्तरावस्थायाः कारणमभ्युप
गम्यते अनुपमृद्यमानानामेवानुयायिनां बीजाद्यवयवानामंकुरादिकारणभावाभ्युपगमात् ॥ तस्मादसद्भ्यः
शशविषाणादिभ्यः सदुत्पत्त्यदर्शनात् सद्भ्यश्च सुवर्णादिभ्यः सदुत्पत्तिदर्शनात् अनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्यु

क्रमः ॥ न चातिशयस्यातिशयान्तरानपेक्षत्वे कार्यस्याप्यनपेक्षेति वाच्यं पटस्य मृदनपेक्षत्वे कार्यत्वाविशेषात् घटस्यापि मृदन। स॰म॰
पेक्षाप्रसंगादन्वयव्यतिरेकाभ्यामपेक्षा सहकारिष्वपि तुल्या यदुक्तं कार्याभावदशायां कारणस्यासत्वापत्तिरिति तन्न अकारणस्या २२५
पि वाधाभावेन सत्वोपपत्तेः। न ह्यर्थक्रियाकारित्वमेव सत्वमसतस्तद्योगे न सत्वस्य ततोऽभेदात् ततो ह्यर्थक्रियाकारित्वं नासत्तः अ।
तः कारणतानवच्छेदकमबाधितस्वरूपात्मकं सत्वं कारणत्वाद्भिन्नमेव तस्मादनुस्यूतस्थिरभावानां हेतुत्वमुपपन्नमिति भावः ॥ ९ ॥

पूर्वापरविरोधमप्याह॥ अपि चेति॥२६॥ अभावादुत्पत्तौ शशविषाणादप्युत्पत्तिः स्यादित्युक्तं अतिप्रसंगांतरमाह॥ उदासीनानामिति॥ अनीहमानानां प्रयत्नशून्यानां अमत्रं घटादिपात्रं॥ तन्वानस्य व्यापारयतः तस्माद्भ्रांतिमूलेन क्षणिकबाह्यार्थवादेन कूटस्थनित्यब्रह्मसमन्वयस्य न विरोध इति सिद्धं॥२७॥ नाभाव उपलब्धेः॥ अखंडनिर्विशेषब्रह्मविज्ञानं बाह्यार्थोपादानं वदतां वेदांतानां भिन्नं साकारं क्षणिकं विज्ञानं न ततोन्योर्थोस्तीति योगाचारमतेन न विरुध्यते न वेति तन्मतस्य मानभ्रांतिमूलत्वाभ्यां संशये पूर्वोक्तबाह्यार्थवादनिरासमुपजीव्य पूर्वपक्षमाह॥ एव॥

अपि न चतुर्भिश्चित्तं चैत्ता उत्पद्यंते परमाणुभ्यश्च भूतभौतिकलक्षणाः समुदाया उत्पद्यंत इत्यभ्युपगम्य पुनरभावाद्भावोत्पत्तिं कल्पयद्भिरभ्युपगममपह्नुवानैर्वैनाशिकैः सर्वो लोक आकुलीक्रियते॥२६॥ उदासीनानामपि चैवं सिद्धिः॥२७॥ यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येतैवं सत्युदासीनानामनीहमानानामपि जनानामभिमतसिद्धिः स्यात् अभावस्य सुलभत्वात् कृषीवलस्य क्षेत्रकर्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्यात् कुलालस्य मृत्संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिः तंतुवायस्यापि तंतूनतन्वानस्यापि तन्वानस्येव वस्त्रलाभः स्वर्गापवर्गयोश्च न कश्चित्कथंचित्समीहेत न चैतद्युज्यतेभ्युपगम्यते वा केनचित् तस्मादप्यनुपपन्नोयमभावाद्भावोत्पत्त्यभ्युपगमः॥२८॥ नाभाव उपलब्धेः॥२९॥ एवं बाह्यार्थवादमाश्रित्य समुदायाप्राप्त्यादिषु दूषणेषूद्भावितेषु विज्ञानवादी बौद्ध इदानीं प्रत्यवतिष्ठते॥ केषांचित्किल विनेयानां बाह्ये वस्तुन्यभिनिवेशं आलक्ष्य तदनुरोधेन बाह्यार्थवादप्रक्रियेयं विरचिता नासौ सुगताभिप्रायः तस्य तु विज्ञानैकस्कंधवाद एवाभिप्रे-

मित्यादिना पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलं॥ नन्वेकस्य सुगतागमस्य कथं बाह्यार्थसत्त्वासत्त्वयोस्तात्पर्यं विरोधादित्याशंक्याधिकारिभेदादविरोध इति वदन् विज्ञानवादिनः सुगताभिप्रायज्ञत्वेन मंदाधिकारिभ्यो बाह्यार्थवादिभ्यः श्रैष्ठ्यमाह॥ केषांचिदिति॥ उक्तं च धर्मकीर्तिना देशना लोकनाथानां सत्त्वाशयवशानुगा इति सुगतानामुपदेशाः शिष्यमत्यनुसारिण इत्यर्थः॥ ~ ॥

नन्वसति बाह्यार्थे मानमेयव्यवहारः कथं तत्राह॥ तस्मिन्निति॥ विज्ञानमेव कल्पितनीलाद्याकारत्वेन प्रमेयमवभासात्मना मानफलं शक्त्यात्मना मानं शक्त्याश्रयत्वाकारेण प्रमातेति भेदकल्पनया व्यवहार इत्यर्थः॥ मुख्य एव भेदः किं न स्यादत आह॥ सत्यपीति॥ न हि बुद्ध्यनारूढस्य नीलादेः प्रमेयत्वव्यवहारोऽस्ति अतो बुद्ध्यारूढाकार एव प्रमेयं न बाह्यमित्यर्थः॥ बाह्यार्थासत्त्वे प्रश्नपूर्वकं युक्तीरुपन्यस्यति॥ कथमित्यादिना॥ ज्ञेयं ज्ञानातिरेकेणासत् तदतिरेकेणासंभवान्नरशृंगवदित्याह॥ तदसंभवादिति॥ असंभवं विवृणोति॥ स हीति॥ परमाणवश्चेदेकस्थूल

तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणांतस्थ एव प्रमाणप्रमेयफलव्यवहारः सर्व उपपद्यते॥ सत्यपि बाह्यार्थे बुध्यारोहमंतरेण प्रमाणादिव्यवहारानवतारात्॥ कथं पुनरवगम्यते॥ अंतस्थ एवायं सर्वो व्यवहारो न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति॥ तदसंभवादित्याह॥ स हि बाह्योऽर्थोऽभ्युपगम्यमानः परमाणवो वा स्युस्तत्समूहा वा स्तंभादयः स्युः तत्र न तावत्परमाणवः स्तंभादिप्रत्ययपरिच्छेद्या भवितुमर्हंति परमाण्वाभासज्ञानानुपपत्तेः नापि तत्समूहाः स्तंभादयस्तेषां परमाणुभ्योऽन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वात्॥ एवं जात्यादीनपि प्रत्याचक्षीत॥ अपि चानुभवमात्रेण साधारणात्मनो ज्ञानस्य जायमानस्य योऽयं प्रतिविषयं पक्षपातः स्तंभज्ञानं कुड्यज्ञानं घटज्ञानं पटज्ञानमिति नासौ ज्ञानगतविशेषमंतरेणोपपद्यत इत्यवश्यं विषयसारूप्यं ज्ञानस्यांगीकर्तव्यं अंगीकृते च तस्मिन्विषयाकारस्य ज्ञानेनैवावरुद्धत्वादपार्थिका बाह्यार्थसद्भावकल्पना॥

स्तंभ इति ज्ञानं न स्यात्समूहस्त्वसन्नित्यर्थः अवयव्यभावेऽपि जात्यादयो बाह्यार्थाः स्युस्तत्राह॥ एवमिति॥ जातिगुणकर्मणां धर्मिणः सकाशाद्भेदेऽत्यंतभेदे वा धर्मिवद्धर्म्यंतरवच्च न धर्मधर्मिभावः भेदाभेदौ च विरुद्धाविति न संति जात्याद्यर्था इत्यर्थः॥ किंच ज्ञानस्य ज्ञेयसारूप्यरूपविशेषसंबंधाभावे सर्वविषयत्वापत्तेर्विशेषोऽंगीकार्यस्तथा च ज्ञानगतविशेषस्यैव ज्ञानेन विषयीकरणाच्च बाह्यार्थसिद्धिर्मानाभावाद्गौरवाच्चेत्याह॥ अपि चेति॥ पक्षपातो विषयविशेषवैशिष्ट्यव्यवहारः॥

किंचज्ञेयंज्ञानाभिन्नंज्ञानोपलंभक्षणनियतोपलंभग्राह्यत्वात्ज्ञानवदित्याह॥अपिचेति॥ज्ञानार्थयोर्वास्तवेभेदेपिसहोपलंभनंस्यात्ग्राह्यग्राहकभावादित्यतआह॥नचैतदिति॥क्षणिकज्ञानस्यार्थेनसंबंधहेत्वभावाच्चग्राह्यग्राहकभावइत्यर्थः॥किंचजाग्रद्विज्ञानंनबाह्यालंबनंविज्ञानत्वात्स्वप्नादिज्ञानवदित्याह॥स्वप्नेति॥विज्ञानानांवैचित्र्यानुपपत्तिबाधितमनुमानमितिशंकतेकथमिति॥अन्यथोपपत्त्यापरिहरति॥वास

अपिचसहोपलंभनियमादभेदोविषयविज्ञानयोरापतति॥नह्यनयोरेकस्यानुपलंभेऽन्यस्योपलंभोस्ति॥नचैतत्स्वभावविवेकेयुक्तंप्रतिबंधकारणाभावात् तस्मादप्यर्थाभावः॥स्वप्नादिवच्चेदंद्रष्टव्यंयथाहिस्वप्नमायामरीच्युदकगंधर्वनगरादिप्रत्ययाविनैवबाह्येनार्थेनग्राह्यग्राहकाकाराभवंति॥एवंजागरितगोचराअपिस्तंभादिप्रत्ययाभवितुमर्हंतीत्यवगम्यतेप्रत्ययत्वाविशेषात्॥कथंपुनरसतिबाह्यार्थेप्रत्ययवैचित्र्यंउपपद्यते॥वासनावैचित्र्यादित्याह॥अनादौहिसंसारेबीजांकुरवत्विज्ञानानांवासनानांचान्योन्यनिमित्तनैमित्तिकभावेनवैचित्र्यंनविप्रतिषिध्यते॥अपिचान्वयव्यतिरेकाभ्यांवासनानिमित्तमेवज्ञानवैचित्र्यमित्यवगम्यतेस्वप्नादिष्वंतरेणाप्यर्थंवासनानिमित्तस्यज्ञानवैचित्र्यस्योभाभ्यामप्यावाभ्यामभ्युपगम्यमानत्वादंतरेणतुवासनांअर्थनिमित्तस्यज्ञानवैचित्र्यस्यमयानभ्युपगम्यमानत्वात् तस्मादप्यभावोबाह्यस्यार्थस्येत्येवंप्राप्तेब्रूमः॥नाभावउपलब्धेरितिनखल्वभावोबाह्यस्यार्थस्याध्यवसातुंशक्यते।कस्मादुपलब्धेःउपलभ्यतेहिप्रतिप्रत्ययंबाह्योर्थःस्तंभःकुड्यंघटःपटइति॥नचोपलभ्यमानस्यैवाभावोभवितुमर्हतियथाहिकश्चिद्भुंजानोभुजिसाध्यायांतृप्तौस्वयमनुभूयमानायामेवंब्रूयात्॥ ११

नेति॥अनादिसंतानांतर्गतपूर्वज्ञानमेववासनातद्वशादनेकक्षणव्यवधानेपिनीलाद्याकारज्ञानवैचित्र्यंभवति॥यथाबीजवासनयाकार्पासरक्तत्वंतद्वदित्यर्थः॥उभयवादिसंमतत्वाच्चवासनाएवज्ञानवैचित्र्यहेतवोनबाह्यार्थाइत्याह॥अपिचेति॥क्षणिकविज्ञानमात्रवादस्यमानमूलत्वात् तेननित्यविज्ञानवादोविरुध्यतइतिप्राप्तेसिद्धांतसूत्रंव्याचष्टे॥नाभावइत्यादिना॥

किंबाह्यार्थस्यानुपलब्धेरभावः उतज्ञानाद्भेदेनानुपलब्धेः॥ नाद्यइत्युक्तमुपलब्धेरिति॥ द्वितीयंशंकते॥ ननुनाहमिति॥ ज्ञानज्ञेययोर्विषयविषयिभावेनभेदस्यसाक्षिप्रत्यक्षसिद्धत्वात्प्रत्यक्षविरुद्धमभेदाभिधानमित्याह॥ बाढमित्यादिना॥ त्वद्वचनादपिजनाबाह्यार्थंज्ञानाद्भेदेनैवोपलभंतइत्याह॥ अतएवेति॥ बाह्यार्थस्यात्यंतासत्त्वेप्रत्यक्षोपलंभायोगात् दृष्टांतत्वासंभवाच्चबहिर्वच्छब्दोनस्यादित्याह॥ इतरथेति॥ अबा॥

नाहंभुंजेनैवतृप्यामीति॥ यद्धींद्रियसन्निकर्षेणस्वयमुपलभ्यमानएवबाह्यमर्थंनाहमुपलभेनचसोस्तीतिब्रुवन्कथमुपादेयवचनःस्यात्॥ ननुनाहमेवंब्रवीमिनकंचिदर्थमुपलभइति॥ किंतूपलब्धिव्यतिरिक्तंनोपलभइतिब्रवीमि॥ बाढमेवंब्रवीषिनिरंकुशत्वात् तेतुंडस्य॥ नतुयुक्त्युपेतंब्रवीषियतउपलब्धिव्यतिरेकोपिबलादर्थस्याभ्युपगंतव्यः उपलब्धेरेव॥ नहिकश्चिदुपलब्धिमेवस्तंभःकुड्यंचेत्युपलभतेउपलब्धिविषयत्वेनैवतुस्तंभकुड्यादीन्सर्वेलौकिकाउपलभंते॥ अतश्चैवमेवसर्वेलौकिकाउपलभंतेयत्प्रत्याचक्षाणाअपिबाह्यार्थमेवव्याचक्षते॥ यदंतर्ज्ञेयंरूपंतद्बहिर्वदवभासतइति॥ तेपिहिसर्वलोकप्रसिद्धांबहिरवभासमानांसंविदंप्रतिलभमानाःप्रत्याख्यातुकामाश्चबाह्यमर्थंबहिर्वदितिवत्कारंकुर्वंति॥ इतरथाहिकस्माद्बहिर्वदितिब्रूयुः॥ नहिविष्णुमित्रोवंध्यापुत्रवदवभासतइतिकश्चिदाचक्षीत॥ तस्माद्यथानुभवंतत्त्वमुपगच्छद्भिर्बहिरेवावभासतइतियुक्तमभ्युपगंतुंनतुबहिर्वदवभासतइति॥ ननुबाह्यस्यार्थस्यासंभवाद्बहिर्वदवभासतइत्यध्यवसितं॥

धितभेदानुभवादेवकारोयुक्तोनवत्कारइत्याह॥ तस्मादिति॥ ज्ञेयार्थोज्ञानातिरेकेणासत्त्वसंभवादित्युक्तबाधाहत्करणमितिशंकते॥ नन्विति॥ कोसावसंभवः असत्त्वंवा असत्त्वनिश्चयोवा अयुक्तत्वंवा उत्कटकोटिकसंशयात्मकसंभवस्याभावोवा नाद्यःसाध्याभेदात् नद्वितीयः स्थूलोघटस्तंभाविति समूहालंबनेस्थूलत्वद्वित्वघटत्वस्तंभत्वरूपविरुद्धधर्मवतोरर्थयोरस्थूलादेकस्माद्द्व्यावगाहिविज्ञानाद्भेदसत्त्वनिश्चयेनासंभवासिद्धिरित्याह॥

नायंसाधुरिति॥ संभवः सत्तानिश्चयः प्रमाणाधीनः असंभवोऽसत्वनिश्चयः प्रमाणाभावाधीनः॥ नवैपरीत्यमितिव्यवस्थामेवस्फुट
यति॥ यद्धीति उक्तव्यवस्थायाः फलंबाह्यार्थस्यप्रत्यक्षादिभिः संभवंवदन्नेवतृतीयंदूषयति॥ इहेति॥ प्रमाणनिश्चितबाह्यार्थस्यस्तं
भादेः परमाणुभ्योभेदाभेदविकल्पैरयुक्तत्वमात्रेणासत्वनिश्चयोनयुक्तः॥ त्वत्पक्षेप्ययुक्तत्वस्यतुल्यत्वान्नह्यस्थूलस्यैकस्यविज्ञा
नस्यस्थूलानेकसमूहालंबनस्यविषयाभेदोयुक्तः स्थूलत्वानेकत्वप्रसंगात् नचेष्टापत्तिः समूहालंबनोच्छेदेविज्ञानानांमिथोवा
र्तानभिज्ञतयाविषयद्वित्वादिव्यवहारलोपापत्तेः तस्मादयुक्तत्वेपियथानुभवंव्यवहारयोग्योर्थः स्वीकार्यः नचतुर्थः निश्चितेनाह

सभवोव१

नायंसाधुरध्यवसायोयतः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौसंभवावधार्येते॥ नपुनः संभवासंभव
पूर्विकेप्रमाणप्रवृत्त्यप्रवृत्ती॥ यद्धिप्रत्यक्षादीनामन्यतमेनापिप्रमाणेनोपलभ्यते तत्संभवति॥ य
त्तुनकेनचिदपिप्रमाणेनोपलभ्यतेतन्नसंभवति॥ इहतुयथास्वंसर्वैरेवप्रमाणैर्बाह्योर्थउपल-
भमानः कथंव्यतिरेकाव्यतिरेकादिविकल्पैर्नसंभवतीत्युच्येतउपलब्धेरेव॥ नचज्ञानस्यविष
यसारूप्याद्विषयनाशोभवति॥ असतिविषयेविषयसारूप्यानुपपत्तेः बहिरुपलब्धेश्चविषय-
स्यातएवसहोपलंभनियमोपिप्रत्ययविषययोरुपायोपेयभावहेतुकोनाभेदहेतुकइत्यभ्युपगंतव्यं॥

श्चासंभवस्यानुपयोगात्तस्यक्वचित्प्रमाणप्रवृत्तेः पूर्वांगत्वादितिभावः॥ यच्चोक्तंज्ञानगतार्थसारूप्यस्यैवज्ञानालंबनत्वोपपत्तेर्बहिरर्थो
भावइतितत्राह॥ नचेति॥ यत्तुगौरवमुक्तंतन्नदूषणंप्रामाणिकत्वादित्याह॥ बहिरिति॥ यतएवज्ञानार्थयोर्भेदः सर्वलोकेसाक्ष्यनुभवसिद्धः
॥ अतएवसहोपलंभनियमोपिनाऽभेदसाधकइत्याह॥ अतएवेति॥ यथाचाक्षुषद्रव्यरूपस्यालोकोपलंभनियतोपलब्धिकत्वेपिनालोकाभे
दः॥ तथार्थस्यनज्ञानाभेदः भेदेपिग्राह्यग्राहकभावेननियमोपपत्तेः नचज्ञानस्यक्षणिकत्वात्स्वभिन्नग्राह्यसंबंधायोगः स्यादित्यादितिभावः॥

विज्ञानमनेकार्थेभ्योभिन्नंएकत्वात्गोत्ववदितिसत्प्रतिपक्षमाह अपिचेतिनचहेत्वसिद्धिःज्ञानंज्ञानमित्येकाकारप्रतीतेःज्ञानैक्यनिश्चयात्नचसाजा
तिविषयाव्यक्तिभेदानिश्चयादित्याह॥ नविशेष्यस्येति॥ घटादेश्चैतन्याद्भेदमुक्त्वा इतिज्ञानाद्भेदमाह॥ तथेति॥ घटोद्वाभ्यांभिन्नःएकत्वात्क्षीरवदित्यर्थः
॥ज्ञानभिन्नार्थानंगीकारेस्वशास्त्रव्यवहारलोपंबाधकमाह॥ अपिचेति क्रमिकयोःस्वप्रकाशयोःक्षणिकज्ञानयोर्मिथोग्राह्यग्राहकत्वमयुक्तमनभ्यु
पगतंचतथाचतयोर्भेदप्रतिज्ञानयुक्ताधर्मिप्रतियोगिनोर्मिथःपरेणचाग्रहेणभेदग्रहायोगात्॥ तथाचतयोर्भेदग्राहकस्थाय्यात्मानङ्गीकारएवएष्टव्यः॥
एवंपक्ष साध्यहेतुदृष्टांतभेदाभावेइदंक्षणिकमसदितिप्रतिज्ञानयुक्ता॥ सर्वतोव्यावृत्तंव्यक्तिमात्रत्वंस्वलक्षणम् अनेकानुगतंसामान्यमनयोर्वृ

अपिचघटज्ञानंपटज्ञानमितिविशेषणयोरेवघटपटयोर्भेदोनविशेष्यस्यज्ञानस्य॥ यथाशुक्लोगौःकृष्णोगौरितिशौ
क्ल्यकार्ष्ण्ययोरेवभेदोनगोत्वस्यद्वाभ्यांचभेदएकस्यसिद्धोभवति॥ एकस्माच्चद्वयोस्तस्मादर्थज्ञानयोर्भेदस्तथाघटदर्शनंघ
टस्मरणमित्यत्रापिप्रतिपत्तव्यं॥ अत्रापिहिविशेष्ययोरेवदर्शनस्मरणयोर्भेदोनविशेषणस्यघटस्य॥ यथाक्षीरगंधः
क्षीररसइतिविशेष्ययोरेवगंधरसयोर्भेदोनविशेषणस्यक्षीरस्यतद्वत्॥ अपिचद्वयोर्विज्ञानयोःपूर्वोत्तरकालयोःस्वसंवे
दनेनैवोपक्षीणयोरितरेतरग्राह्यग्राहकत्वानुपपत्तिस्ततश्चविज्ञानभेदप्रतिज्ञाक्षणिकत्वादिधर्मप्रतिज्ञा॥ स्वलक्ष
णसामान्यलक्षणवास्यवासकत्वाविद्योपप्लवसदसद्धर्मबंधमोक्षादिप्रतिज्ञाश्चस्वशास्त्रगतास्ताहीयेरन्॥ ६॥

तिरूपमितिप्रतिज्ञानयुक्तासर्वानेकार्थानांज्ञानमात्रत्वेमिथःपरेणवादुर्ज्ञानत्वात्॥ उत्तरनीलज्ञानंवास्यंपूर्वनीलज्ञानंवासकमितिप्रतिज्ञानयु
क्ततयोर्भिन्नसज्ञातुरभावात् किंचाविद्योपप्लवोऽविद्यासंसर्गस्तेननीलमितिसद्धर्मः नरविषाणमितिअसद्धर्मः अमूर्तमितिसदस   द्धर्मः॥ सतोवि
ज्ञानस्यासतोनरविषाणस्य वामूर्तत्वादिप्रतिज्ञादुर्लभा अनेकार्थज्ञानसाध्यत्वादज्ञानेनास्यबंधोज्ञानेनास्यमोक्षइतिचप्रतिज्ञावद्दुर्थज्ञान
साध्या आदिपदेनसामान्यतइष्टंग्राह्यमनिष्टंत्याज्यमितिशिष्यहितोपदेशोऽनेकज्ञानसाध्योगृहीतस्तस्मात्प्रतिज्ञादिव्यवहारायग्राह्य
ग्राहकभेदोऽंगीकार्यइत्यर्थः॥

॥ ज्ञानार्थयोर्भेदे युक्त्यंतरमस्तीत्याह ॥ किंचान्यदिति ॥ विज्ञानवदर्थस्याप्यनुभवाविशेषात्स्वीकारो युक्त इत्यर्थः ॥ स्वविषयत्वाद्विज्ञानं स्वीक्रियते नार्थः परग्राह्यत्वादिति शंकते ॥ अथ विज्ञानमिति विरुद्धं स्वीकृत्याविरुद्धं त्यजता बौद्धननयेन मौढ्यं दर्शितमित्याह ॥ अत्यंतेति ॥ ज्ञानं स्ववेद्यमित्यंगीकृत्य मौर्ख्यमापादितं वस्तुतः स्ववेद्यत्वमयुक्तमित्याह ॥ नचेति ॥ कर्तरि क्रियां प्रतिगुणभूते प्रधानत्वाख्यकर्मत्वायोगात्स्वकर्तृकवेदनक

किंचान्यद्विज्ञानं विज्ञानमित्यभ्युपगच्छता बाह्योऽर्थः स्तंभः कुड्यमित्येवंजातीयकः कस्मान्नाभ्युपगम्यत इति वक्तव्यं ॥ विज्ञानमनुभूयत इति चेत् ॥ बाह्योप्यर्थोऽनुभूयत एवेति युक्तमभ्युपगंतुं ॥ अथ विज्ञानं प्रकाशात्मकत्वात्प्रदीपवत्स्वयमेवानुभूयते न तथा बाह्योप्यर्थ इति चेत् ॥ अत्यंतविरुद्धां स्वात्मनि क्रियामभ्युपगच्छसि ॥ अग्निरात्मानं दहतीतिवत् ॥ अविरुद्धं तु लोकप्रसिद्धं स्वात्मव्यतिरिक्तेन विज्ञानेन बाह्योऽर्थोऽनुभूयत इति नेच्छस्यहो पांडित्यं महद्दर्शितं ॥ नचाऽर्थाव्यतिरिक्तमपि विज्ञानं स्वयमेवानुभूयते ॥ स्वात्मनि क्रियाविरोधादेव ॥ ननु विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेति अनवस्था प्राप्नोति ॥ अपि च प्रदीपवदवभासात्मकत्वात् ज्ञानस्य ज्ञानांतरं कल्पयतः समत्वादवभास्यावभासकभावानुपपत्तेः कल्पनानर्थक्यमिति ॥ तदुभयमप्यसत् विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणो ग्रहणाकांक्षानुत्पादादनवस्थाशंकानुपपत्तेः साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपलभ्यभावोपपत्तेः ॥

र्मत्वमसदित्यर्थः ॥ नच स्वविषयत्वमात्रं स्ववेद्यत्वमिति वाच्यं ॥ अभेदे विषयविषयित्वस्याप्यसंभवादिति भावः ॥ ज्ञानस्य स्ववेद्यत्वाभावे दोषद्वयं स्यादिति शंकते ॥ नन्विति ॥ अनवस्था च साम्यं चेति दोषद्वयं परिहरति ॥ तदुभयमपीति ॥ अनित्यज्ञानस्य जन्मादिमत्त्वेन घटवज्जडस्य स्वेन स्वीयजन्मादिग्रहायोगादस्ति ग्राहकाकांक्षा साक्षिणस्तु स्वसत्तायां स्फूर्तौ च निरपेक्षत्वान्नानवस्था नापि साम्यं चिज्जडत्ववैषम्यादित्यर्थः ॥ ६ ॥

शा॰भा॰
र॰प्र॰टी॰
२२९

साक्षी वेत्यत आह ॥ स्वयंसिद्धस्येति ॥ निरपेक्षस्य साक्षिणोऽसत्त्वे क्षणिकविज्ञानभेदासिद्धेः सोऽङ्गीकार्य इत्यर्थः ॥ अनित्यज्ञानस्वरूपसा
धकत्वाच्च साक्षी स्वीकार्य इत्याह ॥ किंचेति ॥ विज्ञानं ज्ञानांतरानपेक्षमिति ब्रुवता तस्याप्रामाणिकत्वमुक्तं स्यात् स्वयं प्रथत इति ब्रुवता ज्ञातृ
शून्यत्वं चोक्तं स्यात् तथा च ज्ञातृज्ञानाविषयत्वाच्छिला स्थप्रदीपवदसदेव विज्ञानं स्यादतस्तत्साक्ष्येष्टव्य इत्यर्थः ॥ विज्ञानस्य स्वान्यज्ञातृ
शून्यत्वमिष्टमेव त्वयापाद्यते न च असत्त्वापत्तिः ज्ञात्रभावादिति वाच्यं ॥ स्वस्यैव ज्ञातृत्वादिति शाक्यः शंकते ॥ बाढमिति ॥ अभेदे ज्ञातृ

अ॰पा॰
२ २

स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात् ॥ किंचान्यत् प्रदीपवद्विज्ञानमवभासकांतरनिरपेक्षं स्वयमेव प्र
थत इति ब्रुवताऽप्रमाणगम्यं विज्ञानमनवगंतृकमित्युक्तं स्याच्छिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत् ॥
बाढमेवमनुभवरूपत्वात्तु विज्ञानस्येष्टो नः पक्षस्त्वयानुज्ञायत इति चेत् ॥ नाऽन्यस्यावगंतुश्चक्षुःसाधनस्य
प्रदीपादिप्रथनदर्शनात् ॥ अतो विज्ञानस्याप्यवभास्यत्वाविशेषात् सत्येवान्यस्मिन्नवगंतरि प्रथनं प्रदीप
वदित्यवगम्यते ॥ साक्षिणोऽवगंतुः स्वयंसिद्धतामुपक्षिपता स्वयं प्रथते विज्ञानमित्येष एव मम पक्षस्त्वया वा
चोयुक्त्यंतरेणाश्रित इति चेत् ॥ न विज्ञानस्योत्पत्तिप्रध्वंसानेकत्वादिविशेषवत्त्वाऽभ्युपगमात् ॥ अतः प्रदी
पवद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभिः प्रसाधितं ॥२८॥ वैधर्म्याच्च न स्वप्नादिवत् ॥२९॥ ज्ञेयत्वायोगात् ज्ञात्रंतर

राम॰
२२९

मावश्यकमिति परिहरति ॥ नेति ॥ विमतं विज्ञानं स्वातिरिक्तवेद्यं वेद्यत्वाद्देहवदित्यर्थः अतिरिक्तः साक्षी किमन्यवेद्यः स्ववेद्यो वा आद्येऽनव
स्था द्वितीये विज्ञानवाद एव भंग्यंतरेणोक्तः स्यादिति शंकते साक्षिण इति त्वया विज्ञानं जन्मविनाशयुक्तमुच्यते ॥ अतः कार्यस्य जडत्वनियमात् स्वा
तिरिक्तवेद्यत्वमस्माभिः साधितं कूटस्थचिदात्मनो ग्राहकानपेक्षत्वाच्चानवस्थेति चोक्तमतो महद्वैलक्षण्यमावयोरिति परिहरति ॥ न विज्ञानस्येति
॥२८॥ सर्ववेद्यवि ज्ञानवदर्थस्याप्युपलब्धेर्न बाह्यार्थाभाव इत्युक्तं ॥ संप्रति जाग्रद्विज्ञानं स्वप्नादिविज्ञानवन्न बाह्यालंबनमित्यनुमानं दूषयति

किमत्र निर्विषयत्वं साध्यमुत पारमार्थिकविषयशून्यत्वमथवा व्यावहारिकविषयशून्यत्वं॥ नाद्यः स्वप्नादिविभ्रमाणामपि मिथ्यार्थालंबनत्वेन दृष्टांते साध्यवैकल्यात् न द्वितीयः सिद्धसाधनादिति सूत्रस्य चकारार्थः तृतीये तु व्यवहारदशायां बाधितार्थग्राहित्वं उपाधिरित्याह॥ बाध्यनेत्यादिना॥ निद्राग्लानमितिकरणदोषोक्तिः। साधनव्यापकत्वनिरासायाह॥ नचैवमिति॥ किंच प्रमाणजानुभव उपलब्धिः पक्षोऽ

यदुक्तं बाह्यार्थापलापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा अपि स्तंभादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः प्रत्ययत्वाऽविशेषादिति तत्प्रतिवक्तव्यं अत्रोच्यते न स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्यया भवितुमर्हंति कस्मात्॥ वैधर्म्यात्॥ वैधर्म्यं हि भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमः॥ बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य मिथ्या मयोपलब्धो महाजनसमागम इति॥ न ह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रांतिरुद्बभूवेति॥ एवं मायादिष्वपि भवति यथायथं बाधः॥ नैवं जागरितोपलब्धं वस्तु स्तंभादिकं कस्यांचिदप्यवस्थायां बाध्यते॥ अपि च स्मृतिरेषा यत्स्वप्नदर्शनं उपलब्धिस्तु जागरितदर्शनं॥ स्मृत्युपलब्ध्योश्च प्रत्यक्षमंतरं स्वयमनुभूयते॥ अर्थविप्रयोगसंप्रयोगात्मकं इष्टं पुत्रं स्मरामि नोपलभे उपलब्धुमिच्छामीति॥ तत्रैवं सति न शक्यते वक्तुं मिथ्या जागरितोपलब्धिरुपलब्धित्वात्स्वप्नोपलब्धिवदिति उभयोरंतरं स्वयमनुभवता॥ न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुं॥

प्रमाणजं स्वप्नज्ञानं दृष्टांत इति वैधर्म्यांतरं॥ परमतेन स्वप्नस्य स्मृतित्वमंगीकृत्याह॥ अपि चेति॥ स्मृतिप्रत्यक्षोपलब्ध्योर्वैधर्म्यांतरमाह॥ अर्थविप्रयोगेति॥ असंबद्धस्यावर्तमानस्य स्मृतेरर्थो विषय इति निरालंबनत्वमप्यस्याः कदाचिद्भवेत्॥ न संप्रयुक्तवर्तमानार्थमात्रग्राहिण्या उपलब्धेरिति भावः॥ पूर्वोक्तप्रमाणाप्रमाणजत्ववैधर्म्योक्तिफलमाह॥ तत्रैवं सतीति॥ वैधर्म्ये सतीत्यर्थः॥ अप्रमाणजत्वोपाधेर्निरालंबनत्वानुमानं न युक्तमिति भावः वैधर्म्यासिद्धिं निरस्यति॥ न चेति॥

शा·भा·
र·प्र·टी·
२३०

अ·पा·
२ २

बाधमप्याह॥ अपिचेति॥ वस्तुनोघटाद्यनुभवस्यनिरालंबनत्वंधर्मोयदिस्यात्तर्हिकिंदृष्टांताग्रहेणप्रत्यक्षतोपिवक्तुंशक्यत्वात्नहिवन्हेरौष्ण्यं
दृष्टांतेनवक्तव्यं॥ यदिनवस्तुनोधर्मोस्तितदापिकिंदृष्टांतेनबाधितस्यदृष्टांतसहस्रेणापिदुःसाध्यत्वादतः स्वतोनिरालंबनत्वोक्तौसा-
लंबनत्वानुभवबाधभियात्वयानुमानमारब्धंतथापिबाधोनमुंचतीत्यर्थः उक्तोपाधिरपिनविस्मर्तव्यइत्याह॥ दर्शितंत्विति॥२९॥
सूत्रव्यावर्त्यंस्मारयित्वादूषयति॥ यदप्युक्तमित्यादिना॥ भावः उत्पत्तिः सत्तावानतुबाह्यार्थानुपलब्धावपिपूर्वपूर्ववासनाबलादुत्त

अपिचानुभवविरोधप्रसंगात्जागरितप्रत्ययानांस्वतोनिरालंबनतांवक्तुमशक्नुवतास्वप्नप्रत्ययसाधर्म्या-
द्वक्तुमिष्यते॥ नहियोयस्यस्वतोधर्मोनसंभवति॥ सोन्यस्यसाधर्म्यात्तस्यसंभविष्यति॥ नह्यग्निरुष्णोऽनुभू-
यमानउदकसाधर्म्याच्छीतोभविष्यति॥ दर्शितंतुवैधर्म्यंस्वप्नजागरितयोः॥२९॥ नभावोऽनुपलब्धेः॥३०॥
यदप्युक्तंविनाप्यर्थेनज्ञानवैचित्र्यंवासनावैचित्र्यादेवावकल्प्यतइतितत्प्रतिवक्तव्यं॥ अत्रोच्यते॥ नभावोवास-
नानामुपपद्यते॥ त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानां अर्थोपलब्धिनिमित्ताहिप्रत्यर्थंनानारूपावासनाभवंति॥
अनुपलभ्यमानेषुत्वर्थेषुकिंनिमित्ताविचित्रावासनाभवेयुः॥ अनादित्वेप्यंधपरंपरान्यायेनाप्रतिष्ठैवानवस्था
व्यवहारलोपिनीस्यान्नाभिप्रायसिद्धिः॥ यावप्यन्वयव्यतिरेकावर्थापलापिनोपन्यस्तौवासनानिमित्तमेवेदंज्ञा-
नंजातंनार्थनिमित्तमितितावप्येवंसतिप्रत्युक्तौद्रष्टव्यौविनार्थोपलब्ध्यावासनानुपपत्तेः॥ रोत्तरविज्ञानवैचित्र्यमस्तु।

बीजांकुरवदनादित्वादित्यतआह॥ अनादित्वेपीति॥ बीजादंकुरोदृष्टइति अदृष्टेपितज्जातीययोः कार्यकारणभावकल्पनायुक्ताइहत्वर्थानुभव।
निरपेक्षवासनोत्पत्तेरादावेवकल्प्यत्वादनादित्वकल्पनानिर्मूलेतिनाभिप्रेतधीवैचित्र्यसिद्धिरित्यर्थः॥ ननुनिरपेक्षवासनानांसत्त्वेधीवैचित्र्यमसत्त्वेतु
नेतिस्वप्नेदृष्टमितिसमूलाऽनवस्थेत्यतआह॥ याविति॥ वासनानांबाह्यार्थानुभवकार्यत्वेसतिनिरपेक्ष्यासिद्धेर्नान्वयादिदृष्टिरित्यर्थः॥ कार्यत्वमाह

व्यतिरेकमाह॥ विनेति॥

रम·
२३०

अर्थानुभवकार्याणांवासनानांतदनपेक्षत्वायोगान्नत्वदुक्तान्वयादिदृष्टिरित्युक्तमभिनवार्थोपलब्धिवैचित्र्यस्यवासनांविनापिभावेनव्यतिरेकव्य।
भिचाराच्चनक्कापिवासनामात्रकृतंधीवैचित्र्यंकिंत्वर्थानुभवेसतिवासनाःसन्तिनेत्यन्वयव्यतिरेकाभ्यांवासनामूलानुभवावच्छेदकार्थकृतमेवेतिबा
ह्यार्थसद्भावसिद्धिरित्याह॥अपिचेति॥यःसंस्कारःससाश्रयोलोकेदृष्टःयथावेगादिरिष्वाश्रयःअतोविज्ञानसंस्काराणांनभावःआश्रयानुपलब्धेरि
त्यर्थांतरमाह॥अपिचेति॥३०॥अस्त्वालयविज्ञानंआश्रयइत्यतआह॥क्षणिकत्वाच्चेति॥सूत्रंव्याचष्टे॥यदपीति॥सहोत्पन्नयोःसव्येतरवि।
द्या२

अपिचविनापिवासनाभिरर्थोपलब्ध्युपगमात् विनात्वर्थोपलब्ध्यावासनोत्पत्त्यनभ्युपगमात् अर्थसद्भावमेवान्वय
व्यतिरेकावपिप्रतिष्ठापयतः॥अपिचवासनानामसंस्कारविशेषाःसंस्काराश्चनाश्रयमंतरेणावकल्पंते॥एवंलोकेदृष्ट
त्वात्॥नचतववासनाश्रयःकश्चिदस्तिप्रमाणतःअनुपलब्धेः॥३०॥क्षणिकत्वाच्च॥३१॥यदप्यालयविज्ञानंनामवास
नाश्रयत्वेनपरिकल्पितंतदपिक्षणिकत्वाभ्युपगमादनवस्थितस्वरूपंसत्प्रवृत्तिविज्ञानवच्चवासनानामधिकरणंभवितुम
र्हति॥नहिकालत्रयसंबंधिन्येकस्मिन्नन्वयिन्यसतिकूटस्थेवासर्वार्थदर्शिनिदेशकालनिमित्तापेक्षवासनाधानस्मृतिप्र
तिसंधानादिव्यवहारःसंभवति॥स्थिरस्वरूपत्वेत्वालयविज्ञानस्यसिद्धांतहानिः॥अपिचविज्ञानवादेपिक्षणिकत्वाभ्यु
पगमस्यसमानत्वाद्यानिबाह्यार्थवादेक्षणिकत्वनिबंधनानिदूषणान्युद्भावितानिउत्तरोत्पादेचपूर्वनिरोधादित्येवमा
दीनितानीहाप्यनुसंधातव्यानि॥

षाणवदाश्रयाश्रयिभावायोगात्पौर्वापर्येचाधेयक्षणासत्तआधारत्वायोगात्सत्वेक्षणिकत्वव्याघा
तान्नाधारत्वमालयविज्ञानस्यक्षणिकत्वान्नीलादिविज्ञानवदित्यर्थः॥अस्तुतर्हिआलयविज्ञानसंतानाश्रयावासनाइत्यतआह॥नहीति॥
सविकारःकूटस्थोवास्थाय्यात्मायदिनास्तितदासंतानस्यावस्तुत्वाद्देशाद्यपेक्षया यद्वासनानामाधानंनिक्षेपोयेचस्मृतिप्रत्यभिज्ञेयश्चतन्मू
लोव्यवहारस्तत्सर्वंनसंभवतीत्यर्थः॥यदिव्यवहारार्थंआत्मस्यापित्वंतदाअपसिद्धांतइत्याह॥स्थिरेति॥सूत्रमनिर्देशार्थत्वेनापिव्याचष्टे॥अपिचे

शा॰भा॰ मतद्वयनिरासमुपसंहरति एवमिति॥ ज्ञानज्ञेयात्मकस्य सर्वस्य सत्त्वासत्त्वाभ्यां विचारासहत्वाच्छून्यतावशिष्यत इति माध्यमिकपक्षस्यापि अ॰पा॰
र॰प्र॰टी॰ मानमूलत्वमाशंक्य सूत्रकारः किमिति न निराचकारेत्यत आह॥ शून्येति॥ आदरः पृथक्सूत्रारंभो न क्रियत एतान्येव तन्मतनिरासार्थत्वेनापि २ २
२३१ योज्यंत इत्यर्थः॥ तथाहि ज्ञानार्थयोर्नाभावः प्रमाणत उपलब्धेः ननु जाग्रत्स्वप्नौ ज्ञानार्थशून्यौ अवस्थात्वात्सुषुप्तिवदित्यत आह॥ वैधर्म्याच्च न
स्वप्नादिवत्॥ स्वप्नआदिर्यस्याः सुषुप्तेस्तद्वत्तेन तावस्थयोः शून्यत्वमुपलब्ध्यनुपलब्धिवैधर्म्यलक्षणवाधितज्ञानार्थोपलब्धिबाधात्सुषुप्ताव

एवमेतौ द्वावपि वैनाशिकपक्षौ निराकृतौ बाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च॥ शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते॥ न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुं अपवादाभावे उत्सर्गप्रसिद्धेः॥ ३१॥ सर्वथानुपपत्तेश्च॥ ३२॥ किंबहुना सर्वप्रकारेण यथायथाऽयं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदीर्यत एव न कांचिदप्यत्रोपपत्तिं पश्यामः॥ अतश्चानुपपन्नो वैनाशिकतंत्रव्यवहारः॥ अपि च बाह्यार्थविज्ञानशून्यवादत्रयमितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनोऽसंबद्धप्रलापित्वं॥ प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजा इति॥ सम॰ २३१
सर्वथाप्यनादरणीयोऽयं सुगतसमयः श्रेयस्कामैरित्यभिप्रायः॥३२॥

प्यात्मज्ञानसत्त्वेन साध्यवैकल्याच्च नानुमानमित्यर्थः॥ किंच। निरधिष्ठाननिषेधायोगादधिष्ठानमेव तत्त्वं वाच्यं तस्य त्वन्मतेन भावः मानतोऽनुपलब्धेरित्याह॥ न भावोऽनुपलब्धेः॥ तदर्थमाह॥ न ह्ययमिति॥ यज्ज्ञाततत्त्वात्सदित्युत्सर्गतः प्रपंचस्य न शून्यत्वं बाधाभावादित्यर्थः न च सत्त्वासत्त्वाभ्यां विचारासहत्वाच्छून्यत्वं मिथ्यात्वसंभवादिति भावः क्षणिकत्वाच्चेति सूत्रं क्षणिकत्वोपदेशाच्चेति पठनीयं शून्यत्वविरुद्धक्षणिकत्वोपदेशादसंगतप्रलापी सुगत इत्यर्थः॥ ३१॥ सुगतमतासांगत्यमुपसंहरति॥ सर्वथेति॥ सर्वज्ञस्य कथं विरुद्धप्रलापस्तत्राह॥ प्रद्वेषो वेति॥ वेदवाह्याश्चत्र प्रजाँ ग्राह्याश्च ताभ्यांत्यैकमूलसुगतसिद्धांतेन न वेदांतसिद्धांतस्याविरोध इति

नैकस्मिन्नसंभवात्॥ मुक्तकच्छमते निरस्ते मुक्ताम्बराणां मतं बुद्धिस्थं भवति तन्निरस्यत इति प्रसंगसंगतिमाह॥ निरस्त इति॥ एकरूपं ब्रह्मेति वैदिकसिद्धांतस्यानेकांतवादेन विरोधोऽस्ति न वेति तद्वादस्य मानभ्रांतिमूलत्वाभ्यां संदेहे मानमूलत्वान्विरोध इति पूर्वपक्षफलमभिसंधाय तन्मतमुपन्यस्यति॥ सप्त चेति॥ जीवाजीवौ भोक्तृभोग्यौ विषयाभिमुख्येनेंद्रियाणां प्रवृत्तिरास्रवः॥ तां संवृणोतीति संवरो यमनियमादिः॥ निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः॥ बंधः कर्म॥ मोक्षः कर्मपाशनाशे सत्यलोकाकाशप्रविष्टस्य सततोर्ध्वगमनं॥ नन्वास्रवादीनां भोग्यांतर्भावात्कथं सप्तत्वमित्यत आह॥ संक्षेपतस्त्विति॥ संक्षेपविस्तराभ्यामुक्तार्थेषु मध्यमरीत्या विस्तारांतरमाह॥ तयोरिति॥ अस्तिकायशब्दः सांकेतिकः पदार्थवाची जीवश्चासावस्तिकायश्चेत्येवं विग्रहः॥ पूर्यंते गलंतीति पुद्गलाः परमाणुसंघाः काया॥

नैकस्मिन्नसंभवात्॥ ३३॥ निरस्तः सुगतसमयः विवसनसमय इदानीं निरस्यते॥ सप्त चैषां पदार्थाः संमताः जीवाजीवास्रवसंवरनिर्जरबंधमोक्षा नाम॥ संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ यथायोगं तयोरेवेतरांतर्भावादिति मन्यंते॥ तयोरिममपरं प्रपंचमाचक्षते॥ पंचास्तिकाया नाम जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायश्चेति॥ सर्वेषामप्येषामवांतरप्रभेदान्बहुविधान्स्वसमयपरिकल्पितान्वर्ण

सम्यक्प्रवृत्त्यनुमेयो धर्मः॥ ऊर्ध्वगमनशीलस्य जीवस्य देहे स्थितिहेतुरधर्मः॥ आवरणाभाव आकाश इत्यर्थः॥ पंचपदार्थानामवांतरभेदमाह॥ सर्वेषामिति॥ अयमर्थः जीवास्तिकायस्त्रिविधः कश्चिज्जीवो नित्यसिद्धः अर्हन्मुख्यः केचित्सांप्रतिकमुक्ताः केचिद्बद्धा इति॥ पुद्गलास्तिकायः षोढा पृथिव्यादि चत्वारि भूतानि स्थावरं जंगमं चेति॥ प्रवृत्तिस्थितिलिंगौ धर्माधर्मावुक्तौ आकाशास्तिकायो द्विविधः लोकाकाशः सांसारिकः॥ अलोकाकाशो मुक्ताश्रय इति॥ बंधाख्यं कर्माष्टविधं चत्वारि घातिकर्माणि चत्वार्यघातीनि॥ तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमांतरायं चेति घातिकर्माणि॥ तत्त्वज्ञानान्न मुक्तिरिति ज्ञानमाद्यं कर्म॥ आर्हततंत्रश्रवणान्न मुक्तिरिति ज्ञानं द्वितीयं॥ बहुषु तीर्थकरप्रदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं॥ मोक्षमार्गप्रवृत्तिविघ्नकरणमान्तर्यम्॥

इमानिचत्वारिश्रेयोहंतृत्वात् घातिकर्माणि॥अथाघातीनिचत्वारिकर्माणिवेदनीयंनामिकंगोत्रिकमायुष्कमिति॥ममवेदितव्यंतत्त्वमस्तीत्यभिमानोवेदनीयं॥एतत्त्वामाहमस्मीत्यभिमानोनामिकं॥अहमत्रभवतोदेशिकस्यार्हतःशिष्यवंशेप्रविष्टोस्मीत्यभिमानोगोत्रिकं॥शरीरस्थित्यर्थंकर्मआयुष्कं॥अथवाशुक्रशोणितमिश्रितमायुष्कंतस्यतत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गोत्रिकं॥शक्तस्यतस्यद्रवीभावात्मककललावस्थायाबुद्बुदावस्थायाश्चारंभकःक्रियाविशेषोनामिकं॥सक्रियस्यबीजस्यजाठराग्निवायुभ्यामीषद्घनीभावोवेदनीयंतत्त्ववेदनानुकूलत्वात्तान्येतानितत्त्ववेदकशुक्लपुद्गलार्थत्वादघातीनि॥तदेतत्कर्माष्टकंजन्मार्थत्वाद्बंधः आस्रवादिद्वारेतिइयंप्रक्रियामानशून्येतिद्योतयतिस्वसमयपरिकल्पितानितिस्वीयतंत्रसंकेतमात्रकल्पितानीत्यर्थः॥पदार्थानामुक्तानामनेकांतत्वंवदंतीत्याह॥सर्वत्रेति॥अस्तित्वनास्तित्वादिविरुद्धधर्मद्वयमादायवस्तुमात्रेन्यायंयोजयंतिसप्तानामस्तित्वादीनांभंगानांसमाहारःसप्तभंगीतस्याःनयोन्यायःघटादेर्हिसर्वात्मनासदैकरूपत्वेप्राप्यात्मनाप्यसत्त्वेवस

सर्वत्रचेमंसप्तभंगीनयंनामन्यायमवतारयंति॥स्यादस्तिस्यान्नास्तिस्यादस्तिचनास्तिचस्यादवक्तव्यःस्यादस्तिचावक्तव्यश्च॥स्यान्नास्तिचावक्तव्यश्चस्यादस्तिचनास्तिचावक्तव्यश्चेत्येवमेवैकत्वनित्यत्वादिष्वपीमंसप्तभंगीनयंयोजयंति॥

इतितत्प्राप्त्येयत्वेनस्यादतोघटत्वादिरूपेणकथंचिदस्तिप्राप्यत्वादिरूपेणकथंचिन्नास्तीत्येवमनेकरूपत्वंवस्तुमात्रस्यास्थेयमितिभावः केतेसप्तभंगास्तानाह॥स्यादस्तीति॥स्यादित्यव्ययंतिङंतप्रतिरूपकंकथंचिदर्थकंस्यादस्तिकथंचिदस्तीत्यर्थःएवमग्रेपि॥तत्रवस्तुनोऽस्तित्ववांछायांस्यादस्तीत्याद्योभंगःप्रवर्तते॥नास्तित्ववांछायांस्यान्नास्तीतिद्वितीयोभंगः क्रमेणोभयवांछायांस्यादस्तिचनास्तिचेतितृतीयोभंगः॥युगपदुभयवांछायांअस्तिनास्तीतिशब्दद्वयस्यसकृदक्रमशक्यत्वात्स्यादवक्तव्यइतिचतुर्थोभंगः॥आद्यचतुर्थभंगयोर्वांछायांस्यादस्तिचावक्तव्यश्चेतिपंचमोभंगः द्वितीयचतुर्थेच्छायांस्यान्नास्तिचावक्तव्यश्चेतिषष्ठोभंगः॥तृतीयचतुर्थेच्छायांस्यादस्तिनास्तिचावक्तव्यश्चेतिसप्तमोभंगइतिविभागः॥एवमेकत्वमनेकत्वंचेतिद्वयमादायस्यादेकःस्यादनेकः॥स्यादेकोऽनेकश्च॥स्यादवक्तव्यःस्यादेकोऽवक्तव्यः॥स्यादनेकोऽवक्तव्यःस्यादेकोनेकश्चावक्तव्यश्चेति॥तथास्यान्नित्यःस्यादनित्यइत्याद्यूह्यम्॥ ॥

एवमनेकरूपत्वेवस्तुनिप्राप्तित्यागादिव्यवहारःसंभवतिएकरूपत्वेसर्वंसर्वत्रसर्वदास्त्येवेतिव्यवहारविलोपापत्तिःस्यात्तस्मादनैकांतंसर्वमित्येकरूपब्रह्मवादबाधइतिप्राप्तेसिद्धांतयति॥अत्रेति॥यदस्तितत्सर्वत्रसर्वदास्त्येवयथाब्रह्मात्मा नचैवंतत्प्राप्त्येयत्नोनस्यादितिवाच्यं॥अप्राप्तिभ्रांत्यायत्नसंभवात्॥यन्नास्तितन्नास्त्येवयथाशशविषाणादि॥प्रपंचस्तूभयविलक्षणएवेत्येकांतवादएवयुक्तःनानेकांतवादस्तथाहिकिंयेनाकारेणवस्तुनःसत्वंतेनैवाकारेणासत्वमुताकारांतरेणद्वितीयेवस्तुनआकारांतरमेवासदितिवस्तुनःसदैकरूपत्वमेवनहिदूरस्थग्रामस्यप्राप्तेरसत्वेग्रामोप्यसत्वंभवतिप्राप्यासत्वेप्राप्तियत्नानुपपत्तेः॥अतोयथाव्यवहारंप्रपंचस्यैकरूपत्वमास्थेयंनाद्यइत्याह॥नायमिति॥नन्विमतमनेकात्मकंवस्तु

श्लो २

अत्राचक्ष्महेनायमभ्युपगमोयुक्तइतिकुतःएकस्मिन्नसंभवात्॥नह्येकस्मिन्धर्मिणियुगपत्सदसत्वादिविरुद्धधर्मसमावेशःसंभवतिशीतोष्णवत्॥यएतेसप्तपदार्थानिर्द्धारिताएतावंतएवंरूपाश्चेति॥तेतथैववास्युर्नैववातथास्युः॥इतरथाहितथावास्युरतथावेत्यनिर्द्धारितरूपंज्ञानंसंशयज्ञानवदप्रमाणमेवस्यात्॥नन्वनेकात्मकंवस्त्वितिनिर्धारितरूपमेवज्ञानमुत्पद्यमानंसंशयज्ञानवन्नाप्रमाणंभवितुमर्हति॥नेतिब्रूमः॥निरंकुशंह्यनेकांतत्वंसर्ववस्तुषुप्रतिजानानस्य।निर्धारणस्यापिवस्तुत्वाविशेषात्स्यादस्तिस्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्धारणात्मकतैवस्यात्॥एवंनिर्धारयितुर्निर्धारणफलस्यचस्यात्पक्षेस्तितास्याच्चपक्षेनास्तितेत्येवंसतिकथंप्रमाणभूतःसंस्तीर्थकरःप्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्धारितासूपदेष्टुंशक्नुयात्॥

त्वान्नारसिंहवदितिचेन्न घट इदानीमस्त्येवेत्यनुभवबाधात्॥किंचजीवादिपदार्थानांसप्तत्वंजीवत्वादिरूपंचास्त्येवनास्त्येवेतिचनियतंउताऽनियतं॥आद्येव्यभिचारइत्याह॥यइति॥द्वितीयेपदार्थनिश्चयोनस्यादित्याह॥इतरथेति॥अनेकांतंसर्वमित्येवनिश्चयइतिशंकते॥नन्विति॥तस्यनिश्चयरूपत्वंनियतमनियतंवाआद्येवस्तुत्वस्यतस्मिन्नेवैकरूपेनिश्चयेव्यभिचारः॥द्वितीयेतस्यसंशयत्वंस्यादित्याह॥नेतिब्रूमइति॥प्रमायामुक्तन्यायंप्रमात्रादावतिदिशति॥एवमिति॥निर्धारणंफलंयस्यप्रमाणादेस्तस्येत्यर्थः॥इत्येवंसर्वत्रानिर्धारणेसत्युपदेशोनिष्कंपप्रवृत्तिश्चनस्यादित्याह॥एवंसतीति॥

शा॰भा॰ अनेकांतवादे अस्तिकायपंचत्वमपि न स्यादित्याह॥ तथा पंचानामिति॥ यदुक्तमवक्तव्यत्वं तत्किं केनापि शब्देनावाच्यत्वं॥ उत सकृद अ॰पा॰
स्॰म॰टी नेकशब्दवाच्यत्वं नाद्यः व्याघातादित्याह॥ न चैषामिति॥ उच्यंते चाऽवक्तव्या इति पदैरिति शेषः॥ न द्वितीयः सकृदेकवक्तृमुखजानेक॰ २२
२३३ शब्दानामप्रसिद्धेर्निषेधायोगात् शेषस्यापि मुखभेदान्न चार्थस्य युगपद्विरुद्धधर्मवांछायां वक्तुर्मूकत्वमात्रमवक्तव्यपदेन विवक्षि

कथं वा तदभिप्रायानुसारिणस्त्वदुपदिष्टेर्थेऽनिर्धारितरूपे प्रवर्तेरन्॥ ऐकांतिकफलत्वनिर्धारणे हि।
सति तत्साधनानुष्ठानाय सर्वो लोकोऽनाकुलः प्रवर्त्तते नान्यथा अतस्त्वानिर्धारितार्थशास्त्रप्रणयनमत्तो
न्मत्तवदनुपादेयवचनः स्यात्। तथा पंचानामस्तिकायानां पंचत्वसंख्यास्ति वा नास्ति वेति विकल्प्यमाना
स्तावदेकस्मिन्पक्षे पक्षांतरे तु न स्यादित्यतो न्यूनसंख्यात्वमधिकसंख्यात्वं वा प्राप्नुयात्॥ न चैषां पदा
र्थानामवक्तव्यत्वं संभवति॥ अवक्तव्याश्चेन्नोच्येरन्॥ उच्यंते चाऽवक्तव्याश्चेति विप्रतिषिद्धं॥ उच्यमानाश्च
न थैवावधार्यंते नावधार्यंत इति च तथा तदवधारणफलं सम्यक्दर्शनमस्ति नास्ति वा एवं तद्विपरी।
तमसम्यक्दर्शनमप्यस्ति वा नास्ति वेति प्रलपन्मत्तोन्मत्तपक्षस्यैव स्यात्॥ न प्रत्यायितव्यपक्षस्य॥
स्वर्गापवर्गयोश्च पक्षे भावः पक्षे चाभावस्तथा पक्षे नित्यता पक्षे चानित्यतेति अनवधारणायां प्रवृत्त्यनु। स्या॰
पपत्तिः॥ अनादिसिद्धजीवप्रभृतीनां च स्वशास्त्रावधृतस्वभावानामयथावधृतस्वभावत्वप्रसंगः॥ २ ॥ २३३

तमिति वाच्यं तादृशवांछायास्तवानुत्पत्तेरिति॥ किंच विरुद्धानेकप्रलापितत्वादर्हन्नऽनाप्त इत्याह॥ उच्यमानाश्चेत्यादिना॥ इति च प्रलपन्नित्य
न्वयः अर्हन्निति शेषः अनाप्तपक्षस्यैवांतर्गतः स्यान्नाप्तपक्षस्येत्यर्थः इतश्चासंगतोनैकांतवाद इत्याह॥ स्वर्गेति॥ किंचानादिसिद्धोऽर्हन्मुनिः॥
अन्ये तु हेत्वनुष्ठानान्मुच्यंते॥ अननुष्ठानाद्बध्यंत इत्यार्हततंत्रावधृतस्वभावानां त्रिविधजीवानां त्रैविध्यनियमोऽपि न स्यादित्याह॥ अनादीति॥

एतेनेति१

प्रपंचितं सूत्रार्थं निगमयति एवमिति॥ सत्वासत्वयोरेकत्र निरासेनेत्यर्थः॥ परमाणुसंघाताः पृथिव्यादय इति दिगंबरसिद्धांतः किमिति सूत्रकृतोपेक्षितस्तत्राह॥ यत्त्विति॥ ३३॥ जीवस्य देहपरिमाणतां दूषयति॥ एवं चेति॥ अकार्त्स्न्यं मध्यमपरिमाणत्वं तेनानित्यत्वं स्यादित्यर्थः॥ अर्थांतरमाह॥ शरीराणां चेति॥ विपाकः कर्मणामभिव्यक्तिः जीवस्य कृत्स्नगजशरीराव्यापित्वमकार्त्स्न्यं शरीरैकदेशो निर्जी-

एवं जीवादिषु पदार्थेष्वेकस्मिन्धर्मिणि सत्वासत्वयोर्विरुद्धयोर्धर्मयोरसंभवात्॥ सत्वे चैकस्मिन्धर्मेऽसत्वस्य धर्मांतरस्यासंभवात्॥ असत्वे चैवं सत्वस्यासंभवादसंगतमिदमार्हतं मतं॥ एतेनैकानेकनित्यानित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकांताभ्युपगमा निराकृता मंतव्याः॥ यत्तु पुद्गलसंज्ञकेभ्योऽणुभ्यः संघाताः संभवंतीति कल्पयंति तत्पूर्वेणैवाणुवादनिराकरणेन निराकृतं भवतीत्यतो न पृथक्तन्निराकरणाय प्रयत्यते॥ ३३॥ एवं चात्माऽकार्त्स्न्यं॥ ३४॥ यथैकस्मिन्धर्मिणि विरुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्त एवमात्मनोऽपि जीवस्याकार्त्स्न्यमपरो दोषः प्रसज्येत॥ कथं॥ शरीरपरिमाणो हि जीव इत्यार्हता मन्यंते॥ शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत॥ शरीराणां चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित्कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात्॥ पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत॥ समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः॥ स्यादेतत् अनंतावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे संकुचेयुर्महति च विकसेयुरिति॥

वः स्यादित्यर्थः॥ पुत्तिकादेहे कृत्स्नो जीवो न प्रविशेत देहाद्बहिरपि जीवः स्यादित्यर्थः॥ किंच बालदेहमात्र आत्मा ततः स्थूले युवदेहे क्वचित्स्यादिति कृत्स्नदेहः स जीवो न स्यादित्याह॥ समान इति यथा दीपावयवानां घटे संकोचो गेहे विकासस्तथा जीवावयवानामिति देहमानत्वं नियमं कृतेति॥ एवं चेति॥

दीपांशवज्जीवांशाः भिन्नदेशा एकदेशा वेति विकल्प्याद्ये ऽल्पदेहाद्बहिरपि जीवः स्यादिति दूषयति तेषामित्यादिना ॥ दीपस्य तु न घटाद्बहिः सत्त्वं अधिकावयवानां विनाशात् ॥ द्वितीयं दूषयति ॥ अप्रतिघात इति ॥ अवयवानां नित्यत्वं चासिद्धं अल्पत्वाद्दीपांशवदित्याह ॥ अपि चेति ॥ ३४ ॥ एवं जीवावयवा नित्या इति मतेन देहमानत्वं निरस्तं संप्रति जीवस्य केचिदेव कूटस्था अवयवा अन्ये त्वागमापायिन इति शंकते ॥ अथेति ॥ बृहत्तनुकाययोरसौ जीवस्यावयवागमापायाभ्यां देहमानत्वमित्यर्थः सूत्रेण परिहरति ॥ तत्रापीति ॥ आगमापायो पर्यायः ॥ किमागमापायिनामवयवानामात्मत्वमस्ति न वा आद्ये आह ॥ विकारादिदोषेति ॥ कोऽसौ बंधमोक्षाभ्युपगम इत्यत आह ॥ कर्माष्टकेति ॥ व्याख्यानमेतत् ॥ आद्ये कल्पे दोषांतरं वदन्कल्प्यांतरमादाय दूषयति ॥ किं चेति ॥ अवशिष्टकूटस्थावयवस्य दुर्ज्ञानत्वादात्मज्ञानाभावान्नस [illegible]

तेषां पुनरनंतानां जीवावयवानां समानदेशत्वं प्रतिहन्यते वा न वेति वक्तव्यं ॥ प्रतिघाते तावन्नानंतावयवाः परिच्छिन्ने देशे सम्मीयेरन् ॥ अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसंगः स्यात् ॥ अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानंत्यं नोत्प्रेक्षितुमपि शक्यं ॥ ३४ ॥ अथ पर्यायेण बृहच्छरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छंति ॥ तनुशरीरप्रतिपत्तौ च केचिदपगच्छंतीत्युच्येत ॥ तत्राप्युच्यते ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥ न च पर्यायेणाप्यवयवोपगमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते कुतो विकारादिदोषप्रसंगात् ॥ अवयवोपगमापगमाभ्यां ह्यनिशमापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यं विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत ॥ ततश्च बंधमोक्षाभ्युपगमो बाध्येत ॥ कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत्संसारसागरे निमग्नस्य बंधनोच्छेदादूर्ध्वगामित्वं भवतीति ॥ किं चान्यदागच्छतामपगच्छतां चावयवानामागमापायधर्मवत्त्वादेवानात्मत्वं शरीरादिवत् ॥ ६

यथा दीपावयवानामाकारस्तेजस्तथात्मावयवानामाकारकारणाभावात्तदागमापायौ युक्तावित्याह किंचेति॥ सर्वजीवसाधारणः प्रतिजीवमसाधारणो वेत्यर्थः॥ किंचात्मन आगमापायिशीलाऽवयवत्वे सति कियन्त आयान्त्यवयवाः कियन्तोऽपयन्तीत्यज्ञानादात्मनिश्चयाभावाद्निर्मोक्षः स्यादित्याह॥ किंचेति अपि चावयवारब्धावयवित्वे जीवस्यानित्यत्वं अवयवसमूहत्वे चाऽसत्त्वं आत्मत्वस्य यावदवयववृत्तित्वे यत्किंचिदवयवापायेऽपि सद्यः शरीरस्याचेतनत्वं गोत्ववत्प्रत्येकं समाप्तौ एकस्मिन्शरीरे आत्मनानात्वं स्यादतो न देहपरिमाणत्वं सावयवत्वे आत्मन इत्युपसंहरति॥ अत इति॥

ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात् न च स निरूपयितुं शक्यते अयमसाविति॥ किंचान्यदागच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्ति॥ अपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यं॥ न हि भूतेभ्यः प्रादुर्भवेयुर्भूतेषु च निलीयेरन्॥ अभौतिकत्वाज्जीवस्य॥ नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात् किंचान्यदनवधृतस्वरूपश्चैवं सत्यात्मा स्यात्॥ आगच्छतामपगच्छतां चावयवानामनियतपरिमाणत्वात्॥ अत एवमादिदोषप्रसंगान्न पर्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते॥ अथवा पूर्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरान्तरप्रतिपत्तावकार्त्स्न्यप्रसंजनद्वारेण नित्यतायां चोदितायां पुनः पर्यायेण परिमाणानवस्थानेऽपि स्रोतः संतान नित्यता न्यायेनात्मनो नित्यता स्यात् यथा रक्तपटानां विज्ञानानवस्थानेऽपि तत्संतान नित्यता तद्वद्विसिचामपीत्याशंक्यानेन सूत्रेणोत्तरमुच्यते॥

२ सूत्रस्यार्थान्तरमाह॥ अथवेति॥ स्थूलसूक्ष्मशरीरप्राप्तावकार्त्स्न्योक्तिद्वारेणात्माऽनित्यतायामुक्तायां सुगतवत् संतानरूपेणात्मनित्यतामाशंक्यानेनोत्तरमुच्यत इत्यन्वयः पर्यायेणेत्यस्य व्याख्या स्रोत इति देहभेदेन परिमाणस्यात्मनश्चानवस्थानेऽपि नाशेऽपि स्रोतः प्रवाहस्तदात्मकस्यात्मव्यक्तिसंतानस्य नित्यतयात्मनित्यता स्यादित्यत्र दृष्टान्तमाह॥ यथेति॥ सिचवस्त्रं विगतं येभ्यस्ते विसिचो दिगंबरास्तेषामित्यर्थः॥ पर्यायात्संतानादप्यात्मनित्यत्वस्याविरोध इति न च कुतो विका

संतानस्यावस्तुन आत्मत्वे शून्यवादः संतानस्य वस्तुत्वे संतान्यतिरेके च कूटस्थात्मवादः॥ अनतिरेके जन्मादिविकारो विनाशो मुक्त्यभाव इत्युक्तदोषप्रसंगात्संतानात्मपक्षोनुपपन्न इति सूत्रार्थः॥३५॥ यं स्थूलं वा सूक्ष्मं वा देहं गृह्णाति तद्देहपरिमाण एव जीव इति नियमं दूषयति॥ अंत्येति॥ अंत्यशरीरपरिमाणस्यावस्थितेर्नित्यत्वदर्शनादुभयोराद्यमध्यमपरिमाणयोर्नित्यत्वप्रसंगादविशेषस्त्रयाणां नित्यपरिमाणानां साम्यं स्याद्विरुद्धपरिमाणानामेकत्रायोगादिति सूत्रयोजना॥ आद्यमध्यमपरिमाणे नित्ये आत्मपरिमाणत्वादंत्यपरिमाणवत् न चाप्रयोजकता परिमाणनाशे सत्यात्मनोपि नाशादंत्यपरिमाणनित्यत्वायोगादिति भावः॥ परिमाणत्रयसाम्यापादनफलमाह एकेति॥ अंत्यशरीरसमान्येव पूर्वशरीराणि स्युः

संतानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसंगो वस्तुत्वेप्यात्मनो विकारादिदोषप्रसंगादस्य पक्षस्यानुपपत्तिरिति॥३५॥ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः॥३६॥ अपि चांत्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैस्तद्वत्पूर्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसंगात्॥ अविशेषप्रसंगः स्यात्॥ एकशरीरपरिमाणतैव स्यान्नोपचितापचितशरीरांतरप्राप्तिः॥ अथवांत्यस्य जीवपरिमाणस्यावस्थितत्वात्पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्॥ ततश्चाविशेषेण सर्वदैवाणुर्महान्वा जीवोभ्युपगंतव्यो न शरीरपरिमाणः॥ अतश्च सौगतमतवदार्हतमपि मतं असंगतमित्युपेक्षितव्यं॥३६॥ पत्युरसामंजस्यात्॥३७॥ इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते॥

विषमशरीरप्राप्तावात्मनस्तत्परिमाणत्वे परिमाणत्रयसाम्यानुमानविरोधादित्यर्थः॥ पूर्वकालत्रयेपि परिमाणत्रयमंगीकृत्यांत्यदृष्टांतेन नित्यत्वमनुमाय साम्यमापादितं॥ संप्रत्यंत्यस्य मुक्तपरिमाणस्याणुत्वस्थूलत्वयोरन्यतरत्वेनावस्थितेस्तद्वदेवान्यमाद्यमध्यमकालयोरपि नित्यत्वात्स्यात्प्रागसतो नित्यत्वायोगात्तथा चाविशेषः कालत्रयेपि जीवपरिमाणाभेद इत्याह॥ अथवेति॥ तस्माद्बुद्धं नैकशरणक्षपणकसिद्धांतेनाविरोधः समन्वयस्येति सिद्धं॥३६॥ पत्युरसामंजस्यात्॥ लुंचितकेशमननिरासानंतरं जटाधारिशैवमतं बुद्धिस्थं निराक्रियत इति प्रसंगसंगतिमाह॥ इदानीमिति॥

सामान्यतः ईश्वरनिरासस्यैवात्र किं न स्यादिति शंकते ॥ तदिति ॥ स्वोक्तिविरोधान्नैवमित्याह ॥ प्रकृतिश्चेत्यादिना ॥ प्रतिष्ठापितत्वात्केवलनिमित्तेश्वरप्रतिषेधोवगम्यत इत्यन्वयः व्याहतो विरुद्धोऽभिव्याहार उक्तिर्यस्य स तथा ॥ अद्वितीयब्रह्मप्रकृतिकं जगदिति वदतो वेदांतसमन्वयस्य कर्तैवेश्वरो न प्रकृतिरिति शैवादिमते न विरोधोस्ति न वेति संदेहे तन्मतस्य मानमूलत्वाद्विरोधे सति वेदांतोक्ताद्वयब्रह्मासिद्धिरिति फलमभिप्रेत्य सत्वासत्वयोरेकत्रासंभववत्कर्तृत्वोपादानत्वयोरप्येकत्रासंभवात्कर्तैवेश्वर इति पूर्वपक्षं कुर्वन्नवांतरमतभेदमाह ॥ सा चेति ॥

तत्कथमवगम्यते ॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादित्यभिध्योपदेशाच्चेत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात् ॥ यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत ॥ तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदांतविहितब्रह्मैकत्वप्रतिपक्षत्वाद्यत्नेनात्र प्रतिषिध्यते ॥ सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा ॥ केचित्तावत्सांख्ययोगव्यपाश्रयाः कल्पयंति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः ॥ इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति ॥ माहेश्वरास्तु मन्यंते ॥ कार्यकारणयोगविधिदुःखांताः पंच पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षणायोपदिष्टाः पशुपतिरीश्वरो निमित्तकारणमिति वर्णयंति ॥ तथा वैशेषिकादयोपि केचित्कथंचित्स्वप्रक्रियानुसारेण निमित्तकारणमीश्वरमिति वर्णयंति ॥

११ सेश्वराः सांख्याः सांख्यशब्दार्थः चत्वारो माहेश्वराः शैवाः पाशुपताः कारुणिकसिद्धांतिनः ॥ कापालिकाश्चेति ॥ सर्वेप्यमी माहेश्वरप्रोक्तागमानुगामित्वान्माहेश्वरा उच्यंते कार्यं महदादिकं कारणं प्रधानं ईश्वरश्च योगः समाधिः विधिः त्रिषवणस्नानादिः दुःखांतो मोक्ष इति पंच पदार्थाः पशवो जीवास्तेषां पाशो बन्धस्तन्नाशायेत्यर्थः ॥ पाशुपतागमप्रामाण्यात्पशुपतिर्निमित्तमेवेति मतमुक्त्वाऽनुमानिकेश्वरमतमाह ॥ नयंति ॥ विमतं सकर्तृकं कार्यत्वात् घटवदिति वैशेषिकाः कर्तारमीश्वरं

शा०भा० कर्मफलंसपरिकरम्।अभिज्ञदातृकंकालांतरभाविफलत्वात्सेवाफलवदितिगौतमादिगंबराश्च॥ ज्ञानैश्वर्योत्कर्षःक्वचिद्विश्रांतःसातिशयत्वात्प अ०पा०
रत्न०टी० रिमाणवदितिसांख्यसौगतपातंजलाइतिमत्वोक्तंकेचित्कथंचिदिति॥ सिद्धांतयति॥ अतइति॥ आगमादिनानिर्दोषेश्वरसिद्धेःकथंदोषवत्त्व २ २
२३६ मित्याह॥ किमिति॥ नतावत्स्वागमादीश्वरनिर्णयःआगमानांनिर्मूलत्वेनाप्रामाण्यात्॥ नचसर्वज्ञज्ञानंमूलंतत्रमानाभावात्॥ नचागम
एवमानंआगममानत्वनिश्चयेमूलनिश्चयस्तन्निश्चयेनतन्निश्चयइत्यन्योन्याश्रयात्॥ नचपुरुषवचसांस्वतोमानत्वंयुक्तंमिथोविरोधेनत
त्वाव्यवस्थानाच्चनाप्यनुमानादीश्वरःसर्वज्ञःकर्तैवेतिनिर्णयःसंभवत्यनुमानस्यदृष्टानुसारित्वेनदृष्टविपरीतार्थासाधकत्वात्तथाचलोके
यादृशाःकर्तारोदृष्टास्तादृशाएवजगत्कर्तारोरागद्वेषादिमंतःसिद्ध्येयुर्यदिलोकेविचित्रप्रासादादिकर्तुरेकत्वाद्यदर्शनेपिजगत्कर्तरि।
लाघवादेकत्वंनित्यज्ञानंनिर्दोषत्वंचकल्प्येततर्हिद्रव्योपादानत्वमपिकल्प्यतांकर्तुरेवोपादानत्वेनलाघवादन्यथास्वतंत्रप्रधानपरमाणवा

अतउत्तरमुच्यते॥ पत्युरसामंजस्यादिति॥ पत्युरीश्वरस्यप्रधानपुरुषयोरधिष्ठातृत्वेनजगत्कारणत्वंनोपपद्यते
कस्मादसामंजस्यात्॥ किंपुनरसामंजस्यं॥ हीनमध्यमोत्तमभावेनहिप्राणिभेदान्विदधतईश्वरस्यरागद्वेषादिदोषप्र
((सक्तेरस्मदादिवदनीश्वरत्वंप्रसज्येत॥

द्युपादानकल्पनागौरवाद्दृष्टत्वाच्चेत्कर्तुर्द्रव्योपादानत्वासिद्धिरेकत्वादिकमपिनसिध्येत्॥
अस्माकंत्वपौरुषेयतयास्वतःसिद्धप्रमाणभावयाश्रुत्यास्वप्रमेयबोधनेदृष्टांतानपेक्षयाभवत्येवलौकिककर्तृविपरीताद्वितीयकर्त्रुपादानात्मकसर्वज्ञ
निर्दोषेश्वरनिर्णयःनिर्णीतेचतस्मिन्धर्मिग्राहकमानबाधान्नरागादिदोषापादनस्यावकाशइत्यनुमानिकेश्वरवादिभ्योवैषम्यंतदभिप्रेत्याश्रौतस्येश्व।
रस्यासामंजस्यमाह॥ हीनेति॥ यदिकर्तुरुपादानत्वमदृष्टत्वान्नकल्प्यतेनतर्हिनिर्दोषत्वस्याप्यदृष्टत्वाद्योविषमकारीसदोषवानितिव्याप्तिदृष्टेश्चजग राम०
त्कर्तादोषवान्स्यात् नचात्रधर्मिग्राहकानुमानबाधःकार्यत्वलिंगस्यकर्तृमात्र साधकत्वेननिर्दोषत्वादावुदासीनत्वान्नचोत्कर्षसमाजातिर्व्यापक २३६
धर्मापादनात्दोषाभावेनव्याप्यविषमकर्तृत्वायोगाच्चदृष्टांतस्याव्यापकधर्माणांपक्षेआपादनंह्युत्कर्षसमाजातिर्यथाशब्दोयदिकृतकत्वेन।
हेतुनाघटवदनित्यःस्यात्तर्हितेनैवहेतुनासावयवोपिस्यादिति॥ नह्यत्रनित्यत्वस्यव्यापकंसावयवत्वंगंधादौव्यभिचारादितिभावः॥६

ननुप्राणिकर्मप्रेरितईश्वरोविषमफलान्प्राणिनःकरोतिनस्वेच्छयेतिशंकते॥ प्राणीति॥ जडस्यकर्मणःप्रेरकत्वायोगान्नैवमित्याह॥ नेति॥ नचेश्वरप्रेरितंकर्मेश्वरस्यप्रेरकमितिवाच्यमित्याह॥ कर्मेति॥ अतीतकर्मणाप्रेरितईश्वरोवर्तमानंकर्मतत्फलायप्रेरयतीत्यनादित्वान्नप्रेर्यप्रेरकभावस्यानुपपत्तिरितिशंकते॥ नानादित्वादिति॥ अतीतकर्मणोपिजडत्वान्नेश्वरप्रेरकता॥ नचतदपीश्वरेणप्रेरितंसदीश्वरंप्रेरयति॥ उक्तान्योन्याश्रयाननंतोप्यतीतकर्मप्रेरितेश्वरप्रेरितंतदेवेश्वरंवर्तमानेकर्मणिफलदानायप्रेरयतीतिचेन्नमानहीनायामूलक्षयावहायाअनवस्थायाःप्रसंगादतःकर्मानपेक्षएवेश्वरोविषमस्रष्टेत्यसामंजस्यंदुर्वारमित्यर्थः॥ यत्तुफलदाने

प्राणिकर्मापेक्षत्वाददोषइतिचेत्॥ न॥ कर्मेश्वरयोःप्रवर्त्यप्रवर्तयितृत्वेइतरेतराश्रयदोषप्रसंगात्॥ नानादित्वादितिचेत्॥ नवर्तमानकालवदतीतेष्वपिकालेष्वितरेतराश्रयदोषाविशेषादंधपरंपरान्यायापत्तेः॥ अपिचप्रवर्तनालक्षणादोषाइतिन्यायवित्समयः नहिकश्चिददोषप्रयुक्तःस्वार्थेपरार्थेवाप्रवर्तमानोदृश्यते॥ स्वार्थप्रयुक्तएवचसर्वोजनःपरार्थेपिप्रवर्ततइत्येवमप्यसामंजस्यंस्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसंगात्॥ पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्यपुरुषस्यचौदासीन्याभ्युपगमादसामंजस्यं॥ ३७॥ संबंधानुपपत्तेश्च॥ ३८॥ पुनरप्यसामंजस्यमेव॥ ९॥

ईश्वरस्यकर्मनिमित्तमात्रंनप्रेरकमितिनोक्तदोषइति तन्न विषमकर्मकारयितुरीश्वरस्यदोषवत्त्वात् नपायात्पूर्वकर्मापेक्षयाकर्मकारयितृत्वेचोक्ताप्रामाणिकानवस्थानादस्माकंत्वेषह्येवसाध्वसाधुकारयतीतिनिरवद्यमितिचश्रुतिमूलंपूर्वकर्मापेक्षाकल्पनमितिवैषम्यं॥ किंचपरमतानुसारेणापीश्वरस्यरागादिमत्त्वंप्राप्नोतीत्याह॥ अपिचेति॥ प्रवर्तकत्वलिंगाद्दोषादितितार्किकाणांस्थितिस्तथाचेश्वरःस्वार्थेरागादिमान्प्रवर्तकत्वात्समतवत् नचकारुणिकेव्यभिचारःपरदुःखप्रयुक्तस्वदुःखनिवृत्त्यर्थित्वात्तस्येत्यर्थःउदासीनःप्रवर्तकइतिचव्याहतमितियोगान्प्रत्याह॥ पुरुषेति॥ ३७॥ प्रधानवादेदोषांतरमाहसूत्रकारःसंबन्धेति॥ ॥

ईश्वरेणासंबद्धस्यप्रधानादेःप्रेर्यत्वायोगात्संबंधोवाच्यःसचसंयोगःसमवायोवानास्तीत्यर्थः॥कार्यबलात्प्रेरणयोग्यत्वाख्यःसंबंधःकल्प्यतामित्य
तआह॥नाप्यन्यइति॥ ईश्वरप्रेरितप्रधानकार्यंजगदितिसिद्धेचेत्संबंधकल्पनास्यात्तच्चाद्याप्यसिद्धमित्यर्थः॥मायाब्रह्मणोस्त्वनिर्वाच्यतादात्म्य
संबंधः देवात्मशक्तिमितिश्रुतेः॥किंचवेदस्यापूर्वार्थत्वान्नलोकदृष्टमृत्कुलालसंबंधोवैदिकेनानुसर्त्तव्यः॥ आनुमानिकेनत्वनुसर्त्तव्यइति॥

नहिप्रधानपुरुषव्यतिरिक्तईश्वरोंतरेणसंबन्धंप्रधानपुरुषावीशीत॥ नतावत्संयोगलक्षणःसंबंधःसंभवति
॥प्रधानपुरुषेश्वराणांसर्वगतत्वान्निरवयवत्वाच्च॥ नापिसमवायलक्षणःसंबंधःआश्रयाश्रयिभावानिरूपणात्॥ ना
प्यन्यःकश्चित्कार्यगम्यःसंबंधःशक्यतेकल्पयितुं॥कार्यकारणभावस्यैवाद्याप्यसिद्धत्वात्॥ ब्रह्मवादिनःकथमिति
चेन्नतस्यतादात्म्यलक्षणसंबंधोपपत्तेः॥ अपिचागमबलेनब्रह्मवादीकारणादिस्वरूपंनिरूपयतीतिनावश्यंतस्य
यथादृष्टमेवसर्वमभ्युपगंतव्यमितिनियमोस्तिपरस्यतुदृष्टांतबलेनकारणादिस्वरूपंनिरूपयतोयथादृष्टमेवसर्व
मभ्युपगंतव्यमित्ययमस्त्यतिशयः॥ परस्यापिसर्वज्ञप्रणीतागमसद्भावात्समानमागमबलमितिचेन्न॥ नइतरे
तराश्रयत्वप्रसंगात् आगमप्रत्ययात्सर्वज्ञत्वसिद्धिः सर्वज्ञप्रत्ययाच्चागमसिद्धिरिति॥ तस्मादनुपपन्नासांख्ययो
गवादिनामीश्वरकल्पना॥ एवमन्यास्वपिवेदबाह्यासुईश्वरकल्पनासुयथासंभवमसामंजस्यंयोजयितव्यं॥
॥३८॥ अधिष्ठानानुपपत्तेश्च॥३९॥ इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य॥ विशेषमाह॥अपिचेति॥सर्वज्ञस्याग
मप्रामाण्यस्यचज्ञप्तावन्योन्याश्रयः अनुमानात्सर्वज्ञसिद्धेर्निरस्तत्वाच्चह्यमनस्कस्यज्ञानंसंभवतिज्ञानंमनोजन्यमितिव्याप्तिविरोधान्नित्य
ज्ञानकल्पनाऽनवकाशादितिभावः॥प्रधानवत्परमाणूनामपिनिरवयवेश्वरेणसंयोगाद्यसत्वात्प्रेर्यत्वायोगः॥प्रेरकत्वेचेश्वरस्यदोषवत्त्वमित्याह॥
एवमन्यास्वपीति॥३८॥ ईश्वरस्यप्रधानादिप्रेरणानुपपत्तेश्चासामंजस्यमित्याहसूत्रकारः॥अधिष्ठानेति॥प्रधानादिकंचेतनस्याऽनधिष्ठेयं॥

अप्रत्यक्षत्वादीश्वरवद्व्यतिरेकेणमृदादिवच्चेत्यर्थः॥ ३९ ॥ चक्षुरादौव्यभिचारमाशंक्यनिषेधति॥ करणवदिति॥ रूपमुद्भूतंनास्तीत्यप्रत्यक्षत्वंस्फुटयति॥ रूपेति॥ स्वभोगाहेतुत्वेसतीतिविशेषणान्नव्यभिचारइत्याह॥ तथापीति॥ भोगःसुखदुःखानुभवः॥ आदिपदाद्विषयानुभवग्रहः॥ नचयद्येनाधिष्ठेयंतत्तदीयभोगहेतुत्वेसतिप्रत्यक्षमितिव्यतिरेकव्याप्तौकरणेषुव्यभिचारतादवस्थ्यमितिवाच्यं॥ भोगाहेतुत्वविशिष्टाप्रत्यक्षत्वस्यहेतुत्वात्करणेषुचविशेषणाभावेनविशिष्टस्यहेतोरभावात्नचविशेष्यवैयर्थ्यंपरार्थपाचकाधिष्ठेय

सहिपरिकल्प्यमानःकुंभकारइवमृदादीनिप्रधानादीन्यधिष्ठायप्रवर्त्तयेत्॥ नचैवमुपपद्यतेनह्यप्रत्यक्षंरूपादिहीनंचप्रधानमीश्वरस्याधिष्ठेयंसंभवति॥ मृदादिवैलक्षण्यात्॥ ३९॥ करणवच्चेन्नभोगादिभ्यः॥ ॥४०॥ स्यादेतद्यथाकरणग्रामंचक्षुरादिकमप्रत्यक्षंरूपादिहीनंचपुरुषोऽधितिष्ठत्येवंप्रधानमपीश्वरोऽधिष्ठास्यतीति॥ तथापिनोपपद्यते॥ भोगादिदर्शनाद्धिकरणग्रामस्याऽधिष्ठितृत्वंगम्यते॥ नचात्रभोगादयोदृश्यंते॥ करणग्रामसाम्येवाभ्युपगम्यमानेसंसारिणामिवेश्वरस्यापिभोगादयःप्रसज्येरन्॥ अन्यथावासूत्रद्वयंव्याख्यायते॥ अधिष्ठानानुपपत्तेश्च॥ इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य॥ साधिष्ठानोहिलोकेसशरीरोराजाराष्ट्रस्येश्वरोदृश्यतेननिरधिष्ठानः अतश्चतद्दृष्टांतवशेनादृष्टमीश्वरंकल्पयितुमिच्छतईश्वरस्यापिकिंचिच्छरीरकरणायतनंवर्णयितव्यंस्यात्॥ ११

काष्ठादौव्यभिचारान्नचप्रधानादेरीश्वरप्रत्यक्षत्वाद्विशेष्यासिद्धिः॥ अतींद्रियत्वरूपाप्रत्यक्षत्वस्यसत्वादित्यभिप्रायः॥ जीवेकरणकृताभोगादयोदृश्यंतेईश्वरेतुप्रधानकृतास्तेनदृश्यंतइत्यक्षरार्थः॥ विपक्षेदोषंवदन्नप्रयोजकत्वंहेतोर्निरस्यति॥ करणेति॥ प्रधानादेःप्रेर्यत्वांगीकारेप्रेरकभोगहेतुत्वंस्यादतींद्रियस्यप्रेर्यस्यभोगहेतुत्वनियमादित्यर्थः॥ सूत्रद्वयस्यार्थांतरमाह॥ अन्यथावेति॥ यःप्रवर्तकश्चेतनःसशरीरीतिलोकेव्याप्तिदृष्टेरीश्वरस्यचशरीरानुपपत्तेर्नप्रवर्तकत्वमितिसूत्रार्थ

माह॥ इतश्चेति॥

विमतंसेश्वरंकार्यत्वाद्राष्ट्रवदितिकल्प्यमानेराजवत्सशरीरएवेश्वरःस्यादित्युक्तंतत्रेष्टापत्तिंनिरस्यति॥ नचतद्दर्शयितुमिति॥ नचनित्यंशरीरंस-
र्गात्प्रागपिसंभवतीतिवाच्यंशरीरस्यभौतिकत्वनियमादित्यर्थः॥ अस्त्वशरीरएवेश्वरइत्यतआह निरधिष्ठानत्वेचेति॥ जीवस्येवशरीरंभौतिकं
ईश्वरस्यतुस्वेच्छानिर्मितंप्रागपिस्यादित्याशंकांनिरस्यतिकरणवदिति॥ करणान्यत्रसंतीतिकरणवच्छरीरंइच्छामयशरीरकल्पनैवानुपपन्नामाना-
भावात् दृष्टभौतिकत्वनियमविरोधाच्चेतिमंतव्यं॥४०॥ एवमीश्वरस्यशुष्कतर्केणकर्तृत्वनिर्णयोनेत्युपपाद्यनित्यत्वसर्वज्ञत्वनिर्णयोपिनसं-

नचतद्दर्शयितुंशक्यतेसृष्ट्युत्तरकालभावित्वाच्छरीरस्यप्राक्सृष्टेस्तदनुपपत्तेःनिरधिष्ठानत्वेचेश्वरस्यप्रवर्तकत्वा-
नुपपत्तेः॥ एवंलोकेदृष्टत्वात्॥ करणवच्चेन्नभोगादिभ्यः॥ अथलोकदर्शनानुसारेणेश्वरस्यापिकिंचित्करणानामायत-
नंशरीरंकामेनकल्प्येतएवमपिनोपपद्यते॥ सशरीरत्वेहिसतिसंसारिवद्भोगादिप्रसंगादीश्वरस्याप्यनीश्वरत्वंप्रसज्ये-
त॥४०॥ अंतवत्त्वमसर्वज्ञतावा॥४१॥ इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्यसहिसर्वज्ञस्तैरभ्युपगम्यते॥ अ-
नंतश्चअनंतंचप्रधानं॥ अनंताश्चपुरुषामिथोभिन्नाअभ्युपगम्यंतेतत्रसर्वज्ञेनेश्वरेणप्रधानस्यपुरुषाणामात्मनश्च
यत्तापरिच्छिद्येतवानवापरिच्छिद्येत॥ उभयथापिदोषोनुषक्तएव॥ कथं॥ पूर्वस्मिंस्तावद्विकल्पइयत्तापरिच्छिन्न-
त्वात्प्रधानपुरुषेश्वराणामंतवत्त्वमवश्यंभावि॥ एवंलोकेदृष्टत्वात्॥ यद्धिलोकेइयत्तापरिच्छिन्नंवस्तुघटादितदंत-
वद्दृष्टं॥ तथाप्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादंतवत्स्यात्॥ संख्यापरिमाणंतावत्प्रधानपुरुषेश्व-
((रत्रयरूपेणपरिच्छिन्नं॥

भवतीत्याह सूत्रकारः॥ अंतवत्त्वमिति॥ प्रधानपुरुषेश्वरत्रयमनित्यंइयत्तापरिच्छिन्नत्वात्घटव-
दित्याह॥ पूर्वस्मिन्निति॥ संख्यावापरिमाणंवेयत्तातथाचनिश्चितसंख्यत्वान्निश्चितपरिमाणत्वाच्चेतिहेतुद्वयंयद्यपिसंख्यावत्त्वमात्रंहेतुःसं-
भवतितथापिसर्वज्ञनिश्चयेनहेतुसिद्धिनिरासंद्योतयितुंनिश्चितपदंतत्राद्यहेतोरसिद्धिर्नास्तीत्याह संख्यापरिमाणमिति॥ संख्यास्वरूपमित्य-

द्वितीयहेतुं साधयति ॥ स्वरूपेति ॥ प्रधानादयो निश्चितपरिमाणाः वस्तुनो भिन्नत्वात् घटवदित्यर्थः ॥ ननु प्रधानपुरुषेश्वरास्त्रय इति ज्ञानेपि जीवानामानंत्यात्कथं संख्यानिश्चयस्तत्राह ॥ पुरुषेति ॥ जीवसंख्यापीश्वरेण निश्चीयते ॥ अनिश्चये सर्वज्ञत्वायोगादित्यर्थः ॥ हेतुसिद्धेः फलमाह ॥ ततश्चेति ॥ माषराशिवत्केषांचिज्जीवानां संघस्तद्वद् ध्यमनश्चेदित्येवं सर्वमुक्तेरिदानीं शून्यं जगत्स्यादित्यर्थः ॥ नित्यस्यानवशेषादिति भावः ॥ ननु ईश्वरः शिष्यतामिति चेन्न तस्यापि भिन्नत्वेनांतवत्त्वात्किंचेशितव्याभावादीश्वराभावः स्यादित्याह ॥ प्रधानमिति ॥ दोषांतरमा

रिणः संसा १

स्वरूपपरिमाणमपि तर्हि तमीश्वरेण परिच्छिद्येत पुरुषगता च महासंख्या ततश्च इयत्तापरिच्छिन्नानां ये संसारान्मुच्यंते तेषां संसारोऽन्तवान् संसारित्वं च तेषामंतवत् ॥ एवमितरेष्वपि क्रमेण मुच्यमानेषु संसारस्य संसारिणां चांतवत्त्वं स्यात् ॥ प्रधानं च सविकारं पुरुषार्थमीश्वरस्याधिष्ठेयं संसारित्वेनाभिमतं ॥ तच्छून्यतायामीश्वरः किमधितिष्ठेत् ॥ किंविषये वा सर्वज्ञतेश्वरते स्यातां ॥ प्रधानपुरुषेश्वराणां चैवमंतवत्त्वे सत्यादिमत्त्वप्रसंगः ॥ आद्यंतवत्त्वे च शून्यवादप्रसंगः ॥ अथ मा भूदेष दोष इत्युत्तरो विकल्पोऽभ्युपगम्येत ॥ न प्रधानस्य पुरुषाणामात्मनश्चेयत्तेश्वरेण परिच्छिद्यत इति ॥ तत ईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत ॥ तस्मादप्यसंगतस्तार्किकपरिगृहीत ईश्वरकारणवादः ॥४१॥ उत्पत्त्यसंभवात् ॥४२॥ येषामप्रकृतिरधिष्ठाता केवलं निमित्तकारणं ईश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः ॥ येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते ॥

ह ॥ प्रधानेति ॥ इयत्तानिश्चयाभावाच्च शून्यतेति द्वितीयं शंकते ॥ अथेति ॥ इयत्ता नास्ति न निश्चीयते चेत्यर्थः प्रधानादयः संख्यापरिमाणवंतः द्रव्यत्वान्माषादिवदित्यनुमानादस्तीयत्ता तदज्ञाने स्यादसर्वज्ञता इयत्तायां चांतवत्त्वमप्यक्षतमिति परिहरति ॥ तत इति ॥ तस्मात्केवलकर्त्रीश्वरवादस्य निर्मूलत्वाच्च कर्त्रुपादानाद्वयेश्वरसमन्वयविरोध इति सिद्धं ॥४१॥ पंचपदार्थवादिमाहेश्वरमतनिरासानंतरं चतुर्व्यूहवादं बुद्धिस्थं निरस्यति ॥ उत्पत्त्य संभवात् ॥ अधिकरणतात्पर्यमाह ॥ येषामिति ॥

अधिकरणारंभमाक्षिपति॥ नन्विति॥ वेदाविरुद्धांशमंगीकृत्य वेदविरुद्धं जीवोत्पत्त्याद्यंशं निराकर्तुमधिकरणारंभ इत्याह॥ उच्यत इति॥ अत्र भागवतपंचरात्रागमो विषयः॥ स किं जीवोत्पत्त्याद्यंशे मानं नवेति संदेहे बाधानुपलंभान्मानमिति पूर्वपक्षयति॥ तत्रेति॥ पूर्वपक्षे तदागमविरोधाज्जीवाभिन्नब्रह्मसमन्वयासिद्धिः सिद्धांते तदंशेनस्याऽमानत्वादविरोधात्तत्सिद्धिरिति फलभेदः॥ सावयवत्वं निरस्यति॥ निरंजनेति॥ कथं तर्ह्यद्वितीये वासुदेवे मूर्तिभेदस्तत्राह॥ स इति॥ व्यूहो मूर्तिः स विशेषं शास्त्रार्थमुक्त्वा सहेतुपुरुषार्थमाह तमित्थंभूतमिति यथोक्तव्यूहवंतं सर्वप्रकृतिं निरंजनं विज्ञानरूपं परमात्मानमिति यावत् वाक्यायचे॥

ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राक्निर्धारितः प्रकृतिश्चाधिष्ठाता चेति श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः तत्कस्य हेतोरेष पक्षः प्रत्याचिख्यासित इति॥ उच्यते॥ यद्यप्येवंजातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशांतरं विसंवादस्थानमिति॥ अतस्तत्प्रत्याख्यानायारंभः॥ तत्र भागवता मन्यंते भगवानेवैको वासुदेवो निरंजनज्ञानस्वरूपः परमार्थतत्त्वं स चतुर्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण संकर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च वासुदेवो नाम परमात्मोच्यते॥ संकर्षणो नाम जीवः॥ प्रद्युम्नो नाम मनः॥ अनिरुद्धो नामाहंकारस्तेषां वासुदेवः पराप्रकृतिरितरे संकर्षणादयः कार्यं तमित्थंभूतं परमेश्वरं भगवंतमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवंतमेव प्रतिपद्यत इति॥ तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा सर्वात्मा स आत्मनात्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रियते॥ स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः॥ परमात्मनोऽनेकधाभावस्याधिगतत्वात्॥ यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनं॥ अजस्रमव्यग्रचित्ततयाभिप्रेयते॥ तदपि न प्रतिषिध्यते॥ श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्॥ यत्पुनरिदमुच्यते॥ वासुदेवात्संकर्षण उत्पद्यते॥ संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति॥ अत्र ब्रूमः॥ न वासुदेवसंज्ञकात्परमात्मनः संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति॥ अनित्यत्वादिदोषप्रसंगात्॥

((तसामवधानपूर्वकं देवतागृहगमनमभिगमनं पूजाद्रव्याणामार्जनमुपादानं इज्या पूजा स्वाध्यायोऽष्टाक्षरादिजपः॥ योगो ध्यानं तत्राविरुद्धांशमुपादत्ते तत्रेति॥ समाहितः श्रद्धावित्तो भूत्वेति तं यथा यथोपासत इत्याद्या च श्रुतिः॥ मत्कर्मकृन्मत्परम इत्याद्या स्मृतिः॥ विरुद्धांशमनूद्य दूषयति॥ यत्पुनरिति॥ कृतहान्यादिदोष आदिशब्दार्थः॥ न्यायोपेतया अज आत्मेत्यादिश्रुत्या पांचरात्रागमस्योत्पत्त्यंशे मानत्वाभावनिश्चयाज्जीवाभिन्नब्रह्मसमन्वयस्थैर्यमिति भावः॥४२॥ जीवस्योत्पत्तिं निरस्य जीवात्मनस उत्प

॥उत्पत्त्यसंभवात्

न च कर्तुरिति॥ यस्मात्कर्तुः करणोत्पत्तिर्न दृश्यते तेन तस्मादसंगता कल्पनेत्यन्वयः सिद्धानां करणानां प्रयोक्ता कर्तेति प्रसिद्धार्थो हि शब्दः वर्णनं निर्मूलमित्याह॥ न चेति॥ ननु लोके कश्चिच्छिल्पिवरः कुठारं निर्माय तेन वृक्षं छिनत्तीति दृष्टमिति चेत्सत्यं शिल्पिनो हस्तादिकरणांतरसत्त्वात्कुठारकर्तृत्वं युक्तं॥ जीवस्य तु करणांतरासत्त्वान्न मनसः कर्तृत्वं विनैव करणं कर्तृत्वे वा मनोवैयर्थ्यमिति भावः॥ ४३॥ संकर्षणादीनामुत्पत्त्यसंभवेपि व्यूहचतुष्टयं स्यादिति सूत्रव्यावर्त्यमाशंकते॥ अथापि स्यादिति॥ ज्ञानैश्वर्ययोः शक्तिरांतरं सामर्थ्यं बलं शरीरसामर्थ्यं वीर्यं शौर्यं तेजः प्रागल्भ्यं एतैरन्विता यस्मात्संकर्षणादयः तस्मादीश्वरा एवेत्यर्थः॥ सर्वेषामीश्वरत्वे पांचरात्रोक्तिमाह॥ वासुदेवा एवेति॥ निर्दोषा रागादिशून्या निरधिष्ठानाः प्रकृत्यजन्याः निरवद्या नाशादिरहिता इत्यर्थः॥ ईश्वरत्वाज्जन्मासंभवो गुण एवेत्याह॥ तस्मादिति सूत्रेण सिद्धांतयति॥ अत्रेति एवमपि चतुर्णामीश्वरत्वेन विज्ञानशक्त्यादिभावेपीत्यर्थः प्रकारांतरं पृच्छति॥ कथमिति॥ किं चत्वारः स्वतंत्रा भिन्ना एव उतैकस्य विकारत्वेनाभिन्नाः॥ आद्यमनूद्य दूषयति॥ यदीत्य

उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्॥ ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्॥ कारणप्राप्तौ कार्यस्य प्रविलयप्रसंगात्॥ प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यइति॥ तस्मादसंगतैषा कल्पना॥ ४२॥ न च कर्तुः करणं॥ ४३॥ इतश्चासंगतैषा कल्पना यस्मान्न हि लोके कर्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते वर्णयंति च भागवताः कर्तुर्जीवात्संकर्षणसंज्ञकात्करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते॥ कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोहंकार उत्पद्यत इति न चैतद्दृष्टांतमंतरेणाध्यवसातुं शक्नुमः॥ न चैवंभूतां श्रुतिमुपलभामहे॥ ४३॥ विज्ञानादिभावे वा तदप्रतिषेधः॥ ४४॥ अथापि स्यान्न चैते संकर्षणादयो जीवादिभावेनाभिप्रेयंते॥ किं तर्हि ईश्वरा एवैते सर्वे ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वरैर्धर्मैरन्विता अभ्युपगम्यंते॥ वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्चेति॥ तस्मान्नायं यथावर्णित उत्पत्त्यसंभवो दोषः प्राप्नोतीति अत्रोच्यते एवमपि तदप्रतिषेध उत्पत्त्यसंभवस्याऽप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसंभवो दोषः प्रकारांतरेणेत्यभिप्रायः॥ ॥ कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति॥ ५

शा॰भा॰
र॰प्र॰टी॰
२५०

द्वितीये च विकाराः प्रकृतितुल्या वा न्यूना वा आद्यमुत्थाप्य निषेधति ॥ अथेत्यादिना ॥ न्यूनत्वपक्षेऽपसिद्धांतमाह ॥ न च पंचेति ॥ यदि न्यूना अपि । भगवतो व्यूहास्तदा चतुष्ट्वव्याघात इत्याह ॥ न चैत इति ॥ ४४ ॥ इतश्च जीवोत्पत्तिवाद उपेक्ष्य इत्याह सूत्रकारः विप्रतिषेधाच्चेति ॥ स्वस्यैव गुणत्वं गुणित्वं विरुद्धं ॥ आदिपदात्प्रद्युम्नानिरुद्धौ भिन्नौ वात्मन इत्युक्त्वात्मान एवैत इति विरुद्धोक्तिग्रहः पूर्वापरविरोधादसांगत्यमिति सू-

अ॰पा॰
२२

ततोऽनेकेश्वरकल्पनानर्थक्यमेकेनैवेश्वरेणेश्वरकार्यसिद्धेः ॥ सिद्धांतहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् ॥ अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति ॥ तथापि तदवस्थ एवोत्पत्त्यसंभवो दोषः न हि वासुदेवात्संकर्षणस्योत्पत्तिः संभवति संकर्षणाच्च प्रद्युम्नस्य प्रद्युम्नाच्चानिरुद्धस्यातिशयाभावात् ॥ भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोर्न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते ॥ न च पंचरात्रसिद्धांतिभिर्वासुदेवादिष्वेकैकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते ॥ वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यंते ॥ न चैते भगवद्व्यूहाश्चतुःसंख्यायामेवावतिष्ठेरन् ॥ ब्रह्मादिस्तंबपर्यंतस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात् ॥ ४४ ॥

विप्रतिषेधाच्च ॥ ४५ ॥ विप्रतिषेधश्च अस्मिञ्शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ॥ ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणा आत्मान एवैते भगवंतो वासुदेवा इत्यादिदर्शनात् ॥ वेदविप्रतिषेधश्च भवति चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शांडिल्य इदं शास्त्रं अधिगतवान् इत्यादिवेदनिंदादर्शनात् ॥ तस्मादसंगतैषा कल्पनेति सिद्धं ॥ ४५ ॥ ॥ इति श्रीशारीरकमी॰ श्रीमच्छंकरभा॰ द्वितीयाध्यायस्य द्वितीयपादः समाप्तः ॥ २ ॥ भाष्य ९०० टीका १००० एवं १९०० ॥

राम॰
२५०

त्रार्थमुक्त्वाऽर्थांतरमाह ॥ वेदेति ॥ एकस्यापि तंत्राक्षरस्याध्येता चतुर्वेदिभ्योऽधिक इति निंदादिपरार्थः ॥ तस्मान्मिथो विरुद्धाभिः पौरुषेयकल्पनाभिर्नापौरुषेयवेदांतसमन्वयविरोध इति सिद्धं ॥ ४५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ श्रीमच्छा॰मी॰व्या॰ रत्नप्रभायां द्वि॰ द्वितीयपादः समाप्तः ॥ २ ॥ ६१ ॥

॥ॐ॥ श्री लक्ष्मीकांतेश्वर समर्थ ॐ ॥ ॐ ॐ ॐ ॥ ॐ ॐ ॥ श्रीकृष्णानंद रामु समर्थ ॥ ॐ ॥ श्री लक्ष्मीकांतेश्वर समर्थ

॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ तत्सत् ॥

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

अथशारीरकसूत्रभाष्येरत्नप्रभायांद्वितीयाध्यायस्यतृतीयःपादःप्रारंभः

॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

शा·भा· श्रीगणेशायनमः॥हरिःॐ॥वियदादिविधानारंभोनानास्याज्जमधुव्रतं॥नित्यंचिद्विश्वकर्तारंभिन्नंसर्वेश्वरंभजे॥१॥जीवस्यानुत्पत्तिप्रसंगे अ·पा
टी· नाकाशस्याप्युत्पत्त्यसंभवमाशंक्यपरिहरन्नादावेकदेशिमतमाह॥नवियदश्रुतेः॥वियत्प्राणपादयोरर्थंसंक्षिपन्पूर्वपादेनसंगतिमाह॥वे २।३
र·प्र· दांतेष्विति॥भिन्नोपक्रमत्वमेवाह॥केचिदित्यादिना॥भूतभोक्तृश्रुतीनांमिथोविरोधशंकानिरासोवियत्पादार्थः लिंगशरीरश्रुतीनांतन्निरा
२५१ सःप्राणपादार्थः॥यथामिथोविरोधात्पूर्वापरविरोधाच्चपरपक्षाउपेक्ष्यास्तथाश्रुतिपक्षोऽप्युपेक्ष्यइतिशंकोत्थानेपादद्वयस्यारंभात्पूर्वपादे
नदृष्टांतसंगतिरितिसमुदायार्थः॥आकाशवाय्वोरुत्पत्तिमामनंतितैत्तिरीयकाःनामनंतिछंदोगाः॥जीवस्यप्राणानांचोत्पत्तिःसर्वत्रआ

॥श्रीगणेशायनमः॥नवियदश्रुतेः॥१॥वेदांतेषुतत्रतत्रभिन्नप्रस्थानाउत्पत्तिश्रुतयउपलभ्यंते॥केचिदाकाशस्यो
त्पत्तिमामनंतिकेचिन्न तथाकेचिद्वायोरुत्पत्तिमामनंतिकेचिन्न एवंजीवस्यप्राणानांच एवमेवक्रमादिद्वा
रकोऽपिविप्रतिषेधःश्रुत्यंतरेषूपलक्ष्यते॥ विप्रतिषेधाच्चपरपक्षाणामनपेक्षितत्वंस्थापितंतद्वत्स्वपक्षस्यापिविप्र
तिषेधादेवानपेक्षितत्वमाशंक्येतेत्यतः सर्ववेदांतगतसृष्टिश्रुत्यर्थनिर्मलत्वायपरःप्रपंचआरभ्यते॥तदर्थनि
र्मलत्वेचफलंयथोक्ताशंकानिवृत्तिरेव॥तत्रप्रथमंतावदाकाशमाश्रित्यचिंत्यतेकिमस्याकाशस्योत्पत्तिरस्त्यु
तनास्तीति॥तत्रतावत्प्रतिपद्यते॥नवियदश्रुतेरिति॥नखल्वाकाशमुत्पद्यते॥ ९त्मानोव्युच्चरंतीतिवाजिनः॥एतस्मा
ज्जायतेप्राणइत्याथर्वणिकाश्चामनंतिनान्ये॥एवमाकाशपूर्विकाक्वचित्सृष्टिःक्वचित्तेजःपूर्विकेतिक्रमविरोधः॥आदिपदात्सइमांल्लोकान
सृजतेत्यक्रमः॥क्वचित्सप्तप्राणाःक्वचिदष्टावित्यादिसंख्याद्वारकश्चविरोधोग्राह्यः॥प्रपंचः पादद्वयंतथाचपादद्वयस्यश्रुतीनांमिथोविरोधनिरा
सार्थत्वाच्छ्रुतिशास्त्राध्यायसंगतयःसिद्धाः॥अत्राकाशस्योत्पत्त्यनुत्पत्तिश्रुत्योर्मिथोविरोधोऽस्तिनवेतिवाक्यभेदैकवाक्यत्वाभ्यांसंदेहेयद्युत्प
त्तिस्तदावाक्यभेदेनविरोधादप्रामाण्यंअनयोःश्रुत्योरितिपूर्वपक्षयिष्यन् आदावनुत्पत्तिपक्षमेकदेशीगृह्णातीत्याह॥तत्रतावदिति॥उत्पत्ति

॥१॥ [illegible]

संप्रतिपूर्वपक्षयतिसूत्रकारः॥अस्तित्विति॥एवंवाक्यत्वेनप्रामाण्यसंभवेकिमितिश्रुत्योरप्रामाण्यमितिशंकते॥नन्वेकवाक्यतेति॥एकवाक्यत्वासंभवादप्रामाण्यंयुक्तमित्याह॥सत्यमित्यादिना॥एकस्ययुगपत्कार्यद्वयासंबंधेपिक्रमेणसंबंधसंभवादेकवाक्यतेतिसुस्पष्टसिद्धांतीशंकते॥ननुसकृदिति

कस्मादश्रुतेः॥नह्यस्योत्पत्तिप्रकरणेश्रवणमस्ति॥छांदोग्येहिसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिसच्छब्दवाच्यंब्रह्मप्रकृत्यतदैक्षततत्तेजोऽसृजतेतिचपंचानांमहाभूतानांमध्यमंतेजआदिंकृत्वात्रयाणांतेजोबन्नानामुत्पत्तिःश्राव्यते॥श्रुतिश्चनःप्रमाणमतींद्रियार्थविज्ञानोत्पत्तौ॥नचात्रश्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी॥तस्मान्नास्त्याकाशस्योत्पत्तिरिति॥१॥अस्तितु॥२॥तुशब्दःपक्षांतरपरिग्रहे॥मानामाकाशस्यछांदोग्येभवेदुत्पत्तिः॥श्रुत्यंतरेत्वस्ति॥तैत्तिरीयकाहिसमामनंति॥सत्यंज्ञानमनंतंब्रह्मेतिप्रकृत्यतस्माद्वाएतस्मादात्मनःआकाशःसंभूतइति॥ततश्चश्रुत्योर्विप्रतिषेधः॥क्वचित्तेजःप्रमुखासृष्टिःक्वचिदाकाशप्रमुखेति॥नन्वेकवाक्यताऽनयोःश्रुत्योर्युक्ता॥सत्यंमायुक्तानतुसावगंतुंशक्यते॥कुतः तत्तेजोऽसृजतेतिसकृच्छ्रुतस्यस्रष्टुःस्रष्टव्यद्वयेनसंबंधानुपपत्तेः॥तत्तेजोऽसृजततदाकाशमसृजतेति॥ननुसकृच्छ्रुतस्यापिकर्तुःकर्तव्यद्वयेनसंबंधोदृश्यते॥यथासूपंपक्त्वौदनंपचतीत्येवंतदाकाशंसृष्ट्वातत्तेजोऽसृजतेतियोजयिष्यामि॥नैवंयुज्यते प्रथमजत्वंहिछांदोग्येतेजसोऽवगम्यते॥तैत्तिरीयकेचाकाशस्य॥नचोभयोःप्रथमजत्वंसंभवति॥एतेनेतरश्रुत्यक्षरविरोधोपिव्याख्यातः॥तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यत्रापितस्मादाकाशःसंभूतस्तस्मात्तेजःसंभूतमितिसकृच्छ्रुतस्यापादानस्यसंभवनस्यचवियत्तेजोभ्यांयुगपत्संबंधानुपपत्तेः॥

॥अप्रामाण्यवादीदूषयति॥नैवमिति॥क्रमोनयुज्यतेद्वयोःश्रुतप्राथम्यभंगापत्तेरित्यर्थः॥एकस्मात्द्विदलबीजात्दलद्वयवदुभयंप्रथमजमित्यतआह॥नचेति॥वायोरग्निरितिक्रमश्रुतिभंगप्रसंगादितिशेषः॥छांदोग्यश्रुतेस्तित्तिरिश्रुतिविरुद्धार्थत्वमुक्त्वातित्तिरिश्रुतेस्तद्विरुद्धार्थत्वमाह॥एतेनेति।एतत्पदार्थमाह तस्मादिति॥छांदोग्येपिश्रुतंतत्तेजसःप्राथम्यमत्रदुर्योज्यमित्यर्थः॥

किंच सत्पदार्थ आत्मा छांदोग्ये तेजस उपादानं श्रूयते अत्र तु वायुरिति नैकवाक्यतेत्याह ॥ वायोरिति ॥ २ ॥ एवं श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते सर्वत्र वियदनुत्पत्तिवादी स्वमतेन प्रामाण्यं ब्रूत इत्याह ॥ अस्मिन्निति ॥ एवमाध्यायसमाप्तेरधिकरणेषु प्रथमं विरोधात् श्रुत्यविरोधात् श्रुत्यप्रामाण्यमिति पूर्वपक्षफलं तत्र एकदेशिसिद्धांतः पश्चान्मुख्यसिद्धांते श्रुतीनामविरोधेनैकवाक्यतया ब्रह्मणि समन्वयसिद्धिरिति फलं क्रमश्चेत्थमवगंतव्यं ॥ तत्र श्रुत्योर्विरोधे सत्यध्ययनविध्युपात्तयोरप्रामाण्याऽयोगाद्वियदनुत्पत्त्यसंभवरूपतर्का

वायोरग्निरिति च पृथगाम्नानात् ॥ २ ॥ अस्मिन्विप्रतिषेधे कश्चिदाह ॥ गौण्यसंभवात् ॥ ३ ॥ नास्ति वियत उत्पत्तिरश्रुतेरेव ॥ या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति ॥ कस्मात् असंभवात् ॥ न ह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु ॥ ते हि कारणसामग्र्यसंभवादाकाशस्योत्पत्तिं वारयंति ॥ समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते ॥ द्रव्यस्य चैकजातीयकमनेकं च द्रव्यं समवायिकारणं भवति ॥ न चाकाशस्यैकजातीयकमनेकं च द्रव्यमारंभकमस्ति ॥ यस्मिन्समवायिकारणे सति असमवायिकारणेन च तत्संयोगे आकाश उत्पद्येत ॥ तदभावात्तु तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति ॥ उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः संभाव्यते ॥ प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति ॥

नुगृहीतछांदोग्यश्रुतिर्मुख्यार्था इतरा गौणीत्यविरोध इत्येकदेशिमतं विवृणोति ॥ नास्तीत्यादिना ॥ आकाशो नोत्पद्यते सामग्रीशून्यत्वादात्मवन्न चाविद्याब्रह्मणोः सत्त्वाद्धेत्वसिद्धिः विजातीयत्वेनानयोरारंभकत्वायोगादसंयुक्तत्वाच्च ॥ संयोग एव हि द्रव्यस्यासमवायिकारणमतः समवाय्यसमवायिनोरभावान्न हेत्वसिद्धिरित्यर्थः ॥ प्रागभावशून्यत्वाच्चात्मवदाकाशो नोत्पद्यत इत्याह ॥ उत्पत्तिमतां चेति ॥ प्रकाशश्चाक्षुषानुभवः ॥ आदिपदं तमोध्वंसपाकयोर्ग्रहणं मूर्तद्रव्याश्रयत्वं ह्याकाशस्य कार्यं न त्वप्रसक्तं येप्यस्ति परमाण्वाश्रयत्वात् ॥ अतो न प्रागभाववदित्यर्थः ॥

प्रागभावासत्त्वंस्फुटयति॥किंहीति॥स्थूलाश्रयोवकाशःसूक्ष्माश्रयश्छिद्रमण्वाश्रयःसुषिरमितिभेदःकिंचात्मवदाकाशोनजायतेविभुत्वाद्
सर्वद्रव्यत्वाच्चेत्याह॥पृथिव्यादीति॥तस्मादुक्ततर्कबलाद्गौणीद्रष्टव्येत्यन्वयः भेदोक्तेर्गौणत्वेवैदिकोदाहरणमाह॥वेदेप्यारण्यानिति॥आका
शेष्विति॥भेदव्यपदेशोगौणइतिसंबंधः॥३॥नकेवलंतर्कादाकाशस्यानुत्पत्तिःकिंतुश्रुतितोपीत्याह सूत्रकारः॥शब्दाच्चेति॥नित्यभावस्यता

आकाशस्यपुनर्नपूर्वोत्तरकालयोर्विशेषःसंभावयितुंशक्यते॥किंहिप्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रंबभूवेतिश
क्यतेऽध्यवसातुं॥पृथिव्यादिवैधर्म्याच्चविभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः॥तस्माद्यथालोकेआकाशंकुर्वाकाशोजा
तइत्येवंजातीयकोगौणःप्रयोगोभवति॥यथाचघटाकाशःकरकाकाशोगृहाकाशइत्येकस्याप्याकाशस्यैवंजातीयको
भेदव्यपदेशोगौणोभवति॥वेदेप्यारण्यानाकाशेष्वालभेरन्नित्येवमुत्पत्तिश्रुतिरपिगौणीद्रष्टव्या॥३॥शब्दाच्च॥४॥श
ब्दःखल्वाकाशस्याजत्वंख्यापयति॥यतआहवायुश्चांतरिक्षंचैतदमृतमिति॥नह्यमृतस्योत्पत्तिरुपपद्यते॥आका
शवत्सर्वगतश्चनित्यइतिचाकाशेनब्रह्मसर्वगतत्वनित्यत्वाभ्यांधर्माभ्यामुपमिमानआकाशस्यापितौधर्मौसूचयति॥
नचतादृशस्योत्पत्तिरुपपद्यते॥सयथाऽनंतोऽयमाकाशएवमनंतआत्मावेदितव्यइतिचोदाहरणंआकाशशरीरंब्र
ह्मआकाशआत्मेतिच॥नह्याकाशस्योत्पत्तिमत्त्वेब्रह्मणस्तेनविशेषणंसंभवतिनीलेनेवोत्पलस्य॥तस्मान्नित्यमेवाका
शेनसाधारणंब्रह्मेतिगम्यते॥४॥स्याच्चैकस्यब्रह्मशब्दवत्॥५॥इदंपदोत्तरंसूत्रं॥स्यादेतत्कथंपुनरेकस्यसंभूतश
ब्दस्यतस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यस्मिन्नधिकारेपरेषुतेजःप्रभृतिष्वनुवर्त्तमानस्यमुख्यत्वंसंभवतिआका
((शेचगौणत्वमिति॥अतउत्तर"

दित्वादितिभावः॥आत्मेतिचशब्दइहोदाहरणमित्यन्वयः॥आकाशःशरीरमस्येतिबहुव्रीहिणाऽत्यंत
साम्यभानात्ब्रह्मवदाकाशस्यानादित्वमित्यर्थः॥४॥पदोत्तरमिति॥शंकोत्तरमितियावत्॥तान्येवशंकापदानिपठति॥स्यादेतदिति॥अधि

शां.भा. यथैकस्मिन्ब्रह्मप्रकरणे अन्नंब्रह्मा(ऽऽ)नंदोब्रह्मेतिवाक्ययोर्ब्रह्मशब्दस्यान्ने गौणत्वमानंदे मुख्यता तथैकवाक्यस्थस्यैकस्यापिसंभूतशब्दस्यगुणमु अ.पा.

टी. ख्यार्थभेदोयोग्यतावशादित्याह ॥ स्याच्चेति ॥ उदाहरणांतरमाह ॥ यथाचेति ॥ अभेदोपचारोभक्तिः मुख्यसिद्धांत्याक्षिपति ॥ कथंपुनरिति ॥ स ७३

रत्न. सर्वाक्षेपहृदयंस्पष्टयति ॥ नन्विति ॥ अद्वितीयत्वश्रुतिबाधः ॥ सर्वविज्ञानप्रतिज्ञाबाधश्चेत्यर्थः ॥ प्रथमाक्षेपंदृष्टांतेनपरिहरति ॥ एकमेवेति

२४३

स्याच्चैकस्यापिसंभूतशब्दस्यविषयविशेषवशाद्गौणोमुख्यश्चप्रयोगोब्रह्मशब्दवत् ॥ यथैकस्यापिब्रह्मशब्दस्यतपसा
ब्रह्मविजिज्ञासस्वतपोब्रह्मेत्यस्मिन्नधिकारेऽन्नादिषुप्रयोगःगौणः आनंदेचमुख्योयथाचतपसिब्रह्मविज्ञानसा
धनेब्रह्मशब्दोभक्त्याप्रयुज्यते ॥ अंजसातुविज्ञेयेब्रह्मणितद्वत् ॥ कथंपुनरनुत्पत्तौनभसएकमेवाद्वितीयमितीयं
प्रतिज्ञासमर्थ्यते ॥ ननुनभसाद्वितीयेनसद्वितीयंब्रह्मप्राप्नोतिकथंचब्रह्मणिविदितेसर्वंविदितंस्यादिति ॥ तदुच्यते ए
कमेवेति तावत्स्वकार्यापेक्षयोपपद्यते ॥ यथालोकेकश्चित्कुंभकारकुलेपूर्वेद्युर्मृद्दंडचक्रादीनिचोपलभ्यापरेद्यु
श्चनानाविधान्यमत्राणिप्रसारितान्युपलभ्यब्रूयात् मृदेवैकाकिनीपूर्वेद्युरासीदिति ॥ सचतयावधारणयामृत्कार्यजा
तमेवपूर्वेद्युर्नासीदित्यभिप्रेयात् नदंडचक्रादि तद्वत् ॥ अद्वितीयश्रुतिरधिष्ठात्रंतरंवारयतियथामृदोऽमत्रप्रकृतेः
कुंभकारोधिष्ठातादृश्यते ॥ नैवंब्रह्मणोजगत्प्रकृतेरन्योधिष्ठातास्तीति ॥ नचनभसापिद्वितीयेनसद्वितीयंब्रह्मप्रसज्य
ते लक्षणान्यत्वनिमित्तंहिनानात्वं ॥ नचप्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्तिक्षीरोदकयोरिवसंसृष्टयोर्व्यापित्वामूर्त
त्वादिधर्मसामान्यात् ॥ सर्गकालेतुब्रह्मजगदुत्पादयितुंयततेस्तिमितमितरत्तिष्ठति ॥ तेनान्यत्वमवसीयते ॥ १ कार्यरूपद्वितीय

शून्यत्वंप्रागवस्थायामवधारणश्रुत्यर्थइत्यर्थः ॥ कुलेगृहे अमत्राणिघटादीनिपात्राणि ॥ एकमेवेत्यवधारणव्यावर्त्यंकार्यमितिव्याख्यायाद्वितीयप
दव्यावर्त्यमाह ॥ अद्वितीयश्रुतिरिति ॥ आकाशस्याद्वितीयत्वमंगीकृत्याद्वितीयादिपदसंकोचः कृतस्तदपिनास्तीत्याह ॥ नचनभसापीति ॥ धर्मसाम्येब्र
ह्मनभसोः कथंभेदस्तत्राह सर्गकालेत्विति ॥

धर्मसाम्याद्द्वितीयत्वोपचार इत्यर्थे श्रुतिमाह ॥ तथाचाकाशेति ॥ द्वितीयमाक्षेपं परिहरति ॥ अतएवेति ॥ अभेदोपचारादेवेत्यर्थः ॥ नभसो ब्रह्मतत्कार्याभ्यामभिन्नदेशकालत्वाच्च तज्ज्ञानेन तज्ज्ञानमित्याह ॥ अपिचेति ॥ ५ ॥ एवमाकाशस्यानुत्पत्तौ सर्वश्रुतीनामविरोध इत्येकदेशिसिद्धान्तः प्राप्तस्तं मुख्यसिद्धान्ती दूषयति ॥ प्रतिज्ञेति ॥ अहानिरबाधः ॥ सामयजुरथर्वणशाखाभेदज्ञापनार्था इतिशब्दाः ॥ नकाचा

तथाचाकाशशरीरं ब्रह्मेत्यादिश्रुतिभ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः ॥ अतएव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः ॥ अपि च सर्वं कार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं भवतीति ॥ अतो ब्रह्मणा तत्कार्येण च विज्ञातेन सह विज्ञातमेवाकाशं भवति ॥ यथा क्षीरपूर्णे घटे कतिचिदप्बिंदवः प्रक्षिप्ताः संतः क्षीरग्रहणेनैव गृहीता भवंति ॥ नहि क्षीरग्रहणादप्बिंदुग्रहणं परिशिष्यते ॥ एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वात् गृहीतमेव ब्रह्मग्रहणेन नभो भवति ॥ तस्माद्भाक्तं नभसः संभवश्रवणमिति ॥ ५ ॥ एवं प्राप्ते इदमाह ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥ येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ न काचन मद्बहिर्धा विद्यास्तीति चैवंरूपा प्रतिज्ञा प्रतिवेदांतं विज्ञायते तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयात् ब्रह्मणः स्यात् ॥ व्यतिरेके हि सति एकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतिज्ञा हीयेत ॥ स चाव्यतिरेक एवमुपपद्यते ॥ यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत ॥ शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते ॥ ६

तेति ॥ आत्मभिन्नं ज्ञेयं नास्तीत्यर्थः ॥ ननु सर्वस्य ब्रह्माऽव्यतिरेकात्प्रतिज्ञाया अहानिरित्यस्तु तथापि जीवादिवदनुत्पन्नस्यापि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात्प्रतिज्ञासिद्धिः किं नस्यात्किमुत्पत्त्येत्यत आह ॥ शब्देभ्यश्चेति ॥ अव्यतिरेक एव न्यायस्तेनेत्य

अयंभावःजीवस्यतावदात्मत्वात् ब्रह्माव्यतिरेकः अज्ञानतत्संबंधयोःकल्पितत्वेनाव्यतिरेकःस्वतंत्रा ऽज्ञाना ऽयोगादज्ञानान्यजडद्रव्यस्यानुकार्य
त्वेनैवाव्यतिरेकसिद्धिः॥ तस्याःकार्यत्वेप्रधानवत्स्वतंत्र्यादव्यतिरेकायोगात्तथाहुर्न्यायविदःनित्यद्रव्याणिस्वतंत्राणिभिन्नान्यनाश्रितानीति
तस्मात्प्रतिज्ञासिद्धयेआकाशस्यकार्यत्वेनैवाव्यतिरेकोवाच्यइति॥ दृष्टांतस्पष्टिसार्वात्म्यशब्दानाह॥ तथाहीति॥ तेनतेनदृष्टांतेनेति यजु
षिदुंदुभ्यादिदृष्टांतेनाऽथर्वणेऊर्णनाभ्यादिदृष्टांतेनेत्यर्थः यजुषिप्रतिज्ञासाधकइदंसर्वमितिशब्दः॥ आथर्वणेब्रह्मैवेदमितिशब्दइतिवि॥

तथाहियेनाश्रुतंश्रुतंभवतीतिप्रतिज्ञायमृदादिदृष्टांतैःकार्यकारणाभेदप्रतिपादनपरैःप्रतिज्ञैषासमर्थ्यते॥ तत्साधनायैव
चोत्तरेशब्दाः।सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं॥ तदैक्षततत्तेजोसृजतेत्येवंकार्यजातंब्रह्मणःप्रदर्श्याव्यतिरेकंप्रद
र्शयंत्यैतदात्म्यमिदंसर्वमित्यारभ्याप्रपाठकपरिसमाप्तेस्तद्यद्याकाशंब्रह्मकार्यंनस्यात् नब्रह्मणिविज्ञातेआकाशंविज्ञा
येततश्चप्रतिज्ञाहानिःस्यात्॥ नचप्रतिज्ञाहान्यावेदस्याप्रामाण्यंयुक्तंकर्तुं॥ तथाहिप्रतिवेदांतंतेतेशब्दास्तेनतेनदृष्टांते
नतामेवप्रतिज्ञांस्थापयंति॥ इदंसर्वंयदयमात्माब्रह्मैवेदममृतंपुरस्तादित्येवमादयस्तस्माज्ज्वलनादिवदेवगगनम
प्युत्पद्यते॥ यदुक्तमश्रुतेनैवियदुत्पद्यतइतितदयुक्तं॥ वियदुत्पत्तिविषयस्यश्रुत्यंतरस्यदर्शितत्वात्॥ तस्माद्वाएतस्मादा
त्मनआकाशःसंभूतइति॥ सत्यंदर्शितंविरुद्धंतुतत्तेजोसृजतेत्यनेनश्रुत्यंतरेण॥ नैकवाक्यत्वात् सर्वश्रुतीनां॥ भवत्वेक
वाक्यत्वमविरुद्धानामिहतुविरोधउक्तः॥ सकृच्छ्रुतस्यस्रष्टुःस्रष्टव्यद्वयसंबंधासंभवात् द्वयोश्चप्रथमजत्वासंभवाद्विक
ल्पासंभवाच्चेति॥

भागः॥ सर्वथाकाशोत्पत्तिकथनादेकदेशिमतेदूषितेश्रुत्यप्रामाण्यवादीस्वोक्तंस्मारयति॥ सत्यंदर्शितमिति॥ मुख्यसिद्धां
त्याह॥ नैकेति॥ तत्तेजोसृजतेतिसकृच्छ्रुतस्यस्रष्टुराकाशतेजोभ्यांयुगपत्संबंधेतित्तिरिक्रमबाधात् क्रमेणाकाशंसृष्ट्वातेजोसृजतेतिसंबंधेतेजः
प्राथम्यभंगप्रसंगाद्वस्तुनिविकल्पासंभवेनतयोःशाखाभेदेनप्राथम्यव्यवस्थायाअयोगान्नैकवाक्यतेतिप्राप्तेमुख्यसिद्धांतीएवंदूषयति॥ ६॥
टि०॥ सिद्धांतीत्यस्सरत्रममधिकं॥१॥

नैष दोष इति ॥ अप्रामाण्यकल्पनाद्वरं अपौरुषेयश्रुतीनामेकवाक्यत्वेन प्रामाण्यकल्पनं तच्चैकवाक्यत्वं बलवच्छ्रुत्या दुर्बलश्रुतेः कल्प्यं बलवती च तित्तिरिश्रुतिः प्रकृतिपंचम्या पौर्वापर्यरूपक्रमस्य श्रुतत्वात् छांदोग्यश्रुतिस्तु दुर्बला तेजःप्राथम्यश्रुत्यभावात्तेजःसर्गमात्रं तु श्रुतं तृतीयत्वेन परिणेयमित्येकवाक्यत्वेनेत्यर्थः ॥ यदुक्तमेकदेशिना छांदोग्यश्रुत्याऽकाशोत्पत्तिर्बाध्यत इति तन्निरस्तं किं च सा श्रुतिः किं तेजोजन्मपरोत तेजोजन्मवियत्स्तुत्यनिश्चयेतूभयपरा आद्ये न तद्वारणमित्याह ॥ नहीति ॥ अविरोधादित्यर्थः ॥ न द्वितीयः श्रुत्यंतरविरोधेनोभयपरत्वकल्पनायोगाद्वाक्य

नैष दोषः ॥ तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् तस्माद्वा एतस्मादात्मन आकाशः संभूतः ॥ आकाशाद्वायुः वायोरग्निरिति ॥ अशक्या हीयं श्रुतिरन्यथा परिणेतुं शक्या तु परिणेतुं छांदोग्यश्रुतिः ॥ तदाकाशं वायुं च सृष्ट्वा तत्तेजोसृजतेति ॥ न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यंतरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति ॥ एकस्य वाक्यस्य व्यापारद्वयासंभवात् ॥ स्रष्टा त्वेकोपि क्रमेणानेकं स्रष्टव्यं सृजेत् ॥ इत्येकवाक्यत्वकल्पनायां संभवंत्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या ॥ न चास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबंधोभिप्रेयते ॥ श्रुत्यंतरवशेन स्रष्टव्यांतरोपसंग्रहात् ॥ यथा च सर्वं खल्विदं ब्रह्म तज्जलानित्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशांतरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयत्येवं तेजसोपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यंतरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति ॥

भेदापत्तेश्चेत्याह ॥ ॥ एकस्येति ॥ नन्वेकस्य स्रष्टुरनेकार्थसंबंधवद्वाक्यस्याप्यनेकार्थता किं न स्यादित्यत आह ॥ स्रष्टा त्विति ॥ एकस्य कर्तुरनेकार्थसंबंधो दृष्टः ॥ नन्वेकस्य वाक्यस्य नानार्थत्वं दृष्टं नानार्थकप्रयोगे तु पय आनयेत्यादावावृत्त्या वाक्यभेद एव आनयनस्य जलक्षीराभ्यां पृथक्संबंधादित्यर्थः फलितमाह ॥ इत्येकेति ॥ एकस्य शब्दस्यावृत्तिं विनाऽनेकार्थत्वं नास्ति चेदसृजतेति शब्दस्य छांदोग्य उपसंहृताकाशादिसंबंधार्थमावृत्तिदोषः स्यादित्यत आह ॥ न चेति ॥ छांदोग्यस्य तेजोजन्माकाशादिजन्मपूर्वकं तेजोजन्मत्वात्तित्तिरिस्थतेजोजन्मवदित्याकाशादिजन्मोपसंहारेण तदाकाशमसृजतेति वाक्यांतरस्यैव कल्पनान्नावृत्तिदोष इत्यर्थः श्रुत्यंतरस्थः क्रमः श्रुत्यंतरे ग्राह्य इत्यत्र दृष्टांतमाह यथा चेति ॥

शा·भा·
टी·
र·प्र·
२५५

अ·पा·
२।३

सृष्टितात्पर्यातात्पर्याभ्यां दृष्टांतश्रुतिवैषम्यं शंकते ॥ नन्वित्यादिना ॥ तेजःसाधर्म्यस्वीकारे आकाशसर्गो धर्मी तद्धर्मः साधर्म्यं चेति द्वयं श्रुतं बाधनीयमिति गौरवमाकाशसाधर्म्ये त्वार्थिकं तेजःसर्गसाधर्म्यमात्रं बाध इति लाघवमिति मत्वाह ॥ नेत्युच्यत इति ॥ किंच प्रधानधर्मित्यागाद्वरं गुणभूतस्य तेजःसाधर्म्यस्य धर्मस्य त्याग इत्याह ॥ नहीति ॥ किंच किं सृष्टिपरश्रुतिसिद्धत्वात्तेजःसाधर्म्यं गृह्यते उत प्रथमस्थानेन तेजसः सर्गश्रुत्याऽर्थात्साधर्म्यभानान्नाद्य इत्याह ॥ अपि चेति ॥ द्वितीयमनूद्य दूषयति ॥ अर्थात्त्विति यदुक्तं वस्तुनि विकल्पासंभवादुभयोः

ननुशमविधानार्थमेतद्वाक्यं तज्जलानिति शांत उपासीतेति श्रुतेर्नैतत्सृष्टिवाक्यं तस्मादेतन्न प्रदेशांतरप्रसिद्धं क्रममनुरोद्धुमर्हतीति ॥ नन्वेतेजोसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथाश्रुति क्रमो गृहीतव्य इति ॥ नेत्युच्यते ॥ नहि तेजःप्राथम्यानुरोधेन श्रुत्यंतरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात् क्रमस्य अपि च तत्तेजोसृजतेति नात्र क्रमस्य वाचकः कश्चिच्छब्दोस्ति ॥ अर्थात्तु क्रमोवगम्यते ॥ स च वायोरग्निरित्यनेन श्रुत्यंतरप्रसिद्धेन क्रमेण निवार्यते ॥ विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयावसंभवानभ्युपगमाभ्यां निवारितौ तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः ॥ अपि च छांदोग्ये येनाश्रुतं श्रुतं भवतीत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातमपि वियदुत्पत्तावुपसंख्यातव्यं किमंग पुनस्तैत्तिरीयके समाम्नातं नभो न संगृह्यते ॥ यच्चोक्तमाकाशस्य सर्वेणानन्यदेशकालत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवत्यतो न प्रतिज्ञा हीयते ॥ न चैकमेवाद्वितीयमिति श्रुतिकोपो भवति क्षीरोदकवद्ब्रह्मनभसोरव्यति

राम
२५५

साधर्म्यं शाखाभेदे न व्यवस्थितं भवति नाप्युभयोर्द्विदलांकुरवत्समुच्चित्योत्पत्त्या साधर्म्यं वायोरग्निरिति क्रमबाधारेकोपपत्तेर्विति पातादिति न दिष्टमेवेत्याह ॥ विकल्पेति ॥ न केवलं श्रुतिद्वयोरविरोधः सौहार्दं चास्तीत्याह ॥ अपि चेति ॥ वियदुपसंग्राह्यमित्यन्वयः वियदनुत्पत्तिवादिनोक्तमनूद्य प्रतिज्ञाया अद्वितीयश्रुतेश्च मुख्यार्थतात्पर्यावगमान्न गौणार्थतेति दूषयति ॥ यच्चोक्तमित्यादिना ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

प्रकृतिविकारन्यायः तदनन्यत्वन्यायः॥ उदकक्षीरस्थमपि क्षीरज्ञानान्न गृह्यते भेदादिति भावः॥ मास्तु सम्यग्ज्ञानं श्रुतेर्भ्रान्तिमूलत्वसंभवादित्याशंक्य। पौरुषेयत्वान्नैवमित्याह॥ न च वेदस्येति॥ माया भ्रान्तिस्तया ऽलीकं मिथ्याभाषणं तेन वंचनमयथार्थबोधनं आदिपदाद्विप्रलिप्साप्रमादकरणापाटवानि गृह्यंते॥ प्रतिज्ञामुख्यत्वमभिधायाद्वितीयश्रुतिमुख्यतामाह॥ सावधारणेति॥ सर्वद्वैतनिषेधपरेत्यर्थः उभयगौणत्वेऽद्भुतवदुपन्यासो मृदादिदृष्टांतैरुक्तसाधनं च न स्यादिति दोषांतरमाह॥ न चेत्यादिना॥ कार्यमेव वस्त्वेकदेशः॥ ६॥ आकाशो नोत्पद्यते सामग्रीशून्यत्वादित्यत्राकाशो विकारः विभक्तत्वात् घटादिवदिति सत्प्रतिपक्षमाह॥ यत्पुनरित्यादिना॥ यो विभक्तः स विकार इत्यन्वयमुक्त्वा यस्त्वविकारः स न विभक्तो यथात्मेति व्यतिरेकव्याप्तिमाह॥ न त्वविकृतमिति॥

अत्रोच्यते॥ न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यं मृदादिदृष्टांतप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते॥ क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्॥ न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यक्ज्ञानगृहीतत्वमस्ति॥ न च वेदस्य पुरुषाणामिव मायालीकवंचनादिभिरर्थावधारणमुपपद्यते॥ सावधारणा चेयमेकमेवाद्वितीयमिति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत॥ न च वस्तुकार्यापेक्षयेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाऽद्वितीयतावधारणं चेति न्याय्यं मृदादिष्वपि हि तन्न संभवात्॥ न तदपूर्ववदुपन्यसितव्यं भवति॥ श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्यादिना॥ तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्यत इति द्रष्टव्यं॥ ६॥ यत्पुनरेतदुक्तमसंभवात् गौणी गगनस्योत्पत्तिश्रुतिरिति तत्र ब्रूमः॥ यावद्विकारं तु विभागो लोकवत्॥ ७॥ तु शब्दोऽसंभवाशंकाव्यावृत्त्यर्थः॥ न खल्वाकाशोत्पत्त्यसंभवाशंका कर्तव्या॥ यतो यावत्किंचिद्विकारजातं दृश्यते॥ घटघटिकोदंचनादि वा कटककेयूरकुंडलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते॥ न त्वविभक्तं किंचित् कुतश्चिद्विभक्तमुपलभ्यते॥ विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते॥ तस्मात्सोऽपि विकारो भवितुमर्हति॥

शा.भा.
टी.
र.प्र.
२४६

अ.पा.
२.३

दिगादिषुव्यभिचारमाशंक्यपक्षसमत्वान्मैवमित्याह ॥ एतेनेति ॥ विभक्तत्वेनेत्यर्थः ॥ आत्मनिव्यभिचारंशंकते ॥ नन्विति ॥ धर्मिसमानसत्ताक
विभागस्यहेतुत्वात्परमार्थात्मनिविभागस्यकल्पितत्वेनभिन्नसत्ताकत्वान्नव्यभिचारइत्याह ॥ नेति ॥ अत्रचाऽज्ञानान्यद्रव्यत्वंविशेषणं ॥ अतो
नाज्ञानतत्संबंधादौव्यभिचारः नन्वात्माकार्यः विभक्तत्वात् वस्तुत्वाद्वाघटवदित्याभासतुल्यमिदं अनुमानमित्याशंकात्मनःपरमकारणत्वेन
श्रुतस्यकार्यत्वेशून्यताप्रसंगइतिबाधकसत्वान्नस्याभासत्वंनात्रकिंचिद्बाधकमस्तिप्रत्युतआकाशस्याकार्यत्वेनित्यानेकद्रव्यकस्यनाश्रौतप्र
तिज्ञाहान्यादयोबाधकाःसंतीतिनाभासतुल्यत्वेनेत्याह ॥ आत्मनइति ॥ इष्टप्रसंगइतिवदंतंप्रत्याह ॥ आत्मत्वादिति ॥ आत्माभावःकेनचित्

एतेनदिक्कालमनःपरमाण्वादीनांकार्यत्वंव्याख्यातं ॥ नन्वात्माप्याकाशादिभ्योविभक्तइतितस्यापिकार्यत्वंघटादिव
त्प्राप्नोति ॥ न ॥ आत्मनआकाशःसंभूतइतिश्रुतेः ॥ यदिह्यात्माविकारःस्यात्तस्मात्परमन्यन्नश्रुतमित्याकाशादिसर्वं
कार्यंनिरात्मकमात्मनःकार्यत्वेस्यात् ॥ तथाचशून्यवादःप्रसज्येत ॥ आत्मत्वादेवात्मनोनिराकरणशंकानुपपत्तिः
॥ नह्यात्मागंतुकःकस्यचित्स्वयंसिद्धत्वान्नह्यात्माऽऽत्मनःप्रमाणमपेक्ष्यसिद्ध्यति ॥ तस्यहिप्रत्यक्षादीनिप्रमाणान्यप्र
सिद्धप्रमेयसिद्धयेउपादीयंते ॥ नह्याकाशादयःपदार्थाःप्रमाणनिरपेक्षाः स्वयंसिद्धाःकेनचिदभ्युपगम्यंते ॥ ७

ज्ञायतेनवाआद्येयोज्ञातासपरिशिष्यतइतिनशून्यताद्वितीयेपिनशून्यतामानाभावादित्यर्थः ॥ किंचयद्धिकार्यंसत्तास्फूर्त्योरन्यापेक्षंतन्निर
कार्यमात्मात्वकार्योनिरपेक्षत्वान्नबाधयोग्यइत्याह ॥ नह्यात्मेत्यादिना ॥ कस्यचित्कारणस्यागंतुकःकार्योनहि ॥ सत्तास्फूर्त्योःसिद्धोरन
न्यायत्तत्वादित्यक्षरार्थः तत्रस्फूर्तेरनन्यायत्तत्वंविवृणोति ॥ नहीति ॥ तदुक्तंसुरेश्वराचार्यैः ॥ प्रमाताचप्रमाणंचप्रमेयंप्रमितिस्तथा ॥ य
स्यप्रसादात्सिध्यंतितत्सिद्धौकिमपेक्ष्यतइति ॥ तथाश्रुतिरपिपुरुषःस्वयंज्योतिस्तस्यभासासर्वमिदंविभातीतिच ॥ नन्वात्मनःस्वतःसिद्धौप्र
माणवैयर्थ्यंतत्राह ॥ तस्येति ॥ ननुप्रमेयस्यापिस्वप्रकाशत्वंकिंनस्यादित्यतआह ॥ नहीति ॥ अतोनप्रमाणवैयर्थ्यमितिभावः ॥ ७ ॥

राम
२४६

आत्मापिमानाधीनसिद्धिकः किंनस्यादित्यतआह॥ आत्मात्विति॥ अयमर्थः निश्चितसत्ताकंहिज्ञानंप्रमेयसत्तानिश्चायकंगेहेघटोदृष्टोनवेतिज्ञानसंशयेनदृष्टइतिव्यतिरेकनिश्चयेवार्थस्वरूपानिश्चयात् ज्ञानसत्तानिश्चयश्चनस्वतः कार्यस्यस्वप्रकाशत्वायोगात् नापिज्ञानांतरादनवस्थानादतः साक्षिणैवज्ञानसत्तानिश्चयोवाच्यः॥ तत्रसाक्षिणश्चेत् ज्ञानाधीनसत्तानिश्चयः अन्योन्याश्रयः स्यादतः सर्वसाधकत्वादात्मा। स्वतः सिद्धइति॥ स्वप्रकाशस्यापिबाधः किंनस्यादित्यतआह॥ नचेति॥ जडंहिपरायत्तप्रकाशत्वादागंतुकंबाधयोग्यंनप्रकाशात्मस्वरूपंनस्वसर्वबाधसाक्षिस्वरूपस्यनिराकर्त्रंतराभावात्स्वस्यचस्वनिराकर्तृत्वाऽयोगात्॥ नहिसुनिपुणेनापिस्वाभावोद्रष्टुंशक्यतइत्यर्थः॥ एवंस्वतःस्फूर्ति

आत्मातुप्रमाणादिव्यवहाराश्रयत्वात्प्रागेवप्रमाणादिव्यवहारात्सिध्यति॥ नचेदृशस्यनिराकरणंसंभवति॥ आगंतुकंहिवस्तुनिराक्रियतेनस्वरूपंयएवहिनिराकर्त्तातदेवहितस्यस्वरूपंनह्यग्नेरौष्ण्यमग्निनानिराक्रियते॥ नथाहमेवेदानींजानामिवर्त्तमानंवस्त्वहमेवातीतमतीततरंचाज्ञासिषमहमेवानागतमनागततरंचज्ञास्यामीत्यतीतानागतवर्त्तमानभावेनान्यथाभवत्यपिज्ञातव्येनज्ञातुरन्यथाभावोस्तिसर्वदावर्त्तमानस्वभावत्वात्॥ तथाभस्मीभवत्यपिदेहेनात्मनउच्छेदोवर्त्तमानस्वभावादन्यथास्वभावत्वंवानसंभावयितुंशक्यं॥ एवमप्रत्याख्येयस्वभावत्वादेवाका

नयेति॥ ७॥

वाकाशस्य॥

((र्यत्वमात्मनः कार्यत्वंच

त्वादात्मानवाध्यइत्युक्त्वासतः सत्ताकत्वाच्चनवाध्यइत्याह॥ तथाहमेवेति॥ ज्ञानज्ञेययोः सत्ताव्यभिचारेपिज्ञातुः सदैकरूपत्वान्नसत्ताव्यभिचारइत्यर्थः॥ मास्तुजीवतोज्ञातुरन्यथास्वभावः मृतस्यतुस्यादित्यतआह॥ उच्छेदोविनाशोऽन्यथास्वभावत्वंमिथ्यात्वंवासंभावयितुमपिनशक्यंअहमस्मीत्यनुभवसिद्धसत्स्वभावस्यबाधकाभावादित्यर्थः॥ एवमात्मनः शून्यत्वनिराशेनशून्यताप्रसंगस्यानिष्टत्वंउक्तंततश्चात्मनः कार्यत्वानुमानंआभासइत्याह॥ एवमिति॥ अकार्यात्मनः सिद्धेतस्याविद्यासहितस्योपादानस्याद्यघाऽदिनिमित्तस्यचसत्त्वादाकाशानुत्पत्तिरितिहेतोः सामग्रीशून्यत्वस्यस्वरूपासिद्धेरुक्तसत्प्रतिपक्षस्यबाधाच्चाकाशस्यकार्यत्वंनिरवद्यमित्याह॥ कार्यत्वंचेति॥ ६ ॥

आत्माविद्ययोर्विजातीयत्वान्नाकाशारंभकत्वमित्युक्तमनूद्य निरस्यति ॥ यत्त्वित्यादिना ॥ किं कारणमात्रस्य साजात्यनियमः ॥ उत समवायिनः ॥ तत्राद्यं निरस्य द्वितीयं शंकते ॥ स्यादेतदिति ॥ किं समवायितावच्छेदकधर्मेण साजात्यमुत सत्त्वादिना नाद्य इत्याह ॥ तदपीति ॥ नच रज्वादि नद्रव्यांतरमिति वाच्यं पटादेरपि तथात्वापातात् द्वितीयोऽस्मदिष्टः आत्माविद्ययोर्वस्तुत्वेन साजात्यादित्याह ॥ सत्त्वेति ॥ उपादानस्य साजात्यनियमं

यत्तूक्तं समानजातीयमनेकं कारणद्रव्यं व्योम्नो नास्तीति तत्प्रत्युच्यते ॥ न तावत्समानजातीयमेवारभते न भिन्नजातीयमिति नियमोस्ति ॥ नहि तंतूनां तत्संयोगानां च समानजातीयत्वमस्ति द्रव्यत्वगुणत्वाभ्युपगमात् ॥ न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोस्ति ॥ स्यादेतत्समवायिकारणविषय एव समानजातीयत्वाभ्युपगमो न कारणांतरविषय इति ॥ तदप्यनैकांतिकं सूत्रगोवालैर्ह्यनेकजातीयैरेका रज्जुः सृज्यमाना दृश्यते ॥ तथा सूत्रैरूर्णादिभिश्च विचित्रान्कंबलान्वितन्वते ॥ सत्त्वद्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यं सर्वस्य सर्वेण समानजातीयकत्वात् ॥ नाप्यनेकमेवारभते नैकमिति नियमोस्ति ॥ अणुमनसोराद्यकर्मारंभाभ्युपगमात् ॥ एकैको हि परमाणुःमनश्चाद्यं कर्मारभते न द्रव्यांतरैः संहत्येत्यभ्युपगम्यते ॥ द्रव्यारंभ एवानेकारंभकत्वनियम इति चेत् न परिणामाभ्युपगमात् ॥ भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यांतरस्यारंभकमभ्युपगम्येत ॥ तदेव तु द्रव्यं विशेषवदवस्थांतरमापद्यमानं कार्यं नामाभ्युपगम्यते ॥ तच्च क्वचिदनेकं परिणमते मृद्बीजाद्यंकुरादिभावेन ॥ क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन ॥ नेश्वरशासनमस्त्यनेकमेव कारणं कार्यं जनयतीति ॥ अतः श्रुतिप्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण जगज्जातमितिनिश्चीयते ॥

निरस्य संयुक्ताऽनेकत्वनियममद्वितीयस्यासंगस्याप्यात्मन उपादानत्वसिद्धये निरस्यति ॥ नापीत्यादिना ॥ किमारंभकमात्रस्यायं नियम उत द्रव्यारंभकस्य नाद्य इत्याह ॥ अण्विति ॥ द्व्यणुकस्य ज्ञानस्य वा समवायिकारणसंयोगजनकमाद्यं कर्म यद्यप्यदृष्टवदात्मसंयुक्ते अणुमनसी ॥

आद्यकर्मारंभकेनथापिकर्मसमवायिनस्तत्वनियमभङ्गइत्याह॥सएकैकोहीति॥द्रव्यान्तरैःसमवायिभिरित्यर्थः द्वितीयमुत्पाद्यारंभवादानंगीकारेणदूषयति॥द्रव्येत्यादिना॥नत्वभ्युपगम्यतेतस्मान्नैषनियमइतिशेषः॥यत्तुक्षीरपरमाणुषुरसांतरोत्पत्तौतैरेवदध्यारंभइतितन्नक्षीरनाशेमानाभावात् रसवद्दध्नोप्येकद्रव्यारभ्यत्वसंभवाच्चद्रव्यगुणसंकेतस्यपौरुषेयस्यश्रुत्यर्थ निर्णयाहेतुत्वादितिभावः॥लोकेकर्तुःसहायदर्शनात् असहायाद्ब्रह्मणःकथंसर्गइतितत्राह॥तथाचोक्तमिति॥प्रागभावशून्यत्वहेतुरप्यसिद्धइत्याह॥यच्चोक्तमित्यादिना

तथाचोक्तमुपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धीति॥यच्चोक्तमाकाशस्योत्पत्तौनपूर्वोत्तरकालयोर्विशेषःसंभावयितुंशक्यतइतितदयुक्तंयेनैवहिविशेषेणपृथिव्यादिभ्योव्यतिरिच्यमानंनभःस्वरूपवदिदानीमध्यवसीयतेसएवविशेषःप्रागुत्पत्तेर्नासीदितिगम्यते॥यथाचब्रह्मनस्थूलादिभिःपृथिव्यादिस्वभावैःस्वभाववदस्थूलमनण्वित्यादिश्रुतिभ्यएवमाकाशस्वभावेनापिनस्वभाववदनाकाशमितिश्रुतेरवगम्यते॥तस्मात्प्रागुत्पत्तेरनाकाशमितिस्थितं॥यदप्युक्तंपृथिव्यादिवैधर्म्यादाकाशस्याजत्वमितितदप्यसत्श्रुतिविरोधेसत्युत्पत्त्यसंभवानुमानस्याभासत्वोपपत्तेः उत्पत्त्यनुमानस्यचदर्शितत्वात् अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसंभवाच्च॥आत्मन्यनैकांतिकमितिचेत्॥नतस्यौपनिषदंप्रत्यनित्यगुणाश्रयत्वासिद्धेः॥ ११ ॥शब्दाश्रयत्वंविशेषः॥शब्दादिमानाकाशःप्रलयेनास्तिनासीद्रजोनोव्योमेतिश्रुतेः

॥नन्वाकाशाभावेकाठिन्यंस्यादितिचेत्तुशिथिलोयंनैयायिकंतन्नयः नह्याकाशाभावस्तद्धर्मोवाकाठिन्यंकिंतुमूर्तद्रव्यविशेषःतत्संयोगविशेषोवाकाठिन्यंतच्चप्रलयेनास्तीतिभावः॥आकाशशरीरंब्रह्मेतिश्रुतेरग्न्यौष्ण्यवद्ब्रह्मस्वभावस्याकाशस्यसतिब्रह्मणिकथमभावस्तत्राह॥यथाचेति॥विभुत्वादाकाशसमंब्रह्मेतिश्रुत्यर्थः॥विभुत्वास्पर्शद्रव्यत्वनिरवयवद्रव्यत्वलिंगानांविभक्तत्वादिलिंगसहितागमबाधमाह॥यदपीत्यादिना॥धर्मिविनाशाभावेगुणनाशोनस्यादितितर्कार्थमनित्यपदंगुणाश्रयत्वमेवहेतुः॥तच्चस्वसमानसत्ताकगुणवत्त्वमतोनिर्गुणात्मनिनव्यभिचारःभू

स्वरूपासिद्धिमप्याह ॥ विभुत्वादीनां चेति ॥ सर्वमूर्तद्रव्यसंयोगः परिणामविशेषो वा विभुत्वं निर्गुणात्मनि दृष्टान्ते नास्ति संयोगस्सावयवत्वनियतस्याऽजत्वसाध्यविरुद्धता च स्वरूपोपचयरूपं तु विभुत्वमात्माकाशयोर्न संभवति ज्यायानाकाशादिति श्रुतेः ॥ क्वचिदाकाशसाम्यं तु ब्रह्मणो यत्किंचिद्धर्मसंबंधेन व्यपदिश्यते ॥ असक्तत्वेन वा पंचीकरणादस्पर्शत्वमसिद्धं कार्यद्रव्यत्वान्निरवयवत्वमप्यसिद्धं द्रव्यत्वजातिश्चात्मन्यसिद्धेत्यर्थः ॥ निस्सद्धत्वांशेन साम्यं न विवक्षितं ॥ ननु स यथाऽनंतोऽयमाकाश एवमनंत आत्मेति श्रुतिर्नित्यत्वेनैव साम्यं ब्रूते नेत्याह ॥ एतेनेति ॥ आकाशस्य कार्यत्वेना

विभुत्वादीनां चाकाशस्यात्मनि वादितं प्रत्यसिद्धत्वात् ॥ यच्चोक्तमेतच्छब्दाच्चेति ॥ तत्रामृतत्वश्रुतिस्तावद्वियत्यमृता दिवौकस इतिवत् द्रष्टव्या ॥ उत्पत्तिप्रलययोरुपपादितत्वात् ॥ आकाशवत्सर्वगतश्च नित्य इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते निरतिशयमहत्त्वाय नाकाशसमत्वाय ॥ यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत् ॥ एतेनानंतत्वोपमानश्रुतिर्व्याख्याता ॥ ज्यायानाकाशादित्यादिश्रुतिभ्यश्च ब्रह्मण आकाशस्योनपरिमाणत्वसिद्धिः ॥ न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयत्यतोऽन्यदार्तमिति च ब्रह्मणोऽन्येषामाकाशादीनामार्तत्वं दर्शयति ॥ तपसि ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसंभवश्रुत्यनुमानाभ्यां परिहृतं तस्माद्ब्रह्मकार्यं वियदिति सिद्धं ॥ ८ ॥७॥ एतेन मातरिश्वा व्याख्यातः ॥८॥ अतिदेशोऽयं ॥ एतेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयो वायुर्व्याख्या

नित्यत्वादित्यर्थः श्रुतिस्त्वापेक्षिकानंत्यद्वारा मुख्यानंत्यं बोधयतीति भावः न्यूनत्वाच्चाकाशस्य न मुख्योपमानत्वमित्याह ॥ ज्यायानिति ॥ मुख्योपमानासत्त्वे श्रुतिर्न तस्येति ॥ तस्मादाकाशस्योपमानत्वमात्रेण नित्यत्वं नास्तीति भावः अनित्यत्वे ——— श्रुतिमाह ॥ अतोऽन्यदिति ॥ यत्तु एकस्यैव संभूतशब्दस्य गौणत्वं मुख्यत्वं चेति तन्न आकाशेऽपि तस्य मुख्यत्वसंभवादित्याह ॥ तपसीति ॥ बलवत्तित्तिरिश्रुत्या छांदोग्ये श्रुतेतेनेयनादेकवाक्यतया स्रष्टरि ब्रह्मण्यात्मनि समन्वय इत्युपसंहरति ॥ तस्मादिति ॥ ७ ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ——— ७ ॥

अनिर्देशत्वात् न पृथक् संगत्याद्यपेक्षा तत्तेजोसृजतेति श्रुतेराकाशाद्वायुरिति श्रुत्या विरोधोस्ति न वेति एकवाक्यत्वभावाभावाभ्यां संशये गौणपक्षः पूर्वपक्षः सिद्धान्तपक्षान्तरं निर्दिशति। तत्रापीत्यादिना।। पूर्वत्र ह्याकाशानंतर्यं तेजसः स्थापितं तत्र वायुतेजसोस्तुल्यवदानंतर्ये वायोरपीति क्रमश्रुतिबाधात् पौर्वापर्यं तेजःप्राथम्यभंगान्नैकवाक्यतेति पूर्वपक्षे गौणवाद्यभिप्रायमाह।। ततश्चेति।। अस्तमयप्रतिषेधो मुख्योत्पत्त्यसंभवे लिंगं वायुश्चान्तरिक्षं चैतदमृतमिति तस्यैव लिंगस्याभ्यासः वायुरेव व्यष्टिः समष्टिश्चेति सर्वात्मत्वं लिंगान्तरमादिपदार्थः।। तथा संवर्गवि।

तत्राप्येते यथायोगं पक्षा रचयितव्याः।। न वायुरुत्पद्यते छंदोगानामुत्पत्तिप्रकरणेऽनाम्नानादित्येकः पक्षः।। अस्ति तु तैत्तिरीयानामुत्पत्तिप्रकरणे आम्नानमाकाशाद्वायुरिति पक्षान्तरं।। ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिरसंभवादित्यपरोऽभिप्रायः।। असंभवश्च सैषानस्तमिता देवता यद्वायुरित्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च।। प्रतिज्ञानुपरोधाद्यावद्विकारं तु विभागाभ्युपगमादुत्पद्यते वायुरिति सिद्धान्तः।। अस्तमयप्रतिषेधोऽपरविद्याविषय आपेक्षिकः अग्न्यादीनामिव वायोरस्तमयाभावात्कृतप्रतिविधानं चामृतत्वादिश्रवणं।। ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणेऽश्रवणाश्रवणयोरेकमेवाधिकरणमुभयविषयमस्तु किमतिदेशेनासति विशेष इति उच्यते।। सत्यमेवमेतत्तथापि मंदधियां शब्दमात्रकृताशंकानिवृत्त्यर्थोयमतिदेशः क्रियते।। संवर्गविद्यादिषु ह्युपास्यतया वायोर्महाभागत्वश्रवणात्।। ऽ यायां वायु

र्ह्येवैतान्सर्वानग्न्यादीन्संहरतीति शब्दमात्रेणैश्वर्ये श्रवणं लिंगान्तरं ग्राह्यं एतैर्लिंगैर्वायुरनाद्यंत इति प्रतीते रुत्पत्तिर्गौणीत्यविरोधः श्रुत्योरिति प्राप्ते प्रतिपिपादयिषित प्रतिज्ञाश्रुतेर्बलीयस्त्वात्तत्साधकानां तत्र तत्र वायूत्पत्तिवाक्यानां भूयस्त्वादुक्तविभक्तत्वादिलिंगानुग्रहाच्च मुख्यैव वायोरुत्पत्तिस्तथा चाकाशं वायुं च सृष्ट्वा तेजोसृजतेति श्रुत्योरेकवाक्यतया ब्रह्मणि समन्वयः लिंगानि तूपास्यवायुस्तावकत्वादापेक्षिकतया व्याख्येयानीति मुख्यसिद्धान्तमाह।। प्रतिज्ञेत्यादिना।। कृतप्रतिविधानं आपेक्षिकत्वेन समाधानं यस्य तत्तथा।। अधिकरणारंभमाक्षिप्योक्तामधिकाशंकां

वायुर्ह्येवैतान्सर्वान्संवृक्तेइत्यादिशब्दमात्रंशंकामूलंनार्थइतिद्योतनार्थंमात्रपदंतामेवशंकामाह॥संवर्गेति॥व्याप्तिसमष्ट्युपास्तिर्वायुर्दिशांव
त्संवेदेत्युपास्तिश्चादिशब्दार्थः॥८॥असंभवस्तुसतोनुपपत्तेः॥अनाद्यनंतंमहतःपरंध्रुवंनचास्यकश्चिज्जनितेत्यादिब्रह्मानादित्वश्रुतीनांत्व९
जातोभवसिविश्वतोमुखइत्युत्पत्तिश्रुत्याविरोधोस्तिनवेत्येकधाकारणत्वभावाभावाभ्यांसंदेहेअस्तिविरोधइतिपूर्वपक्षेयथावाय्वादेरमृतत्वादि
कमुत्पत्तिश्रुतिबलादापेक्षिकंतथाब्रह्मानादित्वमापेक्षिकमितिदृष्टांतसंगत्यैकदेशिपक्षंप्रापयति॥वियदिति॥ब्रह्मकुतश्चिज्जायतेकार

असत्त्वमप्रतिषेधादिभ्यश्चभवतिनित्यत्वाशंकाकस्यचिदिति॥२।८॥असंभवस्तुसतोऽनुपपत्तेः॥९॥वियत्पवनयोरसं
भाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्यब्रह्मणोपिभवेत्कुतश्चिदुत्पत्तिरितिस्यात्कस्यचिन्मतिः॥तथाविकारेभ्यएवाका
शादिभ्यउत्तरेषांविकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापिविकारादेवब्रह्मणउत्पत्तिरितिकश्चिन्मन्येततामाशंकामपने
तुमिदंसूत्रमसंभवस्त्विति॥नखलुब्रह्मणःसदात्मकस्यकुतश्चिदन्यतःसंभवउत्पत्तिराशंकितव्याकस्मात्॥अनुप
पत्तेः॥सन्मात्रंहिब्रह्मनतस्यसन्मात्रादेवोत्पत्तिःसंभवत्यसत्यतिशयेप्रकृतिविकारभावानुपपत्तेः॥नापिसद्विशेषात्दृष्ट
विपर्ययात्॥सामान्याद्धिविशेषाउत्पद्यमानादृश्यंतेमृदादेर्घटादयोनतुविशेषेभ्यःसामान्यंनाप्यसतोनिरात्मकत्वात्॥
कथमसतःसज्जायेतेतिचाक्षेपश्रवणात्॥सकारणंकरणाधिपाधिपोनचास्यकश्चिज्जनितानचाधिपइतिचब्रह्मणो ति॥
९जनयितारंवारय

णत्वादाकाशवदित्यनुमानानुग्रहाज्जन्मश्रुतिर्बलीयसीत्याह॥नचेति॥नचानादिकारणाभावेनानवस्थाबीजांकुर
वदनादित्वोपपत्तेःतथाचदीपाद्दीपवद्ब्रह्मांतराद्ब्रह्मांतरोत्पत्तिरुत्पत्तिश्रुत्याचानादित्वश्रुतिर्नेयेत्यनाद्यनंतब्रह्मसमन्वयासिद्धिरितिभावेनसु९
स्वसिद्धांतमाह॥तामिति॥ब्रह्मनजायतेकारणशून्यत्वान्नरविषाणवद्व्यतिरेकेणघटवच्चेत्यनुमानानुग्रहाद्धिपक्षेचाकारणककार्यवादप्रस
गाद्ब्रह्मानादित्वश्रुतयोबलीयस्यइतिकारणत्वलिंगबाधाज्जन्मश्रुतिःकार्याभेदेनव्याख्येयेत्यनाद्यनंतब्रह्मसमन्वयसिद्धिरितिसिद्धांतफलं॥नच

कारणस्यानिरूपणात्तथाहि किं सन्मात्रस्य ब्रह्मणः सन्मात्रमेव सामान्यं कारणं सद्विशेषो वा असद्वा न त्रेधापीत्याह ॥ सन्मात्रं हीत्यादिना ॥ दीप
स्तु दीपान्तरे निमित्तमित्यनुदाहरणं वियत्पवनयोर्ब्रह्मणश्च विभक्तत्वाविभक्तत्वाभ्यां कारणभावाभावाभ्यां च वैषम्यं कारणत्वलिंगस्याप्रामाणिकान
वस्थानतर्केणापि बाधमाह ॥ न च विकारेभ्य इत्यादिना ॥ कारणस्यानभ्युपगमे यदृच्छावादप्रसंगः ॥ अनादिकारणानभ्युपगमेऽनवस्थाप्रसंगः ॥
तदभ्युपगमे ब्रह्मवादप्रसंगः ॥ कारणान्तरस्य प्रधानादेर्निरासादिति भावः ।९।३॥ तेजोऽतस्तथा ह्याह ॥ ननु तेजोऽसृजत तद्वायोरग्निरिति च श्रुत्योः ।

वियत्पवनयोः पुनरुत्पत्त्युपपत्तिः प्रदर्शिता ननु ब्रह्मणः सास्तीति वैषम्यं न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनात् ब्रह्म
णोऽपि विकारत्वं भवितुमर्हतीति मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसंगात् या मूलप्रकृतिरभ्युपगम्यते तदेव च नो ब्रह्मेत्यवि
रोधः ॥३॥९॥ तेजोऽतस्तथा ह्याह ॥१०॥ छांदोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके तु वायुमूलत्वं तत्र तेजो योनिं प्रति श्रुति
विप्रतिपत्तेः संशयः ॥ प्राप्तं तावद्ब्रह्मयोनिकं तेज इति कुतः ॥ सदेवेत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात् ॥ सर्वविज्ञानप्रतिज्ञा
याश्च ब्रह्मप्रभवत्वे सर्वस्य संभवात् ॥ तज्जलानिति चाविशेषश्रुतेः ॥ एतस्माज्जायते प्राण इति चोपक्रम्य श्रुत्यंतरे सर्व
स्याविशेषेण ब्रह्मजत्वोपदेशात् ॥ तैत्तिरीयके च स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेत्यविशेषश्रवणात् ॥ तस्माद्वा
योरग्निरिति क्रमोपदेशोऽद्भ्यो वा वायोरनन्तरमग्निः संभूत इति ॥९ विरोधोऽस्ति न वेति संदेहे सामान्यात्सामान्योत्पत्त्यसंभवे
पि ब्रह्मवाय्वोः सामान्ययोस्तेजोरूपविशेषोपादानत्वसंभवात्तुल्यबलतयाऽस्ति विरोध इति प्रत्युदाहरणेन पूर्वपक्षः सर्वत्राऽध्यायसमाप्तेरे
कवाक्यत्वासंभवसंभवौ संशयबीजं पूर्वपक्षे श्रुतीनां विरोधादप्रामाण्यं फलं सिद्धान्ते प्रामाण्यमित्युक्तं न विस्मर्त्तव्यमेवं पूर्वपक्षे कार्यमात्रस्य ।
विवर्तत्वात्कल्पितस्य वायोस्तेजःकल्पनाधिष्ठानत्वायोगात् ब्रह्मैव तेजस उपादानं ॥ सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थे श्रुतीनां भूयस्त्वाच्च
तदनुरोधाद्वायोरग्निरिति क्रमार्था पंचमीत्यविरोध इत्येकदेशिसिद्धान्तं प्रापयति ॥ प्राप्तं तावत् ब्रह्मयोनिकं तेज इत्यादिना ॥ श्रुतीनां विरोधमात्रोप

न्यासेन पूर्वपक्षः ॥

अपसिद्धान्तेनाविरोधात्तावदेकदेशिपक्षइतिज्ञेयं॥तदुभयमपिमुख्यसिद्धांतापेक्षयापूर्वपक्षत्वेनव्यवह्रियते॥सिद्धांतयति॥एवंप्राप्तइतिकदर्थिताबाधितार्थेतियावत्॥वायोस्तेजःप्रकृतित्वंपंचमीश्रुत्यानिर्धारितंनचकल्पितस्योपादानत्वासंभवः॥अधिष्ठानत्वासंभवेपिमृदादिवत्परिणामित्वसंभवात्समस्तुब्रह्मणः छांदोग्येसत्पूर्वत्वमात्रंश्रुतंतेनोपादानत्वंनचवहुस्यामितिकार्याभेदेक्षणलिंगादुपादानत्वसिद्धिः॥लिंगाच्छ्रुतेर्बलीयस्त्वेनश्रुत्यविरोधेनलिंगस्यनेयत्वान्नयनंचेत्थंवायोर्ब्रह्मानन्यत्वाद्वायुजस्यापितेजसोब्रह्मप्रकृतिकत्वमविरुद्धमितिसिद्धांतग्रंथाशयः॥

एवंप्राप्तेउच्यते॥तेजोऽतोमातरिश्वनोजायतइतिकस्मात् तथाह्याहवायोरग्निरिति॥अव्यवहितेहितेजसोब्रह्मजत्वेसत्यसतिवायुजत्वेवायोरग्निरितीयंश्रुतिःकदर्थितास्यात्॥ननुक्रमार्थैषाभविष्यतीत्युक्तंनेतिब्रूमः॥तस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिपुरस्तात्संभवत्युपादानस्यात्मनःपंचमीनिर्देशात् तस्यैवचसंभवतेरिहाधिकारात्परस्तादपिचतदधिकारेपृथिव्याओषधयइत्युपादानपंचमीदर्शनात्॥वायोरग्निरित्युपादानपंचम्येवेतिगम्यते॥अपिचवायोरूर्ध्वमग्निःसंभूतइतिकल्प्यउपपदार्थयोगः॥क्लृप्तस्तुकारकार्थयोगःवायोरग्निःसंभूतइतितस्मादेषाश्रुतिर्वायुयोनित्वंतेजसोगमयति॥नन्वितरापिश्रुतिर्ब्रह्मयोनित्वंतेजसोगमयतितत्तेजोसृजतेतिनतस्याःपारंपर्यजत्वेप्यविरोधात्॥यदापिह्याकाशंवायुंचसृष्ट्वावायुभावापन्नंब्रह्मतेजोसृजतेतिकल्प्यते तदापिब्रह्मजत्वंतेजसोनविरुध्यते॥यथातस्याःशृतं ((तस्यादधितस्याआमिक्षे त्यादि॥

इहाधिकारादिति॥वायोरग्निःसंभूतइतिवाक्येसंबंधादित्यर्थः॥तदधिकारेसंभूत्यधिकारे॥निरपेक्षकारकविभक्तेरुपपदसापेक्षविभक्त्यपेक्षयाप्रबलत्वाच्चनक्रमार्थापंचमीत्याह॥अपिचेति॥ऊर्ध्वमनंतरमितिवोपपदंविनापंचमीमात्रात्क्रमोनभातीतिकल्प्यउपपदार्थप्रयोगःप्रकृत्याख्यापादानकारकंतुनिरपेक्षपंचम्याभातिविशेषतोत्रप्रकरणादपादानार्थत्वंपंचम्याःक्लृप्तं।क्लृप्तेनचकल्प्यंसतिविरोधेवाध्यमितिस्थितिरित्यर्थः॥पारंपर्यजत्वमेवाह॥यदापीति॥तस्याधेनोःशृतंतप्तंक्षीरंसासाक्षात्कार्यंदध्यादिकंतुपारंपर्यजमित्यर्थः॥दधिसंसृष्टंकठिनक्षीरमामिक्षा॥

ब्रह्मणोवायुभावेमानमाह॥दर्शयतिचेति॥पारंपर्यजस्यापितज्जत्वव्यपदेशेस्मृतिमाह॥तथाचेति॥अंतःकरणादिभ्योजायमानबुद्ध्यादीनांमनस्त्वेन्यवधारणंकथमित्याशंक्याह॥यद्यपीत्यादिना॥प्रणाड्यापरंपरयाईश्वरवंश्यत्वात्तज्जत्वात्परमकारणांतरनिरासार्थमवधारणंयुक्तमितिशेषः॥एतत्पदार्थमाह॥तासामिति॥तज्जलानित्याद्युक्तश्रुतीनांसाक्षात्प्रणाड्यावाब्रह्मजत्वमात्रेणोपपत्तेरित्यर्थः॥अक्रमश्रुतीनांबलवत्क्रमश्रुत्यनुसारेणैकवाक्यत्वाद्वियद्वायुद्वारातेजःकारणेब्रह्मणिसमन्वयइतिसिद्धं॥१०आपः॥अतिदेशोयंतथाह्याथर्वणेमुंडकग्रंथेएतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीतिमंत्रेअपांब्रह्मजत्वंश्रुतंअग्ने

दर्शयतिचब्रह्मणोविकारात्मनावस्थानं॥तदात्मानंस्वयमकुरुतेति॥तथाचेश्वरस्मरणंभवतिबुद्धिर्ज्ञानमसंमोहइत्याद्यनुक्रम्यभवंतिभावाभूतानांमत्तएवपृथग्विधाइति॥यद्यपिबुद्ध्यादयःस्वकारणेभ्यःप्रत्यक्षंभवंतोदृश्यंतेतथापिसर्वस्यभावजातस्यसाक्षात्प्रणाड्यावेश्वरवंश्यत्वात्॥एतेनाक्रमवत्सृष्टिवादिन्यःश्रुतयोव्याख्यातास्तासांसर्वथोपपत्तेःक्रमवत्सृष्टिवादिनीनांत्वन्यथाऽनुपपत्तेः॥प्रतिज्ञापिसद्वंश्यत्वमात्रमपेक्षतेनाव्यवहितजन्यत्वमित्यविरोधः॥४॥आपः॥११॥अतस्तथाह्याहेत्यनुवर्त्ततेआपोऽतस्तेजसोजायंतेकस्मात्तथाह्याहतदपोऽसृजतेतिअग्नेरापइतिच सतिवचनेनास्तिसंशयः॥तेजसस्तुसृष्टिंव्याख्यायपृथिव्याव्याख्यास्यन्नपोंतरीयामित्यापइतिसूत्रयांबभूव॥५॥११॥९

रापइतिश्रुत्यातस्यविरोधोस्तिनवेतिसंदेहेतुल्यत्वादस्तिविरोधइतिपूर्वपक्षेअपामग्निदाह्यत्वेनविरोधादग्निजत्वासंभवात्क्रमार्थोपंचमीत्यविरोधइत्यधिकाशंकायामुक्ततेजोन्यायमतिदिश्यव्याचष्टे॥अतइति॥प्रत्यक्षविरोधेकथमपामग्निजत्वनिर्णयस्तत्राह॥सतिवचनइति॥त्रिवृत्कृतयोरप्तेजसोर्विरोधेप्यग्नेरापइतिवचनादतींद्रिययोस्तयोर्नास्तिविरोधइतिनिर्णीयतइत्यर्थः॥नकेवलंश्रुत्याविरोधज्ञानायायमतिदेशःकिंतुपंचभूतोत्पत्तिक्रमनिर्णयार्थंचेत्याह॥तेजसस्त्विति॥तस्मात्तेजोभावापन्नेब्रह्मणिश्रुतिसमन्वयइतिसिद्धं॥११

शा.भा. पृथिव्यधिकाररूपशब्दान्तरेभ्यः विषयमुक्त्वाऽन्नशब्दमहाभूतप्रकरणाभ्यां संशयमाह ॥ ता इति ॥ अभ्यवहार्यं भक्ष्यं अन्नमस्तुतीय यद्वान्नमो अ.पा.
दी. दनादिकं तदाश्रयः पृथिवीति श्रुत्याविरोधो यदि पृथिवी तदा न विरोध इति फलं बोध्यं अप्पृथिव्योः कार्यकारणभावादधिकरणसंगतिः अन्नश्रु २।३
र.प्र. तिसृष्टिभवनत्वलिंगाभ्यां पूर्वपक्षः तदेव तत्रैवेति श्रुत्यर्थः ॥ तथा क्वचिदन्नं क्वचिदद्भ्यः पृथिवी ततोऽन्नमिति विरोधान्नैकवाक्यतेति प्राप्ते सिद्धांत
२५१

पृथिव्यधिकाररूपशब्दांतरेभ्यः ॥१२॥ ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंतेति श्रूयते तेन तत्र संशयः
॥ किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वौदनाद्युच्यते किंवा पृथिवीति ॥ तत्र प्राप्तं तावत् व्रीहियवाद्योदनादि वा परि
गृहीतव्यमिति ॥ तत्र ह्यन्नशब्दः प्रसिद्धो लोके ॥ वाक्यशेषोप्येतमर्थमुपोद्बलयति तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं
भवतीति ॥ व्रीहियवाद्येव हि सति वर्षणे बहु भवति न पृथिवीति ॥ एवं प्राप्ते ब्रूमः ॥ पृथिव्येवेयमन्नशब्देनाऽद्भ्यो जायमा
ना विवक्ष्यत इति कस्मात् ॥ अधिकाराद्रूपाच्छब्दांतराच्च ॥ अधिकारस्तावत् तत्तेजोसृजत तदपोसृजतेति महाभूत
विषयो वर्त्तते । तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलंघ्य नाकस्मात् व्रीह्यादिपरिग्रहो न्याय्यः तथा रूपमपि वाक्य
शेषे पृथिव्यनुगुणं दृश्यते ॥ यत्कृष्णं तदन्नस्येति ॥ न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोस्ति नापि व्रीह्यादीनां ॥
ननु पृथिव्या अपि नैव कृष्णत्वनियमोस्ति पयःपांडुरस्यांगाररोहितस्य क्षेत्रस्य दर्शनात् ॥ नायं दोषो बाहुल्यापेक्ष राम
त्वात् ॥ भूयिष्ठं हि पृथिव्याः कृष्णं रूपं न तथा श्वेतरोहिते ॥ पौराणिका अपि पृथिवीच्छायां शार्वरीमुपदिशंति ॥ सा च २५१
कृष्णाभासेत्यतः कृष्णं रूपं पृथिव्या इति श्लिष्यते ॥ श्रुत्यंतरमपि समानाधिकारमद्भ्यः पृथिवीति भवति ॥ छ ॥

यति ॥ एवं प्राप्त इति ॥ अधिकारः प्रकरणं रूपं लिंगं पयः क्षीरं तद्वत्पांडुरं श्वेतं अंगारवद्रोहितं रक्तं ॥ शब्दान्तरशब्दितं स्थानं व्याचष्टे
॥ श्रुत्यंतरमपीति ॥ अवानंतर्ये पृथिव्याः स्थानं श्रुत्यंतरसिद्धं तेनाप्यन्नस्य पृथिवीत्वमित्यर्थः ॥ छ ॥ ॥ छ ॥

तत्तत्र सृष्टिकाले यदपां शरः यो मंडवद्घनीभाव आसीत्स एव समहन्यत कठिनसंघातो भूत्वा अपां कठिनपरिणतिः पृथिव्यभवदिति श्रुत्यर्थः ॥ व्रीह्याद्यन्नसर्गः कस्मिन्नु स्थान इति विवक्षायामाह ॥ पंचमीयं ॥ वृष्टिभवत्वलिंगसहितात्तच्छ्रुतेः कथं प्रकरणलिंगस्यान्नैर्बाध इत्याशंक्याह ॥ वाक्यशेषोपीति ॥ प्रबलदुर्बलप्रमाणसन्निपाते बहूनां दुर्बलानामत्यंतबाधाद्वरं प्रबलप्रमाणस्याल्पबाधेन कथंचिन्नयनमिति न्यायेन श्रुतिलिंगयोरन्नमात्रनिष्ठत्वं बाधित्वाऽन्त्याऽनन्नात्मकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्नमात्रगृहे प्रकरणादीनां पृथिवीमात्रविषयाणामत्यंतबाधापत्तेरिति भावः अन्यस्य वृष्टिजत्वे किंद्वारा पृथिव्या अप्जन्यत्वं सूच्यते पृथिव्य ज्ञा पृथिवी

तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवदिति च ॥ पृथिव्यास्तु व्रीह्याद्युत्पत्तिं दर्शयति पृथिव्या ओषधयः ओषधीभ्योन्नमिति च ॥ एवमधिकारादिषु पृथिव्याः प्रतिपादकेषु सत्सु कुतो व्रीह्यादिप्रतिपत्तिः ॥ प्रसिद्धिरप्यधिकारादिभिरेव बाध्यते ॥ वाक्यशेषोपि पार्थिवत्वादन्नाद्यस्य तद्द्वारेण पृथिव्या एवाद्भ्यः प्रभवत्वं सूचयतीति द्रष्टव्यं ॥ तस्मात्पृथिवीयमन्नशब्देति ॥ १२ ॥ ६ ॥ तदभिध्यानादेव तु तल्लिंगात्सः ॥ १३ ॥ किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान्सृजंत्याहोस्वित्परमेश्वर एव तेन तेनात्मनावतिष्ठमानोभिध्यायंस्तं तं विकारं सृजतीति संदेहे । सति प्राप्तं तावत्स्वयमेव सृजंतीति कुतः ॥ आकाशाद्वायुर्वायोरग्निरित्यादिस्वातंत्र्यश्रवणादिति ॥ ननु चेतनानां स्वतंत्राणां प्रवृत्तिः प्रतिषिद्धा ॥

त्वादस्मवदित्यनुमानादित्यपरार्थः एवं तित्तिरिश्रुत्यनुसारेण छांदोग्यश्रुतेर्नेयतादविरुद्धो भूतसृष्टिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं ॥ १२ ॥ संप्रति तानि भूतान्याश्रित्याश्रयाश्रयिभावसंगत्या तेषां स्वातंत्र्यमाशंक्य निषेधति ॥ तदभिध्यानादेव तु तल्लिंगात्सः उक्तभूतान्याश्रित्य संशयपूर्वपक्षौ दर्शयति ॥ किमिमानीत्यादिना ॥ संशयबीजाऽनुक्तौ पूर्वोत्तरपक्षयुक्तयो बीजमिति ज्ञेयं ॥ नन्वत्र भूतानां किं स्वातंत्र्येणोपादानत्वमाशंक्यते कर्तृत्वं वा नाद्यः रचनानुपपत्तेरित्यादिन्यायविरोधादिति शंकते ॥ नन्विति ॥ न द्वितीयः ॥

॥ अचेतनत्वादितिभावः ॥

शा॰भा॰
टी॰
र॰प्र॰
२५२

॥५॥

यथा मनुष्यादिशब्दैस्तत्तद्देहाभिमानिनो जीवा उच्यन्ते॥ तथाऽऽकाशाद्वायुरित्यादिश्रुतौ आकाशादिशब्दैस्तत्तद्भूताभिमानिदेवता उच्यन्ते॥ तासां स्वकार्ये वाय्वादौ कर्तृत्वसंभवान्निरपेक्षनिमित्तत्वं पञ्चम्यर्थः॥ एवं तदात्मानं स्वयमकुरुतेति श्रुतौ स्वयमिति विशेषणात् ब्रह्मणोऽन्यानपेक्षस्य सर्वकर्तृत्वसंभवान्निरपेक्षनिमित्तत्वं श्रुतं तथा च मिथो निरपेक्षेश्वरभूतकर्तृश्रुत्योर्विरोधात् ब्रह्मणि समन्वय इति सफलं पूर्वपक्षमाह॥ नैष दोष इति॥ भूतानां तदभिमानिदेवतानामित्यर्थः॥ यथा आकाशादिभावापन्नब्रह्मणः सर्वोपादानत्वं तथा तदभिमानिदेवताजीवभावमापन्नब्रह्मणः कर्तृत्वमिति परंपरया ईश्वरकर्तृत्वश्रुत्यविरोधः स्वयमिति विशेषणं ईश्वरान्तरनिरासार्थं न जीवभावापेक्षानिरासार्थमित्येकदेशिसि

नैष दोषः॥ तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादिति॥ एवं प्राप्तेऽभिधीयते॥ स एव परमेश्वरस्तेन तेनात्मनाऽवतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति कुतः तल्लिंगात्॥ तथा हि शास्त्रं॥ यः पृथिव्यां तिष्ठन्यः पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति तथा सोऽकामयत बहु स्यां प्रजायेयेति प्रस्तुत्य सच्च त्यच्चाभवत्॥ तदात्मानं स्वयमकुरुतेति च तस्यैव च सर्वात्मभावं दर्शयति॥ यत्त्वीक्षणश्रवणमप्तेजसोस्तत्परमेश्वरावेशवशादेव द्रष्टव्यं॥ ५॥ सिद्धान्तैकदेशीयः मुख्यसिद्धान्तमाह

॥ एवं प्राप्त इति॥ आकाशादिशब्दैर्देवतालक्षणा मुख्यार्थबाधकाभावान्न च मृत्स्वप्रकृतिलार्थासत्तत्र श्रुतं तदनन्तरत्वात् तथा चाचेतनानां भूतानां कर्तृत्वमेव नास्ति कुत ईश्वरानपेक्षकर्तृत्वं यद्यपि देवतानां कर्तृत्वं संभवति तथापीश्वरनियम्यत्वश्रवणाच्चेतनानामपि न स्वातंत्र्यं किमु वाच्यमचेतनानां भूतानां न स्वातंत्र्यमिति मत्वोक्तं तल्लिंगादिति॥ तत्तदचेतनात्मभावस्थितस्य ब्रह्मण उपादानत्वेपि जीवव्यावृत्तेश्वरत्वाकारेणैव साक्षात्सर्वकर्तृत्वं न जीवत्वद्वारा तस्य सर्वनियंतृत्वलिंगादित्यर्थः॥ प्रकरणाच्च साक्षात्सर्वकर्तृत्वमित्याह॥ तथेति॥ पूर्वोक्तमनूद्य निरस्यति॥ यत्त्विति॥ परमेश्वरस्यान्तर्यामिभावेनावेशः संबंधस्तद्वशाद्भूतेषु वीक्षणश्रवणं नैतावता तेषां चेतनत्वं स्वातंत्र्यं चेत्यर्थः॥ अनेन तदभिध्यानादि॥ रूढतरनारित्यपि पायोग्र्यानरेषु दृश्यते॥ ५॥

तिपदं व्याख्यातं इत्यस्य सूत्रयोजना स ईश्वरस्तु तदात्मना स्थितौ

अ॰
पा॰
२५२

साक्षादेवसर्वकर्त्तानस्यांतर्यामित्वलिंगाज्जीवत्वद्वाराकर्तृत्वंनामजीवस्यैवकर्तृत्वमित्यंतर्यामिणःकर्तृत्वासिद्धेरंतर्यामित्वायोगात् तदभिध्यानादीश्वरेक्षणादेवभूतेषुश्रुतेक्षणोपपत्तेश्चेति ॥ तत्तेजऐक्षतेतिश्रुतईक्षितापरमात्मैवेत्यत्रश्रुत्यंतरंप्रकरणंचाह ॥ तान्यइति ॥ तस्मादीश्वरपदार्थलोपप्रसंगेनेश्वरादन्यस्यस्वातंत्र्याभावान्नेश्वरकर्तृत्वश्रुतेर्भूतश्रुत्याविरोधइतिसिद्धं ॥१३॥ विपर्ययेणतु ॥ यद्यप्यत्रश्रुतिविरोधोनपरिह्रियतइत्यसंगतिस्तथाप्युत्पत्तिक्रमेनिरूपितेलयक्रमोबुद्धिस्थोविचार्यतइतिप्रासंगिकावेवपादावांतरसंगतीइतिमत्वाह ॥ भूतानामिति ॥ अत्रोत्पत्तिक्रमात् विपरीतक्रमनिर्णयात्सिद्धांतेभूतानांप्रातिलोम्येनलयध्यानपूर्वकंप्रत्यग्ब्रह्मणिमनःसमाधानंफलंपूर्वपक्षेतुकारणनाशेसतिकार्यनाशइतिसर्वलयाधारब्रह्मासिद्धेरुक्तसमाध्यसिद्धिरितिभेदः सतिमहाभूतानांलयेक्रमश्चिंतासएवनास्तीतिकेचित्तान्प्रत्याह ॥ त्रयोपीति ॥ अनियमइत्यनास्थयोक्तंश्रौतस्यप्रलयस्यक्रमाकांक्षायांश्रौतउत्पत्तिक्रमएवग्राह्यःश्रौतत्वेनांतरंगत्वादित्येवंपूर्वपक्षःसतिकारणेकार्यंनश्यतीतिलोकेदृश्यतेनतथाचश्रौतोप्युत्पत्तिक्रमोलयेनगृह्यते ॥ किंतुलौकिकक्रमएवगृह्यतेश्रुतेर्लोकदृष्टपदार्थबोधाधीनत्वेनश्रौतादपिलौकिकस्यांतरंगत्वाद्योग्यत्वाच्चकारणमेवहिकार्यस्यस्वरूपमितितदनन्यत्वन्यायेन।स्थापितंनहिस्वरूपनाशेकार्यस्यक्षणमपिस्थितिर्युक्तातस्मादयोग्यउत्पत्तिक्रमोलयस्यनग्राह्यःलौकिकक्रमावरोधेननिराकांक्षत्वादितिसिद्धं

नान्योतोस्तिद्रष्टेतीक्षित्रंतरप्रतिषेधात् प्रकृतत्वाच्चसतईक्षितुः तदैक्षतबहुस्यांप्रजायेयेत्यत्र ॥७॥ विपर्ययेणतुक्रमोऽतउपपद्यतेच ॥१४॥ भूतानामुत्पत्तिक्रमश्चिंतितोथेदानीमप्ययक्रमश्चिंत्यतेकिमनियतेनक्रमेणाप्ययउ॰तोत्पत्तिक्रमेणाथवातद्विपरीतेनेति ॥ त्रयोपिचोत्पत्तिस्थितिप्रलयाभूतानांब्रह्मायत्ताःश्रूयंतेयतोवाइमानिभूतानिजायंते ॥ येनजातानिजीवंति ॥ यत्प्रयंत्यभिसंविशंतीति तत्रानियमोऽविशेषादितिप्राप्ते ॥ अथवोत्पत्तेःक्रमस्यश्रुतत्वात्प्रलयस्यापिक्रमाकांक्षिणःसएवक्रमःस्यादितिएवंप्राप्ते ॥ ततोब्रूमोविपर्ययेणतुप्रलयक्रमोऽतउत्पत्तिक्रमाद्भ (वितुमर्हतितथाहि

लोकेदृश्यते ॥

नयति ॥ ततोब्रूमइत्यादिना ॥

शा.भा.
टी.
र.प्र.
२५३

क्रमेणपरंपरयासर्वकार्यलयाधारत्वंब्रह्मणः किमित्याश्रीयतेसाक्षादेवतत्किंनस्यादित्यतआह॥ नहिस्वकारणव्यतिक्रमेणेति॥ घटनाशेमृदनु
पलब्धिप्रसंगादित्यर्थः॥ वायुस्त्वलीयतेव्योम्नितच्चाव्यक्तेप्रलीयतइतिस्मृतिशेषः आदिपदार्थः॥ योग्यताधीन। संबंधइतिन्यायाद्योग्य क्रमबाध

येनक्रमेणसोपानमारूढस्ततोविपरीतेनक्रमेणावरोहतीति॥ अपिचदृश्यतेमृदोजातंघटशरावाद्यप्ययकालेमृद्भावमप्ये
त्यद्भ्यश्चजातंहिमकरकमप्सुभावमप्येतीति॥ अतश्चोपपद्यतएतत्॥ यत्पृथिव्यद्भ्योजातासतीस्थितिकालव्यतिक्रांतावपोऽ
पीयादपश्चतेजसोजाताःसत्यस्तेजोऽपीयुः॥ एवंक्रमेणसूक्ष्मंसूक्ष्मतरंचानंतरमनंतरंकारणमपीत्यसर्वंकार्यजातंपरम
कारणंपरमसूक्ष्मंचब्रह्माप्येतीतिवेदितव्यं॥ नहिस्वकारणव्यतिक्रमेणकारणकारणेकार्याप्ययोन्याय्यः॥ स्मृतावप्यु
त्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्रतत्रदर्शितः॥ जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सुप्रलीयते॥ ज्योतिष्यापःप्रलीयंतेज्यो
तिर्वायौप्रलीयतइत्येवमादौ॥ उत्पत्तिक्रमस्तूत्पत्तावेवश्रुतत्वात् नाप्ययेभवितुमर्हति॥ नचासावयोग्यत्वादप्ययेनाकां
क्ष्यते॥ नहिकार्येध्रियमाणेकारणस्याप्ययोयुक्तः कारणाप्ययेकार्यस्यावस्थानानुपपत्तेः॥ कार्याप्ययेतुकारणस्यावस्थानंयु
क्तंमृदादिष्वेवंदृष्टत्वात्॥१४॥८॥ अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाऽविशेषात्॥१५॥ भूतानामुत्पत्तिप्रलयावनु
लोमप्रतिलोमक्रमाभ्यांभवतइत्युक्तमात्मादिरुत्पत्तिःप्रलयश्चात्मांतइत्यप्युक्तं॥ सेंद्रियस्यतुमनसोबुद्धेश्चसद्भावःप्रसि
द्धःश्रुतिस्मृत्योःबुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच॥ इंद्रियाणिहयानाहुरित्यादिलिंगेभ्यः तयोरपिकस्मिंश्चिदंतरालेक्रमे
णोत्पत्तिप्रलयावुपसंग्राह्यौसर्वस्यवस्तुजातस्यब्रह्मजत्वाभ्युपगमात्॥ ९ इतिसिद्धं॥१५॥८॥ अंतराविशेषात्॥ उक्तभूतोत्पत्तिलय

क्रममुपजीव्यसकिंकरणोत्पत्तिक्रमेणविरुध्यतेनवेतिकरणानामभौतिकत्वभौतिकत्वाभ्यांसंदेहेवृत्तानुवादपूर्वकंपूर्वपक्षमाह॥ भूतानामि
त्यादिना॥ करणान्येवनसंतीतिवदंतंप्रत्याह॥ सेंद्रियस्येति॥ मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः श्रोत्रादीनींद्रियाण्यन्यइतिस्मृतिर्द्रष्टव्या॥ अस्य
पराः शब्दाःलिंगानीत्युच्यंते करणानांक्रमाकांक्षामाह तयोरिति॥

अ२
पा३

आकांक्षायां श्रुतिसिद्धः क्रमो ग्राह्य इत्याह ॥ अपि चेति विज्ञायते तेनेति विज्ञानं सेंद्रिया बुद्धिः ॥ आत्मनो भूतानां चान्तरा मध्ये तल्लिंगात्सृष्टिवाक्यादेतस्माज्जायते प्राणो मन इत्यादिरूपाद्विज्ञानमनसी अनुक्रम्येते तयोश्च करणक्रमेण पूर्वोक्तक्रमभंग इति शंकासूत्रांशार्थः तच्च करणानां भौतिकत्वाद्भूतानन्तर्यमिति वाच्यं ॥ तेषां भौतिकत्वे मानाभावात्तथा चात्मनः प्रथममाकाशस्य जन्म पश्चाद्वाय्वोरित्युक्तक्रमस्यात्मनः करणानि ततो भूतानीति क्रमेणाविरोध इति निन्तिर्यथर्वणश्रुत्योर्विरोधात्तत्र ब्रह्मणि समन्वय इति पूर्वपक्षफलं ॥ सिद्धांतयति ॥ नेति ॥ आत्मन आकाश इत्यादिनिर्दिष्टश्रुतौ पंचम्याः कार्यकारणभावेनार्थतः क्रमो भातीति न तस्याथर्वणपाठेन बाधः अर्थक्रमविरोधि

अपि चाथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चांतराले करणान्यनुक्रम्यंते ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ तस्मात्पूर्वोक्तोत्पत्तिप्रलयक्रमभंगप्रसंगो भूतानामिति चेत् ॥ न अविशेषात् ॥ यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्रमांतरं मृग्यं ॥ भवति च भौतिकत्वे लिंगं करणानामन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्येवं ((जातीयकं ॥

क्रमविशेषस्याश्रुतेः पाठक्रमस्यार्थक्रमधीशेषस्य शेषिबाधकत्वायोगादतः श्रुत्यार्थक्रमाऽविरोधेन पाठस्य नेयत्वाद्भूतानंतर्यं करणानामित्यर्थः किंच भौतिकत्वात्तेषां तदानंतर्यमित्याह ॥ यदीति ॥ न च प्राणस्याविकारत्वायोगादन्नमयमित्यादिमयटो न विकारार्थतेति वाच्यं करणानां विभक्तत्वेन कार्यतया कारणाकांक्षायामन्नमयमित्यादिश्रुतेराकांक्षितानंतर्यमसति बाधके मयटो विकारार्थतायाश्च युक्तत्वात्प्राचुर्यार्थत्वे त्वनाकांक्षितोक्तिप्रसंगाच्छ्रुत्यैव तेजोवन्नप्राशने वाक्प्राणमनसां वृद्धिस्तदभावेन नाश इति विकारत्वस्य दर्शितत्वान्न विवादावसरः यद्वा स्थूलभूताधीनात्तेषां वृद्धिर्विकारो मयडर्थः श्रूयमाणो भौतिकत्वे लिंगं प्राणेन्द्रियमनांसि भौतिकानि भूताधीनवृद्धिमत्त्वाद्देहवदिति भावः ॥ ७७७ ॥ ७७७ ॥

ननु तेषां भौतिकत्वे कथमाथर्वणे पृथक् तज्जन्मकथनं भूतजन्मोक्त्यैव तज्जन्मसिद्धेरित्यत आह व्यपदेशोपीति प्रौढवादेन तेषामभौतिकत्वमुपेत्यापि श्रुत्यविरोधमाह ॥ अथेति ॥ करणानां भूतानां च पूर्वापरत्वमानाभावान्नोक्तभूतक्रमभंगः ॥ न चाथर्वणवाक्यं मानं पाठमात्रत्वादित्यर्थः तर्हि कथं क्रमनिर्णय इत्यत आह ॥ तथेति ॥ इदं स्थूलं उत्पत्तेः प्राक् प्रजापतिः सूत्रात्मासीत् ॥ अत्र सूक्ष्मभूतात्मकप्रजापतिसर्गः प्रथमः ॥ ततो मन आदिसर्ग इति क्रमो भातीति भावः एवं च भूतकरणोत्पत्तिश्रुत्योरविरोधात् ब्रह्मणि समन्वयसिद्धिरिति सिद्धान्तफलं निगमयति ॥ तस्मादिति ॥ १५ ॥ चराचरभावित्वात् ॥ एवं तावत्तत्पदवाच्यकारणनिर्णयाय भूतश्रुतीनां विरोधो निरस्त इदानीमापादसमाप्तेस्त्वंपदार्थशुध्यै

व्यपदेशोपि क्वचिद्भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः ॥ अथ त्वभौतिकानि करणानि तथापि भूतोत्पत्तिक्रमो न करणैर्विशिष्यते ॥ प्रथमं करणान्युत्पद्यंते चरमं भूतानि प्रथमं वा भूतानि उत्पद्यंते चरमं वा करणानीति आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च न तत्रोत्पत्तिक्रम उच्यते ॥ तथान्यत्रापि पृथगेव भूतक्रमात्करणक्रम आम्नायते प्रजापतिर्वा इदमग्र आसीत्स आत्मानमैक्षत स मनोसृजत तन्मन एवासीत्तदात्मानमैक्षत तद्वाचमसृजतेत्यादिना ॥ तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भंगः ॥ ९ ॥ चराचर व्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥ स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रांतिस्तामपनुदामः ॥ न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसंबंधोपपत्तेः ॥

जीवश्रुतीनां विरोधो निरस्यते इह जीवो न जायते इत्यादिश्रुतेः जातेष्टिश्राद्धशास्त्रेण विरोधोऽस्ति न वेति संदेहे विरोधोस्तीति प्राप्ते लौकिकजन्मादिव्यपदेशसहायाज्जातेष्ट्यादिशास्त्रेण जीवाजत्वादिश्रुतिर्बाध्यत इति पूर्वपक्षयति ॥ स्त इति ॥ तथा च करणोत्पत्तिक्रमेण भूतक्रमस्य बाधाभावेपि जीवोत्पत्तिक्रमेण बाधः स्यादिति प्रत्युदाहरणसंगतिः पूर्वपक्षे जीवब्रह्मैक्यासिद्धिः ॥ सिद्धान्ते तत्सिद्धिरिति भेदः चेतनजन्माद्युद्देशेन चेतनस्य तस्य जन्मान्तरीयफलसाधनं जातकर्मादिसंस्कारो विधीयते तथा चोद्देश्यविधेययोर्मिथो विरोधे सति विधेयाविरोधेनोद्देश्यं नेयमिति न्यायाज्जन्मादिकं देहोपाधिकं न स्वत इति सिद्धान्तयति ॥ नात्मेत्यादिना ॥

जीवापेतं जीवेन त्यक्तं इदं शरीरं ॥ जन्मादिव्यपदेशश्चराचरदेहविषयो मुख्यः जीवे तु भाक्तो गौणः ॥ औपाधिकजन्मादिविषयः स्यादुपाधिजन्मभावे भावादसत्यभावादिति सूत्रार्थः जीवस्यौपाधिकजन्ममृत्यौः श्रुतिमप्याह ॥ स वा इति ॥ जायमानपदार्थमाह ॥ शरीरमिति म्रियमाण

शरीरानुविनाशिनि हि जीवे शरीरांतर्गतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां ॥ श्रूयते च जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति ॥ ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः ॥ सत्यं दर्शितो भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः ॥ किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इति ॥ उच्यते चराचरव्यपाश्रयः स्थावरजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावरजंगमानि हि भूतानि जायंते च म्रियंते चाऽतस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ संतौ तत्स्थे जीवात्मन्युपचर्येते ॥ तद्भावभावित्वात् ॥ शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः ॥ न हि शरीरसंबंधादन्यत्र जीवो जातो मृतो वा केनचिल्लक्ष्यते ॥ स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन्म्रियमाण इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति ॥ जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यं अभावात् जीवप्रादुर्भावस्य जीवस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण ॥ वक्ष्यति ॥ देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्त इत्येतदनेन सूत्रेणावोचत् ॥१६॥१०॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥१७॥ अस्त्यात्मा जीवाख्यः शरीरेंद्रियपंजराध्यक्षः कर्मफलसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहो ९ स्विद्ब्रह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिपत्तेर्विषयः ॥ ९ तं व्याचष्टे उत्क्रामन्निति ॥ ननूत्तरत्र जीवस्य जन्मादि निरस्यते अत्रा-

पि तन्निरासे पुनरुक्तिरित्याशंक्याह ॥ जीवस्येति ॥ तदेवं जातेष्ट्यादिशास्त्रस्यौपाधिकजन्मादिविषयत्वान्न जीवाद्यनंतत्वश्रुतिविरोध इति सिद्धं ॥१६॥२०॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ अग्नेर्विस्फुलिंगवदेतस्मात्परमात्मनः सर्वे जीवात्मानो व्युच्चरंतीत्यादिर्जीवोत्पत्तिश्रुतीनां ॥ ९ ॥

सएषइहप्रविष्टआनखाग्रेभ्यः अजआत्मेत्याद्यनुत्पत्तिश्रुतीनांचमिथोविरोधात्संशयेमाभूतांदेहजन्मनाशयोर्जीवजन्मनाशौदेहांत आ
गमस्वर्गादिहेतुविध्याद्यसंभवात्कल्पादौतयोर्नप्रसद्रुवजीवस्यतौ किंनस्यातांनतत्संभवादितिप्रसुदाहरणेनपूर्वपक्षमाह॥नत्रमात्मेनावदिति॥फ
लंपूर्ववत् उपरोधोबाधः॥नन्वविकृतब्रह्मैवात्रप्रविष्टंजीवोनतत्त्वांतरमितिप्रतिज्ञासिद्धिस्तत्राह॥नचेति॥जीवःपरस्माद्भिन्नःविरुद्धधर्मवत्वा

कासुचिद्धिश्रुतिष्वग्निविस्फुलिंगादिनिदर्शनेजीवात्मनःपरस्माद्ब्रह्मणउत्पत्तिराम्नायते॥कासुचित्त्वविकृतस्यैवपरस्य
ब्रह्मणःकार्यप्रवेशेनजीवभावोविज्ञायते॥नचोत्पत्तिराम्नायतइति॥तत्रभाव्यंतावत्उत्पद्यतेजीवइति॥कुतःप्रतिज्ञानु
परोधादेव॥एकस्मिन्विदितेसर्वमिदंविदितमितीयंप्रतिज्ञासर्वस्यवस्तुजातस्यब्रह्मप्रभवत्वेसतिनोपरुध्येत॥तत्त्वांतर
त्वेतुजीवस्यप्रतिज्ञेयमुपरुध्येत॥नचाविकृतःपरमात्मैवजीवइतिशक्यतेवक्तुं—लक्षणभेदात्॥अपहतपाप्मत्वादि
धर्मकोहिपरमात्मातद्विपरीतोहिजीवोविभागाच्चास्यविकारत्वसिद्धिर्यावान्ह्याकाशादिःप्रविभक्तःससर्वोविकारः॥त
स्यचाकाशादेरुत्पत्तिःसमधिगताजीवात्मापिपुण्यापुण्यकर्मासुखदुःखयुक्प्रतिशरीरंप्रविभक्तइति॥तस्यापिप्रपं।
चोत्पत्त्यवसरेउत्पत्तिर्भवितुमर्हति॥अपिचयथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाइतिप्राणा
देर्भोग्यजातस्यसृष्टिंसृष्ट्वासर्वएतआत्मानोव्युच्चरंतीतिभोक्तृणामात्मनांपृथक्सृष्टिंशास्तियथासुदीप्तात्पावकात्विस्फु
लिंगाःसहस्रशःप्रभवंतेसरूपास्तथाऽक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंतीतिचजीवात्मनामुत्पत्ति।
प्रलयावुच्येते॥सरूपवचनाज्जीवात्मानोहिपरमात्मनासरूपाभवंतिचैतन्ययोगात्॥नचक्वचिदश्रवणमन्यत्रश्रुतं

नभिन्नस्याविकारत्वेप्रतिज्ञाबाधइतितर्कोपेतविभक्तत्वलिंगानुगृहीतोत्पत्तिश्रुतेर्बलीयस्त्वात्प्रवेशश्रुतिर्जीवरूपविकारात्मनाप्रविष्टईश्व
रइतिव्याख्येयेतिसमुदायार्थः॥सरूपाइतिदृष्टांतश्रुतेर्भोवाजीवाइतिनिश्चीयते॥ननुआत्मनआकाशःसंभूतइत्यादौजीवस्योत्पत्त्यश्रव

वारपितुमर्हति॥

पादनुत्पत्तिस्तत्राह॥नचेति॥

एवंविकारत्वे सति विकारप्रपंचात्मना स्वात्मानमकुरुतेति बहिःकारजीवात्मना प्रवेश इत्यर्थः ॥ अजत्वादिश्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादिविषया न तत्त्वमसीति श्रुतिस्थमृहृद इत्यभेदवाक्यवद्व्याख्येयेति प्राप्ते सिद्धांतयति ॥ सर्वमिति ॥ धर्मित्वस्ततो विभागो हेतुरौपाधिको वा नाद्यः ॥ असिद्धेरित्याह अत्रोच्यते

श्रुत्यंतरगतस्यापि अविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात् ॥ प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या ॥ तदात्मानं स्वयमकुरुतेत्यादिवत् तस्मादुत्पद्यते जीव इति एवं प्राप्ते ब्रूमः ॥ नात्मा जीव उत्पद्यते कस्मात् ॥ अश्रुतेः ॥ न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु ॥ ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं सत्यमुक्तं ॥ उत्पत्तिरेव त्वस्य न संभवतीति वदामः कस्मान्नित्यत्वाच्च ताभ्यः ॥ चशब्दादजत्वादिभ्यश्च ॥ नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते ॥ तथाजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मता चेति ॥ न चैवंरूपस्योत्पत्तिरुपपद्यते ॥ ताः काः श्रुतयो ॥ न जीवो म्रियते ॥ स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म ॥ न जायते म्रियते वा विपश्चित् ॥ अजो नित्यः शाश्वतोऽयं पुराणः ॥ तत्सृष्ट्वा तदेवानुप्राविशत् ॥ अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ॥ स एष इह प्रविष्ट आनखाग्रेभ्यः ॥ तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्म सर्वानुभूरित्येवमाद्या नित्यत्ववादिनः श्रुतयो जीवस्योत्पत्तिं प्रतिबध्नंति ॥ ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तं ॥ अत्रोच्यते नास्य प्रविभागः स्वतोऽस्ति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेति श्रुतेः ॥ बुद्ध्याद्युपाधिनिमित्तं त्वस्य विभागप्रतिभानमाकाशस्येव घटादिसंबंधनिमित्तं ॥ तथा च शास्त्रं स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति ॥ तन्मयत्वं चास्य विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवत् द्रष्टव्यं ॥

नास्येति ॥ द्वितीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह ॥ बुद्ध्यादीति ॥ औपाधिकभेदे मानमाह ॥ तथा चेति ॥ मयटो विकारार्थत्वमाशंक्याह ॥ तन्मयत्वं चेति ॥ जाल्मः कामजडः स्त्रीपरतंत्रः स्त्रीमय इतिवज्जीवस्य स्वरूपाज्ञानाद्बुद्ध्यादिपरतंत्रत्वेन भेदकर्तृत्वादिभाक्त्वात्मात्रयोर्थे मयट्प्रयोग इत्यर्थः ॥

लिंगं निरस्यन् तदनुग्राह्यश्रुतेर्गतिमाह ॥ यदपीति ॥ जीवस्यौपाधिकजन्मनाशयोः श्रुतिमाह ॥ तथेति ॥ एतेभ्यो देहात्मना परिणतेभ्यो भूतेभ्यः सम्यगुत्थाय जनित्वा तान्येव लीयमानान्यनु पश्चादिति नश्यति प्रेत्यौपाधिकमरणानन्तरं संज्ञा नास्तीत्यर्थः ॥ ननु प्रज्ञानघनः संज्ञा नास्तीति च विरुद्धमित्यत आह ॥ तथेति ॥ उपाधिलयाद्विशेषज्ञानाभाव एव संज्ञाऽभावो नात्मस्वरूपविज्ञानाभाव इत्युत्तरं प्रतिपादयति श्रुतिरित्यन्वयः ॥ अत्रैवात्मनि विज्ञानघने प्रेत्य संज्ञा नास्तीत्युक्त्या मा मोहान्तं मोहमध्यं भ्रान्तिमापीपददापादितवानिति ममार्थं न जानामि ब्रूहि त्वदुक्तेरर्थमिति मैत्रेयीप्रश्नार्थः ॥ मुनिराह ॥ न वा इति ॥ मोहं मोहकरं वाक्यं ॥ उच्छित्तिः पूर्वावस्थानाशो धर्मोऽस्येत्युच्छित्तिधर्मा परिणामी स नेत्यनुच्छित्तिधर्मा अपरिणामी तस्माद्

> यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसंबंधान्नेतव्यं ॥ उपाध्युत्पत्त्यास्योत्पत्तिस्तत्प्रलयेन च प्रलय इति ॥ तथा च दर्शयति ॥ प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति ॥ तथोपाधिप्रलय एवायं नात्मविलय इत्येतदप्यत्रैव मा भगवान्मोहान्तमापीपदन्न वा अहमिमं विजानामि न प्रेत्य संज्ञास्तीति प्रश्नपूर्वकं प्रतिपादयति ॥ न वा अरेऽहं मोहं ब्रवीम्यविनाशी अरेयमात्मानुच्छित्तिधर्मा ॥ मात्राःसंसर्गस्त्वस्य भवतीति ॥ प्रतिज्ञानुपरोधोऽपि विकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात् ॥ लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव ॥ अत ऊर्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात् ॥ तस्मान्नैवात्मोऽन्यत्वेन प्रविलीयते चेति ॥ १७ ॥

> ज्ञोऽत एव ॥ १८ ॥

विनाशीत्यर्थः ॥ तर्हि न प्रेत्य संज्ञेति कथमुक्तं तत्राह ॥ मात्रेति ॥ विषयैरसंसर्गात्तथोक्तमित्यर्थः ॥ बिंबप्रतिबिंबयोरिवाविरुद्धधर्मभेदो भ्रम इत्यत्र हेतुमाह ॥ अत ऊर्ध्वमिति ॥ जीवस्याविकारित्वे मुक्त्ययोगात्तत्त्वमसीति वाक्यमखण्डार्थमिति च वक्तव्यं ॥ तथा च फलवत्प्रधानवाक्यापेक्षितजीवनित्यत्वश्रुतीनां बलवत्त्वादुत्पत्त्यादिकमध्यस्तमनुवदन्त्युत्पत्त्यादिश्रुतय इत्यविरोध इति सिद्धं ॥ १७ ॥ ज्ञोऽत एव ॥ आत्मैवास्य ज्योतिरित्याद्यात्मस्वप्रकाशत्वश्रुतीनां पश्यंश्चक्षुः शृण्वन् श्रोत्रमित्यनित्यज्ञानवत्त्वश्रुतिभिर्विरोधोऽत्र निरस्यते अस्य लोकस्य चक्षुर्द्रष्टा श्रोत्रं श्रोतेत्यर्थः ॥

मत्युक्तजीवानुत्पत्तिहेतुमादाय स्वप्रकाशत्वसाधनाद्धेतुसाध्यभावः संगतिः अनुत्पत्तौ हि स्वप्रकाशं ब्रह्मैवोपहितं जीव इति जीवस्य स्वप्रकाशतासिद्धमिति ॥ न चैवं गतार्थता अनुत्पन्नस्यापि जीवस्य स्वप्रकाशत्वे ज्ञानसाधनवैयर्थ्यमिति तर्कसहितानित्यज्ञानश्रुतिबलेन स्वप्रकाशत्वश्रुतेर्बोध्यतया ब्रह्मज्ञान्यत्वशंकापोतदैक्ययोग्यतायै स्वप्रकाशत्वस्यात्र साधनात् ॥ तथा च पूर्वपक्षे जीवस्य ब्रह्मैक्याऽयोग्यतासिद्धांतेन तद्योग्यतेत्यापादसमाप्तेः फलं अवगंतव्यं ॥ इष्टापत्तिं निराचष्टे ॥ नेष्टाइति ॥ साधनाधीनज्ञानत्वान्नस्वप्रकाशो जीवो व्यतिरेकेण घटवदित्या

सत्किं कणभुजानामिवागंतुकचैतन्यः स्वतोऽचेतनः आहोस्वित्सांख्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः संशयः ॥ किं तावत्प्राप्तं आगंतुकं आत्मनश्चैतन्यमात्ममनः संयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्तं ॥ नित्यचैतन्यत्वे हि सुप्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात् ॥ ते पृष्टाः संतो न किंचिद्वयमचेतयामहीति जल्पंति ॥ स्वस्थाश्च चेतयमाना दृश्यंते ॥ अतः कादाचित्कचैतन्यत्वादागंतुकचैतन्य आत्मेति ॥ एवं प्राप्तेऽभिधीयते ॥ ज्ञोनित्यचैतन्योयमात्मा ॥ अतएव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते ॥ परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वं आम्नातं ॥ विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म अनंतरोबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुतिषु ॥ तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते ॥ विज्ञानमयप्रक्रियायां च श्रुतयो भवंति ॥ असुप्तः सुप्तानभिचाकशीति अत्रायं पुरुषः स्वयंज्योतिर्भवतीति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्येवंरूपाः

ह ॥ अतः कादाचित्केति ॥ यथाश्रुते भाष्ये हेतोः साध्याविशेष इति मंतव्यं ॥ अतो जीवस्य स्वप्रकाशत्वश्रुतिर्बोध्येति प्राप्ते सिद्धांतयति ॥ एवमिति वेल्वर्थो निश्चयार्थः ॥ न केवलं स्वप्रकाशब्रह्माभेदाज्जीवस्य स्वप्रकाशता किंतु श्रुतितोपीत्याह ॥ विज्ञानमयेति ॥ योऽयं विज्ञानमय इति प्रकरणश्रुत्यर्थः ॥ असुप्तः स्वयंभासमान एवात्मा सुप्तान् लुप्तव्यापारान्वागादीनभिलक्ष्य चाकशीति स्वज्ञार्थोन्पश्यतीति यावत् अत्र स्वप्ने विज्ञातुर्द्दिसत्वस्य साक्षिणो विज्ञातेर्विनाशो नास्तीत्यर्थः ॥

श्री·भा· घ्राणादिजन्यगंधादिज्ञानानुसंधानसिद्धयेआत्मनोज्ञानरूपत्वंवाच्यमितिश्लोकांतरेणाह॥ अथेति॥ आत्मनोनित्यचिद्रूपत्वेपिस्वतोऽसंगत अ·पा·
टी· यागंधाद्यसंबंधात्संबंधघटनात्मकवृत्त्यर्थानिज्ञानसाधनानीति नतेषांवैयर्थ्यमित्याह नगंधेति॥ परिच्छेदोवृत्तिः गंधायतनगोचरां २३
र·म· तःकरणवृत्तयइत्यर्थः सुप्ताद्यवस्थास्वात्मसत्वेपिचैतन्याभावान्नात्माचिद्रूपइत्युक्तंदूषयति॥ यद्विति॥ तत्तदासुषुप्तोनपश्यतीति
२५७ यत्तत्पश्यन्नेवालुप्तज्ञानएवसन्नपश्यतीत्यत्रहेतुः॥ नहीति॥ नाशायोग्यत्वादित्यर्थः॥ किमितिनपश्यतीत्यतआह ‾ ॥ नन्विति॥ वृत्तेःसा
धनाधीनत्वोक्त्यास्वरूपज्ञानस्यासाधनाधीनत्वंहेतुरसिद्धइत्युक्तं॥ साधनवैयर्थ्यतर्कोपिनिरस्तः श्रृण्वन्नित्याद्यनित्यज्ञानश्रुतीनांवृत्तिविष

अथयोवेदेदंजिघ्राणीतिसआत्मेतिचसर्वैःकरणद्वारैरिदंवेदेदंवेदेतिविज्ञानेनानुसंधानात्तद्रूपत्वसिद्धिः॥ नित्यचैत
न्यस्वरूपत्वेघ्राणाद्यानर्थक्यमितिचेत्॥ नगंधादिविषयविशेषपरिच्छेदार्थत्वात्॥ तथाहिदर्शयति॥ गंधायघ्राणमित्यादि॥ य
त्तुसुप्तादयोनचेतयंतइति॥ तस्याश्रुत्यैवपरिहारोभिहितः सुषुप्तप्रकृत्ययद्वैतन्नपश्यति॥ पश्यन्वैतन्नपश्यति॥ नहिद्रष्टु
र्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वात्॥ ननुतद्द्वितीयमस्तिततोऽन्यद्विभक्तंयत्पश्येदित्यादिना॥ एतदुक्तंभवति॥ विषयाभा
वादियमचेतयमानतानचैतन्याभावादिति॥ यथावियदाश्रयस्यप्रकाशस्यप्रकाश्याभावादनभिव्यक्तिर्नस्वरूपाभावात्त
द्वत्॥ वैशेषिकादितर्कस्यश्रुतिविरोधेआभासोभवति॥ तस्मान्नित्यचैतन्यस्वरूपएवात्मेतिनिश्चिनुमः॥१२॥२८॥ उत्क्रांति
((गत्यागतीनां॥२९॥

यत्त्वंव्याख्यातंआत्माज्ञानंद्रव्यत्वात् इत्यादितर्कोश्रुत्यागमबाधितः फलवत्प्रधानवाक्यापेक्षितस्वप्रकाशत्वागम
स्यबलवत्त्वात्॥ किंचनिरवयवात्मनोमनःसंयोगायोगान्नानित्यज्ञानगुणतासमवायाभावाच्चनस्वसमवेतज्ञानवेद्यताकर्मकर्तृत्वविरोधाच्च॥
किंचज्ञानत्वस्यैकवृत्तित्वेलाघवादात्मैवज्ञानंवृत्तेश्चमनःपरिणामत्वश्रुत्याकामःसंकल्पइत्याद्ययाजडत्वान्नास्माकंज्ञानद्वैविध्यगौरवमित्य
नचवद्यमात्मनःस्वप्रकाशत्वमितिसिद्धं॥२८॥ स्वप्रकाशत्वादात्मस्वरूपादीषद्बहिष्ठपरमाणमेवाश्रित्यनाश्रयत्वेनांतर्बहिर्भावेनवासंगत्याविचारयति॥

क्रांतिगत्यागतीनां॥

विषयसंशयौ दर्शयति ॥ इदानीमिति ॥ नात्मा श्रुतेरित्यादिना गतार्थत्वमस्याशंक्यात्माणुत्वश्रुतीनां महत्त्वश्रुतीनां चाविरोधकथनार्थमस्याधिकरणस्यारंभ इत्याह ॥ नन्वित्यादिना न केवलं श्रुतेरुत्क्रांत्याद्यनुपपत्त्यात्मनोऽणुत्वं किंत्वेषोऽणुरात्मेति श्रुत्यापीत्याह ॥ स्वशब्देनेति ॥ पूर्वपक्षे जीवस्याणुत्वाद्ब्रह्मैक्यासिद्धिः सिद्धांते तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन् पूर्वपक्षमाह ॥ तत्प्राप्तमित्यादिना ॥ श्रुतेरणुरिति उत्तरसूत्रादाकृष्य सूत्रं पूरितं उत्क्रांतिःश्रु

इदानीं तु किंपरिमाणो जीव इति चिंत्यते ॥ किमणुपरिमाण उत मध्यमपरिमाण आहोस्वित् महत्परिमाण इति ॥ ननु चनात्मोत्पद्यते नित्यश्चैतन्यस्वभावश्चेत्युक्तं ॥ अतश्च पर एवात्मा जीव इत्यापतति ॥ परस्य चात्मनोनंतत्वमाम्नातं ॥ तत्र कुतो जीवस्य परिमाणचिंतावतार इति ॥ उच्यते सत्यमेतत् ॥ उत्क्रांतिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयंति ॥ स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते ॥ तस्य सर्वस्याऽनाकुलत्वोपपादनायायमारंभः ॥ तत्र प्राप्तं तावदुत्क्रांतिगत्यागतीनां श्रवणात्परिच्छिन्नोऽणुपरिमाणो जीव इति ॥ उत्क्रांतिस्तावत्स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामतीति ॥ गतिरपि ये वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति ॥ आगतिरपि तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति ॥ आसामुत्क्रांतिगत्यागतीनां श्रवणात्परिच्छिन्नस्तावत् जीव इति प्राप्नोति ॥ न हि विभोश्चलनमवकल्पत इति ॥ सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते ॥ १९ ॥ स्वात्मना चोत्तरयोः ॥ २० ॥ उत्क्रांतिकदाचिदचलतोपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्प्येत ॥ उत्तरे तु गत्यागती नाचलतः संभवतः ॥ स्वात्मना हि तयोः संबंधो भवति ॥ गमेः कर्तृस्थक्रियात्वात् ॥

यत इति शेषः ॥ स मुमूर्षुः जीवस्तैर्विद्यादिभिस्तस्माच्चंद्रलोकादिमं लोकं प्रति कर्म कर्त्तुमायातीत्यर्थः ॥ १९ ॥ उत्क्रांतिरात्मनो देहान्निर्गमो न भवति येनाणुत्वं स्यात्किंतु स्वामित्वनिवृत्तिरिति केचित्तदंगीकृत्याप्यणुत्वमावश्यकमित्याह ॥ स्वात्मनेति ॥ उत्क्रांतेरुत्तरयोर्गत्यागत्योः स्वात्मना कर्त्रा संबंधादणुत्वमिति सूत्रयोजना ॥ पाकादाश्रयस्य पक्तृत्ववद्गत्याश्रयस्यापि गंतृत्वोक्तिः किं न स्यादित्यत आह ॥ गमेरिति ॥ गमनस्य कर्तरि संयोगविभागरूपातिशयहेतुत्वात्कर्त्राश्रितत्वं लोकसिद्धमित्यर्थः ॥

शा॰भा॰
टी॰
र॰प्र॰
२५८

जीवोऽणुरमध्यमपरिमाणत्वे सति गतिमत्त्वात्परमाणुवदित्याह ॥ अमध्यमेति ॥ अंगीकारं त्यजति ॥ सत्योश्चेति न स्वाम्यनिवृत्तिमात्रं उत्क्रान्ति- अ॰पा॰
रित्यर्थः देहान्निर्गम एवोत्क्रान्तिरित्यत्र लिंगांतरमाह ॥ देहप्रदेशानामिति ॥ अपादानत्वं अवधित्वं अन्येभ्यो वा मुखादिभ्य एष आत्मा नि- २।३
ष्क्रामतीति शेषः किंच देहमध्येपि जीवस्य गमनागमनश्रुतेरणुत्वमित्याह ॥ स इति इंद्रियाणि गृह्णन् स्वापादौ हृदयं स जीवो गच्छति शुक्लं प्रकाशकं इं-

अमध्यमपरिमाणस्य च गत्यागती अणुत्व एव संभवतः ॥ सत्योश्च गत्यागत्योरुत्क्रान्तिरप्यपसृप्तिरेव देहादिति प्रतीय-
ते ॥ न ह्यनपसृप्तस्य देहाद्गत्यागती स्यातां ॥ देहप्रदेशानां चोत्क्रान्तावपादानत्ववचनात् चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरी-
रदेशेभ्य इति ॥ स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ॥ शुक्रमादाय पुनरेति स्थानमिति चांतरे-
पि शरीरे शारीरस्य गत्यागती भवतस्तस्मादप्यस्याणुत्वसिद्धिः ॥ २० ॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥ अथा-
पि स्यान्नाणुरयमात्मा कस्मादतच्छ्रुतेरणुत्वविपरीतपरिमाणत्वश्रवणादित्यर्थः ॥ स वा एष महानज आत्मा योयं विज्ञा-
नमयः प्राणेषु आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनंतं ब्रह्मेत्येवंजातीयका हि श्रुतिरात्मनोणुत्वे विप्रतिषिध्येते- राम
ति चेन्नैष दोषः ॥ कस्मादितराधिकारात् ॥ परस्य हि आत्मनः प्रक्रियायामेषा परिमाणांतरश्रुतिः ॥ परस्यैवात्मनः प्राधा- २५८
न्येन वेदांतेषु वेदितव्यत्वेन प्रकृतत्वात् ॥ विरजः पर आकाशादित्येवंविधानाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधि-
कारात् ॥ ननु योयं विज्ञानमयः प्राणेष्विति शारीर एव महत्त्वसंबंधित्वेन प्रतिनिर्दिश्यते ॥

द्रियग्राममादाय पुनर्जागरि-
तस्थानमागच्छतीत्यर्थः ॥ २० ॥ इतराधिकाराद्ब्रह्मप्रकरणात् ॥ ननु महत्त्वश्रुतेः कथं परप्रकरणस्थत्वमित्यत आह ॥ परस्येति ॥ या वेदांतश्रुतिः
सा परप्रकरणस्थेत्युत्सर्गात्तस्यास्तत्स्थत्वं ब्रह्मारभ्याधीनत्वाच्चेत्याह ॥ विरज इति ॥ निर्दोष इत्यर्थः ॥ विज्ञानमयश्रुत्या प्रकरणं बाध्यमिति शंक-

अणोर्जीवस्यब्रह्मणाभेदाभेदांगीकाराच्छास्त्रीयाःभेददृष्ट्यामहत्त्वोक्तिर्यथावामदेवस्याहंमनुरितिसर्वोन्मत्वोक्तिरित्यविरोधमाह॥शास्त्रेति॥८
॥२१॥स्वयमुत्क्रान्त्यादिश्रुत्याणुत्वमनुमितंतत्रश्रुतिमप्याह॥स्वशब्देति॥वालाग्रादुद्धृतःशततमोभागस्तस्मादप्युद्धृतःशततमोभागोजीवइति॥
उद्धृत्यमानमुन्मानमत्यंताल्पत्वमित्यर्थःवालःकेशःतोत्रप्रोतायःशलाकाग्रमाराग्रंतस्मादुद्धृतामात्रामानंयस्यसजीवस्तथा॥२२॥आत्मसंयु

शास्त्रदृष्ट्यात्वेषनिर्देशोवामदेववद्द्रष्टव्यःतस्मात्प्राज्ञविषयत्वात्परिमाणांतरश्रवणस्य नजीवस्याणुत्वंविरुध्यते॥२१॥
स्वशब्दोन्मानाभ्यांच॥२२॥इतश्चाणुरात्मा॥यतःसाक्षादेवास्याणुत्ववाचीशब्दःश्रूयते॥एषोणुरात्माचेतसावेदितव्योय
स्मिन्प्राणःपंचधासंविवेशेतिप्राणसंबंधाच्चजीवस्यैवायमणुरभिहितइतिगम्यते॥तथोन्मानमपिजीवस्याणिमानंगमय
ति॥वालाग्रशतभागस्यशतधाकल्पितस्यचभागोजीवःसविज्ञेयइति॥आराग्रमात्रोह्यवरोपिदृष्टइतिचोन्मानांतरं॥२२
॥नन्वणुत्वेसत्येकदेशस्थस्यसकलदेहगतोपलब्धिर्विरुध्येत॥दृश्यतेचजान्हवीह्रदनिमग्नानांसर्वांगशैत्योपलब्धिर्नि
दाघसमयेचसकलशरीरपरितापोपलब्धिरिति॥अतउत्तरंपठति॥अविरोधश्चंदनवत्॥२३॥यथाहिहरिचंदनविंदुः
शरीरैकदेशसंबंधोपिसन्सकलदेहव्यापिनमाल्हादंकरोत्येवमात्मापिदेहैकदेशस्थःसकलदेहव्यापिनीमुपलब्धिंक
रिष्यति॥त्वक्संबंधाच्चास्यसकलशरीरगतावेदनानविरुध्यते॥त्वगात्मनोर्हिसंबंधःकृत्स्नायांत्वचिवर्तते॥त्वक्चकृ
त्स्नशरीरव्यापिनीति॥२३॥अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि॥२४॥अत्राहयदुक्तमविरोधश्चंदनवदि
तितदयुक्तंदृष्टांतदार्ष्टांतिकयोरतुल्यत्वात्॥सिद्धेह्यात्मनोदेहैकदेशस्थत्वेचंदनदृष्टांतोभवति॥ऽऽकायात्मत्वोदेहव्यापिस
र्वोपलब्धिकरणस्यमहिम्नाऽऽत्मनोव्यापिकार्यकारित्वमविरुद्धं॥त्वगात्मनोरिति॥संबंधस्यतत्तदवयवनिष्ठत्वादवयविनश्चैकत्वादात्मसंयो
गस्यकृत्स्नत्वक्निष्ठतेत्यर्थः॥२३॥सिद्धेहीति॥ननुसिद्धमित्यतुल्यतेत्यर्थःविशेषणवैशेष्यंचंदनविंदोरल्पत्वस्यप्रत्यक्षत्वात्तद्व्याप्त्याव्यापिंकारित्वकल्पनायुक्ताजीवस्य॥

प्र॰भा॰ त्वणुत्वे संदेहव्यापिकार्यदृष्ट्या व्यापित्वकल्पनमेव युक्तं व्यापिकार्याश्रयो व्यापीत्युत्सर्गोऽस्तीति सूत्रशंकाभागार्थः ॥ आत्मा स्वःव्यापिकार्यकारि अ॰पा॰
टी॰ त्वाच्चंदनबिंदुवदिति अनुमानमयुक्तं त्वगादौ व्यभिचारादित्याह ॥ न चात्रानुमानमिति ॥ पूर्वोक्तश्रुतिभिर्जीवस्याणुत्वनिश्चयात् हृदिस्थत्वश्रुतिभि- २।३
र॰प्र॰ रेकदेशस्थत्वनिश्चयाच्च न दृष्टांतवैषम्यमिति परिहारभागार्थमाह ॥ अत्रोच्यत इति ॥ २४ ॥ आत्मवत्तद्धर्मज्ञानस्याप्यणुत्वं स्वतः कादाचित्कं
२५९

प्रत्यक्षं तु चंदनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादकत्वं चाऽऽत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्य-
क्षं नैकदेशवर्तित्वम् अनुमेयं तु न स्यादिति यदप्युच्यते ॥ न चात्रानुमानं संभवति ॥ किमात्मनः सकलशरीरगता वेदना त्वगिंद्रियस्येव
सकलदेहव्यापिनः सतः ॥ किं वा विभोर्नभस इवाहोस्विच्चंदनबिंदोरिवाणोरेकदेशस्थस्येति संशयानिवृत्तेरिति ॥ अत्रोच्यते
॥ नायं दोषः कस्मादभ्युपगमात् ॥ अभ्युपगम्यते ह्यात्मनोपि चंदनस्येव देहैकदेशवर्तित्वमवस्थितिवैशेष्यं ॥ कथमिति ॥
उच्यते ॥ हृदि ह्येष आत्मा पठ्यते वेदांतेषु हृदि ह्येष आत्मा ॥ स वा एष आत्मा हृदि कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृ-
द्यंतर्ज्योतिः पुरुष इत्याद्युपदेशेभ्यस्तस्मात् दृष्टांतदार्ष्टांतिकयोरवैषम्यादुक्तमेवैतदविरोधश्चंदनवदिति ॥ २४ ॥ गुणा-
द्वालोकवत् ॥ २५ ॥ चैतन्यगुणव्याप्तेर्वाऽणोरपि सतो जीवस्य सकलदेहव्यापिकार्यं न विरुध्यते ॥ यथा लोके मणिप्रदीपप्र-
भृतीनामपवरकैकदेशवर्तिनामपि प्रभाऽपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्यं करोति तद्वत् ॥ स्यात्कदाचिच्चंदनस्य सा-
वयवत्वात्सूक्ष्मावयवविप्रसर्पणेनापि सकलदेहे आल्हादयितृत्वं न त्वणोर्जीवस्यावयवाः संति यैरयं सकलं देहं विप्रस- राम
र्पेदित्याशंका गुणाद्वालोकवदित्युक्तं ॥ २५ ॥ कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत ॥ न हि पटस्य शुक्लो गुणः पटव्यतिरेके- २५९
णान्यत्र वर्तमानो दृश्यते ॥ ९

तु देहपरिमाणत्वमित्युक्त्वा स्वनय एव व्यापित्वमिति मतांतरमाह ॥ गुणाद्वेति ॥ वाशब्देन चंदनदृष्टांतापरितो-
षः सूचितस्तमाह ॥ स्यादिति ॥ २५ ॥ उत्तरसूत्रव्यावर्त्यां शंकते ॥ कथमिति ॥ ज्ञानं न गुणिव्यतिरिक्तदेशव्यापि गुणत्वाद्रूपवन्न च प्रभायां व्यभिचारः ॥

तस्या अपि द्रव्यत्वादिति प्राप्ते गंधे व्यभिचारमाह ॥ अत उक्तमिति ॥ गुणस्य व्यतिरेक आश्रयविश्लेषो ॥ ननु विश्लिष्टावयवानामल्पत्वात् द्रव्यक्षयो न भातीत्यत आह ॥ अक्षीयमाणमपीति ॥ अपिरवधारणे पूर्वावस्थालिंगेनाक्षीयमाणमेव तद्द्रव्यमनुमीयत इत्यर्थः विमतं अविश्लिष्टावयवं पूर्वावस्थातो गुरुत्वाद्यपचयहीनत्वात्संमतवदिति भावः ॥ शंकते ॥ स्यादेतदिति विश्लिष्टानामल्पत्वादित्युपलक्षणमवयवांतराणां प्रवेशादीत्यपि द्रष्टव्यं विशेषोऽवयवानां विश्लेषप्रवेशरूपः सन्नपि न ज्ञायते ॥ तथा च गुरुत्वापचयो न भवतीति हेतोरन्यथासिद्धिरिति शंकार्थः ॥ आगरुतोऽवयवाः परमाणवस्त्रसरेणवो वा नाद्यास्तद्गतरूपवद्गंधस्याप्यनुपलब्धिप्रसंगादिति परिहरति ॥ नेति ॥ द्वितीयमत्याह ॥ स्फुटेति त्रसरेणुगंधश्चेत्स्फुटो न स्यादित्यर्थः । अतो गंधस्य पुष्पादिस्थस्यैव गुणिव्यतिरेको वाच्य इति भावः ॥ गंधो न गुणिविश्लिष्टः गुणत्वात् रूपवदिति शंकते

प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात् निविडावयवं हि तेजोद्रव्यं प्रदीपः प्रविरलावयवं तु तेजोद्रव्यमेव प्रभेति ॥ अत उत्तरं पठति ॥ व्यतिरेको गंधवत् ॥२६॥ यथा गुणस्यापि सतो गंधस्य गंधवतद्द्रव्यव्यतिरेकेण वृत्तिर्भवति ॥ अप्राप्तेष्वपि कुसुमादिषु गंधवत्सु कुसुमगंधोपलब्धेरेवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति ॥ अतश्चानैकांतिकमेतद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतो गंधस्याश्रयविश्लेषदर्शनात् ॥ गंधस्यापि सहैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसंगादक्षीयमाणमपि तत्पूर्वावस्थातो गम्यते ॥ अन्यथा तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत ॥ स्यादेतत्तद्गंधाश्रयाणां विश्लिष्टानामवयवानामल्पत्वात्सन्नपि विशेषो नोपलक्ष्यते ॥ सूक्ष्मा हि गंधपरमाणवः सर्वतो विप्रसृता गंधबुद्धिमुत्पादयंति नासिकापुटमनुप्रविशंतीति चेत् ॥ न अतींद्रियत्वात् परमाणूनां स्फुटगंधोपलब्धेश्च नागकेसरादिषु ॥ न च लोके प्रतीतिर्गंधवत् द्रव्यमाघ्रातमिति गंध एवाऽऽघ्रात इति तु लौकिकाः प्रतीयंते ॥ रूपादिष्वाश्रयव्यतिरेकेणानुपलब्धेर्गंधस्याप्ययुक्त आश्रयव्यतिरेक इति चेत् ॥ न प्रत्यक्षत्वादनुमानाऽप्रवृत्तेः ॥

॥ रूपेति विश्लेषस्य प्रत्यक्षत्वाद्बाध इत्याह नेति ॥ २६ ॥

आत्मनश्चैतन्यगुणेनैव देहे व्याप्तिरित्यत्र श्रुतिमाह सूत्रकारः ॥ तथा च दर्शयतीति ॥ तद्व्याचष्टे ॥ हृदयेति ॥ २७ ॥ तत्रैव श्रुत्यंतरार्थं सूत्रं पृथगिति विज्ञानमिंद्रियाणां ज्ञानशक्तिं विज्ञानेन चैतन्यगुणेनादाय शेत इत्यर्थः ॥ २८ ॥ एवं चैतन्यगुणव्याप्तिगोचरमभिप्रायांतत्वात्माणुत्वविभुत्वश्रुतीनांविरोधादप्रामाण्यप्राप्त्यावणुत्वं जीवस्य विभुत्वमीश्वरस्येत्यविरोध इत्येकदेशिपक्षो दर्शितस्तं दूषयन् सिद्धांतसूत्रं व्याचष्टे ॥ तुशब्द

तस्माद्यथा लोके दृष्टं तत्तथैवानुमन्तव्यं निरूपकैर्नान्यथा ॥ नहि रसो गुणो जिह्वयोपलभ्यत इति अतो रूपादयोपि गुणा जिह्वयैवोपलभ्येरन्निति नियंतुं शक्यते ॥ २६ ॥ तथा च दर्शयति ॥ २७ ॥ हृदयायतनत्वमणुपरिमाणत्वं चात्मनोभिधाय तस्यैव लोमभ्य आनखाग्रेभ्य इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥ २७ ॥ पृथगुपदेशात् ॥ २८ ॥ प्रज्ञया शरीरं समारुह्येति चात्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशाच्चैतन्यगुणेनैवास्य शरीरव्यापिता गम्यते ॥ तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च कर्तुः शारीरात्पृथक् विज्ञानस्योपदेश एतमेवाभिप्रायमुपोद्बलयति ॥ तस्मादणुरात्मेति ॥ २८ ॥ एवं प्राप्ते ब्रूमः ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ तुशब्दः पक्षं व्यावर्तयति ॥ नैतदस्त्यणुरात्मेति ॥ उत्पत्त्यश्रवणा द्धि परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं ॥ परमेव चेद्ब्रह्म जीवस्तस्माद्यावत्परं ब्रह्म तावानेव जीवो भवितुमर्हति ॥ परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः ॥ तथा च —— स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेष्वित्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवंति ॥ ६ ॥

इत्यादिना तस्माद्ब्रह्माभिन्नत्वात् विभुर्जीवः ब्रह्मवदित्यनुमानानुगृहीते श्रुतिस्मृती आह ॥ तथा च स वा एष इति नित्यः सर्वगतः स्थाणुरित्याद्याः स्मार्तवादाः ॥ एतेन जीवस्य ब्रह्माऽभेदज्ञानेणुत्वाभावधीस्तस्यां तदित्यन्योन्याश्रय इति निरस्तं ॥ प्रधानमहावाक्यानुगुणश्रुतिस्मृतिभिरणुत्वाभावनिश्चयानंतरमभेदज्ञानात्प्रधानवाक्याविरोधे गुणभूताणुत्वश्रुतीनामौपाधिकाणुत्वविषयत्वकल्पनाद्गुणे त्वन्याय्यकल्पनेति न्यायादिति भावः ॥

किंच सर्वदेहव्यापिशैत्यानुभवोऽन्यथानुपपन्नः अणुत्वश्रुतयोऽध्यस्ताणुत्वविषयत्वेन नेयाः कथंचिदर्थवादा नेयाः ॥ लौकिकन्यायादपि तेषां दुर्बलत्वादिति मत्वाह ॥ न चाणोरिति ॥ शंकते ॥ त्वगिति ॥ यद्यण्वात्मसंवंधस्य त्वग्व्याप्त्या देहव्यापिनी वेदना स्यात्तर्ह्यतिप्रसंग इति दूषयति ॥ नेति ॥ प्रसंगस्येष्टत्वं निरस्यति ॥ पादतलस्येति ॥ तस्मादल्पमहतोः संयोगो न महद्व्यापी कंटकसंयोगस्य देहव्याप्त्यदर्शनात् ॥ तथा चाण्वात्मसंयोगस्त्वेकदेशस्य एवेति देहव्यापिवेदनानुपपत्तिः ॥ न च सिद्धांते त्वगात्मसंवंधस्य व्यापित्वात्कंटकसंवंधे देहव्यापिवेदनाप्रसंग इति वाच्यं यावती विषयसंबद्धा त्वक् तावद्व्याप्यात्मसंवंधस्तावद्व्यापिवेदनाहेतुरिति नियमान्नैवं विषयत्वक्संवंध एव तद्धेतुरस्तु किमात्मव्याप्त्येति वाच्यं वेदना हि सुखं

न चाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते ॥ त्वक्संवंधात्स्यादिति चेत् ॥ न ॥ कंटकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत ॥ त्वक्कंटकयोर्हि संयोगः कृत्स्नायां त्वचि वर्तते ॥ त्वक्च कृत्स्नशरीरव्यापिनीति ॥ पादतल एव तु कंटकनुन्नो वेदनां प्रतिलभते ॥ न चाणोर्गुणव्याप्तिरुपपद्यते ॥ गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत ॥ प्रदीपप्रभायाश्च द्रव्यांतरत्वं व्याख्यातं ॥ गंधोऽपि गुणत्वाभ्युपगमात् साश्रय एव संचरितुमर्हति ॥ अन्यथा गुणत्वहानिप्रसंगात् ॥ तथा चोक्तं द्वैपायनेन ॥ उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणाः ॥ पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमिति ॥ यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयान्नाणुर्जीवः स्यात् ॥ चैतन्यमेव त्वस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ ॥ नात्र गुणगुणिविभागो विद्यत इति ॥

दुःखं तदनुभवश्च न चैषां व्यापकानां कार्याणामल्पमुपादानं संभवति कार्यस्योपादानाद्विश्लेषानुपपत्तेर्न चैषां व्यापकत्वमसिद्धं सूर्येण तप्तस्य गंगानिमग्नस्य सर्वांगव्यापिसुखदुःखाऽनुभवस्य दुरपह्नवात् यदुक्तं गुणस्यापि गुणिविश्लेषो गंधवदिति तन्नेत्याह ॥ न चाणोरिति ॥ गंधो नाश्रयाद्विश्लिष्टः गुणत्वाद्रूपवत् इत्यत्रागममाह ॥ तथा चोक्तमिति ॥ न च प्रत्यक्षस्य बाधः गंधस्य प्रत्यक्षत्वेऽपि निराश्रयत्वस्याप्रत्यक्षत्वात् ॥ महतां त्रसरेणूनामनुद्भूतस्पर्शानामुद्भूतगंधानामागमनात्स्फुटगंधोपलंभसंभवः अवयवांतरप्रवेशान्न सहसा मूलद्रव्यक्षय इति भावः ॥ पूर्वं चैतन्यस्य गुणत्वमुपेत्य तद्व्याप्त्या गुण्यात्माणुत्वं निरस्तं संप्रति तस्य गुणत्वमसिद्धमित्याह ॥ यदि च चैतन्यमिति ॥ ॥

उत्सूत्रंविभुत्वमसाध्याणुत्वश्रुतेर्गतिप्रदर्शनार्थंसूत्रंव्याचष्टे ॥ कथमित्यादिना ॥ अंतराविज्ञानमनसीहृदिहीतिचप्रकृताबुद्धिर्योग्यत्वा
त्तच्छब्देनपरामृश्यते ॥ बुद्धिगुणानामात्मन्यध्यासादणुत्वाद्युक्तिर्नस्वतः आनंत्यश्रुतिविरोधादित्याह ॥ तथाचेति ॥ अकार्यकारणद्रव्यसमाना
धिकरणतयातत्त्वमसीतिवाक्यस्यसोयमितिवाक्यवदखंडाभेदार्थत्वादानंत्यंसत्यमणुत्वमध्यस्तमित्यर्थः ॥ उक्तंचैतद्गुहाधिकरणेप्रति-

शरीरपरिमाणत्वंचप्रत्याख्यातं ॥ परिशेषाद्विभुर्जीवः ॥ कथंतर्ह्यणुत्वादिव्यपदेशइत्यतआह ॥ तद्गुणसारत्वात्तु तद्व्य
पदेशइति ॥ तस्याबुद्धेर्गुणास्तद्गुणाइच्छाद्वेषःसुखंदुःखमित्येवमादयस्तद्गुणाःसारःप्रधानंयस्यात्मनःसंसारित्वेसंभव
तिसतद्गुणसारःतस्यभावस्तद्गुणसारत्वंनहिबुद्धेर्गुणैर्विनाकेवलस्यात्मनःसंसारित्वमस्ति ॥ बुद्ध्युपाधिकधर्माध्यासनिमि
त्तंहिकर्तृत्वभोक्तृत्वादिलक्षणंसंसारित्वमकर्तुरभोक्तुश्चासंसारिणोनित्यमुक्तस्यसतआत्मनस्तस्मात्तद्गुणसारत्वात् बुद्धि
परिमाणेनास्यपरिमाणव्यपदेशः ॥ तदुत्क्रांत्यादिभिश्चास्योत्क्रांत्यादिव्यपदेशोनस्वतः ॥ तथाचबालाग्रशतभागस्यशत
धाकल्पितस्यचभागोजीवःसविज्ञेयःसचानंत्यायकल्पतइत्यणुत्वंजीवस्योक्त्वातस्यैवपुनरानंत्यमाह ॥ तच्चैवमेवसमं-
जसंस्यात् ॥ यद्यौपचारिकमणुत्वंजीवस्यभवेत्पारमार्थिकंचानंत्यं ॥ नह्युभयंमुख्यमवकल्पेत ॥ नचानंत्यमौपचारिक
मितिशक्यंविज्ञातुंसर्वोपनिषत्सुब्रह्मात्मभावस्यप्रतिपिपादयिषितत्वात् ॥ तथेतरस्मिन्नप्युन्मानेबुद्धेर्गुणेनात्मगुणेन
चैवआराग्रमात्रोह्यवरोपिदृष्टइतिचबुद्धिगुणसंबंधेनैवाराग्रमात्रतांशास्तिनस्वेनैवात्मना ॥ एषोणुरात्माचेतसावेदित
व्यइत्यत्रापिनजीवस्याणुपरिमाणत्वंशिष्यतेपरस्यैवात्मनश्चक्षुराद्यनवग्राह्यत्वेनज्ञानप्रसादगम्यत्वेनचप्रकृतत्वात् ॥

पाद्यविरुद्धमुद्देश्यगतविशेषणंअविवक्षितमिति ॥ बालाग्रवाक्यमाराग्रवाक्यंचेत्युन्मानद्वयमुक्तंतत्राद्यंनिरस्यद्वितीयंनिरस्यति ॥ तथेतर
स्मिन्नपीतिबुद्धेर्गुणेनतन्निमित्तेनात्मन्यध्यस्तोगुणोभवतितेनात्मगुणेनाध्यस्तेनैवाराग्रपरिमाणोपकृष्टश्चजीवोदृष्टःस्वतस्त्वनंतएवेत्यर्थः

नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावाज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यतिनिष्कलंध्यायमानइत्युक्त्वाएषोणुरात्मेत्युक्तःपर
एव॥ यद्धिजीवस्तथाप्यध्यस्ताणुत्वअणुशब्दार्थइत्याह॥ जीवस्यापीति॥ यदुक्तंस्वगुपदेशाच्चैतन्यगुणेनैवात्मनोदेहव्याप्तिरितितत्राह॥ न

जीवस्यापिचसुखस्याणुपरिमाणत्वानुपपत्तेः ॥तस्मात्तदुत्क्रान्त्याद्यभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायंवाद्रष्टव्यं॥तथा
प्रज्ञयाशरीरंसमारुह्येत्येवंजातीयकेष्वपिभेदोपदेशेषुबुद्ध्यैवोपाधिभूतयाजीवःशरीरंसमारुह्येत्येवंयोजयितव्यं॥व्य
पदेशमात्रंवाशिलापुत्रकस्यशरीरमित्यादिवत्॥नह्यत्रगुणगुणिविभागोपिविद्यतइत्युक्तं॥हृदयायतनत्ववचनम
पिबुद्धेरेवतदायतनत्वात्॥तथाचोत्क्रांत्यादीनामप्युपाध्यायत्ततांदर्शयति॥कस्मिन्वाहमुत्क्रांतउत्क्रांतोभविष्यामिक
स्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेति॥उत्क्रांत्यभावेहिगत्यागत्योरप्यभावोविज्ञायते॥नह्यनपसृप्त
स्यदेहाद्गत्यागतीस्यातां॥एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशःप्राज्ञवत्॥यथाप्राज्ञस्यपरमात्मनःस
गुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशोऽणीयान्व्रीहेर्वायवाद्वामनोमयःप्राणशरीरःसर्वगंधःसर्व
रसःसत्यकामःसत्यसंकल्पइत्येवंप्रकारस्तद्वत्॥२९॥स्यादेतद्यदिबुद्धिगुणसारत्वादात्मनःसंसारित्वंकल्प्येतत
तोबुद्ध्यात्मनोर्भिन्नयोःसंयोगावसानमवश्यंभावीत्यतोबुद्धिवियोगेसत्यात्मनोविभक्तस्यानालक्ष्यत्वादसत्वमसंसारि
त्वंवाप्रसज्येतेति॥अत्रउत्तरंपठति॥यावदात्मभावित्वाच्चनदोषस्तद्दर्शनात्॥३०॥नेयमनंतरनिर्दिष्टदोषप्राप्तिराशं
कनीयाकस्मात्॥यावदात्मभावित्वात्बुद्धिसंयोगस्य॥यावदयमात्मासंसारीभवति॥ ९ प्रज्ञयेति॥बुद्धिःप्रज्ञेत्यर्थः॥य

दिचैतन्यंप्रज्ञानतयाभेदोपचारइत्याह॥व्यपदेशमात्रंवेति॥ननुचैतन्यंगुणइति भेदोमुख्योस्तुनेत्याह॥नह्यत्रेति॥निर्गुणत्वश्रुतेरित्यर्थः॥अ
न्यदपिपूर्वोक्तंबुद्ध्याद्युपाधिकमित्याह॥हृदयेत्यादिनासौत्रंदृष्टान्तंविवृणोति॥यथेति॥२९॥असत्वमित्यापाततअसंसारित्वमापाद्यशेषंसुबोधं

ननुस्वतःसंसारित्वमस्तुकिंबुद्ध्युपाधिनेत्यतआह॥ यावदेवचायमिति॥ समानोबुद्धितादात्म्यापन्नःसन्॥ विज्ञानंब्रह्मतन्मयोविकारोणुरित्यर्थः किंन स्यादतआह॥ प्रदेशांतरइति॥ विज्ञानमयोबुद्धिप्रचुरइत्यर्थः॥ केनसमानइत्याकांक्षायामितिशेषः॥ अनित्यत्वान्नबुद्धेर्यावत्संसारात्मभावित्वमुक्तंसति

यावदस्यसम्यग्दर्शनेनसंसारित्वंननिवर्ततेतावदस्यबुद्ध्यासंयोगोनशाम्यति॥ यावदेवचायंबुद्ध्युपाधिसंबंधस्तावदेवास्य जीवस्यजीवत्वंसंसारित्वंच॥ परमार्थतस्तुनजीवोनामबुद्ध्युपाधिसंबंधपरिकल्पितस्वरूपव्यतिरेकेणास्ति॥ नहिनित्यमुक्तस्व रूपात्सर्वज्ञादीश्वरादन्यश्चेतनोधातुर्द्वितीयोवेदांतार्थनिरूपणायामुपलभ्यते॥ नान्योस्तिद्रष्टाश्रोतामंताविज्ञाता नान्यदतोस्ति द्रष्टृश्रोतृमंतृविज्ञातृतत्त्वमस्यहंब्रह्मास्मीत्यादिश्रुतिशतेभ्यः॥ कथंपुनरवगम्यतेयावदात्मभावीबुद्धिसंयोगइति॥ तद्दर्शी नादित्याह॥ तथाहिशास्त्रंदर्शयति॥ योयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषःससमानःसन्नुभौलोकावनुसंच रतिध्यायतीवलेलायतीवेत्यादि॥ तत्रविज्ञानमयइतिबुद्धिमयइत्येतदुक्तंभवति॥ प्रदेशांतरेविज्ञानमयोमनोमयःप्रा णमयश्चक्षुर्मयःश्रोत्रमयइतिविज्ञानमयस्यमनआदिभिःसहपाठात्॥ बुद्धिमयत्वंचतद्गुणसारत्वमेवाभिप्रेयते॥ यथा लोकेस्त्रीमयोदेवदत्तइतिस्त्रीरागादिप्रधानोऽभिधीयतेतद्वत्ससमानःसन्नुभौलोकावनुसंचरतीतिचलोकांतरगमनेप्यवि योगंबुद्ध्यादर्शयति॥ केनसमानस्तयैवबुद्ध्येतिगम्यतेसन्निधानात्तच्चदर्शयतिध्यायतीवलेलायतीवेत्येतदुक्तंभवति॥ नायं स्वतोध्यायतिनापिचलतिध्यायंत्यांबुद्धौध्यायतीवचलंत्यांबुद्धौचलतीवेति॥ अपिचमिथ्याज्ञानपुरःसरोयमात्मनोबुद्ध्यादि संबंधोनचमिथ्याज्ञानस्यसम्यग्ज्ञानादन्यत्रनिवृत्तिरस्तीत्यतोयावद्ब्रह्मात्मनाऽनवबोधस्तावदयंबुद्ध्युपाधिसंबंधोनशाम्य ति॥ दर्शयतिच॥ वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात्॥ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनाये ति॥३०॥

मूलेकार्यस्यधियोगासंभवाच्चनिपुनराप्याह॥ अपिचमिथ्येति॥ सम्यक्ज्ञानादेवबुद्ध्यादिबंधध्वंसइत्यत्रश्रुतिमाह॥ दर्शयतीति॥ मृत्युमत्येतीत्यन्वयः॥ आदित्यवर्णंस्वप्रकाशंतमसःपरस्तादज्ञानास्पृष्टमित्यर्थः॥३०॥

यावदात्मभावित्वस्यासिद्धिं शंकते ॥ नन्विति ॥ सुषुप्तौ बुद्धिसत्त्वे ब्रह्मसंपत्तिर्नस्यात् प्रलये तत्सत्त्वे प्रलयव्याहतिरित्यर्थः ॥ स्थूलसूक्ष्मात्मना बुद्धेर्यावदात्मभावित्वमस्तीत्याह ॥ पुंस्त्वेति ॥ पुंस्त्वं रेतः आदिपदेन श्मश्र्वादिग्रहः ॥ अस्य बुद्धिसंबंधस्येत्यर्थः स्वापे बीजात्मना सतो बुद्ध्यादेः प्रबोधेऽभिव्यक्तिरित्यत्र श्रुतिमाह ॥ दर्शयतीति ॥ न विदुरित्यविद्यात्मकबीजसद्भावोक्तिः ते व्याघ्रादयः पुनराभवंतीत्यभिव्यक्तिनिर्देशः ॥ ३१ ॥

ननु सुषुप्तिप्रलययोर्न शक्यते बुद्धिसंबंध आत्मनोऽभ्युपगंतुं ॥ सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीति वचनात् ॥ कृत्स्नविकारप्रलयाभ्युपगमाच्च ॥ तत्कथं यावदात्मभावित्वं बुद्धिसंबंधस्येत्यत्रोच्यते ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानानि अविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवंति ॥ नाविद्यमानान्युत्पद्यंते षंढादीनामपि तदुत्पत्तिप्रसंगात् ॥ एवमयमपि बुद्धिसंबंधः शक्त्यात्मना विद्यमान एव सुषुप्तिप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति ॥ एवं ह्येतद्युज्यते ॥ न ह्याकस्मिकी कस्यचिदुत्पत्तिः संभवति अतिप्रसंगात् ॥ दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं ॥ सति संपद्य न विदुः सति संपद्यामह इति ॥ त इह व्याघ्रो वा सिंहो वेत्यादिना ॥ तस्मात्सिद्धमेतत् यावदात्मभावी बुद्ध्युपाधिसंबंध इति ॥ ३१ ॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वाऽन्यथा ॥ ३२ ॥ तच्चात्मन उपाधिभूतमंतःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते ॥ क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते निश्चयादिवृत्तिकं बुद्धिरिति ॥ ५

बुद्धिसद्भावे मानमाह सूत्रकारः ॥ नित्येति ॥ मनसा ह्येव पश्यति बुद्ध्या न विवेचयति ॥ विज्ञानं यज्ञं तनुते चेतसा वेदितव्यः चित्तं च चेतयितव्यं चेति तत्र तत्र श्रुतिषु मन आदिपदवाच्यं तावत् बुद्धिद्रव्यं प्रसिद्धमित्यर्थः ॥ कथमेकस्यानेकधोक्तिरित्यत्राह ॥ क्वचिच्चेति ॥ गर्ववृत्तिकोऽहंकारो विज्ञानं चित्तप्रधानं स्मृतिप्रधानं वा चित्तमित्यपि द्रष्टव्यं ॥

न्या·भा यद्यपि साक्षिप्रत्यक्षसिद्धमंतःकरणं श्रुत्यनूदितं च तथापि प्रत्यक्षश्रुत्योर्विवदमानं प्रति व्यासंगानुपपत्त्या तत्साधयति ॥ तच्चेत्यादिना ॥ सूत्रं अ·पा
टी· योजयति । अन्यथेति पंचेंद्रियाणां पञ्चविषयसंबंधे सति नित्यं युगपत्तं चोपलब्धयः स्युर्मनोतिरिक्तसामग्र्याः सत्त्वात् ॥ यदि सत्यामपि सामग्र्यामु ५२
र· प्र· पलब्ध्यभावस्तर्हि सदैवानुपलब्धिप्रसंग इत्यर्थः ॥ अतः कादाचित्कोपलब्धिनियामकं मन एष्टव्यमिति भावः ननु सत्यपि कराग्निसंयोगे दाह
२६३ कादाचित्कत्ववदुपलब्धिकादाचित्कत्वमस्तु किं मनसेत्याशंक्याऽन्यतरनियमो वेत्येतद्व्याचष्टे ॥ अथवेति ॥ सत्यां सामग्र्यां नित्योपलब्धिर्वांगी
कार्या अन्यतरस्य कारणस्य केनचिच्छक्तिप्रतिबंधनियमो वांगीकार्यः यथा मणिनाऽग्निशक्तिप्रतिबंध इति वाक्यार्थः ॥ अस्तु प्रतिबंध इत्यत

तस्मैवंभूतमंतःकरणमवश्यमस्तीत्यभ्युपगंतव्यं ॥ अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धि
प्रसंगः स्यात् ॥ आत्मेंद्रियविषयाणामुपलब्धिसाधनानां संनिधाने सति नित्यमेवोपलब्धिः प्रसज्येत ॥ अथ सत्यपि
हेतुसमवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्येत न चैवं दृश्यते ॥ अथवान्यतरस्यात्मन इंद्रियस्य वा श-
क्तिप्रतिबंधोऽभ्युपगंतव्यः ॥ न चात्मनः शक्तिप्रतिबंधः संभवति ॥ अविक्रियत्वात् ॥ नापींद्रियस्य न हि तस्य पूर्वोत्तर
योः क्षणयोरप्रतिबद्धशक्तिकस्य सतोऽकस्माच्छक्तिः प्रतिबध्येत ॥ तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपल
ब्धी भवतस्तन्मनः ॥

आह ॥ नचेति ॥ नचेंद्रियस्यैवास्तु शक्तिप्रतिबंध इति वाच्यं प्रतिबंधकाभावात् नच दृष्टसामग्र्यां सत्यां अदृष्टं प्रति
बंधकमिति युक्तं ॥ अतिप्रसंगात् ॥ नच व्यासंगः प्रतिबंधकः मनोऽसत्वे तस्यासंभवात् यथाहि रसादीनां सहोपलब्धिप्राप्तौ रसबुभुत्सा रूपो व्यासं न्याम
गो रूपाद्युपलब्धिप्रतिबंधको वाच्यः ॥ सच गुणत्वाद्रूपवद्गुण्याश्रयः ॥ तत्रात्मनोऽसंगनिर्गुणकूटस्थस्य गुणित्वायोगान्मनस एव गुणित्वेने २६६
ष्टव्यमिति व्यासंगानुपपत्त्या मनःसिद्धिः ॥ एतदभिप्रेत्योपसंहरति ॥ तस्मादिति ॥ अवधानं बुभुत्सा नचाऽनिच्छतोपि दुर्गंधाद्युपलंभान्न बुभु
त्सोपलब्धिनियामिकेति वाच्यं अनेकविषयसन्निधौ कचिदेव तस्या नियामकत्वांगीकारात् ॥ येषां मते पुनरिच्छादीनामात्मधर्मत्वं तेषां मनो
दुर्लभमिति मंतव्यं इच्छादिधर्मिणैवात्मना व्यासंगोपपत्तेः ॥

संप्रतिव्यासंगस्यमानसत्वेश्रुतिमाह ॥ तथाचेति ॥ नकेवलंव्यासंगान्मनःसिद्धिः किंतुकामाद्याश्रयत्वेनापीत्याह ॥ कामादयश्चेति ॥ बुद्धेःप्रामाणिकत्वोक्तिफलमाह ॥ तस्मादिति ॥ ३२ ॥ एवमात्मन्यणुत्वाध्यासोक्त्यास्वाभाविकंमहत्त्वंस्थापितंसंप्रतिततोबहिष्ठंकर्तृत्वंसाधयतिकर्ताशास्त्रार्थवत्त्वात् ॥ सनित्यचिद्रूपोमहानात्माकर्तानवेत्यसंगत्वश्रुतीनांविध्यादिश्रुतीनांचविप्रतिपत्त्यासंशयेबुद्धिकर्तृत्वेनैवविध्यादिशास्त्रोपपत्तेरकर्तात्मेतिसांख्यपक्षप्राप्तौसिद्धांतयत्येवतद्गुणसारत्वोक्त्यात्मनिकर्तृत्वाध्यासस्यापिसिद्धत्वात्पुनरुक्तिमाशंक्यसांख्यपक्षनिरासार्थमात्मनिकर्तृत्वाध्या-

तथाचश्रुतिः अन्यत्रमनाअभूवंनादर्शमन्यत्रमनाअभूवंनाश्रौषमिति ॥ मनसाह्येवपश्यतिमनसाशृणोतीति ॥ कामादयश्चास्यवृत्तयइतिदर्शयतिकामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेति ॥ तस्मादुक्तमेतत्तद्गुणसारत्वात्तुतद्व्यपदेशइति ॥ २९ ॥ कर्ताशास्त्रार्थवत्त्वात् ॥ ३३ ॥ तद्गुणसारत्वाधिकारेणैवापरोपिजीवधर्मःप्रपंच्यते ॥ कर्ताचायंजीवःस्यात्कस्माच्छास्त्रार्थवत्त्वात् ॥ एवंचयजेतजुहुयाद्दद्यादित्येवं विधंविधिशास्त्रमर्थवद्भवति ॥ अन्यथातदनर्थकंस्यात् ॥ तद्धिकर्तुःसतःकर्तव्यविशेषमुपदिशति ॥ नचासतिकर्तृत्वेतदुपपद्येत ॥ तथेदमपिशास्त्रमर्थवद्भवत्येषहिद्रष्टा —— श्रोतामंताबोद्धाकर्ताविज्ञानात्मापुरुषइति ॥ ३३ ॥ विहारोपदेशात् ॥ ३४ ॥ इतश्चजीवस्यकर्तृत्वंयज्जीवप्रक्रियायांसंध्येस्थानेविहारमुपदिशति ॥ सईयतेमृतोयत्रकाममिति ॥ स्वेशरीरेयथाकामं
(परिवर्ततइति च॥ ३४ ॥

सप्रपंचत्वात्पुनरुक्तिरित्याह ॥ तद्गुणेति ॥ अधिकारःप्रसंगः वस्तुतोऽसंगत्वमविद्यातःकर्तृत्वमित्यसंगत्वकर्तृत्वश्रुतीनांअविरोधोक्तेःकर्तृत्वविचारात्मकाधिकरणत्रयस्यपादसंगतिः ॥ श्रुतीनांमिथोविरोधाविरोधौपूर्वोत्तरपक्षयोःफलं ॥ यद्वात्रपूर्वपक्षेबंधाभावाच्छास्त्रवैयर्थ्यंफलं ॥ सिद्धांतेकर्तृत्वादिसंबंधसत्त्वाच्छास्त्रार्थवत्त्वमितिभेदः ॥ ननुबुद्धिकर्तृत्वेनशास्त्रार्थवत्त्वाऽस्तुकिंजीवकर्तृत्वेनेत्यत्राह ॥ तद्धिकर्तुःसतइतिमयेदंकर्तव्यमितिबोधसमर्थस्यचेतनस्यैवकर्तृत्वंवाच्यंनत्वचेतनायाबुद्धेः ॥ किंचभोक्तुरात्मनएवकर्तृतावाच्याशास्त्रफलप्रयो-

शा॰भा॰ संध्य स्थानं स्वप्नः अमृतः स आत्मा यथेष्टमीयते गच्छती ति विहारोपदेशात् आत्मा कर्त्ता ॥ ३४ ॥ प्राणानां मध्ये विज्ञानेन बुद्ध्या विज्ञानस अ॰पा॰
टी॰ मर्थीमिंद्रियजातं आदाय शेत इति प्राणान् गृहीत्वा परिवर्त्तत इति उपादानकर्तृत्वमात्मनः॥ अकर्तृत्वे उपादानानुपपत्तेरिति भावः॥ ३५॥ विज्ञा २।३
र॰प्र॰ न शब्दो जीवस्य निर्देशो न चेत्तदा प्रथमा निर्देशाद्विपर्ययः करणद्योतितृतीया निर्देशः स्यात्तस्मादिह श्रुतौ तनुत इत्या ख्यानेन कर्तृवाचिना

२६४ उपादानात्॥ ३५॥ इतश्चास्य कर्तृत्वं ॥ यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति ॥ तदेषां प्राणानां वि
ज्ञानेन विज्ञानमादायेति ॥ प्राणान् गृहीत्वेति च ॥ ३५॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६॥ इतश्च जीव
स्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति ॥ विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति ॥ न
नु विज्ञानशब्दो बुद्धौ समधिगतः ॥ कथमनेन जीवस्य कर्तृत्वं सूच्यत इति ॥ नेत्युच्यते जीवस्यैवैष निर्देशो न बुद्धेः ॥
न चेज्जीवस्य स्यान्निर्देशविपर्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत् ॥ तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य कर
णविभक्तिनिर्देशो दृश्यते ॥ तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति ॥ इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामाना
धिकरण्यनिर्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः॥ ३६ ॥ अत्राह यदि बुद्धिव्यतिरिक्तो॰
जीवः कर्ता स्यात्स स्वतंत्रः सन् प्रियं हितं चैवात्मनो नियमेन संपादयेन्न विपरीतं ॥ विपरीतमपि तु संपादयन्नुप
लभ्यते ॥ न च स्वतंत्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यत इत्यत उत्तरं पठति ॥ उपलब्धिवदनियमः ॥ ३७
॥ यथायमात्मोपलब्धिं प्रति स्वतंत्रोप्यनियमेनेष्टमनिष्टं चोपलभते ॥ एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति

विज्ञानपदस्य सामानाधिकरण्यनिर्देशात् क्रियायामात्मनः कर्तृत्वं सूच्यत इति सूत्रभाष्ययोरर्थः ॥ ३६ ॥ सूत्रांतरमवतारयति अत्राहेति ॥
जीवः स्वतंत्रश्चेदिष्टमेव कुर्यादस्वतंत्रश्चेन्न कर्ता स्वतंत्रः कर्तेति न्यायादित्यर्थः ॥ सत्यपि स्वातंत्र्ये कारकवैचित्र्यादनियता प्रवृत्तिरिति सूत्रेण परिहरति ॥ यथेति ॥

दृष्टांतासंप्रतिपत्त्याशंकते उपलब्धावपीति॥ चक्षुरादीनां चैतन्येन विषयसंबंधार्थत्वात् स्वसंबद्धोपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन स्वातंत्र्यात् दृष्टांतसिद्धिरित्याह॥ नेति॥ नन्वात्मा विषयसंबंधायकरणान्यपेक्षते चेत्कथं स्वतंत्र इत्याशंक्याह॥ अपि चेति॥ स्वातंत्र्यं नाम न स्वान्यानपेक्षत्वं ईश्वरस्यापि प्राणिकर्मापेक्षत्वेनास्वातंत्र्यप्रसंगात्॥ किंतु स्वेतरकारकप्रयोक्तृत्वे सति कारकाप्रेर्यत्वं स्वातंत्र्यं तेन स्वतंत्रोपि जीवः इष्टसा

उपलब्धावप्यस्वातंत्र्यं उपलब्धिहेतूपादानोपलंभादिति चेन्न विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनां उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात्॥ अपि चार्थक्रियायामपि नात्यंतमात्मनः स्वातंत्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्त्तते॥ भवति ह्येधोदकापेक्षस्यापि पक्तुः पक्तृत्वं सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते॥ ३७॥ शक्तिविपर्ययात्॥ ३८॥ इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति॥ यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात्करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत॥ सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगंतव्यं॥ अहंकरणपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात्॥ अहं गच्छाम्यहमागच्छामि अहं भुंजेऽहं पिबामीति च॥ तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारि करणमन्यत्कल्पयितव्यं॥ शक्तोपि हि सन्कर्ता करणमुपादाय क्रियासु प्रवर्त्तमानो दृश्यतेऽतश्च संज्ञामात्रे विवादः स्यान्न वस्तुभेदः कश्चित्करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात्॥ ३८॥ समाध्यभावाच्च॥ ३९॥ योप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदांतेषु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः॥

धनत्वभ्रांत्याऽनिष्टसाधनमप्यनुतिष्ठतीत्यनियता प्रवृत्तिः स्वातंत्र्यं चेत्यविरुद्धमित्यर्थः॥ ३७॥ जीवस्य कर्तृत्वे हेत्वंतरार्थं सूत्रं॥ शक्तीति बुद्धेः करणशक्तिविपरीता कर्तृशक्तिः स्यादित्यर्थः॥ ततः किं तत्राह॥ सत्यां च बुद्धेरिति॥ सोहं धीगम्यः स कर्ता स एव जीवो यत्तदपेक्षितं करणं तन्मन इति जीवकर्तृत्वसिद्धिरिति भावः॥ ३८॥

ज्ञानसाधनविद्यान्यथानुपपत्त्याप्यात्मनः कर्तृत्वं वाच्यमित्याह॥ ॥समाधीति॥मुक्तिफलभोक्तुरेवतदुपायसमाधिकर्तृत्वमुक्तं अन्यथात्मनोऽकर्तृत्वे बुद्धेरपि अभोक्त्र्याः कर्तृत्वायोगात्समाध्यभावप्रसंगादुत्तरार्थः॥३९॥२४॥यथाचतक्षोभयथा॥उक्तमात्मनः कर्तृत्वमुपजीव्यसंशयपूर्वपक्षावाह॥एवंतावदित्यादिना॥सांख्यनिरासेनात्मनः कर्तृत्वे साधितेबाधकाभावात्तत्सत्यमितिमीमांसकादिपक्षः प्राप्तः नचासंगत्वागमेनबाधः॥अहंकर्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेनतस्यागमस्यस्तावकत्वादितिप्राप्तेउत्सूत्रमेवसिद्धांतयति॥तत्स्वाभाविकमिति॥यदुक्तंबा-

ओमित्येवंध्यायथआत्मानमित्येवंलक्षणः सोप्यसत्यात्मनः कर्तृत्वे नोपपद्येत॥तस्मादप्यस्यकर्तृत्वसिद्धिः॥३९॥२४॥यथाचतक्षोभयथा॥४०॥एवंतावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वंशारीरस्यप्रदर्शितं॥तत्पुनः स्वाभाविकंवास्यादुपाधिनिमित्तंवेतिचिंत्यते॥तत्रैतैरेवशास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकंकर्तृत्वं अपवादहेत्वभावादित्येवंप्राप्ते ब्रूमः नस्वाभाविकंकर्तृत्वमात्मनः संभवत्यनिर्मोक्षप्रसंगात्॥कर्तृत्वस्वभावत्वेह्यात्मनोनकर्तृत्वान्निर्मोक्षः संभवति अग्नेरिवौष्ण्यात्॥नचकर्तृत्वादनिर्मुक्तस्यास्तिपुरुषार्थसिद्धिः कर्तृत्वस्यदुःखरूपत्वात्॥ननुस्थितायामपिकर्तृत्वशक्तौकर्तृत्वकार्यपरिहारात्पुरुषार्थः सेत्स्यति॥तत्परिहारश्चनिमित्तपरिहारात् यथाग्नेर्दहनशक्तियुक्तस्यापिकाष्ठवियोगाद्दहनकार्याभावस्तद्वत्॥ननिमित्तानामपिशक्तिलक्षणेनसंबंधेनसंबद्धानामत्यंतपरिहारासंभवात्॥ ६ ॥

[illegible]

धकाभावादितितदसिद्धमित्याह॥अनिर्मोक्षेति॥ननुकर्तृत्वंनामक्रियाशक्तिर्मुक्तावप्यस्तितथापिशक्तिकार्यस्यक्रियारूपशाकस्याभावान्मुक्तेः पुरुषार्थत्वसिद्धिरितिशंकते॥ननुस्थितायामितिसत्यांशक्तौकथंकार्यपरिहारस्तत्राह॥तत्परिहारश्चेति॥मुक्तौशक्तिसत्त्वेकार्यमपिस्यात्॥शाकाभावेशक्त्ययोगात्॥अस्तिहिप्रलयेपिकार्यंपुनरुद्भवयोग्यंसूक्ष्मंशक्यंतथाचशक्त्याधर्मादिनिमित्तैः सहितकार्याक्षेपान्मुक्तिलोपइतिपरिहरति॥ननिमित्तानामपीति॥सनिमित्तस्यकार्यस्यशक्त्याशक्यत्वेनसंबंधान्निमित्तानामपिपरंपरयाशक्तिसंबद्धत्वमुक्तंमंतव्यंसंबंधेनसं-

यद्वाशक्तिर्लक्षणमाक्षेपकंयस्यकार्यस्यतेनकार्येणयःसंबंधस्तेनेत्यधिकरणेतृतीये ॥ ननुनरस्यकर्मणादेवत्ववच्छास्त्रबलात्कर्तुरेवाकर्तृत्वासिद्धिरितिशंकते ॥ नन्विति ॥ ज्ञानादकर्तृत्वात्स्यमोक्षश्चेत्कर्तृत्वमाविद्यकंस्याद्यतोज्ञानमज्ञानस्यैवनिवर्तकंयदिकर्मणामोक्षस्तत्राह नेति ॥ आत्मनःस्वाभाविकंकर्तृत्वमभ्युपगम्यानिर्मोक्षउक्तः ॥ संप्रत्यसंगनिर्विकारत्वानेकश्रुतिव्याकोपात्तन्नस्वाभाविकमित्याह ॥ अपिचेति ॥ नचाभ्यस्तानेकश्रुतीनांस्तावकत्वकल्पनंयुक्तंनचाहंकर्तेत्यनुभवोविरुध्यते ॥ तस्यसत्यमिथ्योदासीनकर्तृत्वावगाहितो ॥ १८

ननुमोक्षसाधनविधानान्मोक्षःसेत्स्यति ॥ नसाधनायत्तस्याऽनित्यत्वात् ॥ अपिचनित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिरभिहिता ॥ तादृगात्मप्रतिपादनंचनस्वाभाविकेकर्तृत्वेऽवकल्पेत ॥ तस्मादुपाधिधर्माध्यासेनैवात्मनःकर्तृत्वंनस्वाभाविकं ॥ तथाचश्रुतिः ॥ ध्यायतीवलेलायतीवेति ॥ आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिचोपाधिसंपृक्तस्यैवात्मनोभोक्तृत्वादिविशेषलाभंदर्शयति ॥ नहिविवेकिनांपरस्मादन्योजीवोनामकर्ताभोक्तावाविद्यते ॥ नान्योतोस्तिद्रष्टेत्यादिश्रवणात् ॥ परएवतर्हिसंसारीकर्ताभोक्ताचप्रसज्येत ॥ परस्मादन्यश्चेच्चितिमान्जीवःकर्ताबुद्ध्यादिसंघातव्यतिरिक्तोनस्यात् ॥ नाऽविद्याप्रत्युपस्थापितत्वात्कर्तृत्वभोक्तृत्वयोः ॥ तथाचशास्त्रंयत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यविद्यावस्थायांकर्तृत्वभोक्तृत्वेदर्शयित्वाविद्यावस्थायांतएवकर्तृत्वभोक्तृत्वेनिवारय ((तियत्रत्वस्यसर्वमात्मैवा

ध्यासत्वेनाप्युपपत्तेरित्यर्थः ॥ कर्तृत्वस्याध्यस्तत्वेश्रुतिमाह ॥ तथाचेति ॥ विद्वदनुभवबाधितंचकर्तृत्वमित्याह ॥ नहीति ॥ बुद्ध्यादिसंघाताद्व्यतिरिक्तोयदिपरस्मादन्यश्चेतनोनस्यात्तदापरएवसंसारीप्रसज्येतनचानिष्टंपरस्यनित्यमुक्तत्वव्याघातादितिशंकते ॥ परएवेति ॥ नवयंशुद्धस्यचिद्धातोःपरस्यबंधंवदामः ॥ किंतुतस्यैवाविद्याबुद्ध्यादिप्रतिबिंबितस्याविद्ययाभिन्नस्यजीवत्वंप्राप्तस्यबंधमोक्षावितिब्रूमः ॥ कल्पितभेदोपिलोकेबिंबप्रतिबिंबयोर्धर्मव्यवस्थापकोदृष्टइतिपरिहरति ॥ नाविद्येति ॥ अविद्योपहितेबंधोनमु

भूत्तत्केनकंपश्येदिति ॥

ह्यात्मनीत्यत्रश्रुतिमाह ॥ तथाचेति ॥

कर्तृत्वस्य बुद्ध्युपाध्यन्वयव्यतिरेकानुविधायित्वात् श्रुतेश्च न स्वाभाविकत्वमित्याह ॥ तथा स्वप्नेति ॥ आत्मैव काम्यते आनंदत्वात् इत्यात्मकामं स्वरूपं स्वानतिरिक्तकाम्यासत्त्वादकामं आत्मकामत्वादकामत्वाच्चाप्तकामं विशोकत्वाच्चेत्याह ॥ शोकेति ॥ शोकांतरं दुःखास्पृष्टमित्यर्थः ॥ तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थतामाह ॥ एषेति । गतिः प्राप्यं संपदैश्वर्यं लोको भोग्यं सुखं चैतस्मादन्यन्नास्तीत्यर्थः ॥

तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकांतरमित्यारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनंद इत्युपसंहारात् ॥ तदेतदाहाचार्यो यथा च तक्षोभयथेति ॥ त्वर्थे चायं चः पठितः ॥ नैवं मंतव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति ॥ यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति ॥ स एव गृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवत्येवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति ॥ स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातोऽकर्ता सुखी भवति संप्रसादावस्थायां तथा मुक्त्यवस्थायामप्यविद्याध्वांतं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृतः सुखी भवति ॥ तक्षदृष्टांतश्चैतावतांशेन द्रष्टव्यः ॥ तक्षा हि विशिष्टेषु तक्षणादिषु व्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति स्वशरीरेण त्वकर्तैव ॥

९. आत्मा स्वतोऽकर्ता बुद्ध्याद्युपाधिना तु कर्तेत्युभयथाभाव उक्तस्तत्रार्थे सूत्रं योजयति ॥ तदेतदाहेत्यादिना ॥ संप्रसादः सुषुप्तिः यथा स्फटिकस्य लौहित्यं कुसुमाद्युपाधिकं तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकं अन्वयव्यतिरेकाभ्यां सिद्धं न च तौ बुद्धेरात्मकर्तृत्वे करणत्वविषयौ नोपादानत्वविषयाविति युक्तं करणत्वात्कार्यान्वय्युपादानत्वस्यांतरंगतया चित्संवलितबुद्धेस्ताभ्यामुपादानत्वस्यैव सिद्धेः ॥ एवं चिदभेदाध्यस्तबुद्ध्याख्याहंकारस्य कर्तृत्वोपादानत्वेन महावाक्यसमतिश्चेति भावः ॥

ननु तक्षा स्वहस्तादिना वास्यादिप्रेरणशक्तत्वात्स्वतः कर्त्ता आत्मा तु निरवयवत्वादशक्त इति दृष्टांतवैषम्यमाशंक्यौपाधिककर्त्तृत्वांशेन विवक्षितेन साम्यमाह न सहदृष्टांतश्चेति ॥ शास्त्रेणानूद्यमानं कर्तृत्वं स्वाभाविकमेव किं न स्यादित्यत आह ॥ न च स्वाभाविकमिति ॥ उपाध्यभावकाले श्रुते

एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्त्ता भवति स्वात्मना त्वकर्त्तैवेति ॥ न त्वात्मनस्तक्ष्ण इवावयवाः संति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यस्येद्वा ॥ यत्तूक्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति ॥ तन्न विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्त्तव्यविशेषमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति ॥ न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम ॥ तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते ॥ कर्त्ता विज्ञानात्मा पुरुष इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति ॥ एतेन विहारोपादाने परिहृते तयोरप्यनुवादरूपत्वात् ॥ ननु संध्ये स्थाने प्रसुप्तेषु करणेषु स्वे शरीरे यथाकामं परिवर्त्तत इति विहार उपदिश्यमानः केवलस्यात्मनः कर्तृत्वमावहति ॥ तथोपादानेपि तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति करणेषु कर्मकरणविभक्ती श्रूयमाणे केवलस्यैवात्मनः कर्तृत्वं गमयत इति ॥ अत्रोच्यते ॥ न तावत्संध्ये स्थानेऽत्यंतमात्मनः करणविरमणमस्ति ॥ सधीः स्वप्नो भूत्वेमं लोकमतिक्रामतीति तत्रापि धीसंबंधश्रवणात् ॥ तथा च स्मरंति ॥ इंद्रियाणामुपरमे मनोनुपरतं यदि ॥ सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनमिति ॥ कामादयश्च मनसो वृत्तय इति श्रुतिः ॥ ताश्च स्वप्ने दृश्यंते तस्मात्समना एव स्वप्ने विहरति विहारोपि च तत्रत्यो वासनामय एव न तु पारमार्थिकोस्ति ॥

१ कर्तृत्वं स्वाभाविकमेवेति शंकते ॥ ननु संध्य इति ॥ किंच करणैर्विशिष्टस्य कर्तृत्वे तेषां कर्मत्वेन भानात्तेष्वपि कर्तृत्वविभक्तिः स्यात् न चैवमस्ति अतः केवलात्मनः कर्तृत्वमित्याह ॥ न तथेति ॥ स्वप्नविहारे तावदुपाध्यभावोऽसिद्ध इत्याह ॥ न तावत्संध्य इति ॥ विहारस्य मिथ्यात्वात्तत्कर्तृत्वमपि मिथ्येत्याह ॥ विहारोपीति ॥ ९

शा·भा· जक्षन्नुभुंजानइव ॥ करणविशिष्टस्यकर्तृत्वेकरणेषुकर्तृविभक्तिः स्यान्नकरणविभक्तिरित्युक्तंमन्याह ॥ भवतिचलोकइतिकर्तृष्वपिकरणविभक्तिः ॥ अ·पा·
टी· नैविरुध्यतेदृष्टत्वात् ॥ अस्तिचकर्तृत्वप्रयोगः विज्ञानंयज्ञंतनुतइत्यादावितिभावः उपादानस्यसकर्तृकत्वमंगीकृत्यकेवलात्मनः कर्तृत्वंनिरस्तं ॥ २।३
र·प्र· इदानींतस्याक्रियत्वान्नकर्त्रपेक्षेत्याह ॥ अपिचेति ॥ पूर्वंविज्ञानंजीवइत्यंगीकृत्यजीवस्यकर्तृत्वेनतनुतइतिश्रुतिरुक्तासंप्रतितयाश्रुत्यानुपहित
२६७ त्मनः कर्तृत्वमितिप्राप्तौविज्ञानंबुद्धिरेवतस्याश्चात्रकर्तृत्वमुच्यतेनतदुपहितात्मनः कर्तृत्वसिद्धयइत्यभिप्रेत्याह ॥ यत्त्विति ॥ योयंविज्ञानमयः ॥

तथाचश्रुतिरिवकारानुबद्धमेवस्वप्नव्यापारंवर्णयति ॥ उतेवस्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्निति ॥
लौकिकाअपितथैवस्वप्नंकथयंति ॥ आरुरुक्षमिवगिरिशृंगमद्राक्षमिववनराजिमिति ॥ तथोपादानेपियद्यपिकरणेषु
कर्मकरणविभक्तिनिर्देशस्तथापितत्संपृक्तस्यैवात्मनःकर्तृत्वंद्रष्टव्यंकेवलेकर्तृत्वासंभवस्यदर्शितत्वात् ॥ भवतिचलो
केऽनेकप्रकाराविवक्षायोधायुध्यंतेयोधैराजायुध्यतइति ॥ अपिचास्मिन्नुपादानेकरणव्यापारोपरममात्रंविवक्ष्यतेनस्वा
तंत्र्यंकस्यचिदबुद्धिपूर्वकस्यापिस्वापेकरणव्यापारोपरमस्यदृष्टत्वात् ॥ यस्त्वयंव्यपदेशोदर्शितोविज्ञानंयज्ञंतनुतइति
सबुद्धेरेवकर्तृत्वंप्रापयति ॥ विज्ञानशब्दस्यतत्रप्रसिद्धत्वान्मनोनंतरंपाठाच्चतस्यश्रद्धैवशिरइतिचविज्ञानमयस्यात्म
नःश्रद्धाद्यवयवत्वसंकीर्तनात्श्रद्धादीनांचबुद्धिधर्मत्वप्रसिद्धेः ॥ विज्ञानंदेवाःसर्वेब्रह्मज्येष्ठमुपासतइतिचवाक्यशेषात्
॥ ज्येष्ठत्वस्यप्रथमजत्वस्यबुद्धौप्रसिद्धत्वात् ॥ सएषवाचश्चित्तस्योत्तरोत्तरक्रमोयद्यज्ञइतिचश्रुत्यंतरेयज्ञस्यवाग्बुद्धिसाध्यत्वावधारणात् ॥

इत्यादिश्रुतिषुविज्ञानशब्दस्यबुद्धौप्रसिद्धत्वात्तत्रचमनोमयकोशानंतरंपठितत्वात् श्रद्धादिलिंगाच्चबुद्धिरेवविज्ञानमित्यर्थः ॥ तत्रैवलिंगांतरमाह
॥ विज्ञानंदेवाइतिमहद्यक्षंप्रथमजंइत्यादिश्रुतौहिरण्यगर्भस्यात्मकबुद्धेर्ज्येष्ठत्वोक्तेः ॥ अत्रदेवैरिंद्रियैरुपास्यमानंज्येष्ठंब्रह्मविज्ञानंबुद्धिरेवे
त्यर्थः ॥ यस्तुपूज्यंकिंचश्रुत्यंतरेयज्ञस्यबुद्धिकार्यत्वोक्तेः अत्रापियज्ञकर्तृविज्ञानंबुद्धिरित्याह ॥ सएषइति ॥ चित्तेनध्यात्वावाचामंत्रोक्त्वायज्ञोजायते ततश्चित्तस्यवाचः पूर्वोत्तरभावोयज्ञइत्यर्थः ॥

यच्चोक्तं बुद्धेः कर्तृत्वे शक्तिवैपरीत्यप्रसंग इति तन्न विक्लिद्यंते तंदुलाः ज्वलंति काष्ठानि बिभर्ति स्थालीति स्वस्वव्यापारेषु सर्वकारकाणां क-
र्तृत्वस्वीकारादित्याह ॥ नचेति ॥ नहि बुद्ध्यादीनां कर्तृत्वे करणत्ववानो नेष्टुं न स्यादित्यत आह ॥ उपलब्धीति ॥ यथा काष्ठानां स्वव्यापारे कर्तृ-
त्वेपि पाकापेक्षया करणत्वं तथा बुद्ध्यादीनां अध्यवसायसंकल्पादिक्रियाकर्तृत्वेप्युपलब्ध्यपेक्षया करणत्वमित्यर्थः ॥ ननु तर्ह्युपलब्धिः
कस्य व्यापार इत्यत आह ॥ साचेति ॥ नहि तस्यात्मा केवलः कर्ता स्यात् यस्य यो व्यापारः स तस्य कर्त्तेति निस्थितेवित्यत आह ॥ नचेति ॥ उपल-
ब्धेर्नित्यत्वे बुद्ध्यादीनां कथं करणत्वमुक्तमिति चेत् ॥ उच्यते ॥ अखंडसाक्षिचैतन्यं बुद्धिवृत्तिभिर्भिन्नं सद्विषयावच्छिन्नत्वेन ज्ञायते ॥ त

नचबुद्धेःशक्तिविपर्ययःकरणानांकर्तृत्वाभ्युपगमेभवति ॥ सर्वकारकाणामेवस्वस्वव्यापारेषुकर्तृत्वस्यावश्यंभावि-
त्वात् ॥ उपलब्ध्यपेक्षंत्वेषांकरणानांकरणत्वं ॥ साचात्मनोनचतस्यामप्यस्यकर्तृत्वमस्ति ॥ नित्योपलब्धिस्वरूपत्वा-
त् ॥ अहंकारपूर्वकमपिकर्तृत्वंनोपलब्धुर्भवितुमर्हति अहंकारस्याप्युपलभ्यमानत्वात् ॥ नचैवंसतिकरणांतरकल्प-
नाप्रसंगोबुद्धेःकरणत्वाभ्युपगमात् ॥ समाध्यभावस्तुशास्त्रार्थवत्त्वेनैवपरिहृतोयथाप्राप्तमेवकर्तृत्वंउपादायसमा-
धिविधानात्तस्मात्कर्तृत्वमप्यात्मनउपाधिनिमित्तमेवेतिस्थितं ॥ १५ ॥ ४० ॥ परात्तुतच्छ्रुतेः ॥ ४१ ॥ ॥

थाच्चविषयावच्छिन्नचैतन्याख्योपलब्धौबुद्ध्यादीनांकरणत्वंबुद्ध्याद्युपहितात्मनःकर्तृत्वंनकेवलस्यनचबुद्धेरेवतत्कर्तृत्वंचैतन्यस्यजड-
व्यापारवत्त्वायोगादितिभावः ॥ यच्चोक्तंबुद्धेःकर्तृत्वेसएवाहंधीगम्योजीवइतितस्यकरणांतरंकल्पनीयंतथाचनाममात्रेविवादइतितत्रकेवलात्म-
नःकर्तृत्वमुक्तमितिभ्रांतिंनिरस्यति ॥ अहंकारेति ॥ सांख्यनिरासार्थंबुद्ध्यभेदेनाऽध्यस्तचिदात्मकाहंकारगतंकर्तृत्वंयदुक्तंनदहंधीगम्यस्यबुद्धि-
विशिष्टात्मनएवनतुकेवलस्यसाक्षिणोभवितुमर्हतिदृश्यधर्मस्यसाक्षिस्वभावत्वायोगात् एवंविशिष्टात्मनःकर्तृत्वेविशेषणीभूतजडबुद्धेरे-
वकरणत्वोपपत्तेर्नकरणांतरकल्पनाप्रसंगः ॥ अभ्यासंविनाकेवलबुद्धिकर्तृत्ववादिनस्तुकरणांतरप्रसंगोदुर्वारइत्यर्थः ॥ ॥

ब्र॰भा॰
टी॰
र॰प्र॰
२६८

अ॰पा॰
२।३

एवं शास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्वमात्रसाधकत्वेऽपि स्वाभाविककर्तृत्वसाधनसामर्थ्याभावादध्यस्तमेव कर्तृत्वं विध्यादिकर्तृत्वश्रुतीनामुपजीव्यम्॥ तस्मादसंगत्वविध्यादिकर्तृत्वश्रुतीनामविरोध इति सिद्धं॥ ४०॥ परात्तु तच्छ्रुतेः॥ यथा स्फटिके लौहित्याध्यासे लोहितद्रव्यं करणं तेनायं स्फटिको लोहित इत्यनुभवात्तथा कामादिपरिणामिबुद्धिरात्मनि कर्तृत्वाद्यध्यासे करणमित्युक्तं तदध्यस्तं कर्तृत्वमुपजीव्य जीवस्य कारकसंपन्नत्वादीश्वरस्य कारयितृत्वश्रुतेश्च संशयमाह॥ यदिदमिति॥ अत्रैष ह्येवेत्यादिश्रुतीनां कर्तृस्वातन्त्र्यद्योतकविध्यादिश्रुतिभिर्विरोधसमाधानात्पादसंगतिः॥ कर्ममीमांसकमतेन पूर्वपक्षयति॥ तत्रेत्यादिना बुद्ध्यादिकारकसंपन्नादीश्वरव्यतिरेके कर्तृत्वव्यतिरेकानुपलब्धेर्नेश्वरः प्रयोजकः॥ किंच प्रयोजकत्वे नैर्घृण्यादिप्रसंग इत्याह॥ क्लेशात्मकेन चेति॥ दत्तोत्तरमिदं चोद्यमिति शङ्कते॥ नन्विति॥ पूर्वं जीवस्य धर्माधर्मवत्त्वं सिद्धवत्कृत्य तत्सापेक्षत्वाद्विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं संप्रतीश्वराधीनत्वे जीवस्य कर्तृत्वे सिद्धे धर्माधर्मवत्त्वसिद्धिः॥ तद्वत्त्वसिद्धौ तत्सापेक्षकारयितृत्वसिद्धिः ईश्वरस्य कारयितृत्वसिद्धे जीवस्य कर्तृत्वसिद्धिरिति चक्रकापत्तेः कर्मसापेक्षत्वं न संभवतीत्युच्यत इत्याह सत्यमिति ॥

यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं भवति॥ आहोस्विदीश्वरापेक्षमिति भवति विचारणा॥ तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति॥ कस्मात्॥ अपेक्षाप्रयोजनाभावात्॥ अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकान्तरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति॥ तस्य किमीश्वरः करिष्यति॥ न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुहादिवदीश्वरो ऽपेक्षितव्य इति॥ क्लेशात्मकेन च कर्तृत्वेन जन्तून्संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत॥ विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यं॥ ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तं॥ सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसंभवे॥ सापेक्षत्वं चेश्वरस्य संभवति सतोर्जन्तूनां धर्माधर्मयोः तयोश्च सद्भावः सति जीवस्य कर्तृत्वे॥ तदेव चेत्कर्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्वरस्य सापेक्षत्वमुच्येत॥ ६ ॥

अस्तु कर्मानपेक्षस्य प्रवर्तकत्वं तत्राह ॥ अकृतेति ॥ अनपेक्षस्य प्रवर्तकत्वे धर्मवतो नरान् दुःखेनाधर्मवतः सुखेन योजयेत् कारुणिकत्वे वा सर्वे सुखिन एकरूपाः स्युरिति जगद्वैचित्र्यं विध्यादिशास्त्रं च न स्यात् ॥ तस्माद्विध्यादिशास्त्रार्थवत्त्वाय रागद्वेषायत्तं स्वत एव जीवस्य कर्तृत्वं वाच्यं ॥ तथा च कारयितृत्वश्रुतिविरोधः ईश्वरस्ताक्तिका वा सा श्रुतिरिति प्राप्ते सिद्धांतयति ॥ एतामिति ॥ यथा चंदनादिसामग्र्यां सत्यां ध

अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत तस्मात्स्वत एवास्य कर्तृत्वमिति ॥ एवं प्राप्तिं तु शब्देन व्यावर्त्य प्रतिजानीते परादिति ॥ अविद्यावस्थायां कार्यकारणसंघाताविवेकदर्शिनो जीवस्याविद्यातिमिरांधस्य सतः परस्मादात्मनः कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षस्य सिद्धिर्भवितुमर्हति कुतस्तच्छ्रुते ॥ यद्यपि दोषप्रयुक्तः सामग्रीसंपन्नश्च जीवः ॥ यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं ॥ तथापि सर्वास्वेव प्रवृत्तिष्वीश्वरो हेतुकर्तेति श्रुतेरवसीयते ॥ तथा हि श्रुतिर्भवति ॥ एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति ॥ य आत्मनि तिष्ठन्नात्मानमंतरो यमयतीति चैवंजातीयका ॥ ४१ ॥ नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातां ॥ अकृताभ्यागमश्च जीवस्येति नेत्युच्यते ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥ तुशब्दश्चोदितदोषव्यावर्तनार्थः ॥ कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणस्तदपेक्ष एवैनमीश्वरः कारयति ततश्चैते चोदिता दोषा न प्रसज्यंते ॥ जीवकृतधर्माधर्मवैषम्यापेक्ष

मेव्यतिरेके सुखस्यातिरेकग्रहाभावेपि पुण्यो वै पुण्येन कर्मणा भवतीत्यादिशास्त्रप्रामाण्यादेव धर्मस्य हेतुत्वसिद्धिः एवमीश्वरस्यापि शास्त्रबलात्कारयितृत्वसिद्धिरिति भावः ॥ ४१ ॥ धर्माधर्माभ्यामेव फलवैषम्यसिद्धेरलमीश्वरेणेत्याशंक्य बीजे रेवांकुरवैषम्यसिद्धेः पर्जन्यवैयर्थ्यं स्यात् ॥ यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वान्न वैयर्थ्यं तर्हीश्वरस्यापि साधारणहेतुत्वान्न

वत्तत्फलानि विषमं विभजेत्पर्जन्यवच्च

वैषम्यधर्म्यमित्याह ॥ पर्जन्यवदिति ॥

[illegible] हीश्वरो निमित्तमात्रेण ॥ ६ ॥

शा.भा. दृष्टांतंविवृणोति ॥ यथेति ॥ अतिदीर्घवल्ल्योगुच्छाःपुष्पस्तबकावा ॥ गुल्मास्तुह्रस्ववल्ल्यइतिभेदः ॥ किमीश्वरस्यकारयितृत्वे अ.पा.
टी. जीवस्यकर्तृत्वंनस्यात् इत्यापाद्यतेउतचक्रकापत्तिर्वानाद्यइत्याह ॥ नैषदोषइति ॥ अध्यापकाधीनस्यवटोःसुस्वाध्ययनकर्तृत्व २।३
र.प्र. दर्शनादितिभावः चक्रकंनिरस्यति ॥ अपिचेति ॥ अनवद्यंजीवस्यकर्तृत्वंईश्वरस्यकारयितृत्वंचेतिशेषः ॥ ईश्वरस्यसापेक्षत्वेवि
२६९ यथालोकेनानाविधानांगुच्छगुल्मादीनांव्रीहियवादीनांचासाधारणेभ्यःस्वस्वबीजेभ्योजायमानानांसाधारणंनि
मित्तंभवतिपर्जन्यः ॥ नह्यसतिपर्जन्येरसपुष्पफलपलाशादिवैषम्यंतेषांजायते ॥ नाप्यसत्सुस्वस्वबीजेषु ॥ एवं
जीवकृतप्रयत्नापेक्षईश्वरस्तेषांशुभाशुभंविदध्यादितिश्लिष्यते ॥ ननुकृतप्रयत्नापेक्षत्वमेवजीवस्यपरायत्तेक
र्तृत्वेनोपपद्यते ॥ नैषदोषःपरायत्तेपिहिकर्तृत्वेकरोत्येवजीवः ॥ कुर्वंतंहितमीश्वरःकारयति ॥ अपिचपूर्वप्रयत्न
मपेक्ष्यइदानींकारयतिपूर्वतरंचप्रयत्नमपेक्ष्यपूर्वमकारयत् इतिअनादित्वात्संसारस्येत्यनवद्यं ॥ कथंपुनरवग
म्यतेकृतप्रयत्नापेक्षईश्वरइतिविहितप्रतिषिद्धावैयर्थ्यादिभ्यइत्याह ॥ एवंहिस्वर्गकामोयजेतब्राह्मणोनहं
तव्यइत्येवंजातीयकस्यविहितस्यप्रतिषिद्धस्यचावैयर्थ्यंभवति अन्यथातदनर्थकंस्यात् ॥ ईश्वरएवहिविधि राम.
प्रतिषेधयोर्नियुज्येतअत्यंतपरतंत्रत्वाज्जीवस्य ॥ तथाविहितकारिणमप्यनर्थेनसंसृजेत् ॥ प्रतिषिद्धकारिण २६९
मपिअर्थेन ॥ ततश्चप्रामाण्यंवेदस्यास्तमियात् ॥ ईश्वरस्यचात्यंतानपेक्षत्वेलौकिकस्यापिपुरुषकारस्यवैयर्थ्यं ॥

ध्यादिशास्त्रप्रामाण्यान्यथानुपपत्तिंप्रमाणयति कथमित्यादिना ॥ एवंसापेक्षत्वेसत्यवैयर्थ्यंभवति अन्यथाऽनपेक्षत्वेवैयर्थ्यंप्र
पंचयति ॥ ईश्वरइति ॥ तयोःस्थानेसएवनियुज्येत अभिषिच्येत तयोःकार्यंसएवकुर्यात् इतियावत् ॥ तथाचजीवस्यनिरपेक्षेश्वर
परतंत्रत्वाद्विध्यादिशास्त्रमकिंचित्करमनर्थकंस्यादितिसंबंधः पुरुषकारःप्रयत्नः ॥

आदिशब्दार्थमाह नचेति॥ पूर्वोक्तदोषोऽकृताभ्यागमादिः तस्मात्कर्मसापेक्षेश्वरस्य कारयितृत्वादेष ह्येवेत्यादिश्रुतेर्विध्यादिश्रुत्यविरोध इति सिद्धं॥ ४१॥ अंश एके॥ नित्यः स्वप्रकाशोऽनणुः अकर्त्ता जीव इति शोधितत्वंपदार्थस्यात्र ब्रह्मैक्यसाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात्पादसंगतिः॥ पूर्वपक्षे प्रत्यगभिन्नब्रह्मासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः पूर्वोक्तोपकार्योपकारकभावासिद्ध्यै जीवेशयोः संबंधं विषयीकृत्य द्विविधदृष्टान्तदर्शनात्संशयमाह॥ ततश्चेति॥ प्रसिद्धस्वस्वामित्वसंबंधसंभवाद्यः कश्चित्संबंध इत्यनियमो न युक्त इत्यर्थः

तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसंगश्चेत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति॥ ९६॥ ४२॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥ ४३॥ जीवेश्वरयोरुपकार्योपकारकभाव उक्तः॥ स च संबद्धयोरेव लोके दृष्टो यथा स्वामिभृत्ययोर्यथा वाग्निविस्फुलिंगयोः॥ ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत्संबंध आहोस्वित् अग्निविस्फुलिंगवदिति॥ अस्यां विचिकित्सायां अनियमो वा प्राप्नोति॥ अथ वा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबंध इति प्राप्नोति॥ अतो ब्रवीत्यंश इति जीव ईश्वरस्यांशो भवितुमर्हति यथाग्नेर्विस्फुलिंगः अंश इवांशः नहि निरवयवस्य मुख्योंशः संभवति॥ कस्मात्पुनर्निरवयवत्वात् स एव न भवति॥ नानाव्यपदेशात् सोन्वेष्टव्यः स विजिज्ञासितव्य एतमेव विदित्वा मुनिर्भवति॥ य आत्मनि तिष्ठन्नात्मानमंतरो यमयतीति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते॥ १ चेत्याह॥ अथवेति॥ अनेन य आत्मनि तिष्ठन्नित्यादिश्रुतिप्रसिद्धभेदको

टिर्दर्शिता एवं तत्त्वमसीत्यादिश्रुतिसिद्धाभेदकोटिर्द्रष्टव्या॥ तथा च भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति संबंधानिश्चयात्संबंधापेक्षस्य पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात्संगतिः लोकसिद्धानर्थात्मकभेदानुवादित्वेन भेदश्रुतीनां दुर्बलत्वादज्ञानफलवदभेदश्रुत्यनुसारेण कल्पितभेदनिबंधनोंशांशिभावसंबंध इति सिद्धान्तयति॥ अत इत्यादिना॥ अग्नेः सांशत्वेपि निष्कलेश्वरस्य कथं सांशत्वमत आह॥ अंश इति॥ जी

चरन्तुपगः॥

भेदश्चेत्स्वस्वामिभावोयुक्तोनांशांशिभावइतिशंकते ॥ ननुचेति ॥ अभेदस्यापिसत्त्वादंशांशिभावइत्याह ॥ अतइति ॥ वंचसिगच्छसिय
दास्तेयेनामरूपेनिर्मायप्रविश्यव्यवहरन्वर्ततेतंविद्वानमृतोभवतीतिश्रुत्यर्थः श्रुतिसिद्धाभेदेयुक्तिमाह ॥ चैतन्यंचेति ॥ जीवोब्रह्मैव

ननुचायंनानाव्यपदेशःसुतरांस्वामिभृत्यसारूप्येयुज्यतइत्यतआह ॥ अन्यथाचापीति ॥ नचनानाव्यपदेशादेवकेवला
दंशत्वप्रतिपत्तिः ॥ किंतर्ह्यन्यथाचाप्यव्यपदेशोभवत्यनानात्वस्यप्रतिपादकः ॥ तथाह्येकेशाखिनोदाशकितवादिभावंब्र
ह्मणआमनंति आथर्वणिकाब्रह्मसूक्तेब्रह्मदाशाब्रह्मदासाब्रह्मैवेमेकितवाइत्यादिनादाशायएतेकैवर्ताःप्रसिद्धाःयेचा
मीदासाःस्वामिष्वात्मानमुपक्षपयंतियेचान्येकितवाद्यूतकृतस्तेसर्वेब्रह्मैवेति हीनजंतूदाहरणेनसर्वेषामेवनामरू
पकृतकार्यकरणसंघातप्रविष्टानांजीवानांब्रह्मत्वमाह ॥ तथान्यत्रापिब्रह्मप्रक्रियायामेवायमर्थःप्रपंच्यते ॥ त्वंस्त्रीत्वं
पुमानसित्वंकुमारउतवाकुमारी ॥ त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमुखइति ॥ सर्वाणिरूपाणिविचित्यधीरो
नामानिकृत्वाभिवदन्यदास्तइतिच ॥ नान्योतोस्तिद्रष्टेत्यादिश्रुतिभ्यश्चास्यार्थस्यसिद्धिः चैतन्यंचाविशिष्टंजीवेश्वरयोर्य
थाग्निविस्फुलिंगयोरौष्ण्यं ॥ अतोभेदाभेदावगमाभ्यामंशत्वावगमः ॥४३॥ कुतश्चांशत्वावगमः ॥ मंत्रवर्णात् ॥४४॥ मं
त्रवर्णश्चैतमर्थमवगमयति ॥ तावानस्यमहिमाततोज्यायांश्चपूरुषः ॥ पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीति ॥
अत्रभूतशब्देनजीवप्रधानानिस्थावरजंगमानिनिर्दिशति ॥ अहिंसन्सर्वभूतान्यन्यत्रतीर्थेभ्यइतिप्रयोगात् ॥ अं
शःपादोभागइत्यनर्थांतरंतस्मादप्यंशत्वावगमः ॥४४॥ कुतश्चांशत्वावगमः ॥ ९चेतनत्वाद्ब्रह्मवदित्यर्थः ॥४३॥ अस्यसह

स्रशीर्षःपुरुषस्यतावानयंप्रपंचोमहिमाविभूतिःपुरुषस्तुतस्मात्प्रपंचात्ज्यायान्महत्तरःभूतानिदेहिनोजीवाइत्यत्रनियामकमाह ॥ अ
हिंसन्निति ॥ तीर्थानिशास्त्रोक्तकर्माणितेभ्योन्यत्रसर्वप्राणिहिंसामकुर्वन् ब्रह्मलोकमाप्नोतीत्यर्थः ॥ अत्रभूतशब्दस्यप्राणिषुप्रयोगात्सूत्रो

क्तमंत्रेपितथेतिभावः ॥ भूतानांपादत्वेप्यंशत्वंकुतस्तत्राह
अंशःपादइति ॥४४॥

जीवस्यपुरुषसूक्तमंत्रोक्तभगवदंशत्वेभगवद्गीतामुदाहरतिसूत्रकारः॥अपिचेति॥अत्यंतभिन्नेष्वीशित्रीशितव्यभावप्रसिद्धेः॥ईशित-
व्यजीवस्यकथमीश्वरांशत्वमित्याशंकाकल्पितभेदेनापीशितव्यत्वोपपत्तेरनन्यथासिद्धाभेदशास्त्रबलादंशत्वमित्याह॥यत्त्वित्यादिना
औपाधिकेईश्वरस्यनियंतृत्वेजीवस्यचतन्नियंता किंनस्यात् इत्यतआह निरतिशयेतिनितरांहीनः शरीराद्युपाधिः आज्ञानिकोपाधिनात-
तस्यादीशेशितव्यव्यवस्थानवस्तुतः॥तदुक्तंसुरेश्वराचार्यैः ईशेशितव्यसंबंधः प्रत्यगज्ञानहेतुजः सम्यग्ज्ञानेनतमोध्वस्तावीश्वराणामपीश्व-

अपिचस्मर्यते॥४५॥ईश्वरगीतास्वपिचेश्वरांशत्वंजीवस्यस्मर्यते॥ममैवांशोजीवलोकेजीवभूतःसनातनइतितस्मादप्यं-
शत्वावगमः॥यत्तूक्तंस्वामिभृत्यादिष्विवेशित्रीशितव्यभावोलोकेप्रसिद्धइति॥यद्यप्येषालोकेप्रसिद्धिस्तथापिशास्त्रा-
त्त्वंशांशित्वमीशित्रीशितव्यभावश्चनिश्चीयते॥निरतिशयोपाधिसंपन्नश्चेश्वरोनिहीनोपाधिसंपन्नान्जीवान्प्रशास्ति-
तिनकिंचिद्विप्रतिषिध्यते॥४५॥अत्राह॥ननुजीवस्येश्वरांशत्वाभ्युपगमेतदीयेनसंसारदुःखोपभोगेनांशिनईश्वरस्या-
पिदुःखित्वंस्यात्॥यथालोकेहस्तपादाद्यन्यतमांगगतेनदुःखेनांगिनोदेवदत्तस्यदुःखित्वंतद्वत्॥ततश्चतत्प्राप्तानांमह-
त्तरंदुःखंप्राप्नुयात्॥अतोवरंपूर्वावस्थःसंसारएवास्त्वितिसम्यग्दर्शनानर्थक्यप्रसंगा दितिअत्रोच्यते ॥प्रकाशा-
दिवन्नैवंपरः॥४६॥यथाजीवःसंसारदुःखमनुभवतिनैवंपरईश्वरोऽनुभवतीतिप्रतिजानीमहे॥जीवोह्यविद्यावेश-
वशात्देहाद्यात्मभावमिवगत्वातत्कृतेनदुःखेनदुःख्यहमितिअविद्ययाकृतंदुःखोपभोगमभिमन्यतेनैवंपरमेश्वरस्यदे-

रइति॥४५॥उत्तरसूत्रमवतारयति॥अत्राहेति॥ईश्वरःस्वांशदुःखेदुःखीअंशित्वाद्देव((हाद्यात्मभावोदुःखाभिमानोवास्ति
दत्तवदित्यर्थः॥ततः किंतत्राह॥ततश्चेति॥ज्ञानात्सर्वांशदुःखसमष्टिप्राप्त्यपेक्षयासंसारएववरंतत्रस्वदुःखमात्रानुभवादित्यर्थः॥नैवंप-
रइतिप्रतिज्ञांविभजतेयथाजीवइति॥देवदत्तदृष्टांतेभ्रांतिकामकर्मरूपदुःखसामग्रीमत्त्वमुपाधिः तदभावान्नेश्वरस्यदुःखित्वप्राप्तिः॥

शा·भा· उक्तं चैतद्भेदेपि विंबप्रतिविंबयोर्धर्मव्यवस्थेति भावः दुःखस्य भ्रांतिकृतत्वं प्रपंचयति॥ जीवस्यापीत्यादिना॥ भ्रांतौ सत्यां दुःखमित्यन्वयमुक्त्वा अ·पा

टी· भ्रांत्यभावे दुःखाभावदर्शनाच्च भ्रांतिकृतं दुःखमिति निश्चीयत इत्याह॥ व्यतिरेकेति इतरेषु अभिमानशून्येष्वित्यर्थः जीवस्यापि सम्यग्ज्ञाने दुः २।३

र·प्र·
२७१

जीवस्यापि अविद्याकृतनामरूपनिर्वृत्तदेहेंद्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोस्ति॥ यथा च स्वदेहगतदाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रांत्याऽनुभवति॥ यथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रांत्यैवानुभवत्यहमेव पुत्रोहमेव मित्रमिति॥ एवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविशमानस्ततश्च निश्चितमेतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति॥ व्यतिरेकदर्शनाच्चैवमवगम्यते तथाहि पुत्रमित्रादिमत्सु बहुषूपविष्टेषु तत्संबंधाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाद्युद्घोषिते येषामेव पुत्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकादीनां॥ अतश्च लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनोन्यद्वस्त्वंतरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति॥ तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसंगः॥ प्रकाशादिवदिति निदर्शनोपन्यासः॥ यथा प्रकाशः सौरश्चांद्रमसो वा वियद्व्याप्यावतिष्ठमानोंगुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भावमिव प्रतिपद्यमानोपि न परमार्थतस्तत्तद्भावं प्रतिपद्यते॥ यथा वाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोपि न परमार्थतो गच्छति॥ यथा चोदशरावादिकंपनात्तद्गते सूर्यप्रतिबिंबे कंपमानेपि न तद्वान्सूर्यः कंपते॥ एवमविद्याप्रत्युपस्थापिते बुद्ध्याद्युपहिते जीवाख्येंशे दुःखायमानेपि न तद्वानीश्वरो दुःखायते॥ जीवस्यापि तु दुःखप्राप्तिरविद्यानिमित्तैवे राम २७१

स्वाभावो दृष्टः॥ किमु वाच्यं नित्यसर्वज्ञेश्वरस्येत्याह॥ अतश्चेति॥ एवमंशित्वहेतोः सोपाधित्वमुक्त्वा योंशी स वस्तुतः स्वांशधर्मवानिति व्याप्तिं स्थलत्रये व्यभिचारयति॥ प्रकाशादिवदिति॥ वस्तुतः स्वांशदुःखित्वसाध्यस्य देवदत्तदृष्टांतेनैवैकल्यमप्याह॥ जीवस्येति॥ ६॥ ६॥

कस्मिंनदुःखित्वसाध्यंतुभ्रांत्याद्यभावादीश्वरेनास्तीत्युक्तं किंचजीवस्येश्वरस्यचावस्तुतोदुःखित्वानुमानंनयुक्तंआगमबाधादित्याह॥ तथाचेति॥ दुःखित्वेनज्ञावोपदेशोनस्यादित्यर्थः॥ ४६॥ स्मृत्याप्यनुमानंबाध्यमित्याहस्मरंतिचेति सूत्रं व्याचष्टे स्मरंतीति॥ तत्रजीवपरयोर्मध्ये कर्मात्माकर्माश्रयोजीवः दशेंद्रियाणिपंचप्राणाःमनोबुद्धिश्चेतिसप्तदशसंख्याकोराशिर्लिंगं॥ सूत्रेचशब्दःश्रुतिसमुच्चयार्थइत्याह॥

तथाचाविद्यानिमित्तंजीवभावव्युदासेनब्रह्मभावमेवजीवस्यप्रतिपादयंतिवेदांतास्तत्त्वमसीत्येवमादयस्तस्मान्नास्ति। जैवेनदुःखेनपरमात्मनोदुःखित्वप्रसंगः॥ ४६॥ स्मरंतिच॥ ४७॥ स्मरंतिचव्यासादयो यथाजैवेनदुःखेननपरमात्मा दुःखायतइति॥ तत्रयःपरमात्माहिसनित्योनिर्गुणःस्मृतः॥ नलिप्यतेफलैश्चापिपद्मपत्रमिवांभसा॥ कर्मात्मात्वपरोयोसौमोक्षबंधैःसयुज्यते॥ ससप्तदशकेनापि—— राशिनायुज्यतेपुनरिति॥ चशब्दात्समामनंतिचेतिवाक्यशेषः॥ तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीति॥ एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यइतिच॥ ४७॥ अत्राह॥ यदितर्हिएकएवसर्वेषांभूतानामंतरात्मास्यात् कथमनुज्ञापरिहारौस्यातां लौकिकौवैदिकौचेति॥ ननुचांशोजीवईश्वरस्येत्युक्तं॥ तद्भेदाच्चानुज्ञापरिहारौतदाश्रयावव्यतिकीर्णावुपपद्येतेकिमत्रचोद्यतइतिउच्यते॥ नैतदेवमनंशत्वमपिजीवस्याभेदवादिन्यःश्रुतयःप्रतिपादयंति॥ तत्सृष्ट्वातदेवानुप्राविशत्॥ नान्योतोस्तिद्रष्टामृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतितत्त्वमसिअहंब्रह्मास्मीत्येवंजातीयकाः॥ ननुभेदाभेदावगमाभ्यामंशत्वंप्रसिद्ध्यतीत्युक्तं॥ स्यादेतदेवंयद्युभावपिभेदाभेदौप्रतिपिपादयिषितौस्यातां॥ अभेदएवत्वत्रप्रतिपिपादयिषितोब्रह्मात्मत्वप्रतिपत्तौपुरुषार्थसिद्धेः॥

चशब्दादिति॥ यथाआदित्यःप्रकाश्यदोषैर्नलिप्यतेतथेत्यर्थः॥ यतोवास्योऽसंगःतस्मान्नलिप्यते॥ एवमंशित्वकृतमीश्वरेदोषंनिरस्यांशइत्युक्तंजीवस्यांशत्वंदेहाद्युपाधिकमितिस्फुटयितुमत्यंतस्वरूपैक्यमादायाक्षिपति॥ अत्राहेत्यादिना॥ कथंतर्हीत्यन्वयः॥ तद्भेदात् अंशभेदात्॥

शा.भा.
टी.
र.प्र.
२७२

अ.पा.
२।३

निरवयवब्रह्मणोमुख्यांशोनसंभवतीतिवदतासिद्धांतिनाभेदोनास्तीत्युक्तंभवतिभेदाभावेचांशांशित्वाभावादनुज्ञादिभेदव्यवहारानुपपत्तिरि
त्याक्षेपाभिप्रायः॥नवयंवेदस्यासत्वंनरश्रृंगवद्ब्रूमः॥किंतुमिथ्यात्वंवदामः॥तथाचदेहाद्युपाधिभेदेनांशजीवानामाब्रह्मबोधात्कल्पितभेद॰
व्यवहारोपपत्तिरितिसूत्रेणसमाधत्ते नामित्यादिना॥ननुभ्रांतेःकुतश्चिन्निवृत्तौव्यवहारविच्छेदःस्यात् इत्यतआह॥नह्यस्याइत्यादिनाप्रत

स्वभावप्राप्तस्तुभेदोनूद्यते॥नचनिरवयवस्यब्रह्मणोमुख्योंशोजीवःसंभवतीत्युक्तं॥तस्मात्परस्यैवैकःसर्वेषांभूतानामं
तरात्माजीवभावेनावस्थितइत्यतोवक्तव्याऽनुज्ञापरिहारोपपत्तिस्तांब्रूमः॥अनुज्ञापरिहारौदेहसंबंधाज्ज्योतिरादिवत्॥४८
ऋतौभार्यामुपेयादित्यनुज्ञा॥गुर्वंगनांनोपगच्छेदितिपरिहारः॥तथाग्नीषोमीयंपशुंसंज्ञपयेदित्यनुज्ञा॥नहिंस्यात्सर्वाभूतानी
तिपरिहारः॥एवंलोकेपिमित्रमुपसेवितव्यमित्यनुज्ञा॥शत्रुःपरिहर्तव्यइतिपरिहारः॥एवंप्रकारावनुज्ञापरिहारा
वेकत्वेप्यात्मनोदेहसंबंधात्स्यातां॥देहैःसंबंधोदेहसंबंधः॥कःपुनर्देहसंबंधःदेहादिरयंसंघातोहमेवेत्यात्मनि
विपरीतप्रत्ययोत्पत्तिर्दृष्टाचसासर्वप्राणिनांअहंगच्छाम्यहमागच्छामिअहमंधोहमनंधोहंमूकोहममूकोहंमूढोहं
पंडितइत्येवमात्मिका॥नह्यस्याःसम्यग्दर्शनादन्यन्निवारकमस्ति॥प्राक्तुसम्यग्दर्शनात्प्रततैषाभ्रांतिःसर्वजंतुषु
॥तदेवमविद्यानिमित्तदेहाद्युपाधिसंबंधकृताद्विशेषादैकात्म्याभ्युपगमेपिअनुज्ञापरिहारावबकल्प्येते॥सम्यग्दर्शिनस्त
र्ह्यनुज्ञापरिहारानर्थक्यंप्राप्तं॥नतस्यकृतार्थत्वान्नियोज्यत्वानुपपत्तेः॥हेयोपादेययोर्हिनियोज्योनियोक्तव्यःस्यात्॥आ
त्मनस्त्वतिरिक्तंहेयमुपादेयंवावस्त्वपश्यन् कथंनियुज्येत॥नचात्मात्मन्येवनियोज्यःस्यात्॥शरीरव्यतिरेकदर्शिनएवनि
योज्यत्वमितिचेत्॥

तासंततनाविशेषोभेदः॥अनियोज्यत्वाद्ब्रह्मविदःशास्त्रानर्थक्यमिष्टमित्याह॥नतस्येति॥नियोगविषयद्वैताभावादात्मन्यसाध्येनियोगानुप
पत्तेर्नब्रह्मविन्नियोज्यइत्यर्थः॥नन्वामुष्मिकफलहेतुककर्मणिदेहभिन्नात्मविवेकिनएवाधिकारोवाच्यस्तथाचब्रह्मविन्नियोज्यःविवेकित्वा
त्कर्माधिकारिवदितिशंकते॥शरीरव्यतिरेकेति॥

।पुस्तकांतरेषु अहंपंडितइत्यस्यस्थानेऽहममूढइतिपाठोदृश्यते॥मू॰५पं॥

परोक्षविवेकस्यापरोक्षभ्रमाविरोधित्वात्कर्मिणो देहाभेदभ्रमोऽस्ति तथा च भ्रम उपाधिरिति परिहरन्ति॥ नेत्यादिना यथा व्योम देहाद्भिन्नं तद्वद्देह
भिन्नमपश्यतः भ्रान्तस्येत्यर्थः॥ ब्रह्मविन्न नियोज्यः अभ्रान्तत्वात्सुषुप्तवदित्याह॥ नहीति॥ देहादिष्वसंहतत्वदर्शिनः संहतत्वदर्शनशून्यस्य भेद
भ्रान्तिरहितस्य सुषुप्तस्येति यावत्॥ अज्ञस्यापि भ्रान्त्यभावकाले नियोज्यत्वं न दृष्टं किमु वाच्यमात्मविद इत्यर्थः॥ अनियोज्यत्वे बाधकमाशं
क्य परिहरति न चेति॥ विषयवैराग्यस्य ज्ञानार्थमभ्यस्तस्य ज्ञानानन्तरमनुवृत्त्या विषयेषु प्रवर्त्तकरागनिवृत्तेर्नातिप्रसंग इत्यर्थः॥ तदुक्तं

न तत्संहतत्वाभिमानात्॥ सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत एवात्मनो
नियोज्यत्वाभिमानो न हि देहाद्यसंहतत्वदर्शिनः कस्यचिदपि नियोगो दृष्टः किमुतैकात्म्यदर्शिनः॥ न च नियोगाभा
वात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसंगः॥ सर्वत्राभिमानस्यैव प्रवर्त्तकत्वात्॥ अभिमानाभावाच्च सम्यग्दर्शिनः॥ तस्मादे
हसंबंधादेवानुज्ञापरिहारौ ज्योतिरादिवत्॥ यथा ज्योतिष एकत्वेपि अग्निः क्रव्यादः परिह्रियते नेतरो यथा च प्रका
श एकस्यापि सवितुरमेध्यदेशसंबंधः परिह्रियते नेतरः शुचिभूमिप्रविष्टः यथा भौमाः प्रदेशा वज्रवैडूर्यादय उपा
दीयन्ते भौमा अपि संतो नरकलेवरादयः परिह्रियन्ते॥ यथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते तदेव जात्यंतरे
परिवर्ज्यते तद्वत्॥ ४८॥ असंततेश्चाव्यतिकरः॥ ४९॥ स्यातां नामानुज्ञापरिहारावेकस्याप्यात्मनो देहवि
शेषयोगात्॥ यस्त्वयं कर्मफलसंबंधः स चैकात्म्याभ्युपगमे व्यतिकीर्येत स्वाम्यैकत्वादिति चेत् नैतदेवमसंततेः॥

भगवता सोप्यस्य परं दृष्ट्वा निवर्त्तत इति॥ एवमनुज्ञादिप्रसंगेनानियोज्यत्वं विदुष उक्त्वा प्रकृतमुपसंहरति॥ तस्मादिति॥ एकस्याप्युपाधि
भेदात् अनुज्ञापरिहारयोर्दृष्टांतमाह॥ ज्योतिरिति॥ क्रव्यं मांसमत्तीति क्रव्यादोऽशुचिः श्मशानाग्निरित्यर्थः॥ ४८॥ शंकोत्तरत्वेन सूत्रं व्याचष्टे॥
स्यातामित्यादिना यद्यपि स्थूलदेहसंबंधादुपादानपरित्यागौ स्यातां तथाप्यन्यकृतकर्मफलमितरेणापि भुज्येतेति कर्मफलव्यतिकरः सांकर्यं

ब्र.भा.
टी.
र.प्र.
२७३

अ.पा.
२१२

स्याद्देहविशिष्टस्य स्वर्गादिभोगाः योगेनाविशिष्टात्मन एकस्यैव भोक्तृत्वात् तस्मात्स्वर्गी नरकी चेति व्यवस्थासिद्धये आत्मस्वरूपभेदो वाच्य इति शंकार्थः भवेत्तदा सांकर्यं यद्यनुपहितात्मन एव भोक्तृत्वं स्यात् न त्वेतदस्ति तद्गुणसारत्वादित्यत्राभीष्टस्यापि बुद्ध्युपहितस्यैव कर्तृत्वादिस्थापनात् तथा च बुद्धेः परदेहासंबंधात्तदुपहितजीवस्य नास्ति परदेहसंबंध इति बुद्धिभेदेन भोक्तृभेदात्कर्मादिसांकर्यमिति समाधानार्थः ॥४९॥ अंश इत्याद्यसूत्रे जीवस्यांशत्वं घटाकाशस्येवोपाध्यवच्छेदरूपमुक्तं संप्रति एवकारेणावच्छेदपक्षारुचिं सूचयन् रूपंरूपं प्रतिरूपो बभूवेत्यादि श्रुतिसिद्धं प्रतिबिंबपक्षमुपन्यस्यति भगवान्सूत्रकारः ॥ आभास एव चेति ॥ परमात्मैवानुपहितो जीवो न भवति ॥ उपाध्यनुभवात् ॥ नापि ततो

नहि कर्तुर्भोक्तुश्चात्मनः संततिः सर्वैः शरीरैः संबंधोस्ति उपाधितंत्रो हि जीव इत्युक्तं ॥ उपाध्यसंतानाच्च नास्ति जीवसंतानः ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति ॥४९॥ आभास एव च ॥५०॥ आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यो न स एव साक्षात् नापि वस्त्वंतरं ॥ अतश्च यथा नैकस्मिन् जलसूर्यके कंपमाने जलसूर्यकांतरं कंपते ॥ एवं नैकस्मिन् जीवे कर्मफलसंबंधिनि जीवांतरस्य तत्संबंधः ॥ एवमप्यव्यतिकर एव कर्मफलयोः आभासस्य चाविद्याकृतत्वात्तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोपपत्तिः

भिन्नः ॥ स एष इह प्रविष्ट इत्याद्यभेदश्रुतिस्मृतिविरोधात्तस्मादविद्यातत्कार्यबुद्ध्यादिप्रतिबिंब एव जीव इत्यर्थः ॥ अस्मिन्पक्षे बुद्धिप्रतिबिंबभेदात्स्वर्गी नरकीत्यादिव्यवस्था जीवत्वस्याविद्यकत्वाद्विद्यया मोक्षश्चेत्युपपद्यत इत्याह ॥ अतश्चेत्यादिना यस्त्वयं भास्करस्य प्रलापः प्रतिबिंबस्य नोपाधिसंसृष्टतया कल्पितत्वं किंतु स्वरूपेणैवातः कल्पितप्रतिबिंबस्य मुक्तौ स्थित्ययोगान्न जीवत्वमिति स सिद्धांतरहस्याज्ञानकृत इत्युपेक्षणीयः ॥ यदि दर्पणे मुखं मुक्तौ रजतवत्कल्पितं स्यात्तदा नेदं रजतमिति स्वरूपबाधवन्नेदं मुखमिति बाधः स्यात् ॥ अतो नास्ति दर्पणे मुखमिति संसर्गमात्रबाधान्मदीयमुखमेवेदमित्यबाधितमुखाभेदानुभवात्संसृष्टत्वेनैव कल्पितत्वं प्रवेशवाक्योक्त्याविकृतब्रह्मण एव प्रतिबिंबभावाख्यप्रवेशोक्तेर्न स्वरूपकल्पना पराक्रांतं चात्र दर्पणटीकायामाचार्यैरित्युपरम्यते ॥ ५० ॥

राम
२७३

एवं स्वमते स्वरूपैक्येप्युपहितजीवभेदादसांकर्यमुक्तं संप्रति सूत्रे चकारसूचितं परेषां सांकर्यं वक्तुमुपक्रमते ॥ येषामित्यादिना बुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः नवात्मविशेषगुणाः सन्निधानादीत्यादिपदादौदासीन्यमुक्तं ॥ सांख्यः स्वाभिप्रायं शंकते ॥
स्यादेतदिति सर्वेषां पुंसां प्रकृतिसान्निध्याद्यविशेषेपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्तते ॥ तथा चोद्देश्यपुरुषार्थनियतामप्रधा

येषां तु बहव आत्मानस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति ॥ कथं बहवो विभवश्चात्मानश्चैतन्यमात्रस्वरू
पा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति सांख्याः ॥ सति बहुत्वे विभुत्वे च घटकु
ड्यादिसमानाः द्रव्यमात्रस्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांसि अचेतनानि तत्रात्मद्रव्याणां मनोद्र
व्याणां च संयोगान्नवेच्छादयो वैशेषिका आत्मगुणा उत्पद्यन्ते ते चाव्यतिरेकेण प्रत्येकमात्मसु समवयन्ति स संसारस्तेषां
नवानामात्मगुणानामत्यन्तानुत्पादो मोक्ष इति काणादाः ॥ तत्र सांख्यानां तावच्चैतन्यस्वरूपत्वात्सर्वात्मनां सन्नि
धानाद्यविशेषाच्चैकस्य सुखदुःखसंबंधे सर्वेषां सुखदुःखसंबंधः प्राप्नोति ॥ स्यादेतत् प्रधानप्रवृत्तेः पुरुषकैव
ल्यार्थत्वात् व्यवस्था भविष्यति ॥ अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात् तथा चानिर्मोक्षप्रसंगः प्र
सज्येतेति ॥ नैतत्सारं न ह्यभिलषितसिद्धिनिबंधना व्यवस्था शक्या विज्ञातुं उपपत्त्या तु कयाचित् व्यवस्थोच्येत ॥
असत्यां पुनरुपपत्तौ कामं माभूदभिलषितं पुरुषकैवल्यं ॥ प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः ॥ काणादाना
मपि यदैकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि नांतरीयकः संयोगः स्यात् संनिधानाद्यविशेषात् ॥ श्री६ ॥

नप्रवृत्तिरिति भोगादिव्यवस्था अन्यथा नियतप्रवृत्त्यनंगीकारे स्वमाहात्म्यख्यापनार्था प्रधानस्य प्रवृत्तिरित्युद्देश्यविघातः स्यादित्यर्थः ॥ जड
प्रधानस्योद्देश्यविवेकाभावात् पुरुषार्थस्याप्यनागतस्याचेतनस्यानियामकत्वान्न व्यवस्था मानयुक्तिशून्यत्वादित्याह नैतदिति ॥ यो हि नियाम
काभावेनोद्देश्यविघातमापादयति तं प्रति तस्यैवापादनमिष्टमिति भा
वः तार्किकमतेपि भोगादिसांकर्यमित्याह ॥ काणादानामिति ॥ ६ ॥

हेतुर्मनःसंयोगः फलंसुखादि ॥५०॥ यदात्माद्दष्टकृतो योमनःसंयोगःसनदात्मनएवसुखादिहेतुरितिव्यवस्थांशंकते ॥ स्यादेतदिति ॥ सूत्रेणपरिहरति ॥नेत्याहेति ॥ पूर्ववन्मनःसंयोगवददृष्टस्यापिसर्वात्मसाधारणत्वान्नव्यवस्थेत्यर्थः ॥५१॥ रागादिनियमात्तज्जादृष्टनियमइत्याशंक्योत्तरत्वेनसूत्रंगृह्णा

ततश्चहेत्वविशेषात्फलाविशेषइत्येकस्यात्मनःसुखदुःखयोगेसर्वात्मनामपिसमानंसुखदुःखित्वंप्रसज्येत ॥५०॥ स्यादेतद दृष्टनिमित्तोनियमोभविष्यतीतिनेत्याह ॥ अदृष्टाऽनियमात् ॥५१॥ बहुष्वात्मसुआकाशवत्सर्वगतेषुप्रतिशरीरंबाह्याभ्यंतराऽविशेषेणसन्निहितेषुमनोवाक्कायैर्धर्माधर्मलक्षणंअदृष्टमुत्पद्यते ॥ सांख्यानांतावत्तदनात्मसमवायिप्रधानवर्त्तिप्रधानसाधारण्यान्नप्रत्यात्मंसुखदुःखोपभोगस्यनियामकमुपपद्यते ॥ काणादानामपिपूर्ववत्साधारणेनात्ममनःसंयोगेननिर्वर्तितस्यादृष्टस्यास्यैवात्मनइदमदृष्टमितिनियमहेत्वभावादेषएवदोषः ॥५१॥ स्यादेतत् ॥ अहमिदंफलंप्राप्नुवानीदंपरिहराणि ॥ इत्थंप्रयतेइत्थंकरवाणीत्येवंविधाअभिसंध्यादयःप्रत्यात्मंप्रवर्तमानाअदृष्टस्यात्मनांचस्वस्वामिभावंनियंस्यंतीतिनेत्याह ॥ अभिसंध्यादिष्वपिचैवं ॥५२॥ अभिसंध्यादीनामपिसाधारणेनैवात्ममनःसंयोगेनसर्वात्मसन्निधौक्रियमाणानांनियमहेतुत्वानुपपत्तेरुक्तदोषानुषंगएव ॥५२॥ प्रदेशादितिचेन्नांतर्भावात् ॥५३॥ अथोच्येतविभुत्वेप्यात्मनःशरीरप्रतिष्ठेनमनसासंयोगःशरीरावच्छिन्नएवात्मप्रदेशेभविष्यति ॥ अतःप्रदेशकृताव्यवस्थाऽभिसंध्यादीनामदृष्टस्यसुखदुःखयोश्चभविष्यतीति ॥ तदपिनोपपद्यते ॥ कस्मादंतर्भावाद्विभुत्वाऽविशेषाद्धिसर्वएवात्मानःसर्वशरीरेष्वंतर्भवंति ॥ तत्रनवैशेषिकैःशरीरावच्छिन्नोप्यात्मनःप्रदेशःकल्पयितुंशक्यः कल्प्यमानोप्ययंनिष्प्रदेशस्यात्मनःप्रदेशःकाल्पनिकत्वादेवनपारमार्थिकंकार्यंनियंतुंशक्नोति ॥

ति ॥ स्यादेतदित्यादिना ॥ अनियमःउक्तदोषः ॥५२॥ आत्मांतरप्रदेशस्यपरदेहेऽन्तर्भावाद्व्यवस्थेतिशंकार्थः ॥ किंमनसासंयुक्तात्मैवात्मनःप्रदेशःउतकल्पितः ॥ आद्येसर्वात्मनांसर्वदेहेषुअंतर्भावादव्यवस्था ॥ द्वितीयंदूषयति ॥ तत्रनवैशेषिकैरिति ॥ सर्वात्मसान्निध्येसतिकस्यचिदेवप्रदेशःकल्पयितुमशक्यः नियामकाभावादित्यर्थः प्रदेशकल्पनामंगीकृत्याप्याह ॥ कल्प्येति ॥ कार्यमभिसंध्यादिकं ॥

यस्यात्मनो यच्छरीरं तत्र तस्यैव भोग इति व्यवस्थामाशंक्याह ॥ शरीरमपीति ॥ प्रदेशपक्षे दोषांतरमाह ॥ प्रदेशेति ॥ यस्मिन्नात्मप्रदेशेऽदृष्टोत्पत्तिः स किं चलः स्थिरो वा नाद्यः ॥ अचलेंऽशिन्यंशस्य चलनविभागयोरसंभवादण्वात्मवादापाताच्च द्वितीये तस्मिन्नेव प्रदेशे परस्यापि भोगदर्शनाददृष्टमस्तीत्येकेनापि शरीरेण द्वयोरात्मनोर्भोगप्रसंगः ॥ यद्यात्मभेदात्प्रदेशयोर्भेदस्तदापि तयोरेकदेहांतर्भावाद्भोगसांकर्यं तदवस्थं सावयवात्मवादप्रसंगश्च ॥ किंच यत्तु यत्रात्मनः प्रदेशे शरीरादिसंयोगाददृष्टमुत्पन्नं तत्तत्रैवाचलप्रदेशे स्थितमिति स्वर्गादिशरीरावच्छिन्नात्मन्यदृष्टाभावा

शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियंतुं शक्यं ॥ प्रदेशविशेषाभ्युपगमेऽपि च द्वयोरात्मनोः समान‾ सुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात् समानप्रदेशस्यापि च द्वयोरात्मनोरदृष्टस्य संभवात् ॥ तथाहि देवदत्तो यस्मिन्प्रदेशे सुखदुःखमन्वभूत्तस्मात्प्रदेशादपक्रांते तच्छरीरे यज्ञदत्तशरीरे च तं प्रदेशमनुप्राप्ते तस्यापीतरेण समानः सुखदुःखानुभवो दृश्यते स न स्यात् यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात् ॥ स्वर्गाद्यनुपभोगप्रसंगश्च प्रदेशवादिनः स्यात् ब्राह्मणादिशरीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशांतरवर्तित्वाच्च स्वर्गाद्युपभोगस्य ॥ सर्वगतत्वानुपपत्तिश्च ॥ बहूनामात्मनां दृष्टांताभावात् ॥ वदतावत्त्वं के बहवः समानप्रदेशाश्चेति ॥ रूपादय इति चेन्न ॥ तेषामपि‾ धर्म्यंशेनाभेदात् ॥ लक्षणाभेदाच्च ॥ ननु बहूनामात्मनां लक्षणभेदोऽस्ति ९ ङ्गोगो न स्यात् ॥

अतः प्रदेशभेदो न व्यवस्थापकः ॥ यत्तु अत्रोत्पन्नमदृष्टस्वाश्रये यत्र क्वचिद्भोगहेतुरिति स्वर्गादिभोगसिद्धिरिति तन्न भोगशरीरात् दूरस्थाऽदृष्टे मानाभावादिति भावः ॥ यदपि केचिदाहुर्मनस एकत्वेऽप्यात्मनां भेदेन संयोगव्यक्तीनां भेदात्कयाचित्संयोगव्यक्त्या कस्मिंश्चिदेवात्मन्यदृष्टादिकमित्यसांकर्यमिति तत्र संयोगव्यक्तीनां वैजात्याभावेन सर्वासामेवैकदेहांतस्थसर्वात्मस्वदृष्टहेतुत्वापत्तेः तथा च सर्वात्मनामेकस्मिन्देहे भोक्तृत्वं दुर्वारं किंच बहूनां विभुत्वमंगीकृत्य सांकर्यमुक्तं संप्रति कर्तॄणां विभुत्वमसिद्धमहमिहैवास्मि इत्यल्पत्वानुभवात् मानाभावाच्चेत्याह सर्वगतत्वानुपपत्तिश्चेति ॥ किंच बहूनां विभुत्वे समानदेशत्वं वाच्यं तच्चायुक्तमदृष्टत्वादित्याह वदेति ॥

शा॰भा॰ ननुरूपरसादीनामेकघटस्थत्वंदृष्टमितिचेत्॥ नायमस्मत्संमतोदृष्टांतः रूपस्यतेजोमात्रत्वाद्रसस्यजलमात्रत्वात् गंधस्यपृथिवीमात्र अ॰पा॰
टी॰ त्वात् इत्येवंतत्तद्गुणस्यस्वस्वधर्म्यंशेनाभेदात्तेजआदिधर्म्यतिरिक्तघटाभावात्॥ किंचात्मनांबहुत्वमप्यसिद्धं आत्मत्वरूपलक्षणस्या ३।३
२॰म॰ भेदात्तथाचदेवदत्तात्मायज्ञदत्तात्मनोनभिन्नः आत्मत्वाद्यज्ञदत्तात्मवत्॥ अत्रवैशेषिकःशंकते॥ अंत्यविशेषेति॥ नित्यद्रव्यमात्र
२७५ वृत्तयोविशेषास्तेचस्वयंस्वाश्रयव्यावर्तकाएवनतेषांव्यावर्तकमपेक्षंतइत्यंत्याउच्यंते॥ तथाचविशेषरूपलक्षणभे॥ ६ ॥ ६ ॥
दाद्भवत्यात्मभेदइत्यर्थः॥ नतावदात्मन्यनात्मनःसकाशाद्भेदज्ञानार्थोविशेषकल्पना॥ ६ ॥ आत्मत्वादेवानात्मभेदसिद्धेः॥ नाप्या
त्मनांमिथोभेदज्ञानार्थंतत्कल्पनाआत्मभेदस्याद्याप्यसिद्धेः॥ नचविशेषभेदकल्पनादेवात्मभेदकल्पनायुक्ताआत्मभेदज्ञानाद्वात्मसु

अंत्यविशेषवशाद्भेदोपपत्तिरितिचेत्॥ नभेदकल्पनाया अंत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात्॥ आका
शादीनामपिविभुत्वंब्रह्मवादिनोःसिद्धकार्यत्वाभ्युपगमात्॥ तस्मादात्मैकत्वपक्षएवसर्वदोषाभावइतिसि
द्धं॥ २७॥ इतिश्रीमच्छारीरकमीमांसाभाष्येशंकरभगवत्पादकृतौद्वितीयाध्यायस्यतृतीयपादःसमाप्तः॥ ७८॥

विशेषभेदसिद्धिस्तत्सिद्धौतज्ज्ञप्तिरित्यन्योन्याश्रयादितिपरिहारार्थः॥ यत्तुबहूनांविभुत्वेआकाशदिक्कालादृष्टांतइतिसोप्यसंमतइत्याह
॥ आकाशादीनामिति॥ विभुत्वस्यैकवृत्तित्वेलाघवात्तविभुभेदःयथैकस्मिन्नाकाशेभेरीवीणादिभेदेननारमंद्रादिशब्दव्यवस्थाएवमे राम
कस्मिन्नप्यात्मनिबुद्ध्युपाधिभेदेनसुखादिव्यवस्थोपपत्तेरात्मभेदेपिव्यवस्थानुपपत्तेरुक्तत्वात्सुधाभेदकल्पनेत्युपसंहरति॥ तस्मादि २७५
ति॥ एवंभूतभोक्तृश्रुतीनांविरोधाभावात् ब्रह्मण्यद्वयेसमन्वयइतिसिद्धं॥ ५३॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंद
भगवत्कृतौशारीरकमीमांसाव्याख्यायांभाष्यरत्नप्रभायांद्वितीयस्याध्यायस्यतृतीयःपादःसमाप्तः॥ भाष्य ८२५ टीका ७७५॥ एवं १६००॥ शुभं

अथशारीरकसूत्रभाष्येरत्नप्रभायाद्वितीयाध्यायस्यचतुर्थपादःप्रारम्भः

शा·भा· टी· र·प्र· २३६

अ·पा· २।४

श्रीगणेशाय नमः ॥ पूर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिंद्रियाणामुत्पत्तिं साधयति ॥ तथा प्राणाः ॥ भूतभोक्तृविचारानंतरं भौतिकप्राणविचार
इति हेतुहेतुमद्भावं पादयोः संगतिमाह ॥ वियदादीनि ॥ तमेव विप्रतिषेधमाह ॥ तत्रेत्यादिना ॥ यद्यपि प्राणानामनुत्पत्तौ एकविज्ञानप्रतिज्ञानुपपत्तेर्वियदधिकरणन्यायात्तेषामुत्पत्तिः सिध्यति तथापि प्रलये प्राणसद्भावश्रुतेर्गौणीति कथनार्थमेतदधिकरणमित्यपौनरुक्त्यं ॥ अत्र

श्रीगणेशाय नमः ॥ ओं ॥ तथा प्राणाः ॥ १ ॥ वियदादिविषयः श्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृतः चतुर्थेनेदानीं प्राणविषयः
परिहृियते ॥ तत्र तावत् तत्तेजोऽसृजत इति तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते
॥ क्वचिच्चानुत्पत्तिरेवैषामाम्नायते ॥ असद्वा इदमग्र आसीत्तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे
असदासीत्तदाहुः के ते ऋषय इति प्राणा वाव ऋषय इत्यत्र प्रागुत्पत्तेः प्राणानां सद्भावश्रवणात् ॥ अन्यत्र तु प्राणानामपि
उत्पत्तिः पठ्यते ॥ यथाग्नेर्ज्वलतः क्षुद्रा विस्फुलिंगा व्युच्चरंति एवमेवास्मादात्मनः सर्वे प्राणा इति ॥ एतस्माज्जायते प्राणो मनः
सर्वेंद्रियाणि चेति ॥ सप्त प्राणाः प्रभवंति तस्मादिति च ॥ स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवींद्रियं मनोऽन्नमिति
चैवमादिप्रदेशेषु तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाच्चाऽप्रतिपत्तिः प्राप्नोति अथवा प्रागुत्पत्तेः
सद्भावश्रवणात् गौणी प्राणानामुत्पत्तिश्रुतिरिति प्राप्नोति ॥ अत उत्तरमिदं पठति तथा प्राणा इति ॥ कथं पुनरत्र तथेत्यक्षरानुलोम्यं
प्रकृतोपमानाभावात् सर्वगतात्मवहुत्ववादिदूषणमतीतानंतरपादांते प्रकृतं तत्तावन्नोपमानं संभवति सादृश्याभावात् ॥

राम· २३६

प्राणाः विषयाः ते किमुत्पद्यंते न वेति श्रुतीनां विप्रतिपत्त्या संशये तासां समबलत्वादनिर्णय इत्यप्रामाण्यमिति पूर्वपक्षफलं तत्र गौणवादी समाधानमाह
॥ अथवेति ॥ प्राणानां प्रलये सद्भावश्रुतेर्निरवकाशत्वेन वलीयस्त्वादुत्पत्तिश्रुतिर्गौणोत्पत्तिश्रुतिवद्गौणीत्यविरोध इत्यर्थः ॥ अप्रमाणपक्षवद्गौणपक्षोऽपि
मुख्यसिद्धांतिनः पूर्वपक्ष एवेति ज्ञापनार्थमथवेत्युक्तं ॥ मुख्यसिद्धांतमाह ॥ अत इति ॥ तथाशब्दमाक्षिपति ॥ कथमिति ॥ आनुलोम्यमार्जवमित्यर्थः ॥

साम्यंसंकुचयति॥ यथाऽदृष्टस्येतिदूषणवत्प्राणादूत्पत्तन्वितं॥ यद्यप्यदृष्टवत्प्राणा अप्यनियताइतिसूत्रमन्येतितथापिपुनरुक्तंजीववत्प्राणानउत्पद्यतइतिसूत्रार्थश्चेदपसिद्धांतइत्याक्षेपार्थः॥ समाधत्ते॥ नउदाहरणेति॥ दृष्टांतोदार्ष्टांतिकसन्निहितोवाच्यइत्यंगीकृत्यैकवाक्यस्थत्वेनसान्निध्यमुक्तंसंप्रतिनायंनियमः जैमिनिनाभगवताव्यवहितदृष्टांतस्याश्रितत्वादित्याह॥ अयमेवेति॥ अस्तितृतीयाध्यायेऽश्वप्रतिग्रहेष्ट्यधिकरणंतस्येदंविषयवाक्यं॥ यावतोऽश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्वपेदिति॥ एतदुत्तराधिकरणेकिमियंवारुणीष्टिर्दातुरुतप्र

सादृश्येहिसत्युपमानंस्यात् यथासिंहस्तथाबलवर्मेति॥ अदृष्टसाम्यप्रतिपादनार्थमितियद्युच्येत॥ यथाअदृष्टस्यसर्वात्मसन्निधावुत्पद्यमानस्यानियतत्वंएवंप्राणानामपिसर्वात्मनःप्रत्यनियतत्वमितितदपिदेहानियमेनैवोक्तत्वात्पुनरुक्तंभवेत्॥ नचजीवेनप्राणाउपमीयेरन्सिद्धांतविरोधात्॥ जीवस्यह्यनुत्पत्तिराख्याताप्राणानांतूत्पत्तिर्व्याचिख्यासितातस्मात्तथेत्यसंबद्धमिवप्रतिभाति॥ नउदाहरणोपात्तेनाप्युपमानेनसंबंधोपपत्तेः॥ अत्रप्राणोत्पत्तिवाक्यजातमुदाहरणं॥ एतस्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिव्युच्चरंतीत्येवंजातीयकं॥ तत्रयथालोकादयःपरस्माद्ब्रह्मणउत्पद्यंतेतथाप्राणाअपीत्यर्थः॥ तथाएतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच॥ खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीत्येवमादिष्वपिखवादिवत्प्राणानामुत्पत्तिरितिद्रष्टव्यं॥ अथवा॥ ११ तिग्रहीतुरितिविषयेप्रतिगृह्णीयादितिश्रुतेःप्रतिग्रहीतुरित्याशंकाप्रजापतिर्वरुणायाश्वमनयदित्युपक्रमेदातृकीर्तनाल्लिंगादश्वदातुरेवेतिस्यास्यति॥ अतःप्रतिगृह्णीयादित्यस्य।पदस्याश्वान्यःप्रतिग्राहयेदित्यर्थःदद्यादितियावत्योऽश्वदातासवारुणीमिष्टिंकुर्यादितिवाक्यार्थेस्थितेचिंता॥ अश्वदाननिमित्तेयमिष्टिःकिंलौकिकेश्वदानेवैदिकेवेति॥ तत्रतत्केसरिणोदद्यातीतिनिषिद्धलौकिकाश्वदानेदोषसंभवात्तन्निरासार्थेयमिष्टिरिति॥ दोषात्त्विष्टिर्लौकिकेस्यादितिसूत्रेणप्राप्तेसिद्धांतः अत्रहिवरुणोवाएतंगृह्णातियोऽश्वंप्रतिगृह्णातीतिदातुर्दोषसंकीर्तनेष्टिर्विहितावरुणग्राहोजलोदराख्यरोगेरूढः॥६॥

टि०॥ वरुणशब्दवाच्यंस्यात्॥३॥

भा०भा० नचलौकिकेस्वदानेऽयंरोगोभवतीतिप्रसिद्धंनचानेनैववाक्येनप्रसिद्धःस्वमेदोषस्तन्निरासार्थोवेष्टिरितिवदतोअर्थभेदेवाक्यभेदात्॥नचव अ०पा
टी० णोतीतिश्रुतस्त्यावरुणशब्दोनिषेधातिक्रमकृतदोषानुवादकइतियुक्तंरूढित्यागापातात्॥नत्यागेचवैदिकेपिदानेऽश्वत्यागजन्यदुःखंप्राप्तंतदु २१४
२.४ कृतुतस्त्याशङ्क्योत्पन्नेवदितुं तस्मात्प्राप्तानुवादार्थवादोयमिति यज्ञसंबंधिन्यश्वदानेऽयमिष्टिरित्येवंविचार्योक्तं॥पानव्यापच्चतद्वदिति॥सो
२७७ मपानेक्रियमाणेव्यापद्वमनंयदिस्यात्तदाएतंसौमेंद्रंश्यामाकंचरुंनिर्वपेदितिश्रूयतेतत्राश्वप्रतिग्रहेष्ट्यधिकरणपूर्वपक्षन्यायोवदुसूत्र

पानव्यापच्चतद्वदित्येवमादिषुव्यवहितोपमानसंबंधस्याप्याश्रितत्वात्॥यथातीतानंतरपादादौयुक्ताविय़दादयःपरस्य ब्रह्मणोविकाराःसमधिगतास्तथाप्राणाअपिपरस्यब्रह्मणोविकाराइतियोजयितव्यं॥कःपुनःप्राणानांविकारत्वेहेतुःश्रुतत्वमेव॥ननुकेषुचित्प्रदेशेषुनप्राणानामुत्पत्तिःश्रूयतइत्युक्तंतदयुक्तं।प्रदेशांतरेषुश्रवणात्॥नहिक्वचिदश्रवणमन्यत्रश्रुतंनिवारयितुमुत्सहते॥तस्माच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणाअप्युत्पद्यंतइतिसूक्तं॥२॥गौण्यसंभवात्॥३॥ यत्पुनरुक्तंप्रागुत्पत्तेःसद्भावश्रवणात्गौणीप्राणानामुत्पत्तिश्रुतिरितितत्प्रत्याह॥गौण्यसंभवादिति॥गौण्याअसंभवोगौण्यसंभवः॥नहिप्राणानामुत्पत्तिश्रुतिर्गौणीसंभवतिप्रतिज्ञाहानिप्रसंगात्॥कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतिह्येकविज्ञानेनसर्वविज्ञानंप्रतिज्ञायतत्साधनायेदमाम्नायते॥एतस्माज्जायतेप्राणइत्यादि॥साचप्रतिज्ञाप्राणादेः समस्तस्यजगतोब्रह्मविकारत्वेसतिप्रकृतिव्यतिरेकेणविकाराभावात्सिध्यति॥

१ व्यवहितस्तद्वदितिपरामृश्यते॥नहिलौकिकेधातुसाम्यार्थंपीतसोमस्यवमनेऽयंचरुःस्याद्वमननिमित्तेंद्रियशोषाख्यदोषस्यदृष्टस्येंद्रियेणव्यृध्यतेयःसोमंवमतीत्यनुवादादितिपूर्वपक्षसूत्रार्थः॥वैदिकेतुसोमपानेशेषप्रतिपत्तेर्जीर्णतत्वाद्वमनेपिनदोषइतिप्राप्तेसिद्धांतः लोकेवमनकृतेंद्रियशोषस्यधातुसाम्यकरत्वेनगुणत्वान्नदोषतावेदेतुमामेवाङ्गाभिमतिगाइतिसम्यग्जरणार्थमंत्रलिंगाद्वमनेकर्मवैगुण्यात्तस्यदोषत्वात्तस्माद्वैदिकसोमवमनेसौमेंद्रश्चरुरितिस्थितमित्येवमादिषुसूत्रेष्वित्यर्थः॥

ननुप्रतिज्ञापिगौणी।किंनस्यात्इत्यतआह॥तथाचप्रतिज्ञानार्थमिति॥उपक्रमोपसंहाराभ्यांप्रतिपिपादयिषिताद्वितीयत्वप्रतिज्ञानुरोधेनप्राणोत्पत्तिमुख्यैवेतिभावः।मुंडकवच्छ्रुत्यंतरेपिप्रतिज्ञादर्शनात्सामुख्येत्याह॥तथेति॥एषाप्रतिज्ञाप्राणोत्पत्तिमुख्यत्वेहेतुत्वेनद्रष्टव्येत्यर्थः।इदानींप्रलयेप्राणसत्त्वश्रुतेर्गतिंप्रश्नपूर्वकमाह॥कथमित्यादिना॥नेदंवाक्यंमहाप्रलयेपरमकारणस्यब्रह्मणःप्राणवत्त्वपरंकिंत्ववांतरप्रलये।हिरण्यगर्भाख्यावांतरप्रकृतिरूपप्राणसद्भावपरमित्यर्थः॥ननुहिरण्यगर्भरूपविकारस्यसत्त्वेकथंतदाविकारासत्त्वकथनंतत्राह॥स्वविर

गौण्यंतुप्राणानामुत्पत्तिश्रुतौप्रतिज्ञेयंहीयेत॥तथाचप्रतिज्ञानार्थमुपसंहरतिपुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतमिति॥ब्रह्मैवेदंविश्वमिदंवरिष्ठमिति॥तथाआत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितमित्येवंजातीयकासुश्रुतिषुएषैवप्रतिज्ञायोजयितव्या॥कथंपुनःप्रागुत्पत्तेःप्राणानांसद्भावश्रवणं॥नैतन्मूलप्रकृतिविषयं॥अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरइतिमूलप्रकृतेःप्राणादिसमस्तविशेषरहितत्वावधारणात्अवांतरप्रकृतिविषयंत्वेतत्॥स्वविकारापेक्षंप्रागुत्पत्तेःप्राणानांसद्भावावधारणमितिद्रष्टव्यं॥व्याकृतविषयाणामपिभूयसीनामवस्थानांश्रुतिस्मृत्योःप्रकृतिविकारभावप्रसिद्धेः॥वियदधिकरणेहिगौण्यसंभवादितिपूर्वपक्षसूत्रत्वाद्गौणीजन्मश्रुतिरसंभवादितिव्याख्यातंप्रतिज्ञाहान्यातुतत्रसिद्धांतोभिहितः॥इहतुसिद्धांतसूत्रत्वात्गौण्याजन्मश्रुतेरसंभवादितिव्याख्यानं॥

९कारेति॥स्वस्यकार्यब्रह्मणोयत्कार्यंस्थूलंतस्योत्पत्तेरित्यर्थः॥ननुयथाश्रुतिमहाप्रलयेप्राणसद्भावरूपंलिंगंप्राणाऽनुत्पत्तिसाधकंकिमित्यवांतरप्रलयपरतयानीयतइतिचेदेतस्माज्जायतेप्राणइत्यादिप्रबलजन्मश्रुतिबलादितिवदामः॥ननुविकारस्यब्रह्मणःकथंप्रकृतित्वमित्यतआह॥व्याकृतेति॥हिरण्यगर्भःसमवर्त्तताग्रइत्यादिश्रुतावादिकर्त्तासभूतानामित्यादिस्मृतौचविकारात्मनामपिमूलकारणावस्थारूपाणांब्रह्मविराडादीनांप्रकृतिविकारभावेनप्रसिद्धिरस्तिपूर्वापेक्षयाविकारस्याप्युत्तरापेक्षयाप्रकृतित्वमित्यर्थः॥केचिद्वियदधिकरणानुरोधेनेदंसूत्रंव्याचक्षतेतान्दूषयति॥

नस्य जायत इति पदस्याकाशादिषु मुख्यस्य पाठोपेक्षया प्राचीनेषु प्राणेषु श्रुतेर्मुख्यं जन्मेति सूत्रयोजना ॥ तत्सामान्यादिति ॥ तेनाकाशादिजन्मना सामान्यमेकशब्दोक्तत्वं तस्मादित्यर्थः ॥ एकस्मिन्वाक्ये एकस्य शब्दस्य सकृत्क्वचिन्मुख्यत्वं क्वचिद्गौणत्वमिति वैरूप्यं न युक्तमिति न्यायमन्यत्राप्यतिदिशति यत्रापि पश्चाच्छ्रुत इति ॥३॥ यच्चोक्तं छांदोग्ये प्राणानामुत्पत्तिर्न श्रूयत इति तत्राह तत्पूर्वकत्वाद्वाच इति ॥ अत्र सूत्रे वाक्पदं प्राणमन

तदनुरोधेन त्विहापि गौणा जन्मश्रुतिरसंभवादिति व्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता स्यात् ॥२॥ तत्प्राक्श्रुतेश्च ॥३॥ इतश्चाकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः ॥ यज्जायत इत्येकं जन्मवाचि पदं प्राणेषु प्राक्श्रुतं सदुत्तरेष्वप्याकाशादिष्वनुवर्तते एतस्माज्जायते प्राण इत्यत्राकाशादिषु मुख्यं जन्मेति प्रतिष्ठापितं ॥ तत्सामान्यात्प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति ॥ न ह्येकस्मिन्प्रकरणे एकस्मिंश्च वाक्ये एकः शब्दः सकृदुच्चरितो बहुभिः संबध्यमानः क्वचिन्मुख्यः क्वचिद्गौण इत्यध्यवसातुं शक्यः ॥ वैरूप्यप्रसंगात् ॥ तथा स प्राणमसृजत प्राणाच्छ्रद्धामित्यत्रापि प्राणे श्रुतः सृजतिः परेष्वप्युत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते ॥ यत्रापि पश्चाच्छ्रुत उत्पत्तिवचनः शब्दः पूर्वैः संबध्यते तत्राप्येष एव न्यायः ॥ यथा सर्वाणि भूतानि व्युच्चरंतीत्ययमंते पठितो व्युच्चरंति शब्दः पूर्वैरपि प्राणादिभिः संबध्यते ॥३॥ तत्पूर्वकत्वाद्वाचः ॥४॥ यद्यपि तत्तेजोऽसृजतेत्यस्मिन्प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोबन्नानामेव त्रयाणां भूतानामुत्पत्तिश्रवणात् तथापि ब्रह्मप्रकृतिकतेजोबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति ॥ तथा ह्यस्मिन्नेव प्रकरणे तेजोबन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते ॥ १ सोरूपलक्षणं वाक्प्राणमनसां तेजोबन्नपूर्वकत्वोक्तेरश्रवणमसिद्धमिति योजना तैर्वागादिभिश्चक्षुरादीनां सामान्यं करणत्वं तत्सामान्यादित्यर्थः अत्र मयड्विकारे मुख्य इति पक्षे वर्तत एव प्राणानां ब्रह्मकार्यत्वं तेजोबन्नानां ब्रह्मविकारत्वात् यदि प्राणस्य वायोर्जलविकारत्वायोगात्तदधीनस्थितिकत्वमात्रेण भाक्तस्तथापि प्राणानां विकारत्वे भूताधीनस्थितिकत्वं लिंगं मयटोक्तमिति सिद्धं ॥

ब्रह्मकार्यत्वं सप्राणमसृजतेत्यादिश्रुत्यंतरे स्पष्टं ब्रह्मकार्यत्वोक्तेश्च ॥ तस्मात्प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुत्या विरोधात्कारणे ब्रह्मणि समन्व
यइति सिद्धं ॥ ४ ॥ १ ॥ लिंगशरीरविचारात्मकाधिकरणानां लिंगानुत्वंपदार्थभेदधीः फलमिति द्रष्टव्यं ॥ एवं जन्मलब्धसत्ताकानां प्राणानामुप
जीव्योपजीवकत्वसंगत्या संख्यां निर्णेतुं श्रुतीनां विरोधात्संशये पूर्वपक्षयति सप्तगतेर्विशेषितत्वाच्च ॥ विशयः संशयः इंद्रियाण्यत्र विषयः पं

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति ॥ तत्र यदि तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वर्तत एव ब्रह्म
प्रभवत्वं ॥ अथ भाक्तं तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् ॥ येनाश्रुतं श्रुतं भवतीति चोपक्रमादैतदात्म्य
मिदं सर्वमिति चोपसंहारात् ॥ श्रुत्यंतरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपंचनार्थमेव मनआदीनामन्नादिमयत्ववचनमिति ग
म्यते ॥ तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः ॥ ४ ॥ १ ॥ सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥ उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्रा
णानां परिहृतः ॥ संख्याविषय इदानीं परिह्रियते ॥ तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति संप्रति तु कतीतरे प्राणा इति संप्रधारयति
॥ श्रुतिविप्रतिपत्तेश्चात्र विषयः ॥ क्वचित्सप्त प्राणाः संकीर्त्यंते सप्त प्राणाः प्रभवंति तस्मादिति ॥ क्वचिच्चाष्टौ प्राणा ग्रह
त्वेन गुणेन संकीर्त्यंते ॥ अष्टौ ग्रहा अष्टावतिग्रहा इति ॥ क्वचिन्नव सप्त वै शीर्षण्याः प्राणा द्वाववांचाविति ॥ क्वचिद्दश नव वै
पुरुषे प्राणा नाभिर्दशमीति ॥ क्वचिदेकादश दशेमे पुरुषे प्राणा आत्मैकादश इति ॥ क्वचिद्द्वादश सर्वेषां स्पर्शानां त्वगेकाय
नमित्यत्र ॥ क्वचित्त्रयोदश चक्षुश्च द्रष्टव्यं चेत्यत्र ॥ एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः ॥ चधींद्रियाणि वाङ्मनश्चेति

सप्त प्राणा एत एव हस्तेन सहाष्टौ ग्रहत्वं बंधकत्वं गृह्णंति बध्नंतीति ग्रहा इंद्रियाणि तेषां बंधकत्वं विषयाधीनमित्यतिग्रहाः ग्रहानतिक्रांता विषया
इत्यर्थः द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वाक्चेति सप्त शीर्षण्या भवाः प्राणा द्वाववांचौ पायूपस्थौ चेति नव ज्ञानकर्मेंद्रियाणि दशेमे पुरुषे देहे प्राणाः आ
त्मा मन एकादश प्राणा इति सिद्धांतकोटिरुक्ता एत एव हृदयाख्यया बुद्ध्या सह द्वादश अहंकारेण सह त्रयोदश श्रुतितः सप्तत्वावगतेः ये शीर्षण्याः ॥

शा·भा· सप्तत्वंनप्राणाइतिशीर्षण्योद्देशेनप्राणत्वविशेषणाद्वाशीर्षण्यानांप्राणत्वशब्दितेनेंद्रियत्वपरिसंख्ययासप्तैवप्राणाइतिसूत्रयोजना॥ सप्तत्वंवीप्सा- अ·पा

टी· विरुद्धमितिशंकते॥ नन्विति॥ गुहायांहृदयेशेरतइतिगुहाशयाःस्वस्थानेषुनिहितानिक्षिप्ताइत्यर्थः चित्तेनचतुर्दशत्वंमंतव्यंपूर्वपक्षीपरिह- २·४

र·प्र· रतिनैषदोषइति॥५॥ सिद्धांतिनाप्येकादशसुमनोवृत्तिभेदान्निश्चयात्मिकाबुद्धिर्गर्वात्मकोहंकारःस्मरणात्मकंचित्तमितिद्वादशादिसंख्यानभाव

२२९

किंतावत्प्राप्तंसप्तैवप्राणाइतिकुतः॥ गतेः यतस्तावंतोऽवगम्यंतेसप्तप्राणाःप्रभवंतितस्मादित्येवंविधासुश्रुतिषु॥ विशेषिताच्चैतेसप्तवैशीर्षण्याःप्राणाइत्यत्र॥ ननुप्राणागुहाशयानिहिताःसप्तसप्तेतिवीप्साश्रूयतेसासप्तभ्योतिरिक्तान्प्राणान्गमयतीतिनैषदोषः॥ पुरुषभेदाभिप्रायेयंवीप्साप्रतिपुरुषंसप्तसप्तप्राणाइति॥ नतत्त्वभेदाभिप्रायासप्तसप्तान्येन्येप्राणाइति॥ नन्वष्टत्वादिकापिसंख्याप्राणेषूदाहृताकथंसप्तैवस्युःसत्यमुदाहृताविरोधात्त्वन्यतमासंख्याध्यवसातव्या॥ तत्रस्तोककल्पनानुरोधात्सप्तसंख्याध्यवसानं॥ वृत्तिभेदापेक्षंचसंख्यांतरश्रवणमितिमन्यते॥५॥ अत्रोच्यते॥ हस्तादयस्तुस्थितेतोनैवं॥६॥ हस्तादयस्त्वपरेसप्तभ्योतिरिक्ताःप्राणाःश्रूयंतेहस्तोवैग्रहःसकर्मणातिग्रहेणगृहीतोहस्ताभ्यांहिकर्मकरोतीत्येवमाद्यासुश्रुतिषु॥ स्थितेचसप्तत्वातिरेकेसप्तत्वमंतर्भावाच्छक्यतेसंभावयितुं॥ हीनाधिकसंख्याविप्रतिपत्तौह्यधिकासंख्यासंग्राह्याभवति॥ तस्यांहीनाऽन्तर्भवति॥ नतुहीनायामधिका॥ अतश्चनैवंमंतव्यंस्तोककल्पनानुरोधात्सप्तैवप्राणाःस्युरिति॥ उत्तरसंख्यानुरोधात्त्वेकादशैवप्राणाःस्युस्तथाचोदाहृताश्रुतिर्दशेमेपुरुषेप्राणाआत्मैकादशइति॥ ६ ॥

नीयानतोवरंप्राथमिकसप्तत्वेंऽतर्भावःलाघवादितिप्राप्तेसिद्धांतयति॥ अत्रेति॥ आदानेनकर्मणागृहीतःसंबद्धःसंबंधमेवाह॥ हस्ताभ्यामि-
ति॥ अतोधिकसंख्यायाःन्यूनायामंतर्भावायोगात्सप्तैवप्राणाःस्युर्लाघवानुरोधादित्येवंनमंतव्यमित्यन्वयः॥ तर्हिकतींद्रियाणीत्याकांक्षाया-
माह॥ उत्तरेति॥ श्रुतीनांमिथोविरोधेसतिमानांतरानुगृहीताश्रुतिर्बलीयसीतिन्यायेनकार्यलिंगानुमानानुगृहीतैकादशप्राणश्रुत्यनुसारेण

श्रुतयोनेयाइत्यभिसंधायाह॥सत्यमिति॥एकादशकार्यलिंगान्याह॥शब्देति त्रयःकालास्त्रैकाल्यंतद्विषयावृत्तिर्यस्यतत् त्रैकाल्यवृत्तिइंद्रियांत
राणांवर्त्तमानमात्रग्राहित्वादतीतानादिज्ञानायमनोंगीकार्यमित्यर्थः विशेषितत्वादित्युक्तंनिरस्यति अपिचसप्तेति ॥ नचतावतामिति॥आदाना
दीनांश्रोत्रादिभ्योन्यत्वंनचैजात्यादित्यर्थः तेषांतद्वृत्तित्वेबधिरादीनामादानादिनस्यादितिभावः॥कथंतर्हिछिद्रेप्राणशब्दइत्याशंक्यलक्षणये॥
आत्मशब्देनचात्रांतःकरणंपरिगृह्यतेकरणाधिकारात्॥ननुएकादशत्वादप्यधिकेद्वादशत्रयोदशत्वेउदाहृते॥सत्य
मुदाहृतेनत्वेकादशभ्यःकार्यजातेभ्योऽधिकंकार्यजातमस्ति॥यदर्थंअधिकंकरणंकल्प्येत॥शब्दस्पर्शरूपगंधविषयाः पं
चबुद्धिभेदास्तदर्थानिपंचबुद्धींद्रियाणि॥वचनादानविहरणोत्सर्गानंदाःपंचकर्मभेदास्तदर्थानिपंचकर्मेंद्रियाणि॥सर्वार्थ
विषयंत्रैकाल्यवर्त्तिमनस्त्वेकमनेकवृत्तिकं॥तदेववृत्तिभेदात्क्वचिद्भिन्नवत्व्यपदिश्यते॥मनोबुद्धिरहंकारश्चित्तंचेति॥त
थाचश्रुतिःकामाद्यानानाविधावृत्तीरनुक्रम्याहएतत्सर्वंमनएवेति॥अपिचसप्तैवशीर्षण्यान्प्राणानभिमन्यमानस्यचता
एवप्राणाअभिमताःस्युः॥स्थानभेदाद्वौनेचत्वारःसंतःसप्तगण्यंते॥द्वेश्रोत्रेद्वेचक्षुषीद्वेनासिकेएकावागिति॥नचतावता
मेववृत्तिभेदादितरेप्राणाइतिशक्यतेवक्तुंहस्तादिवृत्तीनामत्यंतविजातीयत्वात्॥तथानववैपुरुषेप्राणानाभिर्दशमीत्यत्रा
पिदेहछिद्रभेदाभिप्रायेणैवदशप्राणाउच्यंतेनप्राणतत्वाभिप्रायेणनाभिर्दशमीतिवचनात्॥नहिनाभिर्नामकश्चित्प्राणःप्र
सिद्धोस्ति॥मुख्यस्यतुप्राणस्यभवतिनाभिरपिसकंविशेषायतनमित्यतोनाभिर्दशमीत्युच्यते॥क्वचिदुपासनार्थंकतिचित्प्राणा
गण्यंतेक्वचिद्विग्रहदर्शनार्थं॥तदेवंविचित्रेप्राणयत्ताम्नानेसतिक्किंपरमाम्नानमितिविवेक्तव्यं॥कार्यजातवशात्त्वेकादशत्वाम्ना
त्याह॥मुख्यस्यत्विति॥सप्तप्राणाःप्रभवंतीत्युपासनार्थं॥अष्टौग्रहाइतिश्रुतिस्तुउपलक्षणार्थापायूपस्थपादानामपिबंधकत्वाविशेषादितिविवे
क्तव्यं॥नन्विदंसूत्रव्याख्यानमसंगतंपंचधींद्रियवाङ्मनसांसप्तत्वावगतेःशीर्षण्यानांचतुर्णांविशेषितत्वमितिहेतोवैय्यधिकरण्यादुक्तपरिसं

परसूत्रद्वययोजना॥

नंप्राणविषयंप्रमाणमितिस्थितं॥इयम

स्यादोषाद्भेद्यरूचेराह॥इयमपरेति॥

इंद्रियाणि कतीति संदेहे पूर्वपक्षसूत्रं योजयति सप्तेति ॥ तं जीवात्मानं ये प्राणाः सह गच्छंति तेषामेव भोगहेतुत्वादिंद्रियत्वमित्यर्थः यत्रावस्था यामेष चाक्षुषश्चक्षुषि स्थितोनुग्राहकः सूर्यांशरूपः पुरुषः पराङ् पर्यावर्त्तते बहिर्देशात्स्वांशिनं सूर्यं प्रतिगच्छति अथ तदानीमयं मुमूर्षुररूपज्ञो भवति देवांशे देवं प्रविष्टे लिंगात्मा चक्षुर्हृदये मनस्येकीभवति तदायं न पश्यतीति पार्श्वस्था आहुरित्यर्थः आदिपदात्तु जिघ्रति न वदति

सप्तैव प्राणाः स्युर्यतः सप्तानामेव गतिः श्रूयते ॥ तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यत्र ॥ ननु सर्वशब्दोत्र पठ्यते तत्कथं सप्तानामेव गतिः प्रतिज्ञायत इति विशेषितत्वादित्याह सप्तैव हि प्राणाश्चक्षुरादयः त्वक्पर्यंता विशेषिता इह प्रकृताः ॥ स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्ततेथाऽरूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनाऽनुक्रमणेन प्रकृतगामी च सर्वशब्दो भवति ॥ यथा सर्वे ब्राह्मणा भोजयितव्या इति येमंत्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यंते नान्ये ॥ एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यंते नान्य इति ॥ नन्वत्र विज्ञानमष्टममनुक्रांतं कथं सप्तानामेवानुक्रमणं ॥ नैष दोषो मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेपि सप्तत्वोपपत्तेस्तस्मात्सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः ॥ हस्तादयस्त्वपरे सप्तभ्योतिरिक्ताः प्राणाः प्रतीयंते ॥ हस्तो वै ग्रह इत्यादिश्रुतिषु ग्रहत्वं च बंधनभावो गृह्यते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बंधनेनेति ॥ स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरांतरेष्वपि तुल्यत्वात् बंधनस्य ॥ तस्माच्छरीरांतरसंचारीदं ग्रहसंज्ञकं बंधनमित्यर्थादुक्तं भवति ॥ तथा च स्मृतिः ॥ पुर्यष्टकेन लिंगेन प्राणाद्येन स युज्यते ॥ तेन बद्धस्य वै बंधो मोक्षो मुक्तस्य तेन चेति ॥ ९

न रसयते नेन शृणोति न मनुते न स्पृशति न विजानातीति गृह्यते ॥ सप्तानामेव जीवेन सह गतिरित्यसिद्धं ग्रहत्वश्रुत्या हस्तानामपि गतिप्रतीतेरिति सिद्धांतयति ॥ एवमित्यादिना हस्तादिबंधस्य प्राङ्मोक्षात्सहगतौ स्मृतिमाह ॥ पुर्यष्टकेनेति ॥ प्राणादिपंचकं भूतसूक्ष्मपंचकं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं अंतःकरणचतुष्टयमविद्याका

[illegible]

पुर्यष्टकमात्मनोज्ञापकत्वाल्लिंगं॥ सतिसंभवेसर्वश्रुतिसंकोचोनयुक्तइत्याह॥ सर्वशब्दोपीति॥ तस्मात्संख्याश्रुतीनामविरोधादेकादशेंद्रियकारणेब्रह्मणिसमन्वयइतिसिद्धं॥६॥२॥ अणवश्च॥ प्राणाःसर्वेततताइतिश्रुतेःइंद्रियाणांविभुत्वात्तेषामुत्क्रांतिरसिद्धाकिंतुतत्तद्देहेतेषामभिव्यक्तिरूपा

ग्रहातिग्रहसंज्ञकेनानेनबंधनेनाऽवियोगंदर्शयति॥ आथर्वणेचविषयेंद्रियानुक्रमेणचक्षुश्चद्रष्टव्यंचेत्यत्रतुल्यवद्धस्तादीनींद्रियाणिसविषयाण्यनुक्रामतिहस्तौचादातव्यंचोपस्थश्चानंदयितव्यंचपायुश्चविसर्जयितव्यंचपादौचगंतव्यंचेति॥ तथादशेमेपुरुषेप्राणाआत्मैकादशस्तेयदास्माच्छरीरान्मर्त्यादुत्क्रामंत्यथरोदयंतीत्येकादशानांप्राणानामुत्क्रांतिंदर्शयति॥ सर्वशब्दोपिचप्राणशब्देनसंबध्यमानोऽशेषान्प्राणानभिदधानोनप्रकरणवशेनसप्तस्वेवावस्थापयितुंशक्यतेप्रकरणाच्छब्दस्यबलीयस्त्वात्॥ सर्वेब्राह्मणाभोजयितव्याइत्यत्रापिसर्वेषामेवअवनिवर्तिनांब्राह्मणानांग्रहणंन्याय्यंसर्वशब्दसामर्थ्यात् सर्वभोजनासंभवात्त्वत्रनिमंत्रितमात्रविषयासर्वशब्दस्यवृत्तिराश्रिता॥ इहतुनकिंचित्सर्वशब्दार्थसंकोचनेकारणमस्ति॥ तस्मात्सर्वशब्देनात्राऽशेषाणांप्राणानांपरिग्रहः प्रदर्शनार्थंचसप्तानामनुक्रमणमितिस्थितम्॥ तस्मादेकादशैवप्राणाःशब्दतःकार्यतश्चेतिसिद्धम्॥६॥२॥ अणवश्च॥७॥ अधुनाप्राणानामेवस्वभावांतरमभ्युच्चिनोति॥ अणवश्चैतेप्रकृताःप्राणाःप्रतिपत्तव्याःअणुत्वंचैषांसौक्ष्म्यपरिच्छेदौनपरमाणुतुल्यत्वंकृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसंगात्॥ सूक्ष्माएतेप्राणाःस्थूलाश्चेत्स्युर्मरणकालेशरीरान्निर्गच्छंतोबिलादहिरिवोपलभ्येरन्म्रियमाणस्यपार्श्वस्थैः॥ परिच्छिन्नाश्चैतेप्राणाःसर्वगताश्चेत्स्युःउत्क्रांतिगत्यागतिश्रुतिव्याकोपःस्यात्॥ श्रीः॥

प्रादेशिकोवृत्तयःसंतितनतासामुत्क्रांत्यादिरितिसांख्यानामाक्षेपस्तत्संगत्याप्राणाःकिंपरिमाणाइतिसंदेहेसिद्धांतयतिअधुनेत्यादिना॥ उत्पत्तिसंख्यानिर्णयानंतरंपरिमाणंनिरूप्यतइत्यर्थः॥ अनुद्भूतरूपस्पर्शत्वंसूक्ष्मत्वंपरिच्छेदोऽल्पत्वं॥ ॥ ॥ ॥

बुद्ध्यादीनांविभुत्वेतदुपाधिकमात्मनोऽणुत्वादिकंनसिध्येदित्युक्तन्यायविरोधमाह॥तद्गुणसारत्वमितिउक्ताक्षेपमनूद्यनिरस्यति॥सर्वेगतानामिति॥आनंत्यस्त्वेतेरूपासनार्थत्वान्नोक्तंत्यादिश्रुतीनांनत्याविरोधइतिसिद्धं॥७॥श्रेष्ठश्च॥अतिदेशत्वान्नसंगत्याद्यपेक्षा॥तथाप्राणाइत्युक्तन्यायोत्रातिदिश्यते॥ननुप्राणोजायतेनवेतिसंशयाभावादतिदेशोनयुक्तइत्याक्षिपति किमर्थइतिनिश्चितमहाप्रलयेप्राणसद्भावश्रुत्याधिका

तद्गुणसारत्वंचजीवस्यनसिध्येत्॥सर्वेगतानामपिवृत्तिलाभःशरीरदेशेस्यादितिचेन्नवृत्तिमात्रस्यकरणत्वोपपत्तेः॥यदेवह्युपलब्धिसाधनंवृत्तिःअन्यद्वानसैवनःकरणत्वं॥संज्ञामात्रेविवादइतिकरणानांव्यापित्वकल्पनानिरर्थिका॥तस्मात्सूक्ष्माःपरिच्छिन्नाश्चप्राणाइत्यध्यवस्यामः॥७॥३॥श्रेष्ठश्च॥८॥मुख्यश्चप्राणइतरप्राणवद्ब्रह्मविकारइत्यतिदिशति॥नन्वविशेषेणैवसर्वेप्राणानांब्रह्मविकारत्वंव्याख्यातं॥एतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिचेतिसेन्द्रियमनोव्यतिरेकेणप्राणस्योत्पत्तिश्रवणात्सप्राणमसृजतेत्यादिश्रवणेभ्यश्च॥किमर्थःपुनरतिदेशः अधिकाशंकाऽपाकरणार्थः॥नासदासीयेहिब्रह्मप्रधानेसूक्तेमंत्रवर्णोभवति॥नमृत्युरासीदमृतंनतर्हिनरात्र्याअन्हआसीत्प्रकेतः॥आनीदवातंस्वधयातदेकंतस्माद्धान्यन्नपरःकिंचनासेति॥आनीदितिप्राणकर्मोपादानात्प्रागुत्पत्तेःसंतमिवप्राणंसूचयति॥तस्मादजःप्राणइतिजायतेकस्यचिन्मतिःतामतिदेशेनापनुदति॥आनीच्छब्दोपिनप्रागुत्पत्तेःप्राणसद्भावंसूचयति॥अवातमितिविशेषणात्॥अप्राणोह्यमनाःशुभ्रइतिचमूलप्रकृतेःप्राणादिसमस्तविशेषविरहस्यदर्शितत्वात्॥तस्मात्कारण((सद्भावप्रदर्शनार्थएवायमानीच्छब्दइति॥

शंकामाह॥नासदासीयेहीति नासदासीदित्यारभ्याधीतइत्यर्थः तर्हितदाप्रलयकालेमृत्युर्मारकोमृत्युमत्कार्यंवानासीदमृतंचदेवभोग्यंनासीत् रात्र्याःप्रकेतश्चिन्हंरूपंचंद्रः अन्हःप्रकेतःसूर्यश्चनास्तांस्वधयासहेत्यन्वयः॥पितृभ्योदेयमन्नंस्वधायादास्त्वेनधृतामायास्वधातयासहतदेकंब्रह्मानीदासीदितिपरमार्थः॥अत्रानीदिति तच्चेष्टाकृतवदितिपूर्वपक्षार्थः॥ तस्माद्ब्रह्मणःपरःपरमुत्कृष्टमन्यच्चकिमपिनबभूवेत्यर्थःपरिहारःसुबोधः॥

ननु श्रेष्ठशब्दस्य प्राणे प्रसिद्ध्यभावात्कथं सूत्रमिति तत्राह श्रेष्ठ इति श्रुतिं व्याचष्टे ज्येष्ठश्च प्राण इत्यादिना ॥ पूयेत न पूयं भवेत् न संभवेन्न गर्भो
न भवेदित्यर्थः ॥ वागादिजीवनहेतुत्वं प्राणस्य गुणः स एव मानी श्रुत्यविरोधात्प्राणोत्पत्तिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं ॥ ८ ॥ इंद्रियाणि ।
विचार्य तद्व्यापारात्प्राणं पृथक्कर्तुमुत्पत्तिरनिर्दिष्टा संप्रत्युत्पन्नप्राणस्वरूपं पृथक्करोति ॥ न वायुक्रिये पृथगुपदेशात् ॥ मुख्यः प्राणः किंवा

श्रेष्ठ इति च मुख्यं प्राणमभिदधाति ॥ प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति श्रुतिनिर्देशात् ॥ ज्येष्ठश्च प्राणः शुक्रनिषेककालादा-
रभ्य तस्य वृत्तिलाभान्न चेत्तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न संभवेद्वा श्रोत्रादीनां तु कर्णशष्कुल्यादि-
स्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वं ॥ श्रेष्ठश्च प्राणो गुणाधिक्यात् न वै शक्ष्यामस्त्वदृते जीवितुमिति श्रुतेः ॥ ९ ॥ ८ ॥
न वायुक्रिये पृथगुपदेशात् ॥ स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते ॥ तत्र प्राप्तं तावच्छ्रुतेर्वायुः प्राण इति ॥
एवं हि श्रूयते ॥ यः प्राणः स वायुः स एष वायुः पंचविधः प्राणोपानो व्यान उदानः समान इति ॥ अथवा तंत्रांतरीयाभि-
प्रायात्समस्तकरणवृत्तिः प्राण इति प्राप्तं ॥ एवं हि तंत्रांतरीया आचक्षते सामान्या करणवृत्तिः प्राणाद्या वायवः पंचेति ॥
अत्रोच्यते ॥ न वायुः प्राणो नापि करणव्यापारः कुतः पृथगुपदेशात् ॥ वायोस्तावत्प्राणस्य पृथगुपदेशो भवति ॥ प्रा-
ण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति चेति ॥ न हि वायुरेव सन्वायोः पृथगुपदिश्येत ॥ तथा कर-
णवृत्तेरपि पृथगुपदेशो भवति वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक् प्राणस्यानुक्रमणात् ॥ वृत्तिवृत्तिमतोश्चा-
भेदात् न हि करणव्यापार एव सन्करणेभ्यः पृथगुपदिश्येत ॥ ९. युमात्रं उत करणानां साधारणव्यापारः आहोस्वित्तत्त्वांतरमि-

ति वायुप्राणयोर्भेदाभेदश्रुतीनां मिथो विरोधात्संशये पूर्वपक्षमाह न वेति ॥ द्वितीयं सांख्यपूर्वपक्षमाह ॥ अथ वेति सिद्धांतत्वेन सूत्रमादत्ते ॥ अत्रोच्य-
त इति ॥ मनोरूपब्रह्मणो वाक्प्राणचक्षुःश्रोत्रैश्चतुष्पात्त्वं श्रुतावुक्तं तत्र प्राणो वायुनाधिदैविकेन भात्यभिव्यज्यते अभिव्यक्तः संकल्पनिकार्येषु

मो भवतीत्यर्थः ॥

श्रुतिषु तत्र तत्र प्राणस्य वागादीनां च मिथः संवादलिंगेन पृथगुत्पत्तिलिंगेन चेंद्रियतद्भिन्नव्यापारेभ्योपि भिन्नत्वमित्याह ॥ न वेति ॥ प्राणस्येंद्रियवृत्तित्वं श्रुत्या निरस्य युक्त्यापि निरस्यति ॥ न च समस्तानामिति ॥ या चक्षुःसाध्या वृत्तिः सैव न श्रोत्रादिसाध्या करणानां प्रत्येकमेकैकरूपग्रहादिवृत्तावेव हेतुत्वात् न च समुदायस्य वृत्तिः संभवति तस्यासत्वादित्यर्थः ॥ प्रामाणाभावादिति ॥ श्रोत्रादीनामेकप्राणनाख्यवृत्त्यनुकूलपरिस्पंदेषु मानाभा

तथैतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च ॥ खं वायुरित्येवमादयोपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्तव्याः ॥ न च समस्तानां करणानामेका वृत्तिः संभवति ॥ प्रत्येकमेकैकवृत्तित्वात्समुदायस्य चाकारकत्वात् ॥ ननु पंजरचालनन्यायेन एतद्भविष्यति ॥ यथैकपंजरवर्त्तिनः एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः संतः संभूयैकं पंजरं चालयंति ॥ एवमेकशरीरवर्त्तिन एकादश प्राणाः प्रत्येकं प्रतिनियतवृत्तयः संतः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यंत इति ॥ नेत्युच्यते युक्तं तत्र प्रत्येकवृत्तिभिरवांतरव्यापारैः पंजरचालनानुरूपैरेवोपेताः पक्षिणः सह संभूयैकं पंजरं चालयेयुरिति तथा दृष्टत्वात् ॥ इह तु श्रवणाद्यवांतरव्यापारोपेताः प्राणा न संभूय प्राण्युरिति युक्तं ॥ प्रमाणाभावात् अत्यंतविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य ॥ तथा प्राणस्य श्रेष्ठत्वाद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेवकल्पते ॥ तस्मादन्यो वायुक्रियाभ्यां प्राणः ॥ कथं तर्हीयं श्रुतिः यः प्राणः स वायुरिति ॥ उच्यते ॥ वायुरेवायमध्यात्ममापन्नः पंचव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्वांतरं ॥ नापि वायुमात्रं अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते ॥ ९ ॥ स्यादेतत् ॥

((वात् श्रवणादीनामपरिस्पंदत्वेन विजातीयानां परिस्पंदरूपप्राणनाननुकूलत्वादवांतरव्यापाराभावान्न समस्तकरणवृत्तिः प्राण इत्यर्थः ॥ किंच प्राणस्य वृत्तित्वे वागादीनामेव प्राधान्यं वाच्यं तैनेतरस्तीत्याह ॥ तथा प्राणस्येति ॥ यथा मृदो घटो न वस्त्वंतरं नापि मृन्मात्रं तद्विकारत्वात् तथा वायोर्विकारः प्राण इत्यभेदश्रुतेर्गतिमाह ॥ अध्यात्मइति देहं प्राप्तः पंचावस्थो विकारात्मनास्थितो वायुरेव प्राण इत्यर्थः ॥ ९ ॥ प्राणस्य करणवृत्तित्वाभावे जीववत् भोक्तृत्वं स्यादिति शंकते ॥ स्यादेतदिति ॥ प्राणो न भोक्ता भोगोपकरणत्वात् चक्षुरादिवदिति सूत्रार्थमाह ॥

तुशब्दइत्यादिना॥ यथाबृहद्रथंतरयोः सर्वत्रसहप्रयुज्यमानत्वेनसामत्वेनवासाम्यात्सहपाठस्तथाकरणैः सहोपकरणत्वेनसाम्यात्प्राणस्यपाठइतिनदेहवत्सिद्धिरित्यर्थः॥ किंचप्राणोनभोक्तासावयवत्वाज्जडत्वाच्चदेहवत्॥१०॥ ननुयदंगोपकरणंतत्सविषयंदृष्टंयथाचक्षुरादिकं

प्राणोपितर्हिजीववदस्मिन् शरीरेस्वातंत्र्यंप्राप्नोतिश्रेष्ठत्वात्गुणभावोपगमाच्चतंप्रतिवागादीनामिंद्रियाणां॥ तथाहिअनेकविधाविभूतिः प्राणस्यश्राव्यतेसुप्तेषुवागादिषुप्राणएकोहिजागर्तिप्राणएकोमृत्युनाऽनाप्तः प्राणःसंवर्गोवागादीन्संवृंक्तेप्राणइतरान्प्राणान्रक्षतिमातेवपुत्रानिति॥ तस्मात्प्राणस्यापिजीववत्स्वातंत्र्यप्रसंगस्तंपरिहरति॥ चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः॥१०॥ तुशब्दः प्राणस्यजीववत्स्वातंत्र्यंव्यावर्तयति॥ यथाचक्षुरादीनिराजप्रकृतिवत्जीवस्यकर्तृत्वंभोक्तृत्वंचप्रत्युपकरणानिनस्वतंत्राणि॥ तथामुख्योपिप्राणोराजमंत्रिवत्जीवस्यसर्वार्थकरत्वेनउपकरणभूतोनस्वतंत्रः॥ कुतः तत्सहशिष्ट्यादिभ्यः॥ तेचक्षुरादिभिःसहैवप्राणःशिष्यतेप्राणसंवादादिषु॥ समानधर्माणांचसहशासनंयुक्तंबृहद्रथंतरादिवत्॥ आदिशब्देनसंहतत्वाचेतनत्वादीन्प्राणस्यस्वातंत्र्यनिराकरणहेतून्दर्शयति॥११॥ स्यादेतत्॥ यदिचक्षुरादिवत्प्राणस्यजीवंप्रतिकरणभावोऽभ्युपगम्येतविषयांतरंरूपादिवत्प्रसज्येत॥ रूपाद्यालोचनादिभिर्यथास्वंचक्षुरादीनांजीवंप्रतिकरणभावोभवति॥ अपिचैकादशैवकार्यजातानिरूपालोचनादीनिपरिगणितानियदर्थमेकादशप्राणाःसंगृहीताः॥ नतुद्वादशमपरंकार्यजानमधिगम्यतेयदर्थमयंद्वादशःप्राणःप्रतिज्ञायेतेति॥ अतउत्तरंपठति॥ अकरणत्वाच्चनदोषस्तथाहिदर्शयति॥ ११॥ ननुतावद्विषयांतरप्रसंगोदोषः॥ अकरणत्वात्प्राणस्यनहिचक्षुरादिवत्प्राणस्यविषयपरिच्छेदेनकरणत्वमभ्युपगम्यते.

प्राणस्यतुनिर्विषयत्वादसाधारणकार्याभावाच्चनोपकरणत्वमितिशंकते स्यादेतदिति उक्तव्याप्तेः शरीरेव्यभिचारान्देहेंद्रिय

धारणोक्तांत्वाद्यसाधारणकार्यसत्वाच्चनिर्विषयस्यापिप्राणस्यशरीरवदंगोपकरणत्वमस्त्येवनतुचक्षुरादिवत्ज्ञानकर्मकरणत्वमस्तियेनसविषयत्वस्यादितिपरिहरतिनतावद्धित्यादिना॥

अहंश्रेयसि स्वस्य श्रेष्ठतानिमित्तं व्यूदिरे विवादं चक्रिरे ॥ तद्वृत्तिमात्रहीनमिति मूकादिभावेन स्थितमित्यर्थः ॥ अवरं नीचं कुलायं देहाख्यं गृहं प्राणेन रक्षन् जीवः स्वपितीत्यर्थः तदेव तदानीमेव तेन प्राणेन यदश्नाति जीवस्तेन प्राणकृताशनेनेति यावत् ॥ ११ ॥ एवं श्रुतेः प्राणस्यासाधारणं कार्यमस्तीत्युक्तं तत्रैव हेत्वंतरार्थं सूत्रं व्याचष्टे ॥ इतश्चेत्यादिना ॥ वृत्तिरवस्था अग्निमंथनादिकं वीर्यवत्कर्म ॥

न चास्यैतावता कार्याभाव एव ॥ कस्मात् यतो हि श्रुतिः प्राणांतरेष्वसंभाव्यमानं मुख्यस्य प्राणस्य वैशेषिकं कार्यं दर्शयति प्राणसंवादादिषु अथ ह प्राणा अहंश्रेयसि व्यूदिरे इत्युपक्रम्य यस्मिन्व उत्क्रांत इदं शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं दर्शयित्वा प्राणोच्चिक्रमिषायां वागादिशैथिल्यापत्तिं शरीरपातप्रसंगं च दर्शयंती श्रुतिः प्राणनिमित्तां शरीरेंद्रियस्थितिं दर्शयति ॥ तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति चैतमेवार्थं श्रुतिराह ॥ प्राणेन रक्षन्नवरं कुलायमिति च सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति ॥ यस्मात्कस्माच्चांगात्प्राण उत्क्रामति तदेव तच्छुष्यति तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवतीति च प्राणनिमित्तां शरीरेंद्रियपुष्टिं दर्शयति ॥ कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति च प्राणनिमित्ते जीवस्योत्क्रांतिप्रतिष्ठे दर्शयति ॥ ११ ॥ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥ इतश्चास्ति मुख्यस्य प्राणस्य वैशेषिकं कार्यं ॥ यत्कारणं पंचवृत्तिरयं व्यपदिश्यते श्रुतिषु प्राणोपानो व्यान उदानः समान इति ॥ वृत्तिभेदश्चायं कार्यभेदाऽपेक्षः ॥ प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा ॥ अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा ॥ व्यानस्तयोः संधौ वर्तमानो वीर्यवत्कर्महेतुः ॥ उदानः ऊर्ध्ववृत्तिरुत्क्रांत्यादिहेतुः ॥ समानः समं सर्वेष्वंगेषु योन्नरसान्नयतीति ॥ एवं पंचवृत्तिः प्राणः मनोवत् ॥ यथा मनसः पंच वृत्तयः एवं प्राणस्यापीत्यर्थः ॥ श्रोत्रादिनिमित्ताः शब्दादिविषया मनसः पंच वृत्तयः प्रसिद्धाः ॥

॥

कामादिवृत्तिवत्त्वात्तेपि पंचत्वनियमो नास्तीत्यरुचिं स्वयमेवोद्भाव्य पक्षांतरं गृह्णाति नन्वत्रापीत्यादिना ॥ प्रमाणं प्रमितिः विपर्ययो भ्रमः शशविषाणादिज्ञानं विकल्पः तामसी वृत्तिर्निद्रा स्मृतिः प्रसिद्धा भ्रमनिद्रयोरविद्यावृत्तित्वान्मनोवृत्तित्वमित्यरुच्या स्वमतमाह ॥ वद्विति सूत्रस्यार्थांतरमाह ॥ अथवेति ॥ तदेवं प्राणवायोर्भेदाभेदश्रुत्योरविरोध इति सिद्धं ॥ १२ ॥ ५ ॥ एवं मुख्यप्राणस्योत्पत्तिं स्वरूपं चोक्त्वा परिमाणसंदेहेऽणुत्वमुपदिशति ॥ अणुश्चेति ॥

ननु कामः संकल्प इत्याद्याः परिपठिताः परिगृह्येरन् पंचसंख्यातिरेकात् ॥ नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाः प्रमा मनसो वृत्तिरस्तीति समानः पंचसंख्यातिरेकः ॥ एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पंचवृत्तयः परिगृह्यंते ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयो नाम ॥ वहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यं ॥ जीवोपकरणत्वमपि प्राणस्य पंचवृत्तित्वान्मनोवदिति योजयितव्यं ॥ १२ ॥ ५ ॥ अणुश्च ॥ १३ ॥ अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः ॥ इतरप्राणवदणुत्वं चेहापि सौक्ष्म्यपरिच्छेदौ ॥ न परमाणुतुल्यत्वं पंचभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात् सूक्ष्मः प्राण उत्क्रांतौ पार्श्वस्थेनानुपलभ्यमानत्वात् परिच्छिन्नश्चोत्क्रांतिगत्यागतिश्रुतिभ्यः ॥ ननु विभुत्वमपि प्राणस्य समाम्नायते ॥ समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेत्येवमादिषु प्रदेशेषु ॥ तदुच्यते आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्म नैवैतद्विभुत्वमाम्नायते नाध्यात्मिकेनापि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः ॥ १३ ॥ ६ ॥ ९ अधिकाशंकामाह ननु विभुत्व-

मपीति प्लुषिर्मशकादपि सूक्ष्मो जंतुः पुत्तिकेत्युच्यते नागो हस्ती ॥ प्राण उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति समोऽनेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्पत्वमाधिदैविकस्य विभुत्वमिति विषयभेदाच्छ्रुत्योरविरोध इति समाधत्ते ॥ तदुच्यत इति ॥ किंचोपक्रमे प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम एभिस्त्रिभिर्लोकैरिति विराड्देहसाम्यं समोऽनेनेति सूत्रात्मत्वमिति विषयव्यवस्थासुस्थेत्याह ॥ अपि चेति ॥ ६ ॥

अणवश्चेत्यत्र सर्वेषामिंद्रियाणामानंत्यमुपासनार्थमिति समाहितं अत्र तु प्राणविभुत्वमाधिदैविकमिति समाधानान्तरोक्तेरपौनरुक्त्यं ॥ अन्ये तु प्रसंगात्तत्र स्मृत्याक्षेपो निरस्तः अत्र तु श्रुतिविरोधो निरस्त इत्यपौनरुक्त्यमाहुः ॥१३॥ पूर्वं प्राणस्याध्यात्मिकाधिदैविकविभागेनाप्यणुत्वविभुत्वव्यवस्थोक्ता तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ वाचा हि नामान्यभिवदति चक्षुषा रूपाणि पश्यतीति तृतीयाश्रुत्यान्वयव्यतिरेकवत्या वागादीनां निरपेक्षसाधनत्वोक्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनानामग्न्याद्युपादा।

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥१४॥ ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्याय प्रभवंति आहोस्विद्देवताधिष्ठिताः प्रभवंतीति विचार्यते ॥ तत्र प्राप्तं तावद्यथास्वकार्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति ॥ अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसंगात् शारीरस्य भोक्तृत्वं प्रलीयेत ॥ अतः स्वमहिम्नैषां प्रवृत्तिरित्येवं प्राप्त इदमुच्यते ॥ ज्योतिराद्यधिष्ठानं त्विति ॥ तुशब्देन पूर्वपक्षो व्यावर्त्यते ॥ ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते ॥ हेतुं व्याचष्टे ॥ तदामननादिति ॥ तथा ह्यामनंति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि ॥ अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनाधिष्ठातृत्वमंगीकृत्योच्यते ॥ न हि देवतासंबंधं प्रत्याख्यायाग्नेर्वा

नकत्वपरा न तु तेषामधिष्ठातृदेवतापरा न च स्वस्वकार्ये शक्तानामपि वागादीनामचेतनत्वादधिष्ठा ((चि मुखे वा कश्चिद्विशेषसंबंधो दृश्य त्रपेक्षा न विरुध्यत इति वाच्यं ॥ जीवस्याधिष्ठातृत्वात् ॥ किं च देवानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन्देहे स्यात् तथा चैकत्वानेकभोक्तृणां विरोधात् दुर्बलस्य जीवस्य भोक्तृत्वं न स्यादिति पूर्वपक्षार्थः ॥ सिद्धांतयति ॥ एवं प्राप्त इत्यादिना ॥ अग्निर्वाग्भूत्वाऽऽदित्यश्चक्षुर्भूत्वेति च तद्भावो वाक्त्वात्वादिदेवताधिष्ठेयत्वरूप एव संबंधो न तदुपादानकत्वरूपः दूरस्थादित्यमंडलादेर्मुखस्य चक्षुराद्युपादानत्वासंभवादित्याह ॥ अग्नेश्चायमिति

वायुःप्राणाधिष्ठाताभूत्वानासापुटेप्राविशदितिव्याख्येयमित्याह तथेति॥ भातिदीप्यतेनेनपतिस्वकार्यंकरोतीत्यर्थः॥ एतस्मिन्नधिष्ठात्रधिष्ठेयत्वरूपार्थे। लिंगांतरमाह॥ सवैवाचमिति॥ सप्राणोवाचंप्रथमामुद्गीथकर्मणिप्रधानामनृतादिपाप्मरूपंमृत्युमतीत्यावहन्मृत्युनामुक्तांकृत्वा अग्निर्देवतात्मत्वंप्राप्तवानित्यर्थः किंचमृतस्याग्निंवागप्येतिवातंप्राणश्चक्षुरादित्यमित्यादिश्रुतिरप्यधिष्ठात्रधिष्ठेयत्वसंबंधंद्योतयतीत्याह॥ सर्वत्रेति॥ ननुशकटादीनांब

तथावायुःप्राणोभूत्वानासिकेप्राविशदित्येवमाद्यपियोजयितव्यं॥ तथान्यत्रापिवागेवब्रह्मणश्चतुर्थःपादःसोऽग्निनाज्योतिषा। भातिचतपतिचेत्येवमादिनावागादीनामग्न्यादिज्योतिष्ट्वादिवचनेनैतमेवार्थंदृढयति॥ सवैवाचमेवप्रथमामत्यवहत्सायदामृत्युमत्यमुच्यतसोऽग्निरभवदितिचैवमादिनावागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थंद्योतयति॥ सर्वत्रचाध्यात्माधिदैवतविभागेनवागाद्यग्न्याद्यनुक्रमणमनयैवप्रत्यासत्त्याभवति॥ स्मृतावपि॥ वागध्यात्ममितिप्राहुर्ब्राह्मणास्तत्त्वदर्शिनः॥ वक्तव्यमधिभूतंतत्रवह्निस्तत्राधिदैवतमित्यादिना॥ वागादीनामग्न्यादिदेवताधिष्ठितत्वंसप्रपंचंदर्शितं॥ यदुक्तंस्वकार्यशक्तियोगात्स्वमहिम्नैवप्राणाःप्रवर्तेरन्नितितदयुक्तं॥ शक्तानामपिशकटादीनामनडुहाद्यधिष्ठितानांप्रवृत्तिदर्शनात्॥ उभयथोपपत्तौचागमाद्देवताधिष्ठितत्वमेवनिश्चीयते॥१४॥ यदप्युक्तंदेवतानामेवाधिष्ठात्रीणांभोक्तृत्वप्रसंगोनशारीरस्येतितत्परिह्रियते॥ प्राणवताशब्दात्॥१५॥ सतीष्वपिप्राणानामधिष्ठात्रीषुदेवतासुप्राणवताकार्यकरणसंघातस्वामिनाशारीरेणैवैषांप्राणानांसंबंधःश्रुतेरवगम्यते॥ तथाहिश्रुतिःअथयत्रैतदाकाशमनुविषण्णंचक्षुःसचाक्षुषःपुरुषोदर्शनायचक्षुरथयोवेदेदंजिघ्राणीतिसआत्मागंधायघ्राणमित्येवंजातीयकाशारीरेणैवप्राणानांसंबंधंश्रावयति॥

ऽऽ लीवर्द्दादिप्रेरितानांप्रवृत्तिर्दृष्टाक्षीरादीनांत्वनधिष्ठितानामपिदृष्ट्यादिप्रवृत्तिर्दृश्यते॥ तथाचोभयथासंभवेकथंनिश्चयस्तत्राहउभयथोपपत्तौचेति॥१४॥ उक्तदोषांतरनिरासायसूत्रमवतारयति॥ यदप्युक्तमिति॥ शारीरेणैवेति॥ भोक्त्रेतिशेषः संबंधोभोक्तृभोग्यभावः अथयद्देहेप्राणप्रवेशानंतरंयत्रगोलकेएतत्छिद्रमनुप्रविष्टंचक्षुरिंद्रियंतत्रचक्षुरभिमानीसआत्माचाक्षुषस्तस्यरूपदर्शनायचक्षुः॥

शा.भा. यद्यप्यात्माकरणान्यपेक्षते तथापि ज्ञेयज्ञानतदाश्रयाहंकारान्यो वेदस्यात्मा चिद्रूप एव॥ करणानि तु गंधादिवत्तयेपेक्ष्यंते न चैतन्यायेतिसूत्रा- अ.पा.
टी. र्थः॥ किंच योहं रूपमद्राक्षं स एवाहं स्पृशामीति प्रतिसंधानादेकः शारीर एव भोक्ता न वहवो देवा इत्याह॥ अपि चेति॥ कदाचिद्देवानामत्र भो- २।४
र.प्र. क्तृत्वं कदाचिज्जीवस्येति अनियमोऽस्त्वित्याशंक्य स्वकर्मार्जिते देहे जीवस्य भोक्तृत्वनियमान्मैवमित्याह सूत्रकारः॥ तस्य चेति॥ उत्क्रमणादि-
अ.२ षु जीवस्य प्राणाव्यभिचारात्तस्यैव प्राणस्वामित्वं देवतानां तु परस्वामिकरथसारथिवदधिष्ठातृत्वमात्रमिति व्याख्यांतरमाह॥ शारीरेणैव च नित्य

अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमस्मिञ्छरीरेऽवकल्पते एको ह्ययमस्मिञ्छरीरे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते॥१५॥ तस्य च नित्यत्वात्॥१६॥ तस्य च शारीरस्यास्मिञ्छरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसंभवात् सुखदुःखोपभोगसंभवाच्च न देवतानां॥ ता हि परस्मिन्नैश्वर्ये पदे अवतिष्ठमाना न हीनेऽस्मिञ्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हंति॥ श्रुतिश्च भवति पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छतीति शारीरेणैव च नित्यः प्राणानां संबंधः उत्क्रांत्यादिषु तदनुवृत्तिदर्शनात्॥ तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्यादिश्रुतिभ्यः॥ तस्मात्सतीष्वपि करणानां नियंत्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति॥७॥१६॥ न इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥१७॥

ऽऽइति॥ यथा प्रदीपादिः करणोपकारकस्तथा करणपक्षस्यांतर्गतस्तथा देवाः करणोपकारिण्य एव न भोक्तार इत्यर्थः॥ जीवस्याऽदृष्टद्वारा करणाधिष्ठातृत्वाद्रथस्वामिवद्भोक्तृत्वं देवानां तु करणो—— पकाराभिज्ञतया सारथिवदधिष्ठातृत्वमिति॥ न जीवेनान्यथासिद्धिः देवानामधिष्ठातृत्वेनास्मिन्देहे भोक्तृत्वानुमानं तु न ह वै देवान्पापं गच्छतीत्युक्तश्रुतिबाधितं॥ तस्माच्चक्षुषा हि रूपाणि पश्यतीति श्रुतेः साधनत्वमात्रबोधित्वादग्निर्वाग्भूत्वेत्यादावधिष्ठातृदेवतापेक्षाबोधकश्रुतिभिरविरोध इति सिद्धं॥१६॥ सत्स्विंद्रियेषु तदधिष्ठातृदेवतास्विंमानान्येव प्राणवृत्तिव्यतिरेकेण न संतीत्याक्षेपसंगत्याह॥ न इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्

प्राणादिंद्रियाणांभेदाभेदश्रुतिभ्यांसंशयंवदन्पूर्वपक्षयति ॥ मुख्यश्चेत्यादिना ॥ हंतइदानीमस्यैवमुख्यप्राणस्यसर्वैवयंस्वरूपंभवामेतिसंकल्प्यतेवागादयस्तथाभवन्नित्यभेदश्रुत्यर्थः ॥ तेप्राणादभिन्नाःप्राणपदवाच्यत्वात्प्राणवदित्याह प्राणेतिप्राणाःश्रेष्ठादन्यत्रान्यइतिप्रतिज्ञानार्थत्वेनपदत्रयंव्याचष्टेनत्वांतराण्येवेति ॥ तद्व्यपदेशादित्यत्रतच्छब्दःप्रतिज्ञातान्यत्वंपरामृशतिप्राणाइंद्रिणीत्यपर्यायशब्दाभ्यामन्यत्वोक्तेरिति हेतूपपादनार्थत्वेनपुनरुक्तानिसूत्रपदानियोजयति ॥ कइत्यादिना ॥ सूत्रस्यविश्वतोमुखत्वादुभयार्थत्वमलंकारएवनदूषणंएतेनप्रतिज्ञाध्या

मुख्यस्यैकइतरेचैकादशप्राणाअनुक्रांतास्तत्रेदमपरंसंदिह्यते किंमुख्यस्यैवप्राणस्यवृत्तिभेदाइतरेप्राणाआहोस्वित्तत्त्वांतराणीति ॥ किंतावत्प्राप्तंमुख्यस्यैवेतरेवृत्तिभेदाइति ॥ कुतःश्रुतेस्तथाहिश्रुतिर्मुख्यमितरांश्चप्राणान्संनिधाप्यमुख्यात्मतामितरेषांख्यापयति ॥ हंतास्यैवसर्वेरूपमसामेतितएतस्यैवसर्वेरूपमभवन्निति ॥ प्राणैकशब्दत्वाच्चैकत्वाध्यवसायइतरथाह्यन्याय्यमनेकार्थत्वंप्राणशब्दस्यप्रसज्येत ॥ एकत्रवामुख्यत्वमितरत्रवालाक्षणिकत्वमापद्येत ॥ तस्माद्यथैकस्यैवप्राणस्यप्राणाद्याःपंचवृत्तयःएवंवागाद्याअप्येकादशेत्येवंप्राप्तेब्रूमः ॥ तत्त्वांतराण्येवप्राणाद्वागादीनिकुतःव्यपदेशभेदात् ॥ कोयंव्यपदेशभेदस्तेप्रकृताःप्राणाःश्रेष्ठंवर्जयित्वाऽवशिष्टाएकादशेंद्रियाणीत्युच्यंतेश्रुतावेवंव्यपदेशदर्शनात्एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेतिह्येवंजातीयकेषुप्रदेशेषुपृथक्प्राणोव्यपदिश्यतेपृथक्चेंद्रियाणि ॥ ननुमनसोप्येवंसतिवर्जनमिंद्रियत्वेनप्राणवत्स्यात् मनःसर्वेंद्रियाणिचेतिपृथक्व्यपदेशदर्शनात् ॥ सत्यमेतत्स्मृतौएकादशेंद्रियाणीतिमनोपींद्रियत्वेनश्रोत्रादिवत्संगृह्यतेप्राणस्यत्विंद्रियत्वंनश्रुतौस्मृतौवाप्रसिद्धमस्ति ॥ १७ ॥

हारस्तच्छब्दस्याप्रकृतभेदपरामर्शित्वंचेतिदोषद्वयमपास्तं ॥ शब्दभेदाद्वस्तुभेदसाधनेअतिप्रसंगंशंकते ॥ नन्विति ॥ प्राणवन्मनसोपिइंद्रियेभ्योभेदःस्यादित्यर्थःअपर्यायसंज्ञाभेदात्स्वतंत्रसंज्ञिवस्तुभेदइत्युत्सर्गः ॥ सचमनःषष्ठानींद्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यतेप्राणेतुबाधकाभावादुत्सर्गप्रसिद्धिरितिसमाधत्ते ॥ सत्यमित्यादिना ॥ मनइंद्रियाणिचेतिभेदोक्तिर्गोबलीवर्दन्यायेननेयासिद्धांतेमनसःप्रमोपादानत्वादात्मवदिंद्रियत्वमिष्टंततोनोत्सर्गबाधइतिकेचित् ॥

किंचएतस्माज्जायतेप्राणइंद्रियाणिचेतिपृथक्जन्मव्यपदेशात्स्वतंत्रवस्तुभेदइत्याह॥ व्यपदेशभेदश्चायमिति॥ एकस्मिन्वाक्येप्राणइंद्रियशब्दमेकत्रलभतेपुनरुक्तिभयान्नलभतेचेतिव्याघातइत्यर्थः॥ एवंभेदेनापर्यायसंज्ञाभ्यामुक्तेःपृथग्जन्मोक्तेश्चेतितद्व्यपदेशादितिहेतुर्व्याख्यातः॥१७॥ भेदश्रुतेरितिसूत्रेणप्रकरणभेदोहेतुरुक्तइतिनपौनरुक्त्यं तेहदेवाः शास्त्रीयेंद्रियमनोवृत्तिरूपा असुराणांपापवृत्तिरूपाणांजयार्थमुद्गीथकर्मणिप्रथमंव्यापृतांवाचमूचुस्त्वंनउद्गायासुरनाशार्थमिति तथास्त्वित्यंगीकृत्योद्गायंतींवाचमनृतादिदोषेणविध्वंसितवंतोऽसुरा

व्यपदेशभेदश्चायंतत्त्वभेदपक्षेउपपद्यते॥ नन्वेकत्वेतुसएवैकःसन्प्राणइंद्रियव्यपदेशंलभतेनलभतेचेतिप्रतिषिद्धं॥ तस्मात्तत्त्वांतरभूतामुख्यादितरे॥१७॥ कुतश्चतत्त्वांतरभूताः॥ भेदश्रुतेः॥१८॥ भेदेनवागादिभ्यःप्राणःसर्वत्रश्रूयते॥ तेहवाचमूचुरित्युपक्रम्यवागादीनसुरपाप्मविध्वस्तानुपन्यस्योपसंहृत्यवागादिप्रकरणमथहेममासन्यंप्राणमूचुरित्यसुरविध्वंसिनोमुख्यस्यप्राणस्यपृथगुपक्रमणात्॥ तथामनोवाचंप्राणंतान्यात्मनेकुरुतेत्येवमाद्याअपिभेदश्रुतयउदाहर्तव्यास्तस्मादपितत्त्वांतरभूतामुख्यादितरे॥१८॥ कुतश्चतत्त्वांतरभूताः॥ वैलक्षण्याच्च॥१९॥ वैलक्षण्यंचभवतिमुख्यस्येतरेषांच॥ सुप्तेषुवागादिषुमुख्यएकोजागर्तिसएवचैकोमृत्युनानाप्तआप्तास्त्वितरेतस्यैवचस्थित्युत्क्रांतिभ्यांदेहधारणपतनहेतुत्वंनेंद्रियाणां॥ विषयालोचनहेतुत्वंचेंद्रियाणांनप्राणस्येत्येवंजातीयकोभूयान् लक्षणभेदःप्राणेंद्रियाणां॥ तस्मादप्येषांतत्त्वांतरभावसिद्धिः॥ यदुक्तंएतस्यैवसर्वेरूपमभवन्नितिश्रुतेःप्राणएवेंद्रियाणीति॥ तदयुक्तं॥ तत्रापिपौर्वापर्यालोचनाद्भेदप्रतीतेः॥

इत्येवंक्रमेणसर्वेष्विंद्रियेषुपाप्मग्रस्तेषुपश्चादथेतिप्रकरणंविच्छिद्यप्रसिद्धमास्येभवमासन्यंमुख्यंप्राणमूचुस्त्वन्नउद्गायेतितेनप्राणेनोद्गात्रानिर्विषयतयासंगदोषशून्येनासुरानष्टाइत्यसुराणांविध्वंसिनोमुख्यप्राणस्योक्तेर्भेदसिद्धिरित्याह॥ तेहेति॥ तानित्रीण्यन्नान्यात्मनेस्वार्थंप्रजापतिःकृतवानित्यर्थः॥१८॥ विरुद्धधर्मवत्त्वाच्चभेदइत्याह॥ वैलक्षण्याच्चेति॥ मृत्युनासंगदोषः॥ ९

वाग्दध्रेव्रतं धृतवतीत्यर्थः॥ बहुभिर्भेदलिंगैर्विरोधाद्वागादीनां प्राणरूपभवनं प्राणाधीनस्थितिकत्वरूपं व्याख्येयम्॥ एतदेव प्राणशब्दस्येंद्रियेषु-
लक्षणाबीजं श्रुतौ तस्मादेतस्यैते नाख्यायंत इति परामृष्टमिति न भेदाभेदश्रुत्योर्विरोध इति सिद्धं॥ उत्पत्तिरुत्पादनेति च कार्यकर्त्रोर्व्यापारौ प्रसिद्धौ॥
तत्र जगदुत्पत्तिश्रुतिविरोधः अतीतेन पादद्वयेन निरस्तः॥ संप्रत्युत्पादनश्रुतिविरोधो निरस्यते तत्रापि सूक्ष्मभूतोत्पादनं पारमेश्वरमेवेति श्रुतिषु अविप्र-
तिपन्नं स्थूलभूतोत्पादने तु क्वचिच्छ्रुतिविप्रतिपत्तिरिति तन्निरासार्थमाह॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् नामरूपभेदाकरणभिन्नः प्राण इत्यु-

तथाहि वदिष्याम्येवाहमिति वाग्दध्र इति वागादीनींद्रियाण्यनुक्रम्य तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वागिति च।
श्रमरूपेण मृत्युनाग्रस्तत्वं वागादीनामभिधायाथेममेव नाप्नोद्योयं मध्यमः प्राण इति पृथक् प्राणं मृत्युनानभिभूतमनुक्रामति
॥ अयं वै नः श्रेष्ठ इति च श्रेष्ठतामस्यावधारयति॥ तस्मात्तद्विरोधेन वागादिषु परिस्पंदलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागा-
गादीनामिति मंतव्यं न तादात्म्यमतएव च प्राणशब्दस्येंद्रियेषु लाक्षणिकत्वसिद्धिस्तथा च श्रुतिः त एतस्यैव सर्वे रूपमभवंस्त-
स्मादेत एते नाख्यायंते प्राणा इति मुख्यप्राणविषयस्यैव प्राणशब्दस्येंद्रियेषु लाक्षणिकीं वृत्तिं दर्शयति॥ तस्मात्तत्त्वांतराणि
प्राणादिंद्रियाणीति॥ १९॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥ २०॥ सत्प्रक्रियायां तेजोबन्नानां सृष्टिमभिधायोप-
दिश्यते सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रि-
वृतमेकैकां करवाणीति॥ तत्र संशयः किं जीवकर्तृकमिदं नामरूपव्याकरणमाहोस्वित् परमेश्वरकर्तृकमिति॥ ६ ॥

निस्तृणा ++

कं तत्प्रसंगेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिंत्यत इत्यानंतरसंगतिः॥ प्रक्रियाप्रकरणं ईक्षणमेवाह॥ हंतेत्यादिना॥ हंत इदानीं देवताः सूक्ष्मा
अनुप्रविश्येति संबंधः तासां देवतानामेकैकां देवतां तेजोबन्नात्मनात्र्यात्मिकां करिष्यामीति श्रुतिः पंचीकरणोपलक्षणार्थो छांदोग्येप्याकाशवाय्वोरु-
पसंहारस्योक्तत्वात् एवं स्थूलीकृतेषु भूतेषु प्राणिनां व्यवहारः सेत्स्यतीति परदेवतायास्तात्पर्यं॥ जीवेनेति पदस्य व्याकरवाणीत्यनेन संबंधः
संभवासंभवाभ्यां संशयमाह॥ तत्रेति॥ पूर्वपक्षे जीवस्यैव भौतिकस्रष्टृत्वाद्ब्रह्मणः सर्वस्रष्टृत्वासिद्धिः॥ सिद्धांतेन तत्सिद्धिरिति फलं ॥ ६ ॥

जीवेनेत्यस्यव्याकरवाणीतिप्रधानक्रियापदेनसंबंधइतिपूर्वपक्षमाह तत्रप्राप्तमिति॥ परस्यदेवताया अकर्तृत्वेकथमुत्तमपुरुषप्रयोगइत्याशंक्य
प्रयोजककत्वात्कर्तृत्वोपचारइत्याह यथालोकइतिसिद्धान्तयतितुशब्देनेत्यादिना॥ प्रत्याकृतिप्रतिजातीत्यर्थः॥ अनेनस्थूलसर्वसर्गेजीवस्यासामर्थ्यंद्यो

तत्रप्राप्तंतावत्जीवकर्तृकमेवेदंनामरूपव्याकरणमितिकुतः॥ अनेनजीवेनात्मनेतिविशेषणात्॥ यथालोकेचारेणाहंपरसैन्य
मनुप्रविश्यसंकलयानीत्येवंजातीयकेप्रयोगेचारकर्तृकमेवसत्सैन्यसंकलनंहेतुकर्तृत्वाद्राजात्मन्यध्यारोपयतिसंकलयामीत्यु
त्तमपुरुषप्रयोगेणैवंजीवकर्तृकमेवसन्नामरूपव्याकरणंहेतुकर्तृकत्वाद्देवतात्मन्यध्यारोपयतिव्याकरवाणीत्युत्तमपुरुषप्रयोगे
ण॥ अपिचडित्थकपित्थादिषुनामसुघटशरावादिषुचरूपेषुजीवस्यैवकर्तृत्वंदृष्टं॥ तस्माज्जीवकर्तृकमेवेदंनामरूपव्याकरणमित्येवं
प्राप्तेऽभिधत्ते॥ संज्ञामूर्तिक्लृप्तिस्त्विति॥ तुशब्देनपक्षंव्यावर्तयति॥ संज्ञामूर्तिक्लृप्तिरितिनामरूपव्याक्रियेत्येतत्॥ त्रिवृत्कुर्वतइतिपरमे
श्वरंलक्षयतित्रिवृत्करणेतस्यनिरपवादकर्तृत्वनिर्देशात्॥ येयंसंज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमाविद्युदिति॥ तथाकुश
काशपलाशादिषुपशुमृगमनुष्यादिषुचप्रत्याकृतिप्रतिव्यक्तिचानेकप्रकारासाखलुपरमेश्वरस्यैवतेजोबन्नानांनिर्मातुःकृतिर्भवि
तुमर्हतिकुतः॥ उपदेशात्॥ तथाहिसेयंदेवतैक्षतेत्युपक्रम्यव्याकरवाणीत्युत्तमपुरुषप्रयोगेणपरस्यैवब्रह्मणोव्याकर्तृत्वमिहोप
दिश्यते॥ ननुजीवेनेतिविशेषणात्जीवकर्तृकत्वंव्याकरणस्याऽध्यवसितं॥ नैतदेवंजीवेनेत्येतदनुप्रविश्येत्यनेनसंबध्यते॥ आ
नन्तर्यान्नव्याकरवाणीत्यनेन॥ तेनहिसंबंधेव्याकरवाणीत्ययंदेवताविषयउत्तमपुरुषप्रयोगऔपचारिकःकल्प्येत॥ नचगि
रिनदीसमुद्रादिषुनानाविधेषुनामरूपेष्वनीश्वरस्यजीवस्यव्याकरणसामर्थ्यमस्ति॥ येष्वपिचास्तिसामर्थ्यंतेष्वपिपरमेश्व
रायत्तमेवतत्॥ नचजीवोनामपरमेश्वरादत्यन्तभिन्नश्चारइवराज्ञःआत्मनेतिविशेषणात्उपाधिमात्रनिबंधनत्वाच्चजी
वभावस्यतेनतत्कृतमपिनामरूपव्याकरणंपरमेश्वरकृतमेवभवति॥

१तिते॥ तथाचपदान्वयस्यपदार्थयोग्यताधीनत्वाज्जीव
रूपेणप्रविश्याहमेवव्याकरवाणीत्यन्वयोनतुजीवेनव्याकरवाणीति॥ ननुतर्हिप्रवेशक्रियाजीवकर्तृकाव्याकरणमीश्वरकर्तृकमितिकर्तृभेदात्
क्त्वाप्रत्ययोनस्यादित्यतआह॥ नचजीवोनामेति॥ वस्तुतस्तुसूर्योजलेप्रविष्टइतिप्रतिबिंबभावाख्यप्रवेशेसूर्यस्यैवकर्तृत्वप्रयोगाज्जीवात्मनाप्रवे

शेपीश्वरस्यैवकर्तृत्वमितिश्रुतियुक्तिभिर्बोध्यम्॥

नन्वभेदश्रुतेर्जीव एव व्याकर्त्तो किं न स्यादित्याशंक्य कल्पनया भिन्नस्य न स्याशक्तत्वाच्छ्रुतिविरोधाच्चैवमित्याह ॥ परमेश्वर इति ॥ प्रत्येकं महाभू
तसर्गस्य प्रागुक्तत्वादिह व्याकरणवाक्ये यत्तत्पूर्वकं स्थूलभौतिकसर्ग उच्यत इति पाठक्रमान्वयेन सूत्रसूचितं श्रुत्यर्थमाह त्रिवृत्करणपूर्वकमिति ॥ ईश्व
रकृतं त्र्यात्मत्वमिति क्व दृष्टमित्यत आह ॥ तच्चेति ॥ इदानीं नामरूपव्याकरणे क्रममाह ॥ तत्राग्निरिति ॥ यद्यप्यतः प्रभवादित्यत्र वेदशब्दपूर्विका कार्य
सृष्टिरुक्ता तथाप्यव्यक्तात्स्मृताच्छब्दादर्थसृष्टौ सत्यां स्फुटनामसंबंधाभिव्यक्तिरत्रोक्तेत्यविरोधः ॥ नन्वग्न्यादीनां तैजसानामेवात्रोदाहरणाद्भूजल

परमेश्वर एव च नामरूपयोर्व्याकर्त्तेति सर्वोपनिषत्सिद्धांतः ॥ आकाशो वै नाम नामरूपयोर्निर्वहितेत्यादिश्रुतिभ्यस्तस्मात्परमेश्वरस्यै
व त्रिवृत्कुर्वतः कर्म नामरूपयोर्व्याकरणं ॥ त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते प्रत्येकं नामरूपव्या
करणस्य तेजोवन्नोत्पत्तिवचनेनैवोक्तत्वात् ॥ तच्च त्रिवृत्करणमग्न्यादित्यचंद्रविद्युत्सु श्रुतिर्दर्शयति ॥ यदग्ने रोहितं रू
पं तेजसस्तद्रूपं यच्छुक्लं तदपां ——— यत्कृष्णं तदन्नस्येत्यादिना ॥ तत्राग्निरितीदं रूपं व्याक्रियते ॥ सति च रूपव्याकरणे
विषयप्रतिलंभादग्निरितीदं नाम व्याक्रियते एवमेवादित्यचंद्रविद्युत्स्वपि द्रष्टव्यं ॥ अनेन चाग्न्याद्युदाहरणेन भौमांभसतैजसे
षु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति ॥ उपक्रमोपसंहारयोः साधारणत्वात् तथा हि अविशेषेणैवोपक्रमः इमा
स्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवतीति ॥ अविशेषेणैव चोपसंहारो यदु रोहितमिवाभूदिति तेजसस्तद्रूपमित्येवमादिर्य
द्विज्ञातमिवाभूदित्येतासामेव देवतानां समास इत्येवमंतः ॥२०॥ तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्म
परं त्रिवृत्करणमुक्तं ॥ इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति ॥ तदिदानीमाचार्यो यथाश्रुत्यैवोपदर्शयन्ना

योस्त्र्यात्मकत्वं न विवक्षितमित्यत आह ॥ अनेन चेति ॥ उपक्रमे तासां मध्य इति शेषः यत्कपोतरूपादिकं कृष्णत्वादिविशे ((शंकितं कंचिद्दोषं परि
पाकारेण विज्ञातमिवाभवदिति तद्देवतानां समुदायरूपमित्यर्थः ॥२०॥ बाह्यं त्रिवृत्करणमुक्त्वाध्यात्मिकमपरं पूर्वोक्तविलक्षणं वदन्नुत्तरसूत्रमवतारयति
तासामित्यादिना पुरुषं शरीरं प्राप्यैकैका त्रिवृद्भवति कार्यत्रयात्मना भवतीत्यर्थः ॥ उत्तरसूत्रेणाशंकितं दोषं निरसितुमादौ शंकाविषयमाध्यात्मिकत्रि

हरिष्यन् ॥

वृत्करणं दर्शयतीति भाष्यार्थः ॥

शा.भा. नन्वन्नमयं मांसादिकार्यं भौममित्यत आह॥ त्रिवृत्कृता भूमिरेवेति॥ प्राणस्य वायोरप्कार्यत्वं औपचारिकं द्रष्टव्यं॥२१॥ एवं विषयमुक्त्वा दोषं शंक अ.पा.

टी. ते॥ अत्राहेति तदुत्तरत्वेन सूत्रं व्याचष्टे तुशब्देनेति॥ स्वभागाधिकं वैशेष्यं किमर्थं कृतमित्यत आह॥ व्यवहारप्रसिध्यर्थमिति॥ एवं स्मृतिन्यायमतां २।४

र.प्र.

२९८

मांसादि भौमं यथाशब्दमितरयोश्च॥२१॥ भूमेस्त्रिवृत्कृतायाः पुरुषेणोपभुज्यमानाया मांसादिकार्यं यथाशब्दं निष्पद्यते॥ तथा हि श्रुतिः॥ अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन इति॥ त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः॥ तस्याश्च स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति॥ मध्यमं मध्यात्मना मांसं वर्धयति॥ अणिष्ठं तु मनः स्वमितरयोरप्तेजसोर्यथाशब्दं कार्यमवगंतव्यं॥ एवं मूत्रं लोहितं प्राणश्चापां कार्यमस्थि मज्जा वाक् तेजस इति॥ २१॥ अत्राह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकं अविशेषश्रुतेः तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति॥ किंकृतस्तर्ह्ययं विशेषव्यपदेशः इदं तेज इमा आप इदमन्नमिति॥ तथाध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादि इदमपां पीतानां कार्यं लोहितादि इदं तेजसोऽशितस्य कार्यं अस्थ्यादीति॥ अत्रोच्यते॥ वैशेष्यात्तु तद्वादस्तद्वादः॥२२॥ तुशब्देन चोदितं दोषमपनुदति विशेषस्य भावो वैशेष्यं भूयस्त्वमिति यावत्॥ सत्यपि त्रिवृत्करणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते॥ अग्नेस्तेजोभूयस्त्वमुदकस्याऽप्भूयस्त्वं पृथिव्या अन्नभूयस्त्वमिति॥ व्यवहारप्रसिध्यर्थं चेदं त्रिवृत्करणं व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत्॥ तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते॥ तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥ इति श्रीशारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः॥ २२॥ १९॥ ८७॥ १४५॥

तरश्रुतिभिरविरोधो ब्रह्मणि वेदान्ततात्पर्यस्येति सिद्धं॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां द्वितीयाध्यायस्य चतुर्थः पादः समाप्तोऽयं द्वितीयोऽध्यायः॥ भाष्य॥ ३४५॥ टीका॥ २५५॥ सर्वं॥ ६००॥

॥श्रीकृष्णानंदरामसमर्थ॥

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥ ॐ ॥

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥ ॐ ॥

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥

अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यप्रथमपादःप्रारम्भः

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥ ॐ ॥

ॐ ॥ ॐ ॥ ॐ तत्सत् ॥ ॐ ॥

ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

श्रीगणेशायनमः॥ ॐ॥यंहिवैराग्यसंपन्नास्तत्त्वमर्थंविवेकिनः॥लभंतेसाधनैर्दांतास्तंसीतानायकंभजे॥१॥तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां॥वृत्तमनूद्यतृतीयाध्यायार्थमाह॥द्वितीयइत्यादिना॥अविरुद्धेवेदांतार्थेतत्त्वज्ञानसाधनचिंतावसरइत्यनयोर्हेतुहेतुमद्भावः॥लिंगोपाधिसिद्धौतदुपहितजीवसंसारचिंतेतिपादयोरपितद्भावःसंगतिः॥अत्रप्रथमपादेवैराग्यंद्वितीयेसप्नाद्यवस्थोक्त्यात्वंपदार्थोब्रह्मतत्त्वंचोच्यतेतृतीयेवाक्यार्थस्तदर्थमुपासनाश्चविचार्यंते॥चतुर्थेपादार्थमाह॥सम्यग्दर्शनादितिदर्शनोपायाःसंन्यासादयःमुक्तिरूपफलस्यस्वर्गवत्तारतम्यनियमाभावएकरूपत्वमितियावत्॥प्रसंगागतंदेहात्मदूषणं॥पंचसुद्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्नित्वध्यानंपंचाग्निविद्या॥यस्मात्कर्मणागत्यागतिरूपो नर्थस्तस्मात्कर्म

श्रीगणेशायनमः॥हरिःओम्॥१॥तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां॥१॥द्वितीयेऽध्यायेस्मृतिन्यायविरोधोवेदांतविहितेब्रह्मदर्शनेपरिहृतःपरपक्षाणांचानपेक्षत्वंप्रपंचितंश्रुतिविप्रतिषेधश्चपरिहृतस्तत्रचजीवव्यतिरिक्तानितत्त्वानिजीवोपकरणानि।ब्रह्मणोजायंतइत्युक्तं॥अथेदानीमुपकरणोपहितस्यजीवस्यसंसारगतिप्रकारस्तदवस्थांतराणिब्रह्मसतत्त्वंविद्याभेदाभेदौगुणोपसंहारानुपसंहारौ॥सम्यग्दर्शनात्पुरुषार्थसिद्धिःसम्यग्दर्शनोपायविधिप्रभेदोमुक्तिफलाऽनियमश्चेत्येतदर्थजातंतृतीयेध्यायेचिंतयिष्यतेप्रसंगागतंचकिमप्यन्यत्॥तत्रप्रथमेतावत्पादेपंचाग्निविद्यामाश्रित्यसंसारगतिप्रभेदःप्रदर्श्यतेवैराग्यहेतोस्तस्माज्जुगुप्सेतेतिचांतेश्रवणात्॥जीवोमुख्यप्राणसचिवःसेंद्रियःसमनस्कोविद्याकर्मपूर्वप्रज्ञापरिग्रहःपूर्वदेहंविहायदेहांतरंप्रतिपद्यतइत्येतदवगंतंअथैनमेतेप्राणाअभिसमायंतीत्येवमादेरन्यन्नवतरंकल्याणतरंरूपंकुरुतइत्येवमेतात्संसारप्रकरणस्थाच्छब्दा

फलेजुगुप्सांघृणांविरक्तिंकुर्वीतेतिपंचाग्निविद्योपसंहारेश्रवणाद्वैराग्यार्थंप्रदर्श्यतइत्यन्वयः॥शास्त्रादिसूत्रेति ((द्रुमोधर्मफलोपभोगसंन्यानित्यविवेककृतंवैराग्यमुक्तंइहतद्धर्मीयगत्यागतिक्लेशभावनाकृतंतदुच्यतइत्यपौनरुक्त्यं॥अधिकरणविषयमाहजीवइति॥अविद्याप्रसिद्धाविद्येतिपाठेउपासनाग्राह्याकर्मधर्माधर्मौस्वयंपूर्वप्रज्ञाजन्मांतरसंस्कारःअथमरणकालेप्राणाहृदयेजीवेनैकीभवंतीत्यर्थः॥रूपंशरीरंपंचीकृतभूतभागाःउत्तरदेहपरिणामिनोभूतसूक्ष्माःवेदांतार्थज्ञानसाधनविचारत्वात् सर्वाधिकरणानांश्रुतिशास्त्राध्यायसंगतयःवैराग्यफलकत्वादेतत्पादसंगतिः॥१॥

पूर्वाधिकरणेव्यवहारार्थंपंचीकरणमुक्तंसव्यवहारोत्रनिरूप्यतइतिफलफलिभावोऽवांतरसंगतिः अत्रपूर्वपक्षेनिराश्रयप्राणगत्याभावान्नवैराग्यंसिद्धं
नेभूताश्रयप्राणगतेर्वैराग्यमितिफलभेदः॥ तेजोमात्राश्चक्षुरादयः पश्यंतिजिघ्रंतीतिवाक्यशेषात् आपः पंचस्वग्निहुताः॥ पंचम्यामाहुतौहुतायांयथा
पुरुषशब्दवाच्याः पुरुषात्मनापरिणमंते तथाकिंत्वंवेत्थेतिश्वेतकेतुंप्रतिराज्ञः प्रवाहणस्यप्रश्नः तस्यचोत्तराज्ञानेनस्थितंतंप्रतिराजोवाचासौवावलोको
गौतमाग्निस्तत्रश्रद्धाख्याआपः आहुतिः पर्जन्याग्नौसोमरूपाः इहत्वग्निहोत्रेश्रद्धयाहुतादध्यादिरूपाआपोयजमानसंलग्नाः स्वर्गलोकंप्राप्यसोमा
नक्कारणा॥२॥

सकिंदेहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तोगच्छति॥ आहोस्वित्संपरिष्वक्तइतिचिंत्यते॥ किंतावत्प्राप्तं॥ असंपरिष्वक्तइति॥ कुतः करणो
पादानवद्भूतोपादानस्याश्रुतत्वात्॥ सएतास्तेजोमात्राः समभ्याददानइतिह्यत्रतेजोमात्राशब्देनामुपादानंसंकीर्तयति॥ वा
क्यशेषेचचक्षुरादिसंकीर्तनात्॥ नैवंभूतमात्रोपादानसंकीर्तनमस्ति॥ सुलभाश्चसर्वत्रभूतमात्राः यत्रैवदेहआरब्धव्यस्तत्रैवसं
तितासांनयनंनिष्प्रयोजनं॥ तस्मादसंपरिष्वक्तोयातीत्येवंप्राप्तेपठत्याचार्यस्तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तइति॥ तदं
तरप्रतिपत्तौदेहांतरप्रतिपत्तौदेहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तोरंहतिगच्छतीत्यवगंतव्यं॥ कुतः प्रश्ननिरूपणाभ्यां॥ तथाहिप्र
श्नोवेत्थयथापंचम्यामाहुतावापः पुरुषवचसोभवंतीति॥ निरूपणंचप्रतिवचनंद्युपर्जन्यपृथिवीपुरुषयोषित्सुपंचस्व
ग्निषुश्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतीर्दर्शयित्वाइतितुपंचम्यामाहुतावापः पुरुषवचसोभवंतीति॥ तस्मादद्भिः परिवेष्टि
तोजीवोव्रजतीतिगम्यते॥ नन्वन्याश्रुतिर्जलूकावत्पूर्वदेहंनमुंचतियावन्नदेहांतरमाक्रमतीतिनिदर्शयतितद्यथातृणजलायुकेति॥

ख्यदिव्यदेहात्मनास्थिताः कर्मांतेद्रुताः पर्जन्येहूयंतेततोवृष्टिरूपाः पृथिव्यां॥ अन्नरूपाः पुरुषेरेतोरूपाः योषितिहुताः आपः पुरुषशब्दवाच्याः पुमा
त्मकाभवंतीतिनिरूपणंकृतं॥ नन्वेनदेहंत्यक्त्वाद्भिः सहगतस्यपश्चाद्देहांतरप्राप्तिरित्युक्तमयुक्तंयथातृणजलायुकातृणांतरंगृहीत्वापूर्वंतृणंत्यजति
तथाजीवोदेहांतरंगृहीत्वापूर्वदेहंत्यजतीतिश्रुतिविरोधादितिशंकते॥ नन्वन्येति॥ इहैवकर्मोपात्तभाविदेहंदेवोहमित्यादिभावनयागृहीत्वापूर्वदेहं
त्यजतीतिश्रुत्यर्थः अतोनविरोधइतिसमाधत्ते॥

तव्यापीति॥भावनायादीर्घीभावोभाविदेहविषयत्वंघटाकाशवदुपहितोजीवःसूक्ष्मोपाधिगत्यालोकांतरंगच्छतीति पंचाग्निश्रुत्युक्तःप्रकारस्तद्विरो
धादन्याःकल्पनाःसर्वाअनादर्तव्याइत्यन्वयःसांख्यकल्पनामाह॥व्यापिनामिति॥सुगतकल्पनामाह॥केवलस्येति॥निर्विकल्पकज्ञानसंतानरूपस्या
त्मनोदेहांतरेशब्दादिसविकल्पकज्ञानाख्यवृत्तिलाभोभवतीत्यर्थः काणादकल्पनामाह॥मनइति॥देहांतरंप्रतिमनोनात्रंगच्छतिइंद्रियाणितुनूतना।

तत्राप्यप्परिवेष्टितस्यैवजीवस्यकर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रंजलूकयोपमीयतइत्यविरोधः॥
एवंश्रुत्युक्तेदेहांतरप्रतिपत्तिप्रकारेसतियाःपुरुषमतिप्रभवाःकल्पनाः॥व्यापिनांकरणानामात्मनश्चदेहांतरप्रतिपत्तौकर्मव
शाद्वृत्तिलाभस्तत्रभवति॥केवलस्यैववात्मनोवृत्तिलाभस्तत्रभवति॥इंद्रियाणितुदेहवदभिनवान्येवतत्रतत्रभोगस्थानेउ
त्पद्यंते॥मनएववाकेवलंभोगस्थानमभिप्रतिष्ठते॥जीवएववोत्प्लुत्यदेहाद्देहांतरंप्रतिपद्यतेशुकइववृक्षाद्वृक्षांतरमित्येव
माद्याःसर्वाएवानादर्तव्याःश्रुतिविरोधात्॥१॥ननूदाहृताभ्यांप्रश्नप्रतिवचनाभ्यांकेवलाभिरद्भिःसंपरिष्वक्तोरंहतीतिप्राप्नो
त्यप्शब्दश्रवणसामर्थ्यात्॥तत्रकथंसामान्येनप्रतिज्ञायतेसर्वैरेवभूतसूक्ष्मैःसंपरिष्वक्तोरंहतीति॥अतउत्तरंपठति॥
त्र्यात्मकत्वात्तुभूयस्त्वात्॥२॥तुशब्देनचोदितामाशंकामुच्छिनत्ति॥त्र्यात्मिकाह्यापस्त्रिवृत्करणश्रुतेस्तास्वारंभिका
स्वभ्युपगतास्वितरदपिभूतद्वयमवश्यमभ्युपगंतव्यंभवति॥त्र्यात्मकश्चदेहस्त्रयाणामपितेजोबन्नानांतस्मिन्कार्योपलब्धेः
॥पुनश्चत्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्तश्लेष्मभिर्नसभूतांतराणिप्रत्याख्यायकेवलाभिरद्भिरारब्धुंशक्यते॥तस्माद्भू
यस्त्वापेक्षोयमापःपुरुषवचसइतिप्रश्नप्रतिवचनयोरप्शब्दोनकैवल्यापेक्षः॥सर्वदेहेषुहिरसलोहितादिद्रवद्रव्यभूयस्त्वं
दृश्यते॥

न्येवारभ्यंते॥दिगंबरकल्पनामाह॥जीवइति॥१॥ननुपाकस्वेदगंधस्वरूपकार्यत्रयोपलब्धेस्त्र्यात्मकोदेहइत्ययुक्तंप्राणावकाशयोरप्युपलब्ध्या
देहस्यपंचभूतात्मत्वादित्यरुच्याव्याख्यांतरमाह॥पुनश्चेति॥देहधारकत्वाद्धातवस्तैस्त्रिधातुत्वात्त्र्यात्मकइत्यन्वयः॥देहस्यकेवलाब्जत्वेवातंपि
त्तंचवायव्यंतैजसंनस्यातामितिभावः॥पृथिवीतरभूतापेक्षा
याऽपांबाहुल्यं॥

किंचदेहनिमित्तानांकर्मणामप् बाहुल्यात्ताभिर्भूतांतराण्युपलक्ष्यतइत्याह कर्मचेत्यादिना॥२॥ उत्क्रांतौप्राणादेहबीजपंचभूताश्रयाःप्राणत्वा ९
ज्जीवदेहस्यप्राणवदित्याह॥प्राणगतेश्चेति॥३॥ प्राणानांगतिरसिद्धेत्याशंकानिषेधति॥अग्न्यादीनि॥अदर्शनादोषधिवनस्पतिगमनस्येतिशेषः लो

ननुपार्थिवोधातुर्भूयिष्ठोदेहेषूपलक्ष्यतेनैषदोषः॥इतरापेक्षयाप्यपांबाहुल्यंभविष्यति॥दृश्यतेचशुक्रशोणितलक्षणेपि
देहबीजेद्रवबाहुल्यं॥कर्मचनिमित्तकारणंदेहांतरारंभे॥ कर्माणिचाग्निहोत्रादीनिसोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रया
णि॥कर्मसमवायिन्यश्चापःश्रद्धाशब्दोदिताःसहकर्मभिर्द्युलोकाख्येग्नौहूयंतइतिवक्ष्यति॥तस्मादप्यपांबाहुल्यप्रसिद्धि
र्बाहुल्यात्त्वापशब्देनसर्वेषामेवदेहबीजानांभूतसूक्ष्माणामुपादानमितिनिरवद्यं॥२॥प्राणगतेश्च॥३॥प्राणानांचदेहांतरप्रति
पत्तौगतिःश्राव्यते॥तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्यादिश्रुतिभिः॥साचप्राणानांगतिरा
श्रयमंतरेणनभवतीत्यतःप्राणगतिप्रयुक्तानांतदाश्रयभूतानामपामपिभूतांतरोपसृष्टानांगतिरवगम्यते॥नहिनिराश्रयाः
प्राणाःक्वचिद्गच्छंतितिष्ठंतिवाजीवतोऽदर्शनात्॥३॥अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात्॥४॥स्यादेतन्नैवप्राणादेहांतर
प्रतिपत्तौसहजीवेनगच्छंत्यग्न्यादिगतिश्रुतेः॥तथाहिश्रुतिर्मरणकालेवागादयःप्राणाअग्न्यादीन्देवान्गच्छंतीतिदर्शयति॥
यत्रास्यपुरुषस्यमृतस्याग्निंवागप्येतिवातंप्राणइत्यादिनेतिचेन्न भाक्तत्वाद्वागादीनामग्न्यादिगतिश्रुतिर्गौणी॥लोमसुकेशेषुचा
दर्शनादोषधीर्लोमानिवनस्पतीन्केशाइतिहितत्राम्नायते नचलोमानिकेशाश्चोत्प्लुत्यओषधीर्वनस्पतींश्चगच्छंतीतिसंभवति
॥नचजीवस्यप्राणोपाधिप्रत्याख्यानेगमनमवकल्पते॥नापिप्राणैर्विनादेहांतरेउपभोगउपपद्यते॥विस्पष्टंचप्राणानांसहजी
वेनगमनमन्यत्रश्राविते॥अतोवागाद्यधिष्ठात्रीणांअग्न्यादिदेवतानांवागाद्युपकारिणीनांमरणकालेउपकारनिवृत्तिमात्रमपे
९ क्ष्यवागादयअग्न्यादीन्गच्छंतीत्युपचर्यंते॥४॥

मान्यपियंतीत्यर्थः॥ प्राणानामग्न्यादिषुलयस्यमुख्यत्वेजीवस्यगतिभोगयोरयोगात्
सर्वेप्राणाअनूत्क्रामंतीतिविस्पष्टश्रुतेर्लोमादिगौणलयपाठाच्चगौणत्वमित्यर्थः॥४॥

भूतांतरयुक्तानामपांगतिमुक्त्वापुरुषवचस्त्वंतासामाक्षिप्यसमाधत्ते प्रथमइति॥ ननुप्रथमपदंव्यर्थंउत्तराग्निषुअपामश्रवणात् इत्याशंक्यसोम
वृष्ट्यन्नरेतसामप्त्वादुत्तरत्रतासांश्रवणमस्तिनप्रथमइत्याह॥ यदिनामेति॥ पंचाग्निष्वपामाहुतित्वेसिद्धेतासांपंचम्यामाहुतौपुरुषवचस्त्वंभवे
त्ततस्सिद्धंप्रथमाग्नौतासामनाहुतित्वादितिशंकार्थः॥ एवंहिश्रद्धाशब्देनापांग्रहेसतिप्रश्नोत्तरोपसंहाराणांसंगानादेकार्थत्वादेकवाक्यतोपपद्यते अत्र

प्रथमेऽश्रवणादितिचेन्नताएवह्युपपत्तेः॥५॥ स्यादेतत् कथंपुनःपंचम्यामाहुतावापःपुरुषवचसोभवंतीत्येतन्निर्धारयितुंपार्य
तेयावतानैवप्रथमेग्नावपांश्रवणमस्ति॥ इहहिद्युलोकप्रभृतयःपंचाग्नयःपंचानामाहुतीनामाधारत्वेनाधीतास्तेषांचप्रमुखेऽ
सौवावलोकोगौतमाग्निरित्युपन्यस्यतस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धांजुह्वतीतिश्रद्धाहोम्यद्रव्यत्वेनावेदितानतत्रापोहोम्यद्रव्यतया
श्रुताः॥ यदिनामपर्जन्यादिषुउत्तरेषुचतुर्ष्वग्निष्वपांहोम्यद्रव्यतापरिकल्प्येतपरिकल्प्यतांनामतेषुहोतव्यतयोपात्तानांसोमादी
नामप्बहुलत्वोपपत्तेः प्रथमेत्वग्नौश्रुतांश्रद्धांपरित्यज्याश्रुताआपःपरिकल्प्यंतइतिसाहसमेतत्॥ श्रद्धाचनामप्रत्ययविशेषःप्र
सिद्धिसामर्थ्यात्॥ तस्मादयुक्तःपंचम्यामाहुतौअपांपुरुषभावइतिचेन्नैषदोषोयतस्तत्रापिप्रथमेग्नौताएवापःश्रद्धाशब्देनाभि
प्रेयंतेकुतःउपपत्तेः॥ एवंह्यादिमध्यावसानसंगानादनाकुलमेतदेकवाक्यमुपपद्यते॥ इतरथापुनःपंचम्यामाहुतावपांपु
रुषवचस्त्वप्रकारेपृष्टेप्रतिवचनावसरेप्रथमाहुतिस्थानेयदिनापोहोम्यद्रव्यंश्रद्धांनामावतारयेत्ततोन्यथाप्रश्नोन्यथाप्रतिव
पं चनमित्येकवाक्यतानस्यादितितुपंचम्यामाहुतावापःपुरुषवचसोभवंतीतिचोपसंहरन्नेतदेवदर्शयतिश्रद्धाकार्यंच
सोमवृष्ट्यादिस्थूलीभवदप्बहुलंलक्ष्यते॥ साचश्रद्धायाअप्त्वेयुक्तिः॥ कारणानुरूपंहिकार्यंभवति॥ ११ हेतुचतुर्थ्येतिध्वेवा

पामाहुतित्वाच्चतुर्थ्यामाहुतावितिवाच्यं॥ अतःप्रश्नोपसंहारयोःपंचम्यामितिश्रवणात्प्रथमाग्नावप्यापएवग्राह्याइतिसमाधानार्थः॥ अतपःअद्भ्योऽ
न्यत्॥ एतदेवेतिश्रद्धाशब्दस्याप्परत्वंदर्शयतीत्यर्थः॥ उपपत्तेरित्यस्यार्थांतरमाह॥ श्रद्धाकार्यमिति॥ तस्याःश्रद्धाहुतेःसोमःसंभवतीत्यादिनाश्र
द्धासोमादीनांपूर्वपूर्वपरिणामत्वश्रुतेस्ततोद्रवपरिणामित्वात्॥ श्रद्धायाअप्त्वंप्रत्ययात्मकस्यश्रद्धायाआहुतित्वायोगाच्चेत्यर्थः॥ ६ ॥

श्रद्धाशब्दस्याप्सु मुख्यस्य न गुणेन वृत्तिर्युक्ता लक्षणां वक्तुं श्रद्धाया अद्भिरेककर्मयोगित्वं हेतुत्वं वा संबंधमाह ॥ श्रद्धापूर्वकेति ॥ असौ यजमानो यस्मात्तावच्छ्रद्धेनापः श्रद्धां संनमंते जनयंतीति श्रुत्यर्थः ॥ ५ ॥ अपां गतिरूपेणाद्भिः सह जीवानां गतिमाक्षिप्य समाधत्ते ॥ अथापीत्यादिना ॥ द्युलोकाग्नौ श्रद्धाहुतेः सोमो राजा संभवतीत्युक्त्वा वाक्यशेषे धूमादिमार्गेण आकाशाच्चंद्रमसं गता इष्टादिकारिण एष सोमो राजेत्युक्ता अतः सोमराजशब्दसामान्यादिष्टादिकारिणां जीवानां

न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन् धर्मिणो निष्क्रम्य होमायोपादातुं शक्यते पश्वादिभ्य इव हृदयादीनीत्याप एव श्रद्धाशब्दा भवेयुः ॥ श्रद्धाशब्दश्चाप्सूपपद्यते ॥ वैदिकप्रयोगदर्शनात् ॥ श्रद्धा वा आप इति ॥ तनुत्वं श्रद्धासारूप्यं गच्छंत्यापो देहबीजभूता इत्यतः श्रद्धाशब्दाः स्युर्यथा सिंहपराक्रमो नरः सिंहशब्दो भवति ॥ श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते मंचशब्द इव पुरुषेषु ॥ श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिरापो हास्मै श्रद्धां संनमंते पुण्याय कर्मण इति श्रुतेः ॥ ५ ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥ अथापि स्यात्प्रश्नप्रतिवचनाभ्यां नामापः श्रद्धादिक्रमेण पंचम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन्नित्युक्तं न तु तत्संपरिष्वक्ता जीवा रंहेयुः ॥ अश्रुतत्वात्तत्र त्वापामिव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति ॥ तस्माद्रंहति संपरिष्वक्त इत्ययुक्तमिति चेन्न ॥ नैष दोषः कुतः इष्टादिकारिणां प्रतीतेः ॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीति उपक्रम्येष्टादिकारिणां धूमादिना पितृयाणेन पथा चंद्रप्राप्तिं कथयत्याकाशाच्चंद्रमसमेष सोमो राजेति त एवेहापि प्रतीयंते ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति तस्या आहुतेः सोमो राजा संभवतीति श्रुतिसामान्यात् ॥ तेषां चाग्निहोत्रदर्शपौर्णमासादिकर्मसाधनभूता दधिपयःप्रभृतयो द्रवद्रव्यभूयस्त्वात्प्रत्यक्षमेवापः संति ता आहवनीये हुताः सूक्ष्मा आहुतयोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयंति ॥ तेषां च शरीरं नैधनेन विधानेनांत्येग्नावृत्विजो जुह्वत्यसौ स्वर्गाय लोकाय स्वाहेति ॥ ६ ॥

श्रद्धाशब्दितानामद्भिः सह गतिरिह श्रद्धाहुतिवाक्ये प्रतीयत इत्यर्थः ॥ तेषां सूक्ष्माभिर्द्रव्यापूर्वरूपाभिः पंचीकृताभिरद्भिः सम्बन्धं वदन् सहगतिं विवृणोति ॥ तेषां चाग्निहोत्रेति निधनं मरणं तन्निमित्तकर्म नैष्टि विधानं असौ यजमानः स्वर्गाय गच्छत्विति मंत्रार्थः ॥ ॥

नगर्गिनं२

श्रु·भा· हुतद्रव्यरूपाणामपां गमनेसूत्रांतरमाह तथाचेति॥ अग्निहोत्रप्रकरणेजनकेनयाज्ञवल्क्यंप्रतिनत्वेवैनयोः सायंप्रातराहुत्योस्त्वमुत्क्रांतिंगतिंप्रतिष्ठांन भ·पा·
टी· तृप्तिंपुनरावृत्तिंनलोकंप्रत्युत्थायिनंवेत्थेतिषट्प्रश्नाः कृतास्तेषांनिर्वचनमपिराज्ञैवतेवाएतेआहुतीहुतेउत्क्रामतः तेअंतरिक्षद्वारादिवंगच्छतस्ते ३।१
र·प्र· दिवमेवाहवनीयंप्रतिष्ठांकुर्वातेदिवंतर्पयतस्तेततः पुनरावर्तेतेततः पृथिव्यांपुरुषेयोषितिचहूते —————— पुरुषरूपेणोत्तिष्ठतइतिवा॥
२५२

ततस्ताः श्रद्धापूर्वककर्मसमवायिन्यः आहुतिमय्यआपः पूर्वरूपाः सत्यस्तानिष्टादिकारिणोजीवान्परिवेष्ट्यामुंलोकंफलदाना
यनयंतीतियत्तदत्रजुहोतिनाभिधीयतेश्रद्धांजुह्वतीति॥ तथाचाग्निहोत्रेषट्प्रश्नीनिर्वचनरूपेणवाक्यशेषेणतेवाएतेआ
हुतीहुतेउत्क्रामतइत्येवमादिनाग्निहोत्राहुत्योः फलारंभायलोकांतरप्राप्तिः प्रदर्शिता॥ तस्मादाहुतिमयीभिरद्भिः संपरिष्व
क्ताजीवारंहतिस्वकर्मफलोपभोगायेतिनिश्चीयते॥६॥ कथंपुनरिदमिष्टादिकारिणांस्वकर्मफलोपभोगायरंहणंप्रतिज्ञायते॥
यावतातेषांधूमप्रतीकेनवर्त्मनाचंद्रमसमधिरूढानामन्नभावंदर्शयति॥ एषसोमोराजातद्देवानामन्नंतंदेवाभक्षयंतीति॥
तेचंद्रंप्राप्यान्नंभवंतितांस्तत्रदेवायथासोमंराजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्रभक्षयंतीतिच[illegible]नविषयंसूत्रंतत
र॥ नचव्याघ्रादिभिरिवदेवैर्भक्ष्यमाणानामुपभोगः संभवतीत्यतउत्तरंपठति॥ भाक्तंवानात्मवित्वात्तथाहिदर्शयति॥७॥ वाश
ब्दश्चोदितदोषव्यावर्त्तनार्थः॥ भाक्तमेषामन्नत्वंनमुख्यं॥ मुख्येह्यन्नत्वेस्वर्गकामोयजेतेत्येवंजातीयकाः अधिकारश्रुतिरुपरु
ध्येत॥ चंद्रमंडलेचेदिष्टादिकारिणामुपभोगोनस्यात्किमर्थमधिकारिणइष्टाद्यायासबहुलंकर्मकुर्युः॥ अन्नशब्दश्चोपभोग
हेतुत्वसामान्यात् अनन्नेप्युपचर्यमाणोदृश्यते॥ यथाविशोन्नं राज्ञांपशवोन्नंविशामिति॥ तस्मादिष्टस्त्रीपुत्रमित्रभृत्या
दिभिरिवगुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणंदेवानांतदेवैषांभक्षणमभिप्रेतं॥ नमोदकादिवच्चर्वणनिगरणंवा॥

क्यशेषेणकृतं॥६॥ संप्रत्युत्तरसूत्रव्यावर्त्यशंकते॥ कथमित्यादिना॥ अत्रसोमाख्यचंद्रस्यान्नत्वमुक्तंनेष्टादिकारिणामिति भ्रांतिनिरासार्थंसूत्रांतर
माह॥ तेचंद्रमिति॥ यथायज्ञेचमसस्थंसोममृत्विजआप्यायस्वेतिक्रियावृत्तौलोट्पुनः पुनराप्याय्यपुनः पुनरपक्षय्यभक्षयंति॥ एवमेनानिष्टादिकारि

णोऽन्नरूपान्भक्षयंतिदेवाइत्यर्थः॥ अधिक्रियतेपुरुषोवि
धिनासंबध्यतेतेनेत्यधिकारः॥ २५२

फलकामनाशास्त्रानर्थक्यवारणाय अन्नत्वं गौणमिति भावः॥ केन दोषेण तेषां देवभोग्यत्वमित्यत आह॥ अनात्मवित्त्वादिति॥ यथा पशुर्भोग्य एवमज्ञस्स भेदधीमान् देवानां भोग्य इत्यर्थः॥ आत्मशब्दस्य मुख्यत्वबलेन सूत्रांशं व्याख्याय प्रकृतपंचाग्नयः सूत्रकृतात्मत्वेनोपचरिता इति व्याख्यान्तरमाह॥ अनात्मे

न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीति च देवानां चर्वणादिव्यापारं वारयति॥ तेषां चेष्टादिकारिणां देवान्प्रति गुणभावोपगतानामप्युपभोग उपपद्यते॥ राजोपजीविनामिव परिजनानां अनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभोग्यभाव उपपद्यते॥ तथा हि श्रुतिरनात्मविदां देवोपभोग्यतां दर्शयति॥ अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति॥ स चास्मिन्नपि लोक इष्टादिभिः कर्मभिः प्रीणयन्पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी तदादिष्टं फलमुपभुंजानः पशुवद्देवानामुपकरोतीति गम्यते॥ अनात्मवित्त्वात्तथा हि दर्शयतीत्यस्यापरा व्याख्या॥ अनात्मविदो ह्येते केवलकर्मिण इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः॥ पंचाग्निविद्यामिहात्मविद्येत्युपचरन्ति॥ प्रकरणात्पंचाग्निविज्ञानविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेनान्नत्वमुद्भाव्य तत्पंचाग्निविज्ञानप्रशंसायै पंचाग्निविद्या हीह विधित्सिता वाक्यतात्पर्यावगमात्॥ तथा हि श्रुत्यन्तरं चंद्रमंडले भोगसद्भावं दर्शयति॥ स सोमलोके विभूतिमनुभूय पुनरावर्त्तत इति॥ तथान्यदपि श्रुत्यन्तरं अथ ये शतं पितॄणां जितलोकानामानंदाः स एकः कर्मदेवानामानंदो ये कर्मणा देवत्वमभिसंपद्यन्त इतीष्टादिकारिणां देवैः सह संवसतां भोगप्राप्तिं दर्शयति॥ एवं भाक्तत्वादन्नभाववचनस्येष्टादिकारिणोऽत्र जीवा रंहन्त इति प्रतीयते॥ तस्माद्रंहति संपरिष्वक्त इति युक्तमेवोक्तं॥ १॥ ७॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च॥ ८॥ इष्टादिकारिणां धूमादिना वर्त्मना चंद्रमंडलमधिरूढानां भुक्तभोगानां ततः प्रत्यवरोह आम्नायते॥ ६ ॥

त्यादिना विद्यास्तुत्यर्थमन्नत्वं न मुख्यमित्यत्र श्रुत्यन्तरार्थं सूत्रशेषं व्याचष्टे॥ तथा हीति॥ एवं गतिपर्यालोचनया वैराग्यमिति सिद्धं॥ ७॥ इदानीं गत्यन्तरभाविनीमागतिं निरूपयति॥ कृतात्यय इति॥

भोक्तव्यकर्मसमाप्त्यानंतर्यमथशब्दार्थः॥ यथेतमित्यारभ्यश्वादियोनिमित्यंतं वाक्यं यावत्तावदाम्नायत इति योजना॥ अत्र यावत्संपातमिति विशेषणाद्रमणीयचरणादिति वाक्याच्च संशयमाह॥ तत्रेति॥ अनुशयः कर्मात्र पूर्वपक्षे कर्माभावेनागतेरनियमात् वैराग्यदार्ढ्यं सिद्धांते कर्मसत्वे नागतिनियमाद्वैराग्यदार्ढ्यमिति भेदः॥ तेषामिष्टादिकारिणां यदा तत्कर्मपर्यवैति परिक्षीणं भवति तदा पुनरावर्तंत इति श्रुत्यंतरेणापि कृत्स्नकर्म

तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंते यथेतमित्यारभ्य यावद्रमणीयचरणा ब्राह्मणादियोनिमापद्यंते॥ कपूयचरणाः श्वादियोनिमिति॥ तत्रेदं विचार्यते॥ किं निरनुशया भुक्तकृत्स्नकर्माणोवरोहंत्याहोस्वित्सानुशया इति॥ किं तावत्प्राप्तं निरनुशया इति॥ कुतः यावत्संपातमिति विशेषणात्संपातशब्देनात्र कर्माशय उच्यते॥ संपतंत्यनेनास्माल्लोकादमुं लोकं फलोपभोगायेति॥ यावत्संपातमुषित्वेति च कृत्स्नस्य तस्य कृतस्य तत्रैव भुक्ततां दर्शयति॥ तेषां यदा तत्पर्यवैतीति च श्रुत्यंतरेणैष एवार्थः प्रदर्श्यते॥ स्यादेतत्॥ यावदमुष्मिल्लोँके उपभोक्तव्यं कर्म तावदुपभुंक्त इति कल्पयिष्यामीति॥ नैवं कल्पयितुं शक्यते॥ यत्किंचेत्यन्यत्र परामर्शात्॥ प्राप्यांतं कर्मणस्तस्य यत्किंचेह करोत्ययं॥ तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मण इत्यपरा श्रुतिर्यत्किंचेत्यविशेषपरामर्शेन कृत्स्नस्येह कृतस्य कर्मणस्तत्र क्षयितां दर्शयति॥ अपि च प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं॥ प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्याभिव्यक्त्यनुपपत्तेः॥ तस्मादविशेषाद्यावत्किंचिदनारब्धफलं तस्य सर्वस्याभिव्यंजकं॥ न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति॥ न ह्यविशिष्टे प्रदीपसन्निधौ घटोभिव्यज्यते न पट इत्युपपद्यते॥ तस्मान्निरनुशया अवरोहंतीत्येवं प्राप्ते ब्रूमः

॥ कृतात्ययेऽनुशयवानिति॥ ८॥

णामत्र लोके भुक्तत्वमुच्यत इत्यर्थः॥ यावत्पदसंकोचो न युक्तः श्रुत्यंतरविरोधादित्याह॥ नैवमिति॥ अयं नरो यत्किंचिदिह लोके कर्म करोति॥ तस्यांतं फलं परलोके प्राप्य कर्मार्थं पुनरायातीति श्रुत्यर्थः॥ कर्माभावे श्रुतिमुक्त्वा युक्तिमाह॥ अपि चेति॥ अभिव्यक्तिः फलोन्मुखता मरणेनाभिव्यक्तस्य सर्वस्य कर्मणः परलोकभोगस्यावश्यंभावात् कर्मभाव इत्यर्थः॥ ॥

चरणाख्यशीलमात्रादवरोह इति प्राप्ते सिद्धांतप्रतिज्ञां व्याचष्टे येनेत्यादिना तत्तत्रावरोहतां जीवानां मध्ये ये केचिदिह कर्मभूमौ रमणीयचरणाः पुण्यकर्माणः पुण्ययोनिभाज इति यत्तदभ्याशो ह अवश्यं हीत्यर्थः ॥ कपूयं पापं ॥ दृष्टशब्दस्य श्रुत्यर्थमुक्त्वार्थांतरमाह ॥ दृष्टश्चेति ॥ पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्यादिशास्त्रेण सुखदुःखयोर्धर्माधर्महेतुकत्वमवगतं ततश्च जन्मारभ्य दृष्टो भोगः कर्महेतुकः भोगत्वात्स्वर्गभोगवत् इत्यनुशयसिद्धिः ।

येन कर्मवृंदेन चंद्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदम्मयं शरीरं चंद्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात्प्रविलीयते ॥ सवितृकिरणसंपर्कादिव हिमकरकाः ॥ हुतभुगर्चिःसंपर्कादिव घृतकाठिन्यं ॥ ततः कृतात्यये कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहंति केन हेतुना दृष्टस्मृतिभ्यामित्याह ॥ तथा हि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति ॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा ॥ अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वेति ॥ चरणशब्देनानुशयः सूच्यत इति वर्णयिष्यते ॥ दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रविभज्यमानः आकस्मिकत्वासंभवादनुशयसद्भावं सूचयति ॥ अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् ॥ स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यंत इति सानुशयानामेवावरोहं दर्शयति ॥ कः पुनरनुशयो नामेति केचित्तावदाहुः स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भांडानुसारिस्नेहवत् ॥ ९ विपक्षे च हेत्वभावाद्भोगस्याकस्मिकत्वप्रसंग इत्यर्थः स्मृतावाश्रमाः आश्रमिणः प्रेत्य मृत्वा लोकांतरे कर्मफलं भुक्त्वा ततः शेषेण भुक्तादन्येन कर्मणा अनुशयाख्येन पुनर्जन्म प्रतिपद्यंत इति संबंधः विशिष्टादेशाद्यो मेधांता दश गुणा येषु तेन तथोक्ताः श्रुतं ज्ञानं वृत्तं आचारः स्वाभिमतानुशयं वक्तुं पृच्छति ॥ कः पुनरिति ॥ कृतस्य कर्मणः स्वर्गे भोगे सति भुक्तस्य कर्मणो लेशोऽनुशयस्तद्वानवरोहति भांडे स्नेहलेशस्य दृष्टत्वात् ततः शेषेणेति स्मृतेश्चेत्येकदेशिव्याख्यामाह ॥ केचिदित्यादिना ॥

रिच्यमानंस्नेहेनवियुज्यमानं॥ननुभोगनाश्यत्वात् कर्मणोलेशोनयुक्तइतिशंकते॥नन्विति॥कृत्स्नकर्मणोभोगेजातेनाशःस्यान्नतुभोगो
जातइतिपरिहारार्थः॥भोगोनजायतइत्ययुक्तमितिशंकते॥नन्विति॥भोगःसावशेषोजातइतिसमाधत्ते॥बाढमित्यादिना॥इदमेकदेशिव्या

यथाहिस्नेहभांडंरिच्यमानंनसर्वात्मनारिच्यते॥भांडानुसार्येवकश्चित्स्नेहशेषोवतिष्ठतेतथानुशयोपीति॥ननुकार्यविरो
धित्वाददृष्टस्यनभुक्तफलस्यसावशेषस्यावस्थानंन्याय्यं॥नायंदोषः॥नहिसर्वात्मनाभुक्तफलत्वंकर्मणःप्रतिजानीमहे॥न
नुनिरवशेषकर्मफलोपभोगायचंद्रमंडलमारूढः॥बाढं॥तथापिस्वल्पकर्मावशेषमात्रेणतत्रावस्थातुंनलभ्यते॥य
थाकिलकश्चित्सेवकःसकलैःसेवोपकरणैराजकुलमुपसृप्तश्चिरप्रवासात्परिक्षीणबहूपकरणःछत्रपादुकादिमा
त्रावशेषोनराजकुलेवस्थातुंशक्नोत्येवमनुशयमात्रपरिग्रहोनचंद्रमंडलेवस्थातुंशक्नोतीति॥नचैतद्युक्तमिव॥नहिस्व
र्गार्थस्यकर्मणोभुक्तफलस्यावशेषानुवृत्तिरुपपद्यतेकार्यविरोधित्वादित्युक्तं॥नन्वेतदप्युक्तंनस्वर्गफलस्यकर्मणोनिखि
लस्यभुक्तफलत्वंभविष्यतीति॥तदेतदपेशलं॥स्वर्गार्थंकिलकर्मस्वर्गस्थस्यैवस्वर्गफलंनिखिलंजनयतिस्वर्गच्युत
स्यापिकिंचित्फललेशंजनयतीति॥नशब्दप्रमाणकानामीदृशीकल्पनावकल्पते॥स्नेहभांडेतुस्नेहलेशानुवृत्तिर्दृष्टत्वादु
पपद्यते॥तथासेवकस्योपकरणलेशानुवृत्तिश्चदृश्यते॥नत्विहतथास्वर्गफलस्यकर्मणोलेशानुवृत्तिर्दृश्यते॥ना
पिकल्पयितुंशक्यतेस्वर्गफलत्वशास्त्रविरोधात्॥अवश्यंचैतदेवंविज्ञेयंनस्वर्गफलस्येष्टादेःकर्मणोभांडानुसारि
स्नेहवदेकदेशोनुवर्तमानोनुशयइति॥यदिहियेनसुकृतेनकर्मणेष्टादिनास्वर्गमन्वभूवंस्तस्यैवकश्चिदेकदेशोनु
शयःकल्प्येत॥ततोरमणीयएवैकोनुशयःस्यान्नविपरीतस्तत्रेयमनुशयविभागश्रुतिरुपरुध्येत॥तद्यइहरम
णीयचरणाअथयइहकपूयचरणाइति॥ ११ ख्यानंदूषयति॥नचेति॥स्वर्गकामोयजेतेत्यादिशास्त्रेणस्वर्गभोगार्थंकर्मचो
दितंतच्छेषस्यमर्त्यभोगहेतुत्वेशास्त्रविरोधइत्यर्थः किंचस्वर्गहेतुकर्मशेषादवरोहेकपूययोन्यापत्तिश्रुतिविरोधइत्याह॥अवश्यंचेति॥ ८॥

स्वाभिमतमनुशयमाह ॥ तस्मादिति ॥ पूर्वपक्षबीजमनूद्य दूषयति ॥ यदित्यादिना ॥ क्षपयित्वा पुनरागच्छंतीति प्राप्यांतमितिवाक्येन गम्यत इति योजना ॥ जन्मारभ्य दृष्टभोगलिंगानुगृहीतया रमणीयकपूयचरणश्रुत्यैहिकानुशयाख्यकर्मविशेषपरया विरोधात् यत्किंचेति यावत्संपातमिति च सामान्यशब्दयोरामुष्मिकविषयत्वेन संकोचोन्याय्य इति भावः ॥ मरणं कृत्स्नकर्माभिव्यंजकमित्ययुक्तं उक्तानुशयश्रुतिविरोधादित्याह ॥ तदपीति ॥

तस्मादामुष्मिके फले कर्मजाते उपभुक्ते अवशिष्टमैहिकफलं कर्मांतरजातं अनुशयस्तद्वंतोऽवरोहंतीति ॥ यदुक्तं यत्किंचेत्यविशेषपरामर्शात्सर्वस्येह कृतस्य कर्मणः फलोपभोगेनांतं प्राप्य निरनुशया अवरोहंतीति ॥ नैतदेवमनुशयसद्भावस्यावगमितत्वात् यत्किंचिदिह कृतमामुष्मिकफलं कर्मारब्धभोगं तत्सर्वं फलोपभोगेन क्षपयित्वेति गम्यते ॥ यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केनचित्कर्मणामुष्मिंल्लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न संभवतीति तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तं ॥ अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोभिव्यंजकं प्रतिज्ञायत इति वक्तव्यं ॥ आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत ततो वक्तव्यं ॥ यथैव प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरित्येवं प्रायणकालेपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारंभासंभवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति ॥ नह्यनारब्धफलत्वसामान्येन जात्यंतरोपभोग्यफलमप्यनेकं कर्मैकस्मिन्प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात् ॥

बलवदनारब्धकर्मप्रतिबंधान्न कृत्स्नकर्माभिव्यक्तिरित्याह ॥ अपि चेत्यादिना ॥ तस्य कृत्स्नकर्मव्यंजकत्वे हेतुर्नास्तीति भावः ॥ प्रश्नं मत्वोत्तरं शंकते ॥ आरब्धेति ॥ आरब्धवदनारब्धस्यापि बलवतः प्रतिबंधकत्वान्न सर्वकर्मणः फलदानायाभिव्यक्तिरिति समाधत्ते ॥ यथेति अनारब्धफलत्वाविशेषात्सर्वकर्मणामभिव्यक्तिमाशंक्य मिथो विरुद्धस्वर्गनरकादिदेहफलानामेकदेहारंभकत्वासंभवउक्तस्तं विवृणोति नहीति ॥ ॥

नराल॥३॥

अस्तुनर्हिदुर्बलस्यकर्मणोनाशइत्यतआह नापीति॥नाभुक्तंक्षीयतेकर्मेत्येकांतउत्सर्गः सचप्रायश्चित्तब्रह्मज्ञानध्यानैर्बाध्यतेनमरणमात्रेणेत्यर्थः मरणेनदुर्बलकर्माविनाशेमानमाह॥स्मृतिरिति॥कर्मनाशपक्षंनिरस्यप्रकृतकृत्स्नकर्माभिव्यक्तिपक्षेदोषांतरमाह॥यदिचेति॥कृत्स्नकर्मणामेकस्मिन्देवादिजन्मनिभोगेनक्षयान्नजन्मान्तरंस्यात् ज्ञानाभावान्नमुक्तिर्नित्यङ्गदेवस्यकर्षांदूशास्त्रस्यादित्यर्थः॥श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणांचंडालपुल्कसानांचब्रह्महायोनिमृच्छतीत्यादिस्मृतिविरोधाच्चनसर्वकर्मणामेकजन्मारंभकत्वमित्याह॥ब्रह्मेति॥ नन्वेकस्यकर्मणः

नापिकस्यचित्कर्मणःप्रायणेऽभिव्यक्तिःकस्यचिदुच्छेदइतिशक्यतेवक्तुंऐकांतिकफलत्वविरोधात्॥ नहिप्रायश्चित्तादिभिर्हेतुभिर्विनाकर्मणामुच्छेदःसंभाव्यते॥स्मृतिरपिविरुद्धफलेनकर्मणाप्रतिबद्धस्यकर्मांतरस्यचिरमवस्थानंदर्शयति॥कदाचित्सुकृतंकर्मकूटस्थमिवतिष्ठति॥मज्जमानस्यसंसारेयावद्दुःखाद्विमुच्यतइत्येवंजातीयका॥ यदिचकृत्स्नमनारब्धफलंकर्मएकस्मिन्प्रायणेयुगपदभिव्यक्तंसदेकांजातिमारभेत ततःस्वर्गनरकतिर्यग्योनिषुअधिकारानवगमाद्धर्माधर्मानुत्पत्तौनिमित्ताभावान्नोत्तराजातिरुपपद्येत॥ब्रह्महत्यादीनांचैकैकस्यकर्मणोऽनेकजन्मनिमित्तत्वंस्मर्यमाणमुपरुध्येत॥ नचधर्माधर्मयोःस्वरूपफलसाधनादिसमधिगमेशास्त्रादतिरिक्तंकारणंशक्यंसंभावयितुं॥ नचदृष्टफलस्यकर्मणःकारीर्यादेःप्रायणमभिव्यंजकंसंभवतीत्यव्यापिकाऽपीयंप्रायणस्याभिव्यंजकत्वकल्पना॥प्रदीपोपन्यासोपिकर्मबलाबलाप्रदर्शनेनैवप्रतिनीतः॥ स्थूलसूक्ष्मरूपाभिव्यक्त्यनभिव्यक्तिवच्चेदंद्रष्टव्यम्॥ ६ ॥ २५५

कथमनेकजन्मफलकत्वंअदृष्टत्वादित्यतआह॥नचेति॥किंचव्यंजकत्वेपिमरणस्यकिंसर्वकर्मव्यंजकत्वंकल्प्यतेउतयत्किंचित्कर्मव्यंजकत्वंनाद्यः॥इहकृतकारीर्यादेरत्रैवफलहेतोर्मरणव्यंग्यत्वासंभवादित्याह॥नचेति॥द्वितीयंनिरस्यन् परोक्तंदृष्टांतंविघटयति॥प्रदीपेति॥रूपाणांप्रदीपवत् मरणंनकस्यचिदपिकर्मणोव्यंजकंकिंतुप्रबलकर्मप्रतिबंधाभावेदुर्बलंव्यज्यतइत्यर्थः॥एवंमरणस्यव्यंजकत्वानंगीकारेणप्रदीपदृष्टांतोनिरस्तःअंगीकारेप्यनुकूलोदृष्टांतइत्याह॥स्थूलेतिसूक्ष्ममनुद्भूतरूपमितिमरणेसर्वकर्माभिव्यक्त्यसिद्धिरितिशेषः॥ ॥

एवंसर्वकर्मसंघएकजन्मारंभकइत्यैकभविकः कर्माशयइतिमतनिरासमुपसंहरतितस्मादिति॥ चरणश्रुत्याततः शेषेणेत्यादिस्मृत्यासबलप्रानिबंधादितिन्यायेनचानभिव्यक्तकर्मसद्भावादित्यर्थः॥ ननुमुक्त्यनुपपत्त्यांगीकार्यऐकभाविकइत्यतआह॥ शेषेति॥ सूत्रशेषंव्याचष्टे॥ तेनेत्यादिना॥ अवरोहमार्गइत्यंशंश्रूयतेतस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानंपुनर्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुंवायुर्भूत्वाधूमो भवतिधूमोभूत्वाभ्रंभवत्यभ्रंभूत्वामेघोभवतिमेघोभूत्वाप्रवर्षतितइहव्रीहियवाओषधिवनस्पतयस्तिलमाषाइतिजायंतेऽतोवैखलु

यथाहिप्रदीपःसमानेपिसन्निधानेस्थूलंरूपमभिव्यनक्तिनसूक्ष्मं॥ एवंप्रायणमपिसमानेप्यनारब्धफलस्यकर्मजातस्यप्राप्तावसरत्वेबलवतः कर्मणोवृत्तिमुद्भावयतिनदुर्बलस्येति॥ तस्माच्छ्रुतिस्मृतिन्यायविरोधादश्लिष्टोयमशेषकर्माभिव्यक्त्यभ्युपगमः॥ शेषकर्मसद्भावेऽनिर्मोक्षप्रसंगइत्ययमप्यस्थानेसंभ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः॥ तस्मात्स्थितमेतदनुशयवंतोऽवरोहंतीति॥ तेचावरोहंतोयथेतमनेवंचावरोहंति॥ यथेतमितियथागतमित्यर्थः॥ अनेवमितितद्विपर्ययेणेत्यर्थः॥ धूमाकाशयोः पितृयाणेऽध्वन्युपात्तयोरवरोहेसंकीर्त्तनाद्यथेतंशब्दाच्चयथागतमितिप्रतीयते॥ रात्र्याद्यसंकीर्त्तनात् अभ्राद्युपसंख्यानाच्च

॥ विपर्ययोपिप्रतीयते॥

दुर्निष्प्रपतरंयोयोह्यन्नमत्तियोरेतःसिंचतितद्भूयएवभवतितद्यइहरमणीयचरणारमणीयांयोनिमापद्यंतइतिधूमाद्यध्वनायथेतं यथागतंतथैतमध्वानंपुनरायांतीत्युक्त्वा धूमादिरूपपितृमार्गस्थरात्र्यादिकंनोक्तंअधिकंचाभ्रादिकमुक्तमितिमत्वासूत्रकृतोक्तंयथेतमनेवंचेति॥ अवशिष्टश्रुत्यर्थोग्रेस्फुटीभविष्यति॥८॥

शा·भा·
टी·
३·अ·
१९६

पुस्तकांतरेषु स्मृतावक्रोधाद्रोहादयइति पाठो दृश्यते ॥ टि·पं·२

संमतिश्रुतिस्थचरणशब्दमाक्षेपपूर्वकं सूत्रकृद्व्याचष्टे ॥ चरणादिति चेदिति ॥ अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा । अनुग्रहश्च ज्ञानं च शीलमेत॰
द्विदुर्बुधा इति स्मृतावुक्ता अद्रोहादयः शास्त्रार्थज्ञानरूपं शीलं सर्वकर्मांगमुक्तं तद्बोधकं चरणपदमंगिनः श्रौतादिकर्मणो लक्षकं कर्मणश्चोत्तर
वस्या धर्माधर्माख्याः पूर्वमिति कर्मलक्षणयैव तदभिन्नापूर्वाख्यानुशयसिद्धिरिति कार्ष्णाजिनिमतं ॥ ९ ॥ तदेव शंकासमाधानाभ्यामाह ॥ आनर्थक्यमि
ति चेदित्यादिना सूत्रेण ॥ चरणशब्दवाच्यस्यैव ग्रहणसंभवात्तल्लक्षणायुक्तेति शंकितैव सूत्रे नन्विति प्रतिषिद्धं शीलं क्रोधानृतादिरूपं ॥ किं च शीलस्येति

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥ अथापि स्यात् यास्तु निरनुशयसद्भावप्रतिपादनायोदाहृतास्तद्य इह रमणीयचर
णा इति सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयात् अन्यच्चरणमन्योऽनुशयः चरणं चारित्रमाचारः शीलमित्यनर्थांतरमनुशयस्तु ।
भुक्तफलात्कर्मणोतिरिक्तं कर्माभिप्रेतं ॥ श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति ॥ यथाकारी यथाचारी तथा भवतीति ॥ यान्यनवद्यानि क
र्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानीति च ॥ तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरि
ति चेन्नैष दोषो यतोऽनुशयोपलक्षणार्थैवैषा चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते ॥ ९ ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥
स्यादेतत् कस्मात्पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते ॥ ननु शीलस्यैव श्रौतस्य विहितप्रतिषिद्धस्य सा
ध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति ॥ अवश्यं च शीलस्यापि किंचित्फलमभ्युपगंतव्यं ॥ अन्यथा ह्यानर्थक्यमेव शी
लस्य प्रसज्येतेति चेत् न नैष दोषः कुतस्तदपेक्षत्वात् ॥ इष्टादि हि कर्मजातं चरणापेक्षं ॥ न हि सदाचारहीनः कश्चिदधिकृतः स्यात् ॥ आ
चारहीनं न पुनंति वेदा इत्यादिस्मृतिभ्यः ॥ पुरुषार्थत्वेप्याचारस्य नानर्थक्यं ॥ इष्टादौ हि कर्मजाते फलमारभमाणे तदपेक्ष एवाचार॰
स्तत्रैव कंचिदतिशयमारभ्यते ॥ कर्म च सर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिस्तस्मात्कर्मैव शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कार
णमिति कार्ष्णाजिनेर्मतं ॥ न हि कर्मणि संभवति शीलाद्योन्यापत्तिर्युक्ता ॥ न हि पद्भ्यां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हतीति ॥ १० ॥

स्य फलत्वायोगात्कुतो योन्यापत्तिस्तस्यैव फलं नानुशयस्येत्याह ॥ अवश्यं चेति ॥ वेदास्तदर्थकर्माण्याचारं विना न फलंतीति स्मृत्या शीलस्य कर्मांगत्वात्प्रत्य
कृफलापेक्षा अंगीफलेनार्थवत्त्वात् न चांगमात्राद्योन्यापत्तिः फलमिति वाच्यं अंगस्य फलासंभवेन मुख्यार्थस्याचारस्य ग्रहणायोगात् लक्षणायुक्तेति समाधा
नार्थः ॥ यद्वाचारस्य स्नानादिवत्पुरुषसंस्कारतया पुरुषार्थत्वं तदाप्यविरोध इत्याह ॥ पुरुषार्थत्वेपीति ॥ अंगावबद्धोपास्तिवदाचारोर्थवानित्यर्थः अस्तु तर्हि

अ·पा·
३·१·
शीलाख्याचारादेव योन्यापत्तिरित्याशंका पुण्यो वै पुण्येन कर्मणे
त्यादिश्रुत्याविरोधान्मैवमित्याह ॥ कर्म चेति ॥ पारयमाणः शक्तः ॥ १० ॥

यद्यप्यक्रोधादिरूपं शीलं साधारणधर्मात्मकं विशेषरूपात्कर्मणो भिन्नं तथापि चरणाचारशब्दौ कर्मवाचिनावेव न शीलवाचकाविति न लक्षणावसर इति बादरिमतं सुस्थमिति सिद्धांतमाह ॥ सुकृतेति ॥ चरणशब्दार्थमुपसंहरति ॥ आचारोपीति ॥ कर्मण एवाचारत्वे यथाकारीत्यादिभेदोक्तिः कथमित्यत आह ॥ भेदव्यपदेश इति निरुपपदाचारशब्दात्सदाचाररूपो विशेषो भाति ॥ अतस्तत्समभिव्याहृतकर्मसामान्यवाचको यथाकारीति शब्दस्तदितरविशेषपरः एवमनवद्यानि कर्माणीति सामान्यतः अस्माकं सुचरितानीति विशेष इति विवेकः ॥ तस्मादनुशयबलादागत्यऽवश्यंभावानुसंधानाद्वैराग्यमिति सिद्धं ॥ ११ ॥ एवं

सुकृतदुःकृते एवेति तु बादरिः ॥ ११ ॥ बादरिस्त्वाचार्यः सुकृतदुःकृते एव चरणशब्देन प्रत्याय्येते इति मन्यते ॥ चरणमनुष्ठानं कर्मेत्यनर्थांतरं तथाह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते ॥ यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मं चरत्येष महात्मेति ॥ आचारोपि च धर्मविशेष एव ॥ भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते ॥ तस्माद्रमणीयचरणाः प्रशस्तकर्माणः कपूयचरणा निंदितकर्माण इति निर्णयः ॥ ११ ॥ २ ॥ अनिष्टादिकारिणामपि च श्रुतं ॥ १२ ॥ इष्टादिकारिणश्चंद्रमसं गच्छंतीत्युक्तं ये त्वितरेऽनिष्टादिकारिणस्तेपि किं चंद्रमसं गच्छंत्युत न गच्छंतीति चिंत्यते ॥ तत्र तावदाहुः ॥ इष्टादिकारिण एव चंद्रमसं गच्छंतीत्येतन्न कस्मात् ॥ यतोऽनिष्टादिकारिणामपि चंद्रमंडलं गंतव्यत्वेन श्रुतं ॥ तथा ह्यविशेषेण कौषीतकिनः समामनंति ॥ ये वै के चास्माल्लोकात् प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति ॥ देहारंभोपि च पुनर्जायमानानां नांतरेण चंद्रप्राप्तिमवकल्पते ॥ पंचम्यामाहुतावित्याहुतिसंख्यानियमात् तस्मात्सर्व एव चंद्रमसमासीदेयुः ॥ इष्टादिकारिणामितरेषां च समानगतित्वं न युक्तमिति चेन्नेतरेषां चंद्रमंडले भोगाभावात् ॥ १२ ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

पुण्यात्मनां गत्यागतिचिंतया वैराग्यं निरूप्य पापिनां तच्चिंतया तन्निरूपयति ॥ अनिष्टादिकारिणामपि च श्रुतं ॥ ये वै के चेत्यविशेषश्रुतेर्वैवस्वतं संगमनं जनानामिति श्रुतेश्च संशये प्रथमाधिकरणेन सिद्धनियमाक्षेपसंगत्या पूर्वपक्षसूत्रं व्याचष्टे ॥ तन्नेत्यादिना ॥ यमराजं पापिजनानां संगमयं हविषा प्रीणयतेति श्रुत्यर्थः ॥ पूर्वपक्षे पुण्यवतामेव चंद्रगतिरिति नियमाभावात्पुण्यवैयर्थ्ये पापाद्वैराग्यादार्ढ्यं चेति फलं ॥ सिद्धांते पापिनां चंद्रलोकदर्शनमपि नास्तीति पुण्यार्थयत्नं वैराग्यदार्ढ्यं चेति फलं ॥ पंचमाग्नौ देहारंभ इति नियमात् पापिनामपि प्रथमं द्युलोकाग्निप्राप्तिर्वाच्येत्याह ॥ देहारंभ इति ॥ पापिनां स्वर्गभोगाभावेपि मार्गांतराभावाच्चंद्रगतिरिति भावः ॥ १२ ॥

शा·भा· सिद्धांतसूत्रं व्याचष्टे ॥ तुशब्द इत्यादिना ॥ संयमने यमलोके यमकृता यातना अनुभूयावरोहंतीत्येवं आरोहावरोहाविति योजना सूत्रस्य अ·पा
टी· ज्ञेया ॥ प्रयतां मृत्वा गच्छतां सम्यक् परत्वात्प्राप्यत इति संपरायः परलोकः तदुपायः सांपरायो वा बालमज्ञं विशेषतो वित्तरागेण मूढं मोहात्प्रमाद्यंतं ३।१
र·प्र·

२५७ तुशब्दः पक्षं व्यावर्त्तयति ॥ नैतदस्ति सर्वे चंद्रमसं गच्छंतीति एतत्कस्माद्यतो भोगायैव चंद्रारोहणं न निःप्रयोजनं ॥ नापि प्र
त्यवरोहणायैव यथा कश्चित् वृक्षमारोहति पुष्पफलोपादानायैव न निष्प्रयोजनं नापि पतनायैव भोगश्चानिष्टादिकारिणां चंद्रम
सि नास्तीत्युक्तं ॥ तस्मादिष्टादिकारिण एव चंद्रमसमारोहंति नेतरे ॥ ते तु संयमनं यमालयमवगाह्य स्वदुष्कृतानुरूपा यामीर्या
तना अनुभूय पुनरेवेमं लोकं प्रत्यवरोहंत्येवंभूतौ तेषामारोहावरोहौ भवतः ॥ कुतः तद्गतिदर्शनात् ॥ तथा हि यमवचनस्वरू
पा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति ॥ न सांपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं ॥ अयं लोको ना
स्ति पर इति मानी पुनः पुनर्वशमापद्यते म इति वैवस्वतं संगमनं जनानामित्येवंजातीयकं च बह्वेव यमवश्यताप्राप्तिलिंगं
भवति ॥ १३ ॥ स्मरंति च ॥ १४ ॥ अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने पुरे यमायत्तं कृष्णकर्मविपाकं स्मरंति नाचिकेतो
पाख्यानादिषु ॥ १४ ॥ अपि च सप्त ॥ १५ ॥ अपि च सप्त नरकान्रौरवप्रमुखान्दुष्कृतफलोपभोगभूमित्वेन स्मरंति पौराणिकाः ताननि
ष्टादिकारिणः प्राप्नुवंति कुतस्ते चंद्रं प्राप्नुयुरित्यभिप्रायः ॥ १५ ॥ ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्माणोऽनुभवंतीति ॥
यावता तेषु रौरवादिष्वन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यंत इति ॥ नेत्याह ॥ तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥ तेष्वपि च २५७
सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः ॥ यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिष्ठातारः स्मर्यं
ते ॥ १६ ॥

वैतं प्रति न भाति स च बालो यं स्त्री वित्तादिः लोकोस्ति न परलोकोस्तीति मानी सः मे मम यमस्य वशमाप्नोतीत्यर्थः ॥ पापिनां यमवश्य
तावादिविशेषश्रुतिस्मृतिबलात् ये वै के चेत्यविशेषश्रुतिरिष्टादिकारिविषयत्वेन व्याख्येयेति भावः ॥ १३ ॥ सूत्रत्रयस्य भाष्यं सुबोधं ॥ १४ ॥ १५ ॥ १६ ॥

यदुक्तं मार्गांतराभावात्पापिनामपि चंद्रगतिरिति तन्न तृतीयमार्गस्योक्तेरित्याह। विद्याकर्मणोरिति ॥ मार्गद्वयोक्त्यनंतरं तृतीयमार्गोक्तिप्रारंभार्थः स्तुनावयशब्दः ॥ एतयोर्विद्याकर्मणोः पथिद्वयसाधनयोरन्यतरेणापि साधनेन येन नरा न युक्तास्ते जन्ममरणावृत्तिरूपतृतीयमार्गस्थानि भूतानि भवंति ॥ क्रि

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥ पंचाग्निविद्यायां वेत्थ यथासौ लोको न संपूर्यत इत्यस्य प्रश्नस्य प्रतिवचनावसरे श्रूयते ॥ अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवंति ॥ जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यत इति ॥ तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत् कस्मात् प्रकृतत्वात् ॥ विद्याकर्मणी हि देवयानपितृयाणयोः पथोः प्रतिपत्तौ प्रकृते ॥ तद्य इत्थं विदुरिति विद्या तया प्रतिपत्तव्यो देवयानः पंथाः प्रकीर्तितः ॥ इष्टापूर्ते दत्तमिति कर्म तेन प्रतिपत्तव्यः पितृयाणः पंथाः प्रकीर्तितस्तत्प्रक्रियायामथैतयोः पथोर्न कतरेण च नेति श्रुतं एतदुक्तं भवति ये च विद्यासाधनेन देवयाने पथ्यधिकृताः नापि कर्मणा पितृयाणे तेषामेष क्षुद्रजंतुलक्षणोऽसकृदावर्ती तृतीयः पंथा भवतीति ॥ तस्मादपि नानिष्टादिकारिभिश्चंद्रमाः प्राप्यते ॥ स्यादेतत् तेपि चंद्रबिंबमारुह्य ततोऽवरुह्य क्षुद्रजंतुत्वं प्रतिपत्स्यंत इति ॥ तदपि नास्त्यारोहानर्थक्यादपि च सर्वेषु प्रयत्सु चंद्रलोकं प्राप्नुवत्सु असौ लोकः प्रयद्भिः संपूर्येतेत्यतः प्रश्नविरुद्धं प्रतिवचनं प्रसज्येत ॥ तथाहि प्रतिवचनं दातव्यं यथाऽसौ लोको न संपूर्यते ॥ अवरोहाभ्युपगमात् असंपूरणोपपत्तिरिति चेत् न अश्रुतत्वात्सत्यमवरोहादप्यसंपूरणमुपपद्यते श्रुतिस्तु तृतीयस्थानसंकीर्तनेनासंपूरणं दर्शयति ॥ एतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यत इति ॥ तेनानारोहादेवासंपूरणमिति युक्तं ॥ अवरोहस्येष्टादिकारिष्वप्यविशिष्टत्वे सति तृतीयस्थानोक्त्याऽऽनर्थक्यप्रसंगात् तुशब्दस्तु शाखांतरीयवाक्यप्रभवामशेषगमनाशंकामुच्छिनत्ति ॥ एवं सत्यधिकृतापेक्षः शाखांतरीये वाक्ये सर्वशब्दोऽवतिष्ठते ॥ ये वै के चाधिकृता अस्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति ॥

यावृत्तौ लोऽनेन पापिनां चंद्रगत्यभावाच्चंद्रलोको न संपूर्यत इति श्रुत्यर्थः ॥ प्रतिपत्ताविति प्राप्तिसाधने इत्यर्थः ॥ अपि च पापिनां चंद्रगतावसौ लोकः संपूर्येत अतश्च न संपूर्यत इत्येतत् प्रतिवचनं विरुद्धं प्रसज्येतेत्यन्वयः ॥ अवरोहादसंपूरणमश्रुतं न कल्प्यं श्रुतहान्यापत्तेरित्याह ॥ नाश्रुतत्वादिति ॥ अवरोहा

एवं तृतीयं स्थानं श्रुत्युक्तमित्यत आह अवरोहस्येति ॥

१७ ॥

द्रममध्यानंपुनर्निवर्तनंतदिति इष्टादिकारिणामवरोहो लोकेरनिष्टादिकारिणामपिअवरोहस्यार्थसिद्धत्वात्पुनरुक्तिर्व्यर्थेत्यर्थः ॥ अथैतयोरितिमार्गेणैतयोप क्रमवाधस्तृतीयशब्दवाधश्चेत्यतः स्थानशब्दोमार्गस्तत्फलइतिद्रष्टव्यं १७ एवमविशेषश्रुतेर्मार्गेणताभावाच्चेतिपूर्वपक्षबीजद्वयंनिरस्यतृतीयबीजनिरासार्थंसूत्रमादत्ते यत्पुनरित्यादिना विद्याकर्मशून्यानांक्रिमिकीटादिभावेनजायस्वेत्यादिश्रुत्यानिरंतरजन्ममरणोपलब्धेर्नाहुतिसंख्यादरइत्यर्थः पु

यत्पुनरुक्तंदेहलाभोपपत्तयेसर्वेचन्द्रमसंगन्तुमर्हन्तिपंचम्यामाहुतावित्याहुतिसंख्यानियमादितितत्प्रत्युच्यते ॥ नतृतीयेनतथोपलब्धेः ॥१८॥ नतृतीयेस्थानेदेहलाभायपंचसंख्यानियमआहुतीनामादर्तव्यःकुतःतथोपलब्धेः ॥ तथाह्यंतरेणैवाहुतिसंख्यानियमंवर्णितेनप्रकारेणतृतीयस्थानप्राप्तिरुपलभ्यते ॥ जायस्वम्रियस्वेत्येतत्तृतीयंस्थानमिति ॥ अपिचपंचम्यामाहुतावापःपुरुषवचसोभवंतीतिमनुष्यशरीरहेतुत्वेनाहुतिसंख्यासंकीर्त्यतेनेनकीटपतंगादिशरीरहेतुत्वेनपुरुषशब्दस्यमनुष्यजातिवचनत्वात् ॥ अपिचपंचम्यामाहुतावपांपुरुषवचस्त्वमुपदिश्यतेनापंचम्यामाहुतौपुरुषवचस्त्वंप्रतिषिध्यतेवाक्यस्यद्व्यर्थतादोषात्तत्रयेषामारोहावरोहौसंभवतस्तेषांपंचम्यामाहुतौदेहउद्भविष्यत्यन्येषांतुविनैवाहुतिसंख्ययाभूतांतरोपसृष्टाभिरद्भिर्देहआरप्स्यते ॥१८॥ स्मर्यतेपिचलोके ॥१९॥ अपिचस्मर्यतेलोकेद्रोणधृष्टद्युम्नप्रभृतीनांसीताद्रौपदीप्रभृतीनांचायोनिजत्वंतत्रद्रोणादीनांयोषिद्विषयैकाहुतिर्नास्तिधृष्टद्युम्नादीनांतुयोषित्पुरुषविषयेद्वेअप्याहुतीनस्तः ॥ यथाचतत्राहुतिसंख्यानादरोभवतिएवमन्यत्रापिभविष्यति ॥ बलाकाप्यंतरेणैवरेतःसेकंगर्भंधत्तइतिलोकेरूढिः ॥१९॥ दर्शनाच्च ॥२०॥ अपिचचतुर्विधेभूतग्रामेजरायुजांडजस्वेदजोद्भिज्जलक्षणेस्वेदजोद्भिज्जयोरंतरेणैवग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरोभवति ॥ एवमन्यत्रापिभविष्यति ॥

रुषशब्दाश्चैवमित्याह ॥ अपिचेति ॥ मनुष्यदेहस्यापिनाहुतिसंख्यानियमइत्याह ॥ अपिचेत्यादिना ॥ विधिनिषेधरूपार्थद्वयेवाक्यभेदःस्यादित्यर्थः ॥१८॥ अनियमेस्मृतिसंवादार्थंसूत्रं ॥ स्मर्यतेपीति ॥ लोकानेनेनेति लोकोभारतादिरुक्तःपुरस्तार्थमप्याह ॥ बलाकेति ॥१९॥ अंडजानिचजारुजानिचस्वेदजानिचोद्भिज्जानिचेतिश्रुत्यवष्टंभेनसूत्रंव्याचष्टे अपिचेति ॥ अन्यत्राप्यनिष्टादिकारि

अनयाश्रुत्या चातुर्विध्यं कथमुक्तं श्रुत्यंतरे त्रीण्येवेत्यवधारणविरोधादिति शंकोत्तरत्वेन सूत्रमादत्ते॥ नन्वित्यादिना जीवजं जरायुजं मनुष्यादि॥ भूमिमुद्भिद्य जायते वृक्षादिकं उदकं भित्त्वा जायते यूकादिजंगममिति भेदः संशोकः स्वेदः॥२१॥ एवं पापिनां गत्यागती विचार्य संप्रतीष्टादिकारिणामवरोहे विशेषमाह॥ साभाव्यापत्तिरुपपत्तेः यथेतमनेवं चेत्युक्तरीत्या पथागतं धूमाद्यध्वानं पुनर्निवर्तंते निरुक्ताश्चानुशायिनः कर्मान्ते द्रुतदेहाः आकाशंगताः आकाशसदृशा भवंति आकाशसादृश्यानंतरं पिंडीकृतानि सूक्ष्मालिंगोपहिताः वायुनेतस्ततश्च नीयमाना वायुसमा भवंति सोनुशयिसंघो वायुसमो भूत्वा धूमसंसर्गतस्तत्समो

ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवंत्याण्डजं जीवजमुद्भिज्जमित्यत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते॥ तृतीयशब्दावरोधः संशोकजस्य॥२१॥ आंडजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः॥ उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् स्थावरोद्भेदात्तु विलक्षणो जंगमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः॥ ३॥२१॥ साभाव्यापत्तिरुपपत्तेः॥२२॥ इष्टादिकारिणश्चंद्रमसमारूढास्तस्मिन् यावत्संपातमुषित्वा ततः सानुशया अवरोहंतीत्युक्तं॥ अथावरोहप्रकारः परीक्ष्यते॥ तत्रेयमवरोहश्रुतिर्भवति॥ अथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा भ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति॥ तत्र संशयः॥ किमाकाशादिस्वरूपमेवावरोहंतः प्रतिपद्यंते॥ किंवाकाशादिसाम्यमिति॥ तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यंत इति॥ कुतः॥ एवं हि श्रुतिर्भवति इतरथा लक्षणा स्यात्॥ श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा॥ तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्तत्स्वरूपोपपत्तावांजस्येनावकल्पंते॥ ९

भवति धूमसमो भूत्वाऽभ्रसमो भवति अपो बिभर्तीत्यभ्रं मेहति सिंचतीति वृष्टिकर्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो भवतीति सिद्धांतगत्या श्रुत्यर्थः॥ पूर्वोत्तरयुक्तिद्वयं संशयबीजं मंतव्यं॥ पूर्वत्र मार्गद्वयं उक्त्वा तृतीयत्वोक्तेर्युक्तं स्थानशब्दस्य मार्गलक्षकत्वं इह तु दृष्टंवद्धिभवतीत्यादिप्रयोगे भवति श्रुतेर्विकारस्वरूपापत्तौ मुख्यत्वात्सादृश्यापत्तिलक्षणाबीजं नास्तीति प्रत्युदाहरणसंगतिः श्रुतिमुख्यत्वफलमिति पूर्वपक्षः

शा.भा.
टी.
र.प्र.
२५९

अनुशयिनांपूर्वसिद्धाकाशादिस्वरूपापत्त्ययोगाल्लक्षणेतिसिद्धांतयति॥एवमित्यादिना॥समानोभावोधर्मोयस्यतद्भावःसाभाव्यंसाम्यमितिसूत्रपदार्थः
॥एवंह्येतदिति॥एतद्भवनमेवसादृश्यरूपमेवोपपद्यतइत्यर्थः अनुशयिनामाकाशादिभ्योनिर्गमनान्यथानुपपत्त्यापिसादृश्यलक्षणेत्याह॥आकाश॰
स्वरूपेति॥संयोगलक्षणामाशंक्याह॥विभुत्वादिति॥भवतिश्रुत्यासंयोगलक्षणायामनुवादःस्यादित्यर्थः विविधभूतसाम्यमवरोहेभवतीत्यतस्त

तस्मादाकाशादिस्वरूपप्रतिपत्तिरित्येवंप्राप्तेब्रूमः॥आकाशादिसाम्यंप्रतिपद्यन्तइति चंद्रमंडलेयदम्मयंशरीरमुपभोगा
र्थमारब्धंतदुपभोगक्षयेसतिप्रविलीयमानंसूक्ष्ममाकाशसमंभवतिततोवायोर्वशमेतिततोधूमादिभिःसंपृच्यतइति त
देतदुच्यते यथेतमाकाशमाकाशाद्वायुमित्येवमादिना॥कुतएतदुपपत्तेः एवंह्येतदुपपद्यतेनह्यन्यस्यान्यभावोमु
ख्यउपपद्यते॥आकाशस्वरूपप्रतिपत्तौचवाय्वादिक्रमेणावरोहोनोपपद्यते॥विभुत्वाच्चाकाशेननित्यसंबंधत्वान्नत।
त्सादृश्यापत्तेरन्यस्तत्संबंधोघटते॥श्रुत्यसंभवेचलक्षणाश्रयणंन्याय्यमेवा॰तआकाशादितुल्यतापत्तिरेवात्राकाशा
दिभावउपचर्यते॥४॥२२॥नातिचिरेणविशेषात्॥२३॥तत्राकाशादिप्रतिपत्तौप्राग्व्रीह्यादिप्रतिपत्तेर्भवतिविशयः॥
किंदीर्घंदीर्घंकालंपूर्वसादृश्येनावस्थायोत्तरसादृश्यंगच्छत्युताल्पमल्पमिति॥तत्रा॰नियमोनियमकारिणःशास्त्रस्या॰
भावात्॥इत्येवंप्राप्तइदमाह॥नातिचिरेणेति॥अल्पमल्पकालमाकाशादिभावेनावस्थायवर्षधाराभिःसहेमांभुवमापतंति
॥कुतएतत्विशेषदर्शनात्॥तथाहिव्रीह्यादिभावापत्तेरनंतरंविशिनष्टि॥अतोवैखलुदुर्निष्प्रपततरमिति॥तकारएकश्छांद
सःप्रक्रियायांतुप्रोमंतव्योदुर्निष्क्रमततरंदुःखतरमस्माद्व्रीह्यादिभावान्निःसरणंभवतीत्यर्थः॥तदत्रदुःखनिःप्रपतनंप्रदर्शयति

धानाद्वैराग्यमुपसंहरति॥अतइति॥२२॥नातिचिरेण॥उक्तंसादृश्यमुपजीव्यलोकेगंतॄणांचिराचिरगतिद((न्पूर्वेषुसुखंनिष्प्रपतनंदर्श
र्नात्संशयंवदन्पूर्वपक्षयति॥तत्रेत्यादिना॥अनियमात्कदाचिद्विलंबेनयोन्यापत्तिरितिपूर्वपक्षफलं॥सिद्धांतेतुव्रीहियवादिभावादनुशयिनां।
विलंबेननिर्गमनमितिविशेषादाकाशादिभावात् शीघ्रंनिर्गमइत्यविलंबेनयोन्यापत्तिरित्यनुसंधानाद्वैराग्यदार्ढ्यमितिविवेकः॥ ॥

अ.पा.
३.१
२५९

नन्वाकाशादिष्वनुशयिनां सुखं व्रीहियवादिषु दुःखमिति दुःशब्दाज्ज्ञानेन चिराचिरनिर्गमनमित्यत आह ॥ सुखदुःखनाविशेषश्रवायमिति अवधिःका-
लः ॥ २४ ॥ अन्याभिलापात् ॥ सूत्रनिक्रमात् अर्थक्रमाच्चाधिकरणानां क्रमो बोध्यः ॥ इह भूमौ वर्षधाराद्वारा पतितानास्तेनुशयिनो व्रीह्यादिसाम्येन जायन्त-
इति सूत्रार्थः ॥ अत्र जायन्त इति सूत्रे तेः पूर्वेणाकाशादिवर्षान्तसादृश्योक्तेश्च संशयमाह नत्रेति ॥ अस्मिन्नवधौ वर्षे सादृश्यानन्तरमित्यर्थः दुर्भिक्षप्रपतनवशा-
द्वेन चिरनिर्गमनलक्षणोक्तानयुक्तादुःखेन निर्गमनमिति सुखसंभवादित्याक्षेपसंगत्या पूर्वपक्षयति ॥ किंतावदित्यादिना ॥ अत्र पूर्वपक्षे स्थावर-

सुखदुःखनाविशेषश्रायं निःप्रपतनस्य कालात्यन्तदीर्घत्वनिमित्तस्तस्मिन्नवधौ शरीरानिष्पत्तेरुपभोगासंभवात् तस्मा-
द्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति ॥ ५ ॥ २४ ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ तस्मिन्नेवावरोहे प्र-
वर्षणानन्तरं पठ्यते ॥ त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्त इति ॥ तत्र संशयः ॥ किमस्मिन्नवधौ
स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवंत्याहोस्वित्क्षेत्रज्ञान्तराधिष्ठितेषु स्थावरशरीरेषु संश्ले-
षमात्रं गच्छन्तीति ॥ किं तावत्प्राप्तं ॥ स्थावरजात्यापन्नास्तत्सुखदुःखभाजोऽनुशयिनो भवंतीति ॥ कुत एतत् जनेर्मु-
ख्यार्थत्वोपपत्तेः ॥ स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः ॥ पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्या-
निष्टफलत्वोपपत्तेस्तस्मान्मुख्यमेवेदमनुशयिनां व्रीह्यादिजन्म श्वादिजन्मवत् ॥

त्वनिवृत्तयेऽधिकारिणां यत्नगौरवं सिद्धं ।
ते व्रीह्यादिसंश्लेषमात्रं परिहर्तुं यत्नलाघवं वैराग्यधौर्यं चेति विवेकः ॥ ननु देहोत्पत्त्या जीवानां जन्म स्यात्स्वतः व्रीह्यादेस्तु न देहत्वमित्यत आह
स्थावरस्येति स्थाणुमन्येऽनुसंयन्तीत्याद्या श्रुतिः शरीरजैः कर्मदोषैर्याति स्थावरतां नर इत्याद्या स्मृतिः ननु स्वर्गिणां पापाभावात्कथं स्थावरत्वं तत्राह ॥
पश्विति ॥ सोमाद्युच्छिष्टभक्षणसुराग्रहावादिशब्दार्थैः क्रत्वर्थहिंसादेरपि हिंसात्वादिसामान्येन प्रवृत्तेर्न हिंस्यादित्यादिशास्त्रनिषिद्धताकारे-
णदुरितापूर्वकारित्वमविरुद्धमिति सांख्या आहुः ॥ ६ ॥

श्रुतोऽत्र व्रीह्यादिभावोऽनुशयिनां न तज्जन्मरूपः कर्मविशेषपरामर्शं विनाऽत्रोक्तत्वात् पूर्वोक्ताकाशादिभाववदिति सिद्धान्तयति सर्वं प्राप्त इत्यादिना॥ पूर्ववदिति पदं दृष्टान्तत्वेन हेतुत्वेन च व्याख्यातं॥ यदत्र प्रकरणे कर्मविशेषपरामर्शपूर्वकमुच्यते तज्जन्मेति व्यतिरेकदृष्टान्तमप्याह यत्र त्विति॥ अपि च यो यो ह्यन्नमत्ति यो रेतः स्त्रियां सिंचति तद्भूयो भवतीति वाक्यशेषे व्रीह्यादिषु प्रविष्टस्यानुशयिनस्सघस्यान्नद्वारा रेतस्सिक्पुरुषयोगः श्रुतः तदन्य

यथा श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वेति मुख्यमेवानुशयिनां श्वादिजन्म तत्सुखदुःखान्वितं भवत्येवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः॥ अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते॥ न तत्सुखदुःखभाजो भवन्ति पूर्ववत्॥ यथा वायुधूमादिभावोऽनुशयिनां तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि जातिस्थावरैः संश्लेषमात्रं॥ कुत एतत्॥ तद्वदेवेहाप्यभिलापात्॥ कोऽभिलापस्य तद्वद्भावः कर्मव्यापारमन्तरेण संकीर्तनं॥ तथाकाशादिषु प्रवर्षणान्तेषु न कंचित्कर्मव्यापारं परामृशत्येवं व्रीह्यादिजन्मन्यपि॥ तस्मान्नास्त्यत्र सुखदुःखभाक्त्वमनुशयिनां॥ यत्र तु सुखदुःखभाक्त्वमभिप्रैति परामृशति तत्र कर्मव्यापारं रमणीयचरणाः कपूयचरणा इति च॥ अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु खण्ड्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुर्यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन्पीड्यमाने प्रवसतीति प्रसिद्धं॥ तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येतातः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति॥ एतेन जननेर्मुख्यार्थत्वं प्रतिब्रूयात्॥ उपभोगस्थानत्वं च स्थावरभावस्य न तु वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे॥ भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं॥ चन्द्रमसस्त्ववरोहन्तोऽनुशयिनो न स्थावरभावमुपभुंजत इत्याचक्ष्महे॥२४॥ ९ थानुपपत्त्यापि जन्मश्रुतिर्न मुख्येत्याह॥

अपि चेत्यादिना व्रीह्यादिरूपदेहनाशे देहिनामुत्क्रान्तेरवश्यंभावाद्रेतःसिग्योगो न स्यादित्यर्थः॥ एतेनेति॥ उक्तानुमानार्थापत्तिभ्यां जायन्त इति श्रुतेर्मुख्यार्थत्वमनुशयिभोगायतनत्वं च व्रीह्यादेः प्रतिब्रूयादित्यर्थः॥ ननु व्रीह्यादेर्भोगायतनत्वानंगीकारे पूर्वोक्तश्रुतिस्मृतिप्रसिद्धिबाध इत्यत आ

वैदिकं कर्माशुद्धं न भवति शास्त्रविहितत्वादिति सूत्रार्थं प्रपंचयति अयं धर्म इत्यादिना॥ शुचौ देशे प्रातः सायं काले जीवनादिनिमित्ते कृतमग्निहोत्रं धर्मो भवति सएवाशुचिदेशे मध्यरात्रे मरणादिनिमित्ते कृतः सन्न धर्मो भवतीति निर्णयः शास्त्रैकसाध्य इत्यर्थः॥ ततः किं तत्राह॥ शास्त्रात्त्वेति॥ ननु या हिंसा सासोऽधर्म इत्युत्सर्गस्य विशेषविधिना बाधोऽत्र न युक्तः नाभिचरेदिति निषिद्धश्येनस्य पुरुषार्थत्ववत् निषिद्धहिंसादेरपि क्रतूपकारकत्वाविरोधादिति तत्राह॥ उत्सर्गापवादयोरिति॥ अयमर्थः काम्यकर्मणि सर्वत्र करणांशे रागतः प्रवृत्तिरंगेषु विधित इति स्थितिः॥ तथा च श्येनाख्ये

अशुद्धमिति चेन्न शब्दात्॥२५॥ यत्पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्पत इत्यतो मुख्यमेवाऽनुशयिनां व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति॥ तत्परिह्रियते॥ न शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य॥ अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणं अतीन्द्रियत्वात्तयोः अनियतदेशकालनिमित्तत्वाच्च॥ यस्मिन्देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति॥ तेन शास्त्रादृते धर्माधर्मविषयं विज्ञानं न कस्यचिदस्ति॥ शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः॥ स कथमशुद्ध इति शक्यते वक्तुं॥ ननु न हिंस्यात्सर्वा भूतानीति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति॥ बाढं॥ उत्सर्गस्तु सः॥ अपवादोऽग्नीषोमीयं पशुमालभेतेति॥ उत्सर्गापवादयोश्च व्यवस्थितविषयत्वं॥ तस्माद्विशुद्धं कर्म वैदिकं शिष्टैरनुष्ठीयमानत्वादनिंद्यमान

((त्वा। च्च तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वं

कर्मणि निषेधेऽपि रागप्राबल्यात् प्रवृत्तिः स्यात् क्रत्वंगहिंसादौ तु विधित एव प्रवृत्तिर्वाच्या सच ((

विधिर्यद्युत्सर्गप्राप्तं अनर्थहेतुत्वं न बाधेत तर्हि प्रवर्तको न स्यात् प्रवर्तकत्वे वा विधिरनर्थाय स्यात् अतो निरवकाशो विधिः सावकाशमुत्सर्गमविहितहिंसादिषु स्थापयतीति॥ इदं च निषेधशास्त्रस्य हिंसात्वादिसामान्येन प्रवृत्तिमंगीकृत्योक्तं वस्तुतस्तस्य रागप्राप्तहिंसाविषयत्वाद्वैधहिंसायामप्रवृत्तेर्नाशुद्धत्वशंकावसर इति द्रष्टव्यं प्रतिरूपं दुःखरूपं तस्य फलं तेनेति योजना॥

इह व्रीह्यादिभावे कश्चिदधिकारः कर्मपरामर्शो नास्तीत्युक्तं ॥२५॥ अथ व्रीह्यादिभावानंतरं रेतःसिग्भावः श्रुतस्तत्रान्नस्यानुशयिनो रेतःसेकक॰
र्तृत्वेनायोगाद्योगमात्रं वाच्यं तद्वदुपक्रमेपि योग एवास्थेयः अन्यथोपक्रमोपसंहारयोर्विरोधः स्यादिति मत्वोक्तमित्यविरोध इति ॥२६॥ योनेः शरीरं श्रुते
र्न व्रीह्यादिशरीरत्वमनुशयिनामिति सूत्रार्थः ॥ एवं कर्मिणां गत्यागति संसारो दुर्वार इत्यनुसंधानात् कर्मफलाद्वैराग्यं ततत्वज्ञानसाधनं सिद्धमिति पा॰

न च श्वादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति ॥ तद्धि कपूयचरणानधिकृत्योच्यते ॥ नैवमिह वैशेषिकः कश्चिदधिकारो
ऽस्त्यतश्चंद्रमंडलस्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते ॥२५॥ रेतःसिग्योगोथ ॥२६॥ इतश्च॰
व्रीह्यादिसंश्लेषमात्रं तद्भावो यत्कारणं व्रीह्यादिभावस्यानंतरमनुशयिनां रेतःसिग्भाव आम्नायते ॥ यो यो ह्यन्नमत्ति॰
यो रेतः सिंचति तद्भूय एव भवतीति ॥ न चात्र मुख्यो रेतःसिग्भावः संभवति ॥ चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति
॥ कथमिवानुपचरितं तद्भावमद्यमानान्नानुगतोनुशयी प्रतिपद्यते ॥ तत्र तावदवश्यं रेतःसिग्योग एव रेतःसिग्भावोभ्युप
गंतव्यः ॥ तद्वद्व्रीह्यादिभावोपि व्रीह्यादियोग एवेत्यविरोधः ॥२६॥ योनेः शरीरम् ॥२७॥ अथ रेतःसिग्भावस्यानंतरं योनौ नि
षिक्ते रेतसि योनेरधि शरीरमनुशयिनामनुशयफलोपभोगाय जायत इत्याह शास्त्रं ॥ तद्य इह रमणीयचरणा इत्यादि ॥ त
स्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरत्वमेव सुखदुःखान्वितं भवतीति ॥ तस्माद्व्रीह्यादिसंश्लेषमात्रमनु
शयिनां तज्जन्मेति सिद्धं ॥६॥२७॥ इति शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ तृतीयाध्यायस्य प्रथमः पादः समाप्तः

दार्थमुपसंहरति ॥ इति सिद्धमिति ॥२७॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदानंदभगवतः कृतौ शारीरकमीमांसाव्याख्यायां
भाष्यरत्नप्रभायां तृतीयाध्यायस्य प्रथमः पादः समाप्तः ॥१॥ भाष्य ॥३५०॥ टीका ॥२५०॥ एवं ॥६००॥ अधिकरणे ॥९३॥ श्रीरामचंद्राय नमः

अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यद्वितीयपादःप्रारंभः

ब्र॰भा॰ टी॰ र॰प्र॰ ३०२

अ॰पा॰ ३।२

श्रीगणेशाय नमः ॥ संध्ये सृष्टिराह हि ॥ उक्तवैराग्यसाध्यस्तत्त्वंपदार्थविवेको वाक्यार्थज्ञानसाधनमस्मिन्पादे निरूप्यत इति पादयोर्हेतुसाध्यभावसंगतिमाह ॥ अतिक्रांत इति ॥ साधनविचारत्वादेवास्य पादस्यास्मिन्नध्याये संगतिः ॥ अस्मिन्पादे नस्थानतोपीत्यतः प्रागुद्देश्यत्वेन प्रथमं जिज्ञासितत्वंपदार्थः अवस्थाद्वारा विविच्यते तेन दारभ्यापादसमाप्तेर्विधेयतत्पदार्थविवेकः ॥ तत्र पूर्वं गत्यागतिचिंतया जाग्रदवस्था निरूपिता तदनंतरभाविनीं स्वप्नावस्थां श्रुत्युक्तां विषयीकृत्य तत्र स्वप्ने रथादिसृष्ट्युक्तेस्तदभावोक्तेश्च संशयं वदन्पूर्वपक्षसूत्रं योजयति ॥ तत्र संशय इत्यादिना ॥ स्वप्ने रथादेर्जाग्रद्रथादिवत् व्यावहारिकसत्ता का उत शुक्तिरजतवत् प्रातीतिका इति संशयार्थः ॥ आरंभणाधिकरणे प्रपंचस्य पारमार्थिकत्वनिषेधादिति मंतव्यं

श्रीगणेशाय नमः ॥ १ ॥ संध्ये सृष्टिराह हि ॥ १ ॥ अतिक्रांते पादे पंचाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपंचितः ॥ इदानीं तु तस्यैवावस्थाभेदः प्रपंच्यते ॥ इदमामनंति ॥ स यत्र प्रस्वपितीत्युपक्रम्य न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादि ॥ तत्र संशयः ॥ किं प्रबोध इव स्वप्नेपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति तत्र तावत्प्रतिपद्यते संध्ये तथ्यरूपा सृष्टिरिति संध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् ॥ संध्यं तृतीयं स्वप्नस्थानमिति ॥ द्वयोर्लोकस्थानयोः प्रबोधसंप्रसादस्थानयोर्वा संधौ भवतीति संध्यं तस्मिन्संध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति ॥ कुतः यतः प्रमाणभूता श्रुतिरेवमाह ॥ अथ रथान्रथयोगान्पथः सृजत इत्यादि ॥ स हि कर्तेति चोपसंहारादेवमेवावगम्यते ॥ २ ॥ ऽध्ये ॥

अत्र पूर्वपक्षे जाग्रद्वत्स्वप्नाज्जीवस्य विवेकासिद्धिः सिद्धांते प्रातीतिकदृश्यसाक्षितया विवेकात्स्वयंज्योतिष्ट्वसिद्धिरिति फलं सुमूर्षोः सर्वेंद्रियोपसंहारादेतल्लोकाननुभवे सति वासनामात्रेणेमं लोकं स्मरतः कर्मवशाद्धृदये मनसा परलोकस्फूर्तिरूपः स्वप्नो भवति सोयं लोकद्वयसंधौ भवतीति संध्यः स्वप्नः ॥ तथा च श्रुतिः ॥ तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं चेति ॥ अयं स्वप्नः कादाचित्क इत्यरुच्या नित्यस्वप्नस्य प्रबोधसंप्रसादसंधिभवत्वमुक्तं ॥ अन्ये तु मर्त्यचक्षुराद्यजन्यरूपादिसाक्षात्कारत्वं परलोकलक्षणं दैवचक्षुराद्यजन्यतद्वत्त्वं मर्त्यलोकलक्षणं च स्वप्नेस्तीति लक्षणतो लोकद्वयस्य दर्शनात् नित्यस्वप्नस्यैव लोकद्वयसंध्यत्वं ग्राममहापथसंधिमार्गस्य तत्संध्यत्ववदित्याचक्षते ॥ न केवलं श्रुत्या स्वप्नार्थानां व्यावहारिकसत्यत्वं किंतु सकर्तृकत्वादपीत्याह ॥ स हि कर्तेति ॥ २ ॥

किंच स्वप्नार्थाः सत्याः प्राज्ञनिर्मितत्वात् आकाशादिवदिति सूत्रार्थमाह ॥ अपि चेत्यादिना ॥ रूढिमाशंक्य प्रकरणान्निरस्यति ॥ नन्वित्यादिना य ः। सुप्तेषु निर्व्यापारेषु जागर्तीति देवश्रुत्युक्तं स प्रकाशो ब्रह्मेत्यर्थः ॥ स्वप्नस्य जाग्रदर्थैः समानदेशत्वश्रुतेरभेदश्रुतेश्च सत्यत्वेन तात्पर्यमित्याह अथो खल्वाहुरिति ॥ २ ॥ स्वप्नरथादयः प्रातीतिकाः जाग्रद्रथादौ क्लृप्तसामग्रीं विना दृष्टत्वाच्छुक्तिरूप्यादिवदिति सिद्धान्तयति ॥ तुशब्द इत्यादिना ॥ चिन्मात्रनिष्ठा ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ अपि चैके शाखिनो स्मिन्नेव संध्ये स्थाने कामानां निर्मातारं आत्मानमामनंति ॥ य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इति ॥ पुत्रादयश्च तत्र कामा अभिप्रेयंते काम्यंत इति ॥ ननु कामशब्देनेच्छाविशेषा एवोच्येरन् न शतायुषः पुत्रपौत्रान्वृणीष्वेति प्रकृत्यांते कामानां त्वा कामभाजं करोमीति प्रकृतेषु पुनरत्र तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् ॥ प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः ॥ प्राज्ञस्य हीदं प्रकरणं अन्यत्र धर्मादन्यत्राधर्मादित्यादि ॥ तद्विषय एव च वाक्यशेषोपि तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥ तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति ॥ प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति ॥ तथा च श्रुतिः ॥ अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति स्वप्नजागरितयोः समानन्यायतां श्रावयति ॥ तस्मात्तथ्यरूपैव संध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ तुशब्दः पक्षं व्यावर्तयति ॥ नैतदस्ति यदुक्तं संध्ये सृष्टिः पारमार्थिकीति ॥ मायैव संध्ये सृष्टिर्न परमार्थगंधोप्यस्ति कुतः ॥ कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ नहि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः ॥ किं पुनरत्र कार्त्स्न्यमभिप्रेतं देशकालनिमित्तसंपत्तिरबाधश्च ॥ नहि परमार्थवस्तुविषयाणि देशकालनिमित्तान्यबाधश्च स्वप्ने संभाव्यंते ॥ न तावत्स्वप्ने रथादीनामुचितो देशः संभवति ॥

ऽविद्याचित्त्वावच्छेदेन जीवे पिहिता रथाद्याकारा मायेति सूत्रभाष्ययोरुक्ता मायाविद्ययोरभेदज्ञानाय ॥ मात्रपदेन तु सति प्रमातर्यबाध्यत्वरूपस्य व्यावहारिकसत्यत्वस्य निरासः । उक्तः कार्त्स्न्यमत्र जाग्रति याक्लृप्तसामग्री तज्जन्यत्वं परमार्थवस्तुनो जाग्रदर्थस्य कार्यस्य धर्मः सत्यत्वव्यापकः तदभावं स्वप्ने विवृणोति ॥ न तावदित्या

शा.भा. संवृतेसंकीर्णेपर्येतुंगंतुंविपर्येतुंवागंतुं॥ श्रावयतिप्रबुद्धोजनःपार्श्वस्थान्इतिशेषः॥ एतत्स्वप्नंयथास्यात्तथायत्रकालेस्वप्न्ययावृत्त्याचरति तदास्वे९ अ.पा.
टी. शरीरेयथेष्टंचरतीत्यर्थः॥ बहिरिवेति॥ कुलायाद्देहात् बहिरिवामृत आत्माचरित्वायत्रकामंयथेष्टमीयतेविहरतीत्यर्थः॥ गुणमाह॥ योहीति ॥देहाभि ३।२
र.प्र.
२०३

नहिसंवृतेदेहदेशेरथादयोवकाशंलभेरन्॥ स्यादेतत्॥ बहिर्देहात्स्वप्नंद्रक्ष्यतिदेशांतरितद्रव्यग्रहणात्॥ दर्शयतिचश्रुतिःबहि
र्देहात्स्वप्नंबहिःकुलायादमृतश्चरित्वा सईयतेऽमृतोयत्रकाममिति॥ स्थितिगतिप्रत्ययभेदश्चनानिष्क्रांतेजंतौसामंजस्य
मनुभवेदिति॥ नेत्युच्यते नहिसुप्तस्यजंतोःक्षणमात्रेणयोजनशतांतरितंदेशंपर्येतुंविपर्येतुंचततःसामर्थ्यंसंभाव्यते॥ क्वचिच्
चप्रत्यागमनवर्जितंस्वप्नंश्रावयति॥ कुरुष्वहमद्यशयानोनिद्रयाभिप्लुतःस्वप्नेपंचालानभिगतश्चास्मिन्प्रतिबुद्धश्चेति। दे
हाच्चेदपेयात्पंचालेष्वेवप्रतिबुध्येततानभिगतइतिकुरुष्वेवतुप्रतिबुध्यते॥ येनचायंदेहेनदेशांतरमश्नुवानोमन्यते
तमन्येपार्श्वस्थाःशयनदेशएवपश्यंति यथाभूतानिचायंदेशांतराणिस्वप्नेपश्यतिनतानितथाभूतान्येवभवंतिपरिधावंश्चे
त्पश्येज्जाग्रद्वद्वृत्तमर्थमाकलयेत्॥ दर्शयतिचश्रुतिः॥ अंतरेवदेहेस्वप्नंसयत्रैतत्स्वप्न्ययाचरतीत्युपक्रम्यस्वेशरीरेय
थाकामंपरिवर्त्ततइति अतश्चश्रुत्युपपत्तिविरोधाद्बहिःकुलायश्रुतिर्गौणीव्याख्यातव्याबहिरिवकुलायादमृतश्चरित्वेति॥
योहिवसन्नपिशरीरेनतेनप्रयोजनंकरोतिसबहिरिवशरीराद्भवति ॥ स्थितिगतिप्रत्ययभेदोप्येवंसतिविप्रलंभएवाभ्युप
गंतव्यः॥ कालविसंवादोपिचस्वप्नेभवति॥ रजन्यांसुप्तोवासरंभारतेवर्षेमन्यते॥ तथामुहूर्तमात्रवर्त्तिनिस्वप्नेकदाचिद्बहून् राम.
वर्षपूगानतिवाहयति॥ निमित्तान्यपिचस्वप्नेनबुद्धयेकर्मणेवोचितानिविद्यंते॥ करणोपसंहाराद्धिनास्यरथादिग्रहणायच २०३
क्षुरादीनिसंति॥ रथादिनिर्वर्त्तनेपिकुतोस्यनिमेषमात्रेणसामर्थ्यंदारूणिवा॥ ९मानहीनत्वगुणेनबहिष्ठवद्देहस्थोपिबहिरित्युक्तइ

त्यर्थः॥ एवंसतिश्रुतियुक्तिभ्यांअंतरेवस्वप्नेसमीत्यर्थः॥ विप्रलंभोविभ्रमः योग्यदेशाभावमुक्त्वा कालाभावमाह॥ कालेतिअत्ररात्रिसमयेपिकृत्स्नम
स्तादिवर्षीनरेवासरोभवतीतिभारतइत्युक्तं॥ पूर्वपक्षानुमानानांजाग्रदर्थेदृष्टांतेक्लृप्तसामग्रीजन्यत्वमबाधयोग्यत्वंचोपाधिरितिसूत्रतात्पर्यं॥ ३॥
जाग्रद्वत्तवद्वृत्तमर्थमाकलयेदित्यपिपाठः॥ मूल.पं.६॥

स्वप्नस्य भ्रांतिमात्रत्वेन तत्सूचितोऽप्यर्थः सत्यो न स्यादिति शंकोत्तरत्वेन सूत्रांतरं व्याचष्टे ॥ मायेत्यादिना मंत्रेण देवतानुग्रहेणौषधिसेवया वा स्वप्नाः सत्यसूचकाश्चेत्सत्याः स्युरित्यत आह ॥ तत्रापि भवतु नामेति ॥ सत्यहर्षहेतोरपि शुक्तिरूप्यस्य सत्यत्वादर्शनादिति भावः ॥ यथा कृषिद्वारा लां-

बाध्यंते चैते रथादयः स्वप्नदृष्टाः प्रबोधे स्वप्न एव चैते सुलभबाधा भवंति आद्यंतयोर्व्यभिचारदर्शनात् रथोऽयमिति हि कदाचित्स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते मनुष्योऽयमिति च निर्धारितः क्षणेन वृक्षः स्पष्टं चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रं । न तत्र रथा न रथयोगा न पंथानो भवंति इत्यादि तस्मान्मायामात्रं स्वप्नदर्शनं ॥ ३ ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥ मायामात्रत्वात्तर्हि न कश्चित्स्वप्ने परमार्थगंध इति नेत्युच्यते सूचकश्च हि स्वप्नो भवति भविष्यतोः साधुसाधुनोस्तथा हि श्रूयते ॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इति ॥ तथा पुरुषं कृष्णं कृष्णदंतं पश्यति स एनं हंतीत्येवमादिभिः स्वप्नैश्चिरजीवित्वमावेदयंत इति श्रावयंति ॥ आचक्षते च स्वप्नाध्यायविदः ॥ कुंजराद्यारोहणादीनि स्वप्ने धन्यानि ॥ खरयानादीन्यधन्यानीति ॥ मंत्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः सत्यार्थसमन्विता भवंतीति मन्यंते ॥ तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वं ॥ सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः ॥ तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं ॥ यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यं ॥ यथा लांगलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लांगलं गवादीनुद्वहति ॥ एवं निमित्तमात्रत्वात्सुप्तो रथादीन्सृजते स हि कर्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन्सृजति ॥ निमित्तत्वं त्वस्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात् ॥ तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यं ॥

गलस्य गवादिजीवननिमित्तत्वं तथा स्वप्नभोक्तुरदृष्टद्वारा स्वप्नसृष्टिनिमित्तत्वं न तु कुंभं प्रति कुंभकारस्येव साक्षात्स्वप्नकर्तृत्वं सामग्र्यभावबाधयोरुक्तत्वादित्याह ॥ यदुक्तमित्यादिना तथा च स्वप्नस्य सत्कर्तृकत्वं मुख्यं नास्तीति हेत्वसिद्धिरिति भावः ॥ ६ ॥

समन्विता इत्यत्र गंधिनः इति पाठोऽप्यस्ति ४७ ॥

श्रुतितात्पर्यविरोधाच्च न स्वप्नसत्यत्वमित्याह अपि चेति ॥ व्यतिकरः संकरः श्रुत्यानस्यरतयेत्यर्थः ॥ जागरिताद्विशेषादिति भावः फलितमाह ॥ तस्मादिति
॥ एतेनेति भाक्तत्वेनेत्यर्थः द्वितीयसूत्रोक्तप्राज्ञकर्तृकत्वहेतुरपि स्वप्नस्य किं श्रुतिसिद्धः ॥ उत प्राज्ञस्य सर्वेश्वरत्वात्सिद्धः नाद्य इत्याह ॥ यदप्युक्तमि-
त्यादिना ॥ स्वयं विहत्य जाग्रद्देहं निश्चेष्टं कृत्वा स्वयं वासनया देहं निर्माय स्वेन भासा स्वीयबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन च स्वप्नमनुभ

अपि च जागरिते विषयेंद्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्च आत्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्व
प्न उपन्यस्तस्तत्र यदि रथादिसृष्टिवचनं श्रुत्या निर्णीयेत ततः स्वयंज्योतिष्ट्वं न निर्णीतं स्यात्तस्माद्रथाद्यभाववचनं श्रुत्या र-
थादिसृष्टिवचनं तु भक्त्येति व्याख्येयं ॥ एतेन निर्माणश्रवणं व्याख्यातं यदप्युक्तं प्राज्ञमेनं निर्मातारमामनंतीति ॥ तदप्य-
सत् ॥ श्रुत्यंतरे स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति जीवव्यापारश्रवणादिहापि य एष सुप्तेषु जा
गर्तीति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता संकीर्त्यते ॥ तस्य तु वाक्यशेषेण तदेव शुक्रं तद्ब्रह्मेति जीवभावं व्याव
र्त्य ब्रह्मभाव उपदिश्यते॥ तत्त्वमसीत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते ॥ न चास्माभिः स्वप्नेपि प्राज्ञव्यापारः प्रतिषिध्य
ते ॥ तस्य सर्वेश्वरत्वात्सर्वास्वप्यवस्थास्वधिष्ठातृत्वोपपत्तेः पारमार्थिकस्तु नायं संध्याश्रयः सर्गो वियदादिसर्गवदित्येता
वत्प्रतिपाद्यते ॥ न च वियदादिसर्गस्याप्यात्यंतिकं सत्यत्वमस्ति ॥ प्रतिपादितं हि तदनन्यत्वमारंभणशब्दादिभ्य इत्यत्र
समस्तस्य प्रपंचस्य मायामात्रत्वं ॥ प्राक्तु ब्रह्मात्मत्वदर्शनाद्वियदादिप्रपंचो व्यवस्थितरूपो भवति ॥ संध्याश्रयस्तु प्रपं
चः प्रतिदिनं बाध्यत इति ॥ अतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितं ॥ ४ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधवि
पर्ययौ ॥ ५ ॥

वतीत्यर्थः न केवलं बृहदारण्यके जीवस्य स्वप्नकर्तृत्वं श्रुतं किंतु काठकेपीत्याह ॥ इहापीति जीवोक्तौ ब्रह्मप्रकरणविरोध इत्यत आह ॥ तस्य त्विति एवं हेतोः
श्रुतिसिद्धत्वं निरस्य द्वितीयमंगीकरोति ॥ न चास्माभिरिति ॥ तर्हि हेतुसिद्धेः स्वप्नस्य सत्यत्वमित्याशंक्य सत्यत्वं व्यावहारिकं पारमार्थिकं वेति विकल्प्य
व्यवहारकाले बाधदर्शनान्नाद्य इत्याह ॥ पारमार्थिकस्त्विति ॥ द्वितीये दृष्टांतस्य साध्यवैकल्यमित्याह ॥ न चेति ॥ कस्तर्हि स्वप्नस्य जाग्रतो विशेषोत्र क
थ्यत इत्याशंक्य प्रातिभासिकत्वमित्याह ॥ माविति ॥ ४ ॥

पूर्वंक्तृत्रसामग्र्यभावात्स्वप्नोमायेत्युक्तमयुक्तंसत्यसंकल्पमात्रेणापिसत्यसृष्टिसंभवादितिशंकांकृत्वापरिहरन्सूत्रंव्याचष्टे॥ अथापिस्यादित्यादिना सत्यसंकल्पस्यहिसंकल्पात्सृष्टिःसत्याभवति॥ जीवस्यात्रसत्यसंकल्पत्वंप्रत्यक्षमितिपरिहारार्थः॥ नर्हिविरुद्धधर्मवत्त्वाज्जीवस्येश्वरत्वंनास्त्येवेतिशंकते॥ किमिति॥ नास्तीतिनकिंत्वावृत्तमस्तितत्पुनरीश्वरप्रसादात्कस्यचिद्व्यज्यतइत्याह॥ ननास्तीति॥ विधूतध्वांतस्यनिष्पापस्यसंसिद्धस्याणिमादिविशिष्टस्येत्यर्थः॥ ग्रस्तेचाहतितिदेवंज्ञात्वासाक्षात्कृत्यसर्वपाशानामविद्यादिक्लेशानामपहानिरपक्षयस्तद्रूपोभवति॥ क्षीणैश्चक्लेशैस्तत्कार्यजन्म

अथापिस्यात्परस्यैवतावदात्मनोंशोजीवः॥ अग्नेरिवविस्फुलिंगस्तत्रैवंसतियथाग्निविस्फुलिंगयोःसमानेदहनप्रकाशनशक्तीभवतः एवंजीवेश्वरयोरपिज्ञानैश्वर्यशक्तिततश्चजीवस्यज्ञानैश्वर्यवशात्सांकल्पिकीस्वप्नेरथादिसृष्टिर्भविष्यतीति॥ अत्रोच्यते॥ सत्यपिजीवेश्वरयोरंशांशिभावेप्रत्यक्षमेवजीवस्येश्वरविपरीतधर्मत्वं॥ किंपुनर्जीवस्येश्वरसमानधर्मत्वंनास्त्येव॥ ननास्ति। विद्यमानमपितत्तिरोहितं॥ अविद्यादिव्यवधानात्तत्पुनस्तिरोहितंसत्परमेश्वरमभिध्यायतोयतमानस्यजंतोर्विधूतध्वांतस्यतिमिरतिरस्कृतेवदृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्यकस्यचिदेवाविर्भवतिनस्वभावतएवसर्वेषांजंतूनां॥ कुतस्ततोहिईश्वराद्धेतोरस्यजीवस्यबंधमोक्षौभवतः॥ ईश्वरस्वरूपापरिज्ञानाद्बंधस्तत्स्वरूपपरिज्ञानात्तुमोक्षः तथाचश्रुतिः॥ ज्ञात्वादेवंसर्वपाशापहानिःक्षीणैःक्लेशैर्जन्ममृत्युप्रहाणिः॥ तस्याभिध्यानात्तृतीयंदेहभेदेविश्वैश्वर्यंकेवलआप्तकामइत्येवमाद्या॥५॥ देहयोगाद्वासोपि॥ ६॥ कस्मात्पुनर्जीवःपरमात्मांशएवसंस्तिरस्कृतज्ञानैश्वर्योभवति॥ युक्तंतुज्ञानैश्वर्ययोरतिरस्कृतत्वंविस्फुलिंगस्येवदहनप्रकाशनयोरिति॥ उच्यतेसत्यमेवैतत्॥ सोपितुजीवस्यज्ञानैश्वर्यतिरोभावोदेहयोगाद्देहेंद्रियमनोबुद्धिविषयवेदनादियोगाद्भवति॥

मरणात्मकबंधध्वंसइतिनिर्गुणविद्याफलमुक्तंसगुणविद्याफलमाह॥ तस्येति॥ परस्याभिमुख्येनाहंग्रहेणध्यानाद्बंधमोक्षापेक्षयामंत्रोक्तहानिहृयापेक्षयावातृतीयंविश्वैश्वर्यमणिमादिरूपंमर्त्यदेहपातेसतिसिद्धदेहेभवतितद्योगानंतरमात्मज्ञानात्केवलोद्वैतशून्यआप्तकामःप्राप्तसर्वज्योतिरानंदोभवतीतिक्रममुक्तिरित्यर्थः॥ ५॥ उक्तैश्वर्यतिरोभावेदेहाभिमानोहेतुरितिकथनार्थंसूत्रंतन्निरस्यांशंकामाह॥ कस्मादिति॥ सत्यावरणंतास्तोत्वंगीकृत्यकल्पितावरणंसाधयति॥ उच्यतइत्यादिना॥

ब्र·भा· जीवस्येश्वरत्वमङ्गीकृत्यावरणकल्पनातो वरमन्यत्वकल्पनेत्याशङ्कामुद्भाव्य श्रुत्या निरस्यति ॥ नन्वित्यादिना ॥ स्वप्नेप्यालोकादेः सत्यत्वे जाग्रतीवात्मनः अ·पा·
टी· स्वप्रकाशत्वमस्फुटं स्यात् ॥ प्रातिभासिकत्वे त्वालोकेन्द्रियाद्यसत्वेप्यर्थापरोक्ष्यमात्मज्योतिषः सत्वेनि स्फुटं सिध्यतीति तस्माद्देशादिसाम्यवचनं ३।२
र·प्र· स्वप्नस्य जाग्रत्तुल्यभानाभिप्रायमित्यर्थः ॥ ६ ॥ २ ॥ सर्वबाह्यकरणोपरमे सति मनो वासनोद्दीपिताऽविद्याविलासात्मकं स्वप्नमात्म
३०५

अस्ति चायमुपमा यथाग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य दहनप्रकाशने तिरोहिते भवतः ॥ यथा वा भस्मच्छन्नस्य एवम
विद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः ॥ वाशब्दो जीवेश्वरयोरन्य
त्वाशंकाव्यावृत्त्यर्थः ॥ नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् ॥ किं देहयोगकल्पनयेति नेत्युच्यते ॥ न ह्यन्यत्वं जीवस्येश्व
रादुपपद्यते ॥ सेयं देवतैक्षतेत्युपक्रम्यानेन जीवेनात्मनानुप्रविश्येत्यात्मशब्देन जीवस्य परामर्शात् ॥ तत्सत्यं स आत्मा तत्त्वमसि
श्वेतकेतो इति च जीवायोपदिशतीश्वरात्मतां ॥ अतोऽनन्य एवेश्वराज्जीवः सन्देहयोगात्तिरोहितज्ञानैश्वर्यो भवति ॥ अतश्च न
सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते ॥ यदि च सांकल्पिकी स्वप्ने रथादिसृष्टिः स्यात् ॥ नैवानिष्टं कश्चित्स्वप्नं पश्येत् ॥ न हि
कश्चिदनिष्टं संकल्पयति ॥ यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयं
ज्योतिष्ट्वविरोधात् ॥ श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात् ॥ जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वा राम·
भिप्रायं तत् ॥ तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं ॥ ६ ॥ ९ ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ स्वप्नावस्था परीक्षिता सुषुप्ताव ३०५
स्थेदानीं परीक्ष्यते ॥ तत्रैताः सुषुप्तिविषयाः श्रुतयो भवंति ॥ क्वचिच्छ्रूयते तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा
नाडीषु सृप्तो भवतीति ॥ अन्यत्र तु नाडीरेवानुक्रम्य श्रूयते ॥ ताभिः प्रत्यवसृप्य पुरीतति शेत इति ॥ ९ तः साक्षिणः स्वयंज्योतिष्ट्वार्थं विचार्य

प्रति योग्यानुयोगिभावसंगत्या स्वप्नावस्थ मनोलयात्मिकां सुषुप्तिं विचारयति ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ तदेतत्स्वपनं यथास्यात्तथा यत्रका
ले सुषुप्तः समस्तो निरस्तबाह्यकरणो मनोलयात्सम्यक्प्रसन्न इत्यर्थः ॥ स्वापे नाडीस्थानमुक्त्वा नाडीपुरीततौ नाडीपरमात्मनौ च समुच्चयश्रुतीराह ॥

इतिसमुच्चयान्तन्निर्णय॥२॥

परमात्ममात्रस्थतीराह तथान्यत्रेत्यादिना॥नाडीपुरीतद्ब्रह्मसुसप्तमीश्रुतेः समुच्चयश्रुतेश्चसंशयमाह॥तत्रेति॥पूर्वपक्षेस्थानविकल्पाज्जीवस्यतत्रसैक्यानिर्णयः सिद्धान्तेनाडीभिः पुरीततंगत्वान्तर्हृदिब्रह्मण्येवशेतइतिविवेकः॥एकपुरोडाशार्थत्वंव्रीहियवयोर्दृष्टंनाड्यादीनामेकस्मिन्स्वापस्वपार्थेनिरपेक्षस्थानत्वंतुकुतइत्यतआह॥नाड्यादीनांचेतिस्वनिरूपणेतृतीयाश्रुतेर्नसप्तमीतिशंकार्थः॥आयतनशब्दात्सप्तम्यर्थआधारत्वंगम्यत

तथान्यत्रनाडीरेवानुक्रम्यतासुतदाभवतियदासुप्तःस्वप्नंनकंचनपश्यत्यथास्मिन्प्राणएवैकधाभवतीति॥तथान्यत्रयएषोंतर्हृदयआकाशस्तस्मिन्शेतइति॥तथान्यत्रसतासोम्यतदासंपन्नोभवतिस्वमपीतोभवतीति॥प्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमितिच॥तत्रसंशयः॥किमेतानिनाड्यादीनिपरस्परनिरपेक्षाणिभिन्नानिसुषुप्तिस्थानानि॥आहोस्वित्परस्परापेक्षयैकंसुषुप्तिस्थानमिति॥किंतावत्प्राप्तंभिन्नानीति॥कुतः॥एकार्थत्वात्॥नहिएकार्थानांक्वचित्परस्परापेक्षत्वंदृश्यतेव्रीहियवादीनां॥नाड्यादीनांचैकार्थतासुषुप्तौदृश्यते॥नाडीषुसुप्तोभवति॥पुरीततिशेतइतिचतत्रतत्रसप्तमीनिर्देशस्यतुल्यत्वात्॥ननुनैवंसति सप्तमीनिर्देशोदृश्यतेसतासोम्यतदासंपन्नोभवतीति॥नैषदोषः॥तत्रापिसप्तम्यर्थस्यगम्यमानत्वात्॥वाक्यशेषाद्धितत्रायतनैषीजीवःसदुपसर्पतीत्याह अन्यत्रायतनमलब्ध्वाप्राणमेवोपश्रयतइति॥प्राणशब्देनचतत्रप्रकृतस्यसतउपादानात्॥आयतनंचसप्तम्यर्थः॥सप्तमीनिर्देशोपितत्रवाक्यशेषेदृश्यते॥सतिसंपद्यनविदुःसतिसंपद्यामहइति॥सर्वत्रचविशेषविज्ञानोपरमलक्षणंसुषुप्तंनविशिष्यते॥तस्मादेकार्थत्वान्नाड्यादीनांविकल्पेनकदाचित्किंचित्स्थानंस्वापायोपसर्पतीत्येवंप्राप्तेप्रतिपाद्यते॥तदभावोनाडीषुआत्मनिचेति॥तदभावइतितस्यप्रकृतस्यस्वप्नदर्शनस्याभावःसुषुप्तमित्यर्थः नाडीष्वात्मनिचेति समुच्चयेनैतानिनाड्यादीनिस्वापायोपैतिनविकल्पेनेत्यर्थः॥ ७ ॥

इत्याह॥नैषदोषइति॥अन्यत्रावस्थाद्वयेश्रान्तोजीवोविश्रान्तिस्थानंप्राणाख्यंसद्ब्रह्मोपसर्पतिसुषुप्तावितिश्रुत्यर्थः॥सप्तमीश्रुत्यानिरपेक्षाधारत्वभानाद्विकल्पआस्थेयः कदाचित्समुच्चितस्यापिनाड्यादीनांस्थानत्वमितिनसमुच्चयश्रुतिविरोधइतिपूर्वपक्षार्थः॥सिद्धान्तयति॥तदभा

ग्रा·भा·
टी·
र·प्र·
३०६

सूत्रेचकारःपुरीतत्समुच्चयार्थः यदानाड्यःसुषुप्तिस्थानंतदापुरीतत्स्थानंनभवतीति श्रुतस्थानत्वस्यपक्षेबाधःस्यात्सनयुक्तइत्याह॥ विकल्पेह्यु
पामिति॥व्रीहियवयोरिवगत्याविकल्पइतिभावः यत्तुसप्तमीश्रुत्यानाड्यादीनामेकफलकत्वमितितन्नेत्याह॥नह्येकेति॥प्रासादस्यपर्यंकधारणम
र्थःपर्यंकस्यतुशयनमितिफलभेदेप्येकविभक्तिर्दृश्यते॥व्यवधानाऽव्यवधानाभ्यांशयनसाधनत्वात् समुच्चयश्च॥तथेहापिनाडीपुरीतत्तोर्जीवस्यसं
कुतः॥तच्छ्रुतेः॥तथाहिसर्वेषामेवनाड्यादीनांतत्रतत्रसुषुप्तिस्थानत्वंश्रूयतेतच्चसमुच्चयेसंगृहीतंभवति॥विकल्पेह्येषां
पक्षेबाधःस्यात्॥नन्वेकार्थत्वाद्विकल्पोनाड्यादीनांव्रीहियवादिवदित्युक्तं॥नेत्युच्यते॥नह्येकविभक्तिनिर्देशमात्रेणैकार्थ
त्वंविकल्पश्चापतति॥नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात् प्रासादेशेतेपर्यंकेशेतइत्येवमादिषु॥तथेहा·
पिनाडीषुपुरीततिचब्रह्मणिचस्वपितीत्युपपद्यतेसमुच्चयस्तथाचश्रुतिः॥तासुतदाभवतियदासुप्तःस्वप्नंनकंचनपश्यत्यथा
स्मिन्प्राणएवैकधाभवतीतिसमुच्चयंनाडीनांप्राणस्यचसुषुप्तौश्रावयति॥एकवाक्योपादानात् प्राणस्यचब्रह्मत्वंसमधिग
तंप्राणस्तथानुगमादित्यत्र॥यत्रापिनिरपेक्षाइवनाडीःसुषुप्तिस्थानत्वेनश्रावयति आसुतदानाडीषुसृप्तोभवतीति॥तत्रापि
प्रदेशांतरप्रसिद्धस्यब्रह्मणोऽप्रतिषेधान्नाडीद्वारेणब्रह्मण्येवावतिष्ठतइतिप्रतीयते॥नचैवमपिनाडीषुसप्तमीविरुध्यते॥
नाडीद्वारापिब्रह्मोपसर्पतैवसुप्तएवनाडीषुभवति॥योहिगंगयासागरंगच्छतिगतएवसगंगायांभवति॥अपिचात्ररश्मिना
डीद्वारात्मकस्यब्रह्मलोकमार्गस्यविवक्षितत्वान्नाडीस्तुत्यर्थंसुप्तिसंकीर्तनंनाडीषुसृप्तोभवतीत्युक्त्वातंनकश्चनपाप्मास्पृश
तीतिब्रुवन् नाडीःप्रशंसति॥ब्रवीतिचपाप्मस्पर्शाभावेहेतुंतेजसाहितदासंपन्नोभवतीति तेजसानाडीगतेनपित्ताख्येनाभि
((व्याप्तकरणोनबाह्यान्विषयानीक्षतइत्यर्थः॥
चारद्वाराब्रह्मण्येवसुप्तिरितिसमुच्चयइत्यर्थः॥नाडीनांप्राणस्यचएकेनवाक्येनोपादानान्मिथःसमु
च्चयइत्याह॥एकवाक्येति॥आधारत्वमात्रंसप्तम्यर्थोननिरपेक्षत्वंअतोनसमुच्चयस्यसप्तम्याबाधइत्याह॥ नचैवमपीति॥समुच्चयेपीत्यर्थः॥अत्र
नाडीश्रुतौनाडीषुभोक्तुःसुप्तिर्नविवक्षितारश्मिसंबद्धनाडीरूपमार्गस्तुत्यर्थत्वादित्याह॥अपिचेति॥पित्तेनविषये क्षणाभावेसुखदुःखयोरभावात्

हेतुर्धर्माधर्मात्मकपाप्मास्पर्शइत्यर्थः॥

अ·पा·
३२

नयइत्यपिपाठः ६।

अपहतपाप्मब्रह्मसंपत्त्यावापाप्मास्पर्शइत्याह॥ अथवेतिअस्मिन्व्याख्यानेलाभमाह॥ एवंचसतीति॥ नासुतदाभवत्यथाऽस्मिन्प्राणएवैकधाभवतीतिश्रुतेः समुच्चयआश्रितोभवतीत्यर्थः॥ नाडीब्रह्मणोर्गुणप्रधानभावेनसुप्तौसमुच्चयवत् पुरीततब्रह्मणोरपीत्याह॥ तथेत्यादिना आकाशे ब्रह्मणिशेतइत्युपक्रम्यताभिः प्रत्यवसृप्यपुरीततिशेतइत्युक्तं॥ तयाचनाडीद्वारापुरीततंगत्वाब्रह्मणिशेतइतिसमुच्चयः सिद्धइत्याह॥ तथानाडीतिसप्तना।

अथवातेजसेतिब्रह्मणएवायंनिर्देशःश्रुत्यंतरेब्रह्मैवतेजएवेतितेजःशब्दस्यब्रह्मणिप्रयुक्तत्वात्॥ ब्रह्मणाहितदासंपन्नोभवतिनाडीद्वारेणअतस्तंनकश्चनपाप्मास्पृशतीत्यर्थः॥ ब्रह्मसंपत्तिश्चपाप्मस्पर्शाभावेहेतुःसमधिगतः सर्वेपाप्मानोतोनिवर्त्तंतेऽपहतपाप्माह्येषब्रह्मलोकइत्यादिश्रुतिभ्यः॥ एवंचसतिप्रदेशांतरप्रसिद्धेनब्रह्मणासुषुप्तिस्थानेनानुगतोनाडीनांमार्गःसमाश्रितोभवति॥ तथापुरीततोपिब्रह्मप्रक्रियायांसंकीर्तनात्तदनुगुणमेवसुषुप्तिस्थानत्वंविज्ञायते॥ यएषोंतर्हृदयआकाशस्तस्मिन्शेतइतिहृदयाकाशेसुषुप्तिस्थानेप्रकृतइदमुच्यतेपुरीततिशेतइति॥ पुरीतदितिहृदयपरिवेष्टनमुच्यते॥ तदंतर्वर्तिन्यपिहृदयाकाशेशयानःशक्यतेपुरीततिशेतइतिवक्तुं॥ प्राकारपरिक्षिप्तेपिपुरेवर्त्तमानःप्राकारेवर्त्ततइत्युच्यते॥ हृदयाकाशस्यचब्रह्मत्वंसमधिगतंदहरउत्तरेभ्यइत्यत्र॥ तथानाडीपुरीततत्समुच्चयोपिताभिःप्रत्यवसृप्यपुरीततिशेतइत्येकवाक्योपादानादवगम्यते॥ सत्प्राज्ञयोश्चप्रसिद्धमेवब्रह्मत्वं॥ एवमेतासुश्रुतिषुत्रीण्येवसुषुप्तिस्थानानिसंकीर्तितानिनाड्यःपुरीतत् ब्रह्मचेति॥ तत्रापिद्वारमात्रंनाड्यःपुरीतच्च॥ ब्रह्मैवत्वेकंसुषुप्तिस्थानं॥ अपिचनाड्यःपुरीतद्वाजीवस्योपाध्याधारएवभवति॥ तत्रास्यकरणानिवर्त्ततइति॥ नह्युपाधिसंबंधमंतरेणस्वतएवजीवस्याधारःकश्चित्संभवति॥ ब्रह्माव्यतिरेकेणस्वमहिमप्रतिष्ठितत्वात्॥ ७॥

संपन्नोभवतिप्राज्ञेनसंपरिष्वक्तइतिसत्प्राज्ञयोः श्रुतेः पंचसुषुप्तिस्थानानीत्यतआह॥ सत्प्राज्ञयोरिति॥ किंचप्रकृतदर्शादिसाधनैकपुरोडाशनिष्पत्तौमिथोनपेक्षतयासमर्थत्वाद्युक्तोव्रीहियवयोर्विकल्पः नाड्यादीनांतुब्रह्मनिरपेक्षतयासुषुप्तजीवाधारत्वासामर्थ्यान्नविकल्पइत्याह॥ अपिचनाड्यइति॥ उपाधिलिंगाश्रयनाडीपुरीततोरुपहितजीवाश्रयत्वंपरंपरयाधारत्वंनतदपिसुषुप्तौनसंभवतिउपाधिलयादित्यर्थः॥

ब्र·भा· ननुब्रह्मापिजीवस्यनमुख्यंस्थानंअभेदादित्यतआह॥ब्रह्माधारत्वमिति॥जीवस्यब्रह्मण्यभेदेनावस्थानंनाडीपुरीतनोस्तुलीनोपाधेर्जीवस्य। अ·पा·
टी· स्थितिरेवनसंभवतीत्येकार्यसामर्थ्याभावान्नविकल्पइत्यर्थः सुषुप्तौजीवस्यभेदकोपाधिलयाद्यौत्सर्गिकब्रह्माभेदस्यविकल्पोनयुक्तइत्या ३।२
र·प्र· ह॥अपिचेति॥किंचनाड्यादीनामन्यतमस्थानेकश्चित्सुप्तिवादिनापिसुषुप्तंनविशिष्यतइतिवक्तव्यं॥तच्चवक्तुंनशक्यतइत्याह॥अपिचस्था

३०७ ब्रह्माधारत्वमप्यस्यसुषुप्तेनैवाधाराधेयभेदाभिप्रायेणोच्यते॥कथंतर्हितादात्म्याभिप्रायेणयतआहसतासोम्यत।
दासंपन्नोभवतिस्वमपीतोभवतीतिस्वशब्देनात्माभिलप्यतेस्वरूपमापन्नःसुप्तोभवतीत्यर्थः॥अपिचनकदाचिज्जीव।
स्यब्रह्मणासंपत्तिर्नास्तिस्वरूपस्यानपायित्वात्॥स्वप्नजागरितयोस्तुउपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्यतदु
पशमात् सुषुप्तेस्वरूपापत्तिर्विवक्ष्यते॥स्वमपीतोभवतीति॥अतश्चसुप्तावस्थायांकदाचित्सतासंपद्यतेकदाचिन्न
संपद्यतइत्ययुक्तं॥अपिचस्थानविकल्पाभ्युपगमेपिविशेषविज्ञानोपशमलक्षणंतावत्सुषुप्तंनक्वचिद्विशिष्यते॥
तत्रसतिसंपन्नस्तावदेकत्वान्नविजानातीतियुक्तंतत्केनकंविजानीयादितिश्रुतेः॥नाडीषुपुरीततिचशयानस्यनकिं
चिद्विज्ञानेकारणंशक्यंविज्ञातुंभेदविषयत्वात्॥यत्रवान्यदिवस्यात्तत्रान्योन्यत्पश्येदितिश्रुतेः॥ननुभेदविषयस्या।
प्यतिदूरत्वादिकारणंअविज्ञानेस्यात्॥बाढमेवंस्यात्॥यदिजीवःस्वतःपरिच्छिन्नोऽभ्युपगम्येतयथाविष्णुमित्रःप्रवासी।
स्वगृहंनपश्यतीति॥ननुजीवस्योपाधिव्यतिरेकेणपरिच्छेदोविद्यते॥उपाधिगतमेवातिदूरादिकारणमविज्ञानइतिय राम·
द्युच्येत तथाप्युपाधेरुपशान्तत्वात् सत्येवसंपन्नोनविजानातीतियुक्तं॥ ॰तेति॥भेदाभावोहिभेदज्ञानाभावेहेतुःनाडीपुरीत। ३०७
त्स्थस्यतुजीवस्यभेदावस्थत्वात् भेदाविज्ञानेकारणंनास्तीत्यर्थः॥द्वैतावस्थस्यापिद्वैताज्ञानेहेतुंशंकते॥ननुभेदेति॥द्रष्टुर्दृश्यात् दूरस्थत्वंस्वा
भाविकंऔपाधिकंवातत्राद्यंसदृष्टान्तमनूद्यप्रत्याहबाढमित्यादिना॥द्वितीयमनूद्यदूषयति॥उपाधिगतमेवेतिउपाधिभिन्नस्यैवनाड्यादौस्वा
पेक्षतिपयसंनिकृष्टार्थज्ञानप्रसंगात् सुषुप्तिव्याघातःस्यात् उपाधिलयेत्वन्यत्रजीवस्यस्थित्ययोगाद्ब्रह्मण्येवस्वापआस्थेयइत्यर्थः॥ छ॥

एवंविकल्पंनिरस्यनाडीपुरीततोर्ब्रह्मणासहतुल्यवत्समुच्चयमफलत्वेनदूषयन्गुणप्रधानत्वेनसमुच्चयमुपसंहरति॥तच्चत्रयमित्यादिना॥७॥किंचब्रह्मणःसकाशाज्जीवस्योत्थानश्रुतेर्ब्रह्मैवसुषुप्तिस्थानमित्याह सूत्रकारः॥अतःप्रबोधइतिनाडीपुरीततोःकाप्युत्थानापादानत्वाश्रवणात्सुषुप्तिस्थानत्वमित्यर्थः॥तस्मादुपाधिलयेजीवस्यब्रह्माभेदादौपाधिकस्यैवभेदइतिविवेकाद्धाकार्यभेदसिद्धिरितिस्थितं॥ ८ ॥

तत्त्रयमिहतुल्यवन्नाड्यादिसमुच्चयंप्रतिपादयामः।नहिनाड्यःसुप्तिस्थानं——पुरीतद्वेत्यनेनविज्ञानेनकिंचित्प्रयोजनमस्ति॥नह्येतद्विज्ञानप्रतिबद्धंकिंचित्फलंश्रूयते॥नाप्येतद्विज्ञानंफलवतःकस्यचिदंगमुपदिश्यते॥ब्रह्मत्वनपायिसुप्तिस्थानमित्येतत्प्रतिपादयामः॥तेनतुविज्ञानेनप्रयोजनमस्तिजीवस्यब्रह्मात्मत्वावधारणंस्वप्नजागरितव्यवहारविमुक्तत्वावधारणंच॥तस्मादात्मैवसुप्तिस्थानं॥७॥अतःप्रबोधोऽस्मात्॥८॥यस्माच्चात्मैवसुप्तिस्थानंअतएवचकारणान्नित्यवदेवास्मादात्मनःप्रबोधःस्वापाधिकारेशिष्यते॥कुतएतदागादित्यस्यप्रश्नस्यप्रतिवचनावसरेयथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवैतस्मादात्मनःसर्वेप्राणाइत्यादिना॥सतआगम्यनविदुःसतआगच्छामहइतिचविकल्प्यमानेषुतुसुषुप्तिस्थानेषुकदाचिन्नाडीभ्यःप्रतिबुध्यतेकदाचित्पुरीततःकदाचिदात्मनइतिअशासिष्यत्॥तस्मादात्मैवसुप्तिस्थानमिति॥८॥३॥सएवतुकर्मानुस्मृतिशब्दविधिभ्यः॥९॥तस्याःपुनःसत्संपत्तेःप्रतिबुध्यमानःकिंयएवसत्संपन्नःसएवप्रतिबुध्यतेउतसवान्योवेतिचिंत्यते॥तत्रप्राप्तंतावत्॥अनियमइति॥कुतःयदाहिजलराशौकश्चिज्जलबिंदुःप्रक्षिप्यतेजलराशिरेवसतदाभवति॥पुनरुद्धरणेचसएवजलबिंदुर्भवतीतिदुःसंपादं॥तद्वत्सुप्तः परेणैकत्वमापन्नःसंप्रसीदति॥नसएवपुनरुत्थातुमर्हति॥

सएवतुकर्मानुस्मृतिशब्दविधिभ्यः॥सुषुप्तौउपाधिनाशात्कर्माऽनुस्मृत्यादेर्दर्शनाच्चसंशयेसत्यस्माद्ब्रह्मणोजीवस्योत्थानश्रुतेर्ब्रह्मैवसुषुप्तिस्थानमित्युक्तमयुक्तं॥सुप्तादन्यस्याप्युत्थानसंभवेनसुषुप्तस्यनाड्यादिस्थानत्वसंभवादित्याक्षेपसंगत्यानियामकाभावादनियमइति पूर्वपक्षमाह॥तस्याःपुनरित्यादिनापूर्वपक्षेज्ञानवैयर्थ्यंसुषुप्त्यैवापुनरावृत्तिरूपमुक्तिसिद्धेः॥ ९ ॥

सिद्धांतेतु अज्ञानत्वस्यात्मनास्थितस्याज्ञानवलेनपुनस्तस्यैवोत्थानावश्यंभावाद्ज्ञाननाशायज्ञानापेक्षेतिफलं॥ ईश्वरोवेत्यनियमदार्ढ्यायोक्तंस
वान्योवेत्येषपूर्वपक्षः॥ ज्ञानंविनाबुद्ध्याद्युपाधेरत्यंतनाशाभावात्तयाबुद्ध्योपहितोजीवः सुषुप्तौकारणात्मनास्थितस्तयैवनामाकर्मानुभवसंस्कार
वत्त्योपहितउत्तिष्ठतीतिसिद्धांतयति॥ सएवत्वित्यादिना॥ सामिकृतस्यार्द्धकृतस्यैकस्यैवज्योतिष्टोमादेरनेकयजमानकर्तृत्वापातोतिप्रसंगः स्मृतिमुक्त्वा।

तस्मात्सएवेश्वरोवान्योवाजीवः प्रतिबुध्यतइत्येवंप्राप्तइदमाह॥ सएवतुजीवः सुप्तःस्वास्थ्यंगतःपुनरुत्तिष्ठति॥ नान्यःक
स्मात्कर्मानुस्मृतिशब्दविधिभ्यः विभज्यहेतुंदर्शयिष्यामि॥ कर्मशेषानुष्ठानदर्शनात्तावत् सएवोत्थातुमर्हति॥ नान्यस्तथाहि
॥पूर्वेद्युरनुष्ठितस्यकर्मणोऽपरेद्युःशेषमनुतिष्ठन्दृश्यते॥ नचान्येनसामिकृतस्यकर्मणोन्यःशेषक्रियायांप्रवर्तितुमर्हति ॥ अ
अतिप्रसंगात्॥ तस्मादेकएवपूर्वेद्युरपरेद्युश्चैकस्यकर्मणःकर्तेतिगम्यते॥ इतश्चसएवोत्तिष्ठतियत्कारणमतीतेहन्यहमदो
ऽद्राक्षमिति पूर्वानुभूतस्यपश्चात्स्मरणंअन्यस्योत्थानेनोपपद्यते ॥ नह्यन्यदृष्टमन्योऽनुस्मर्तुमर्हति॥ सोहमस्मीतिचात्मानु
स्मरणमात्मांतरोत्थानेनावकल्पते॥ शब्देभ्यश्चतस्यैवोत्थानमवगम्यते॥ तथाहिपुनःप्रतिन्यायंप्रतियोन्याद्रवतिबुद्धांता
यैव॥ सर्वाःप्रजाअहरहर्गच्छंत्यएतंब्रह्मलोकंनविंदंति तइहव्याघ्रोवासिंहोवायद्यद्भवंति तदाभवंतीत्येवमादयःशब्दाः
स्वापप्रबोधाधिकारेपठिताः नात्मांतरोत्थानेसामंजस्यमीयुः॥ कर्मविद्याविधिभ्यश्चैवमेवावगम्यते॥ अन्यथाहिकर्मविद्या
विधयोनर्थकाःस्युरन्योत्थानपक्षेहिसुप्तमात्रोमुच्यतइत्यापद्येत॥ एवंचेत्स्यात् वदकिंकालांतरफलेनकर्मणाविद्यया
वाकृतंस्यात्॥ अपिचान्योत्थानपक्षेयदितावच्छरीरांतरेव्यवहरमाणोजीवउत्तिष्ठेत्॥ तत्रत्यव्यवहारलोपप्रसंगः
स्यात्॥ अथतत्रसुप्तउत्तिष्ठेत्कल्पनानर्थक्यंस्यात्॥ ९॥ तुशब्दसूचितांप्रतिज्ञामाह ॥ सोहमितिअयनंगमनंआयः योनिःतत्र
इंद्रियस्थानंप्रतिनियतंगमनंयथाभवति तथाप्रतियोन्यागच्छतिजागरणायेतिश्रुत्यर्थः नविंदंतीत्यज्ञानसत्वात् सुप्तस्योत्थाननियमउक्तः इह हि॥ अपिचेत्यादिना॥
पूर्वप्रबोधेयेभवंतितएवतदोत्तरप्रबोधेभवंतीत्यर्थः॥ विधिंव्याचष्टे॥ कर्मेति॥ सएवोत्तिष्ठतीतिनिश्चीयतइत्यर्थः॥ अत्रैवोत्तरतंत्रयुक्त्यंतरमा

अन्योत्थाने सुखादेर्न पूर्वकर्मकार्यतेत्यकृताभ्यागमः पूर्वसुप्तजीवकृतकर्मनाशश्चेत्यर्थः ॥ पूर्वपक्षयुक्तं दृष्टान्तं वैषम्येण दूषयति ॥ यत्पुनरित्यादिना ॥ अस्मदाद्यशक्यमपि विवेचनं प्राण्यदृष्टापेक्ष ईश्वरः करोतीति मत्वा दृष्टान्तमाह ॥ दृश्यते चेति ॥ ब्रह्माभेदाच्च जीवस्य जलबिंदुवैषम्यमित्याह अपि चेति ॥ अभेदे सत्यन्यो वोत्तिष्ठतीति चिंतानवकाशादित्याशंक्य बुद्धिभेदेन जीवभेदाच्चिंतेत्याह ॥ एवं सतीति ॥ सुषुप्तौ बुद्धिनाशेन प्रत्यहं बुद्ध्युपा-

यो हि यस्मिन् शरीरे सुप्तः स तस्मिन्नेवोत्तिष्ठति ॥ अन्यस्मिन् शरीरे सुप्तोऽन्यस्मिन्नुत्तिष्ठतीति कोऽस्यां कल्पनायां लाभः स्यात् ॥ अयं मुक्त उत्तिष्ठेत् अंतवान्मोक्ष आपद्येत निवृत्ताविद्यस्य च पुनरुत्थानमनुपपन्नं ॥ एतेनेश्वरस्योत्थानं प्रत्युक्तं नित्यनिवृत्ताविद्यत्वात् ॥ अकृताभ्यागमकृतविप्रणाशौ च दुर्निवारावन्योत्थानपक्षे स्यातां ॥ तस्मात्स एवोत्तिष्ठति नान्य इति ॥ यत्पुनरुक्तं ॥ यथा जलराशौ प्रक्षिप्तो जलबिंदुर्नोद्धर्तुं शक्यत एवं सति संपन्नो जीवो नोत्थातुमर्हतीति ॥ तत्परिह्रियते ॥ युक्तं तत्र विवेककारणाभावाज्जलबिंदोरनुद्धरणं ॥ इह तु विद्यते विवेककारणं कर्म चाविद्या चेति वैषम्यं ॥ दृश्यते च दुर्विवेचयोरप्यस्मज्ज्ञानीयैः क्षीरोदकयोः संसृष्टयोर्हंसेन विवेचनं ॥ अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिंदुरिव जलराशेः सतो विविच्येत सदेव तूपाधिसंपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपंचितं ॥ एवं सति यावदेकोपाधिगता बंधानुवृत्तिस्तावदेकजीवव्यवहारः उपाध्यंतरगतायां तु बंधानुवृत्तौ जीवांतरव्यवहारः स एवायमुपाधिः स्वापप्रबोधयोर्बीजांकुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं ॥ ९ ॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥ अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः कथयंति ॥ स तु किमवस्थ इति परीक्षायामुच्यते ॥ तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धाः ॥ जागरितं स्वप्नः सुषुप्तमिति ॥

धिभेदादेकजीवव्यवहारो न स्यादित्यत आह ॥ स एवायमिति स्थूलसूक्ष्मात्मनानिवृत्त्येकोपाधिरित्यर्थः ॥ अवस्थात्रयादात्मानं विविच्य मूर्छां निविवेचयति ॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ मूर्छा प्रसिद्धावस्थान्तर्गता वा पंचमावस्था वेति अवस्थाचतुष्टयप्रसिद्धेर्मुग्धस्य तद्वैलक्षण्याच्च संशये सोऽहमिति प्रत्यभिज्ञयोत्थितस्य सुप्ताभेदवद्विशेषज्ञानाभावाविशेषेण लिंगेन सुषुप्तिरेव मूर्छेति प्रत्यभिज्ञानात्सुषुप्त्यंतर्गतेना मूर्छेति दृष्टांतं संगत्या पूर्वपक्षमाह ॥ तिस्रस्तावदिति ॥

शा॰भा॰ पूर्वपक्षे प्रसिद्धावस्थातः पृथगात्मनो मूर्छातो विवेकार्थं यत्नासिद्धिः फलं सिद्धान्ते पृथक्कृत्य यत्नध्रौव्यमिति भेदः परिशेषं दर्शयन् सिद्धान्तयति॥ न ताव॰ अ॰पा॰
टी॰ दित्यादिना जाग्रदपि जागरावस्थोपीत्यर्थः। सेन्द्रियकमर्थज्ञानं देहधारणं च तस्यास्ति न मुग्धस्येति वैषम्योक्त्या दूषयति॥ नेत्यादिना॥ मूर्छायाञ्जागरा ३।२

र॰प्र॰ चतुर्थी शरीरादपसृप्तिर्न तु पंचमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धाऽस्ति॥ तस्मात्तिसृणामेवावस्थानामन्य
३०४ तमावस्था मूर्छेत्येवं प्राप्ते ब्रूमः॥ न तावन्मुग्धो जागरितावस्थो भवितुमर्हति॥ न हि अयमिंद्रियैर्विषयानीक्षते॥ स्यादेत
त्॥ इषुकारन्यायेन मुग्धो भविष्यति॥ यथेषुकारो जाग्रदपि इष्वासक्तमनस्तया नान्यान्विषयान्निरीक्षते एवं मुग्धो मुसल-
संपातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति॥ न अचेतयमानत्वात्॥ इषुकारो हि व्यापृतमना
ब्रवीति इषुमेवाहमेतावंतं कालमुपलभमानोऽभूवमिति॥ मुग्धस्तु लब्धसंज्ञो ब्रवीति अंधे तमसि अहमेतावंतं कालं प्रक्षिप्तोऽभू
वं॥ न किंचिन्मया चेतितमिति॥ जाग्रतश्चैकविषयविषक्तचेतसोपि देहो विध्रियते॥ मुग्धस्य तु देहो धरण्यां पतति॥ त
स्मान्न जागर्ति॥ नापि स्वप्नान्पश्यति निःसंज्ञत्वात्॥ नापि मृतः प्राणोष्मणोर्भावात्॥ मुग्धे हि जंतौ मृतोयं स्यान्न वा मृत इति संश
याना ऊष्मास्ति नास्तीति हृदयदेशमालभंते निश्चयार्थं प्राणोस्ति नास्तीति च नासिकादेशं॥ यदि प्राणोष्मणोरस्तित्वं नाव
गच्छंति ततो मृतोयमिति अध्यवसाय दहनायारण्यं नयंति॥ अथ तु प्राणमूष्माणं वा प्रतिपद्यंते ततो नायं मृत इत्यध्यवसाय
संज्ञालाभाय भिषज्यंति॥ पुनरुत्थानाच्च न दिष्टं गतः॥ न हि यमराष्ट्रात्प्रत्यागच्छति॥ अस्तु तर्हि सुषुप्तो निःसंज्ञत्वात्॥ अ राम॰
मृतत्वाच्च॥ न वैलक्षण्यात् मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो भवति भयानकं च वदनं विस्फारिते नेत्रे॥ सु ३०५
षुप्तस्तु प्रसन्नवदनः तुल्यकालं पुनः पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः॥ न चास्य देहो वेपते पाणिपेषणमात्रेण च
द्भेदमुक्त्वा स्वप्नमृतिभ्यां भेदमाह॥ नापीत्यादिना॥ आलभंते स्पृशंति॥ दिष्टं मरणं॥ सुषुप्ति॥ सुप्तमुत्थापयंति॥ न तु मुग्धं मुद्गरघातेना
मूर्छयोः किंचित्सारूप्येपि बहुवैलक्षण्याद्भेद इत्याह॥ नेति॥

लक्षणभेदमुक्त्वा निमित्तभेदमाह निमित्तेति प्रत्यभिज्ञाप्यसिद्धेत्याह ॥ नचेति ॥ उक्तसारूप्यवैरूप्याभ्यामर्द्धसंपत्तिः सर्वैः सुषुप्तिधर्मैरसंपन्नो मुग्धः सुषुप्तो न भवति सर्वैर्मरणावस्थाधर्मैरसंपन्नो मृतोपि न किंतु अवस्थान्तरगत इति सूत्रार्थः ॥ अत्र सूत्रे जीवस्य ब्रह्मणार्द्धसंपत्तिरुक्तेति भ्रान्तः शंकते ॥ कथमिति यत्सुषुप्तं प्रति सत्संपन्नत्वं श्रुतं न तदुपाध्यभावाभिप्रायं उपाध्यभावस्य मुग्धस्यापि समत्वादिति यतस्तस्मात्कृत्स्नसंपत्तिरेवेत्यर्थः सुषुप्तकाले कर्मासंबंधे पुनरुत्था

निमित्तभेदश्च भवति मोहस्वापयोः मुसलसंपातादिनिमित्तत्वान्मोहस्य ॥ श्रमादिनिमित्तत्वाच्च स्वापस्य ॥ न च लोकेस्ति प्रसिद्धिः मुग्धः सुप्त इति परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः निःसंज्ञत्वात्संपन्नः इतरस्माच्च वैलक्षण्यादसंपन्न इति ॥ कथं पुनरर्द्धसंपत्तिर्मुग्धतेति शक्यते वक्तुं ॥ यावता सुप्तं प्रति तावदुक्तं श्रुत्या सता सोम्य तदा संपन्नो भवति ॥ अत्र स्तेनोस्तेनो भवति नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुःकृतमित्यादिना ॥ जीवे हि सुकृतदुःकृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति ॥ न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते मुग्धेपि तौ प्रत्ययौ नैव विद्येते ॥ तस्मादुपाध्युपशमात् सुषुप्तवन्मुग्धेपि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्द्धसंपत्तिरिति ॥ अत्रोच्यते ॥ न ब्रूमो मुग्धेर्द्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति ॥ किं तर्हि अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वं अर्धेनावस्थान्तरपक्षस्येति ब्रूमः दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये ॥ द्वारं चैतन्मरणस्य यदास्य सावशेषं कर्म भवति ॥ तदा वाङ्मनसे प्रत्यागच्छतः ॥ यदा तु निरवशेषं कर्म भवति तदा प्राणोष्माणावपगच्छतः तस्मादर्धसंपत्तिं ब्रह्मविद इच्छंति ॥ यत्तूक्तं न पंचमी काचिदवस्था प्रसिद्धास्तीति नैष दोषः कदाचित्कीयमवस्थेति न प्रसिद्धा स्यात् ॥ प्रसिद्धा चैषा लोकायुर्वेदयोः अर्द्धसंपत्त्यभ्युपगमाच्च न पंचमी गण्यत इत्यनवद्यं ॥ ४ ॥ १० ॥ ९ नेकथमित्याशंक्य तत्कार्यो भा

वान्तदसंबंधोक्तिरित्याह ॥ जीवे हीति ॥ ब्रह्मणा कृत्स्नसंपत्तिमंगीकृत्य परिहरति ॥ न ब्रूम इति ॥ मुग्धत्वं हि सुषुप्तस्यार्धेन निःसंज्ञत्वादिधर्मेण साम्येन संपन्नं भवति मरणस्यार्द्धेन कंपादिना संपन्नमित्यर्धसंपत्तिरित्यर्थः ॥ इतोपि सुषुप्तिवैषम्यमित्याह द्वारं चेति अप्रसिद्धिमंगीकृत्योक्तं प्रसिद्धिरप्यस्तीत्याह ॥ प्रसिद्धा चेति आयुर्वेदो वैद्यशास्त्रं ॥ प्रसिद्धौ कथं विवाद इत्याशंक्य पंचमत्वेनाप्रसिद्धेरित्याह ॥ अर्द्धेति ॥ सुषुप्तिमृतिधर्मार्धसंपन्नात्तदंतर्भावत्

द्वितीकानामित्यर्थः ॥ १० ॥

नोपिपरस्योभयलिंगं ॥२१॥

शा·भा· सर्वाभिरवस्थाभिरलिप्तत्वमर्थादिति विचार्यापादसमाप्तेस्तत्पदार्थं निरूपयितुंकामः प्रथमंतस्यनिर्विशेषत्वमाह नस्थानतेसर्वत्रहि ॥ उद्देश्यत्वंपदा अ·पा·
टी· र्थजिज्ञासोपरमानंतरंतत्स्वरूपब्रह्मविचारस्यावसरसंगतिमाह ॥ येनेति ॥ सविशेषत्वंनिर्विशेषत्वंचेत्युभयंलिंगयतेज्ञाप्यतेयाभिस्ताउभयलिं ३·२
र·प्र· गाःश्रुतयःसंशयबीजत्वेनसंनीत्यर्थः ॥ यथाविरुद्धसुषुप्तिमरणोभयरूपत्वंमुग्धत्वंतथाश्रुतिप्रामाण्यादुभयरूपंब्रह्मध्येयमितिदृष्टांतेन
२९० पूर्वपक्षःनिर्विशेषमेकरूपमेवज्ञेयमितिसिद्धांतयति ॥ सवमिति किमुभयरूपत्वंस्वतः ॥ उतस्वतोनिर्गुणस्यसर्वगंधत्वादिविशेषःउपाधितःसत्य

नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि ॥११॥ येनब्रह्मणासुषुप्त्यादिषुजीवउपाध्युपशमात्संपद्यते ॥ तस्येदानींस्वरूपंश्रुतिवशेननिर्धार्यते ॥ संत्युभयलिंगाःश्रुतयःब्रह्मविषयाःसर्वकर्मासर्वकामःसर्वगंधःसर्वरसइत्येवमाद्याःसविशेषलिंगाः ॥ अस्थूलमनण्वह्रस्वमदीर्घमित्येवमाद्याश्चनिर्विशेषलिंगाः ॥ किमासुश्रुतिषुउभयलिंगंब्रह्मप्रतिपत्तव्यमुतान्यतरलिंगं ॥ यदाप्यन्यतरलिंगंतदापिकिंसविशेषमुतनिर्विशेषमितिमीमांस्यते ॥ तत्रोभयलिंगश्रुत्यनुग्रहात्उभयलिंगमेवब्रह्मेत्येवंप्राप्तेइदमुच्यते ॥ नतावत्स्वतएवपरस्यब्रह्मणउभयलिंगत्वमुपपद्यते ॥ नह्येकंवस्तुस्वतएवरूपादिविशेषोपेतंतद्विपरीतंचेत्यवधारयितुंशक्यंविरोधात् ॥ अस्तुतर्हिस्थानतःपृथिव्याद्युपाधियोगादिति ॥ तदपिनोपपद्यते ॥ नह्युपाधियोगादप्यन्यादृशस्यवस्तुनोऽन्यादृशःस्वभावःसंभवति ॥ नहिस्वच्छःसन्स्फटिकोऽलक्तकाद्युपाधियोगादस्वच्छोभवति ॥ भ्रममात्रत्वादस्वच्छताभिनिवेशस्य ॥ उपाधीनांचाविद्याप्रत्युपस्थापितत्वात् ॥ अतश्चान्यतरलिंगपरिग्रहेपिसमस्तविशेषरहितंनिर्विकल्पमेवब्रह्मप्रतिपत्तव्यं ॥ नतद्विपरीतं ॥ सर्वत्रहिब्रह्मस्वरूप प्रतिपादनपरेषुवाक्येष्वशब्दमस्पर्शमरूपमव्ययमित्येवमादिष्वपास्तसम-

आहोस्वित्स्वतःसविशेषमेवब्रह्मेति ॥ तत्राद्यंनिरस्यद्वितीयंअनूद्यदूषयति ॥ अस्तुतर्हीति ॥ स्थानमुपाधिः ११ स्वविशेषमेवब्रह्मोपदिश्यते ब्रह्मणिविशेषःकश्चित्औपाधिकत्वात्स्फटिकलौहित्यवदित्यर्थः ॥ उपाधेःसत्यत्वेपितत्कृतंमिथ्येतिदृष्टंब्रह्मणितूपाधीनांमिथ्यात्वात् तत्कृतोविशेषो मिथ्येतिकिमुवाच्यमित्याह ॥ उपाधीनामितितृतीयंनिरस्यति ॥ अतश्चेति ॥ सर्वस्यविशेषस्यकल्पितत्वादेवेत्यर्थः ॥ निषेधश्रुतेश्चैवमित्याह ॥ सर्वत्रे

भिद्यतइति भेदो विशेषः ॥ निर्विशेषत्वश्रुतावपि विशेषस्यापि श्रुतेरुभयरूपत्वं स्यादिति शंकां व्याचष्टे ॥ अथापि स्यादिति ॥ पूर्वोक्तविरोधं स्मारयति ॥ ननूक्तमिति ॥ भेदश्रुतिप्रामाण्यार्थमौपाधिकरूपभेदस्वीकारादविरोध इति समाध्यर्थः किमुपाधिगतस्वरूपभेदो ब्रह्मण्युपचर्यते ध्यानार्थमुतो-पाधियोगात्सत्यविरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति ॥ आद्येऽस्मदिष्टसिद्धिः द्वितीयमभेदश्रुत्या दूषयति ॥ नेति ब्रूमइति ॥ द्वैतनिंदापूर्वकमद्वैतो-

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ अथापि स्यात् यदुक्तं निर्विकल्पमेकलिंगमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिंगत्वमस्तीति तन्नोपपद्यते ॥ कस्माद्भेदाद्भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यंते चतुष्पात् ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरवैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकास्तस्मात्सविशेषत्वमपि ब्रह्मणोभ्युपगंतव्यं ॥ ननूक्तं नोभयलिंगत्वं ब्रह्मणः संभवतीति ॥ अयमप्यविरोधः उपाधिकृतत्वादाकारभेदस्य अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत् ॥ नेति ब्रूमः कस्मात् प्रत्येकमतद्वचनात् प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्रावयति शास्त्रं यश्चायमस्यां पृथिव्यां तेजोमयोमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोमृतमयः पुरुषोयमेव स योयमात्मेत्यादि ॥ अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुं ॥ १२ ॥ अपि चैवमेके ॥ १३ ॥ अपि चैवं भेददर्शननिंदापूर्वकमभेददर्शनमेवैके शाखिनः समामनंति ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति ॥ तथान्येपि ॥ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति समस्तस्य भोग्यभोक्तृनियंतृलक्षणस्य प्रपंचस्य ब्रह्मैकस्वभावतामधीयते ॥ १३ ॥ कथं पुनराकारवदुपदेशिनीष्वनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमित्यत उत्तरं पठति ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं ॥ १ केचन निर्विशेष-

तत्त्वमिति सूत्रार्थमाह ॥ अपि चेति ॥ भोक्ता जीवो भोग्यं शब्दादि तयोः प्रेरितारमीश्वरं च मत्वा विचार्य मेमम प्रोक्तं तत्सर्वं त्रिविधं ब्रह्मैवेति जानीयादित्यर्थः ॥ १३ ॥ द्विविधश्रुतिषु सतीषु निर्विशेषत्वे किं नियामकमिति शंकते ॥ कथं पुनरिति ॥ तत्पराः तत्परातत्परविरोधे तत्परं बलवदिति न्यायो नियामक इत्याह ॥ अरूपवदेवेति

उपासनापरवाक्येषुआकारेतात्पर्याभावेपिदेवताविग्रहादिवदाकारसिद्धिमाशंक्यनिष्प्रपंचपरश्रुतिविरोधान्नैवमित्याह तेष्वसतीति ॥१४॥ कल्पि
तद्वैतेसावकाशत्वाच्चसप्रपंचत्वश्रुतयोदुर्बलाइत्याह प्रकाशवच्चेति ॥ नन्वाकारवाक्यानामुपाधिकल्पितसर्वगंधत्वादिनार्थवत्त्वंकिमितिवर्ण्यते

नरूपादिमत् ॥ कस्मात्तत्प्रधानत्वात् ॥ अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययं ॥ आकाशोवैनामनामरूपयोर्नि
र्वहितातेयदंतरातद्ब्रह्म दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वा
नुभूरित्येवमादीनिहिवाक्यानिनिःप्रपंचब्रह्मात्मतत्वप्रधानानिनार्थांतरप्रधानानीत्येतत्प्रतिष्ठापितंतत्तुसमन्वयादित्यत्र ॥
तस्मादेवंजातीयकेषुवाक्येषुयथाश्रुतंनिराकारमेवब्रह्मावधारयितव्यं ॥ इतराणित्वाकारवद्ब्रह्मविषयाणिवाक्यानिनत
त्प्रधानानिउपासनविधिप्रधानानिहितानि ॥ तेष्वसतिविरोधेयथाश्रुतमाश्रयितव्यंसतितुविरोधेतत्प्रधानान्यतत्प्रधानेभ्यो
बलीयांसिभवंति ॥ एषविनिगमनायांहेतुः ॥ येनोभयीष्वपिश्रुतिषुसतीष्वनाकारमेवब्रह्मावधार्यतेनतुपुनर्विपरीतमिति ॥१४
॥ कातर्हिआकारवद्विषयाणांश्रुतीनांगतिरित्यतआह ॥ प्रकाशवच्चावैयर्थ्यात् ॥१५॥ यथाप्रकाशःसौरश्चांद्रमसोवावि
यद्व्या प्यावतिष्ठमानोंगुल्याद्युपाधिसंबंधात्तेषुऋजुवक्रादिभावंप्रतिपद्यमानेषु तद्भावमिवप्रतिपद्यते ॥ एवंब्रह्मा
पिपृथिव्याद्युपाधिसंबंधात्तदाकारतामिवप्रतिपद्यते ॥ तदालंबनोब्रह्मणआकारविशेषोपदेशउपासनार्थोनविरुध्यते ॥
एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपिवाक्यानांभविष्यति ॥ नहिवेदवाक्यानांकस्यचिदर्थवत्त्वंकस्यचिदनर्थवत्त्वमि
तियुक्तंप्रतिपत्तुंप्रमाणत्वाविशेषात् ॥ नन्वेवमपियत्पुरस्तात्प्रतिज्ञातंनोपाधियोगादप्युभयलिंगत्वंब्रह्मणोस्तीतितद्विरुध्य
ते ॥ नेतिब्रूमः उपाधिनिमित्तस्यवस्तुधर्मत्वानुपपत्तेः ॥ उपाधीनांचाविद्याप्रत्युपस्थापितत्वात् ॥१५ वैयर्थ्यमेवोच्यतांतत्राह न

हिवेदवाक्यानामिति ॥ नन्वेवमपीति ॥ उक्तरीत्योभयरूपत्वांगीकारेणश्रुतीनांव्यवस्थितत्वेपीत्यर्थः ॥ उपाधीनांकल्पितत्वादौपाधिकस्यस
त्यत्वानुपपत्तेर्नेसत्यमुभयरूपत्वमितिपूर्वमुक्तंसंप्रतिसत्यंनिर्विशेषत्वंमिथ्यासविशेषत्वमित्युच्यतइत्युभयरूपत्वांगीकारेपिनपूर्वापरविरोधइ

राम

द्वैतस्यमिथ्यात्वेज्ञानेनवाधातुपासनादिव्यवहारोनस्यादित्याशंकाबाधात्प्रागेवसदित्याह॥सत्यामिति॥१५॥यतःश्रुतिश्चिन्मात्रमाह॥अतश्चविशेषोमिथ्येतिसूत्रार्थमाह आहचेति॥सैंधवघनोलवणपिंडः॥१६॥किंचश्रुतिस्मृत्योःपरप्रतिषेधेनब्रह्मोपदेशान्निष्प्रपंचंब्रह्मेत्याह॥दर्शयतिचेति॥अथहैनोक्तानंतरज्ञाहेतुत्वान्नेतिनेतिउपदेशःक्रियतइत्यर्थः॥अधिअन्यस्तुनःपुनरधीहिभोइतिनिर्बंधकारिणंतंद्वि

सत्तामेवचनैसर्गिकामविद्यायांलोकवेदव्यवहारावतारइतितत्रतत्त्वावोचाम॥१५॥आहचतन्मात्रं॥१६॥आहचश्रुतिश्चैतन्यमात्रंविलक्षणरूपांतररहितंनिर्विशेषंब्रह्म॥सयथासैंधवघनोऽनंतरोऽबाह्यःकृत्स्नोरसघनएवैवंवाअरेऽयमात्माऽनंतरोऽबाह्यःकृत्स्नःप्रज्ञानघनएवेति॥एतदुक्तंभवति॥नतस्यात्मनोंतर्बहिर्वाचैतन्यादन्यद्रूपमस्ति॥चैतन्यमेवतुनिरंतरमस्यस्वरूपंयथा सैंधवघनस्यांतर्बहिश्चलवणरसएवनिरंतरोभवतिनरसांतरंतथैवेति॥१६॥ दर्शयतिचाथोअपिस्मर्यते॥१७॥दर्शयतिचश्रुतिःपरप्रतिषेधेनैवब्रह्मनिर्विशेषत्वं॥अथातआदेशोनेतिनेतीति॥अन्यदेवतद्विदितादथोअविदितादधि॥यतोवाचोनिवर्तंते अप्राप्यमनसासहेत्येवमाद्या॥बाष्कलिनाचबाध्वःपृष्टःसन्नवचनेनैवब्रह्मप्रोवाचेतिश्रूयते॥सहोवाचाधीहिभोइतिसतूष्णींबभूवतंहद्वितीयेवातृतीयेवावचनउवाचब्रूमःखलुत्वंतुनविजानासिउपशांतोऽयमात्मेति॥तथास्मृतिष्वपिपरप्रतिषेधेनैवोपदिश्यते॥ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते॥अनादिमत्परंब्रह्मनसत्तन्नासदुच्यतइत्येवमाद्यासु॥तथाविश्वरूपधरोनारायणोनारदमुवाचेतिस्मर्यते॥मायाह्येषामयासृष्टायन्मांपश्यसिनारद॥सर्वभूतगुणैर्युक्तंनैवंमांज्ञातुमर्हसीति॥१७॥६॥

तीयेतृतीयेचप्रश्नेतूष्णींभावंकृत्वाउवाच॥उपशांतोनिरस्तद्वैतःअतस्तस्यतूष्णींभावएवोत्तरमिति॥सौत्रअथोशब्दस्तथार्थकः॥आदिमत्कार्यंतत्तुभवतीत्यनादिमत् मतइंद्रियवेद्यं॥असत्परोक्षंचनस्वप्रकाशत्वादित्यर्थः॥सर्वभूतगुणैर्दिव्यगंधादिभिर्युक्तंमांमूर्तिमंतं

पश्यसीतियत्सामायाअतएवंसद्वैतोभगवानितिमां द्रष्टुंनार्हसिवस्तुतोद्वैतातीतत्वादित्यर्थः॥१७॥

ब्र·भा·
टी·
र·प्र·
३१२

किंचयथाजलाद्युपाधिकल्पितःसूर्यचंद्रादेर्भेदश्चलनादिधर्मश्चैवमात्मनइतिदृष्टांतश्रुतेश्चनिर्विशेषंतत्त्वमित्याह अतएवचोपमेति ॥ जलस्यप्रतिबिंबत्वाकारेणसूर्यस्याभासत्वद्योतनायसूर्यकेतिकप्रत्ययः ॥ यथायंज्योतिर्मयोविवस्वान्स्वतएकोपिघटभेदेनभिन्नाःअपोनुगच्छन्बहुधाक्रियतएवमजोयमात्मादेवःस्वप्रकाशएकोप्युपाधिनामाययाक्षेत्रेष्वनुगच्छन्भेदरूपःक्रियतइतियोजना ॥१७॥ इहात्मन्युक्तदृष्टांतवैषम्यशंका

अ·पा·
३।२

अतएवचोपमासूर्यकादिवत् ॥१८॥ यतएवचायमात्माचैतन्यरूपोनिर्विशेषोवाङ्मनसातीतःपरप्रतिषेधोपदेश्योतएवचास्योपाधिनिमित्तामपारमार्थिकींविशेषवत्तामभिप्रेत्यजलसूर्यकादिवदित्युपमोपादीयतेमोक्षशास्त्रेषु ॥ यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नाबहुधैकोनुगच्छन् ॥ उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मेति ॥ एकएवतुभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवदित्येवमादिषु ॥१८॥ अत्रप्रत्यवस्थीयते ॥ अंबुवदग्रहणात्तुनतथात्वं ॥१९॥ नजलसूर्यकादितुल्यत्वमिहोपपद्यतेतद्वदग्रहणात् ॥ सूर्यादिभ्योहिमूर्तेभ्यःपृथग्भूतंविप्रकृष्टदेशंमूर्तंच।जलंगृह्यते ॥ तत्रयुक्तःसूर्यादिप्रतिबिंबोदयोनत्वात्मामूर्तोनचास्मात्पृथग्भूताविप्रकृष्टदेशाश्चोपाधयःसर्वगतत्वात् ॥ सर्वानन्यत्वाच्चतस्मादयुक्तोयंदृष्टांतइति ॥१९॥ अत्रप्रतिविधीयते ॥ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॥२०॥ युक्तएवत्वयंदृष्टांतोविवक्षितांशसंभवात् ॥ नहिदृष्टांतदार्ष्टांतिकयोःक्वचित्कंचिद्विवक्षितमंशंमुक्त्वासर्वसारूप्यंकेनचिद्दर्शयितुंशक्यते ॥ सर्वसारूप्येहिदृष्टांतदार्ष्टांतिकभावोच्छेदएवस्यात् ॥ नचेदंस्वमनीषयाजलसूर्यकादिदृष्टांतप्रणयनं ॥ शास्त्रप्रणीतस्यत्वस्यप्रयोजनमात्रमुपन्यस्यते ॥ किंपुनरत्रविवक्षितंसारूप्यमिति ॥ तदुच्यते ॥ वृद्धिह्रासभाक्त्वमिति ॥ जलगतंहिसूर्यप्रतिबिंबंजलवृद्धौवर्द्धतेजलह्रासेह्रसति ॥ जलचलनेचलति ॥ जलभेदेभिद्यतइत्येवंजलधर्मानुविधायिभवति ॥

नाम·
३१२

सूत्रमंबुवदिति ॥ आत्मनोनीरूपत्वात्दूरस्थोपाध्यभावाच्चमाययाबुद्ध्यादिषुप्रतिबिंबभेदोनयुक्तइत्यर्थः ॥१९॥ उपाध्यंतर्भावेनतत्कल्पितधर्मत्वमत्रविवक्षितांशस्तेनसाम्येनसमाधानसूत्रंवृद्धिह्रासेति ॥ दृष्टांतसाम्येपिनीरूपात्मनःप्रतिबिंबःस्वबुद्ध्याकथंकल्प्यतइत्यतआह ॥ नचेदमिति ॥ श्रूयतेनकल्प्यतइत्यर्थः श्रुतदृष्टांतस्यसूर्यकादिवदित्युपन्यासेनकिंफलमित्यतआह ॥ शास्त्रेति ॥

आत्मनो निर्विशेषत्वं फलमित्यर्थः ॥ अविरोध इति नवैषम्यमित्यर्थः ॥ आत्मा प्रतिविंबशून्यः नीरूपद्रव्यत्वात् वायुवत् इत्यनुमाने आकाशे व्यभिचारः ॥ अल्पजलेः विदूराकाशप्रतिविंबदर्शनादुपाधिदूरस्थत्वमपि क्वचिदनपेक्षितमिति भावः ॥ २० ॥ प्रवेशश्रुतेश्चोक्तानुमानबाध इत्याह सूत्रकारः ॥ दर्शनाच्चेति ॥ द्विपदः पुरो मनुष्यादिदेहांश्चक्रे चतुष्पदः पुरः पशून्कृत्वा पुरश्च सुराद्यभिव्यक्तेः पुरस्तात् स ईश्वरः पक्षी लिंगशरीरी भूत्वा पुर उक्तानि शरीराण्याविशत् सच प्रविष्टोपि पुरुषः पूर्ण एवेत्यर्थः तैत्तिरीयके लिंगस्य पक्षाद्युक्तेः पक्षित्वं मन्तव्यमेवं प्रतिविंबभावेन भेदादेः कल्पितत्वात् निर्विशेषं ब्रह्मेति स्वमतमुपसंहरति ॥ तस्मादिति ॥ एकदेशिव्याख्यामुत्थापयति ॥ अत्रेति ॥ तस्यानन्तोपीत्याद्येकमधिकर-

न तु परमार्थतः सूर्यस्य तथात्वमस्ति ॥ एवं परमार्थतोऽविकृतमेकरूपमपि सत् ब्रह्म देहाद्युपाध्यन्तर्भावाद्भजत इवोपाधिधर्मान् वृद्धिह्रासादीन् ॥ एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामंजस्यादविरोधः ॥ २० ॥ दर्शनाच्च ॥ २१ ॥ दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वंतरनुप्रवेशं ॥ पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ॥ पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति ॥ अनेन जीवेनात्मनानुप्रविश्येति च ॥ तस्माद्युक्तमेतत् अत एव चोपमा सूर्यकादिवदिति ॥ तस्मान्निर्विकल्पैकलिंगमेव ब्रह्म नोभयलिंगं विपरीतलिंगं चेति सिद्धं ॥ अत्र केचित् द्वे अधिकरणे कल्पयंति ॥ प्रथमं तावत् किं प्रत्यस्तमिताशेषप्रपंचमेकाकारं ब्रह्म उत प्रपंचवत् नेकाकारोपेतमिति ॥ द्वितीयं तु स्थिते प्रत्यस्तमितप्रपंचत्वे किं सल्लक्षणं ब्रह्म उत बोधलक्षणं उतोभयलक्षणमिति अत्र वयं वदामः ॥ सर्वथाप्यानर्थक्यमधिकरणांतरारंभस्येति ॥ ॰

णं तत्र ब्रह्मणो निष्प्रपंचत्वे स्थिते किंलक्षणं ब्रह्मेति संदेहे प्रकाशवच्चेत्यादि द्वितीयमधिकरणं प्रवृत्तं न सद्रूपमेव ब्रह्म किंतु प्रकाशवच्चिद्रूपं च कुतः ॥ अवैयर्थ्यात् सत्यं ज्ञानं सदेव सोम्येत्युभयश्रुतेर्द्विरूपे ब्रह्मण्यर्थवत्त्वादिति पूर्वपक्षे सिद्धान्तः आह च तन्मात्रं सन्मात्रं ब्रह्म श्रुतिराह ज्ञानसत्तानतिरेकादिति ॥ इदं द्वितीयाधिकरणं दूषयति ॥ अत्र वयमिति ॥ द्वितीयाधिकरणस्य किं ब्रह्मणोनेकरूपत्वनिरासः फलं उत बोधनिरासः अहोस्वित्सत्तानिरास इति विकल्प्य सर्वथाप्यानर्थक्यं प्रपंचयन् आद्ये गतार्थतामाह ॥ यदि तावदिति न द्वितीय इत्याह ॥ न चेति ॥ ब्रह्मणो बोधरूपत्वनिरासे जडत्वाज्जीवाभेदश्रुतिबाधश्च स्यादित्याह ॥

ब्रा·भा·
टी·
र·प्र·
३१३

कथंचेति॥ नतृतीयइत्याह॥ नापीति॥ सत्तानिरासेबोधस्यानुक्तत्वंचस्यादित्याह॥ कथमिति॥ नचबोधस्यसत्तानतिरेकान्ननुक्तत्वमितिवाच्यं॥ सद्बोधपदयोर्वाच्यानतिरेकेपर्यायत्वप्रसंगात्॥ एवंसिद्धांतंफलाभावेनदूषयित्वापूर्वपक्षंदूषयति॥ नापीति॥ प्रसंगमेवाहसत्त्वेनेति॥ व्यावृत्तत्वंभिन्नत्वंनिष्प्रपंचैकरूपत्वसिद्धांतविरोधात् भिन्नोभयरूपत्वपूर्वपक्षानुत्थानमित्यर्थः उभयश्रुतिबलादुत्थानमितिशंकते श्रुतत्वादिति॥ मेरुविंध्यवत्परस्परं

यदितावदनेकलिंगत्वंपरस्यब्रह्मणोनिराकर्तव्यमित्ययंप्रयासःसतुपूर्वेणैवनस्थानतोपीत्यनेनाधिकरणेननिराकृतमित्युत्तरमधिकरणंप्रकाशवच्चेत्यनेनद्व्यर्थंस्यान्नसल्लक्षणमेवब्रह्मनबोधलक्षणमितिशंकांवक्तुंविज्ञानघनएवेत्यादिश्रुतिवैयर्थ्यप्रसंगात्॥ कथंवानिरस्तचैतन्यंब्रह्मचेतनस्यजीवस्यात्मत्वेनोपदिश्येत॥ नापिबोधलक्षणमेवब्रह्मनसल्लक्षणमितिशंकांवक्तुं॥ अस्तीत्येवोपलब्धव्यइत्यादिश्रुतिवैयर्थ्यप्रसंगात्॥ कथंवानिरस्तसत्ताकोबोधोभ्युपगम्येत॥ नाप्युभयलक्षणमेवब्रह्मेतिशंकांवक्तुं॥ पूर्वाभ्युपगमविरोधप्रसंगात्॥ सत्ताव्यावृत्तेनचबोधेनबोधव्यावृत्तयाचसत्तयोपेतंब्रह्मप्रतिजानानस्यतदेवपूर्वाधिकरणप्रतिषिद्धंसप्रपंचत्वंब्रह्मणःप्रसज्येत॥ श्रुतत्वाद्दोषइतिचेत्॥ नएकस्यानेकस्वभावत्वानुपपत्तेः॥ अथसत्तैवबोधोबोधएवचसत्तानानयोःपरस्परंव्यावृत्तिरस्तीतियद्युच्येत॥ तथापिकिंसल्लक्षणंब्रह्मउतबोधलक्षणंउतोभयलक्षणमिति॥ अयंविकल्पोनिरालंबनएवस्यात्॥ सूत्राणित्वेकाधिकरणत्वेनैवास्माभिर्नीतानि॥ अपिचब्रह्मविषयासुश्रुतिष्वाकारवदनाकारप्रतिपादनेनविप्रतिपन्नास्वनाकारेब्रह्मणिपरिगृहीतेअवश्यंवक्तव्येतरासांश्रुतीनांगतिस्तादर्थ्येनप्रकाशवच्चेत्यादीनिसूत्राणिअर्थवत्तराणिसंपद्यन्ते॥ १

भिन्नसत्ताबोधयोरेकब्रह्माभेदशंकाश्रुतिशतैर्नापिनयुक्तेत्याह॥ नेति॥ सद्बोधयोर्भेदोस्तिनवाआद्येश्रुतेरपिविरुद्धार्थत्वानुपपत्तेर्नपूर्वपक्षोत्थानमित्युक्तंसंप्रतिद्वितीयंशंकते॥ अथसत्तैवेति॥ सद्बोधपदयोर्वाच्यभेदेपिलक्ष्यैक्योपपत्तिरखंडार्थस्वीकारादित्यर्थः॥ अखंडार्थस्यपूर्वपक्षत्वंनस्यात्सिद्धांतत्वात्॥ किंचात्रसंशयोप्ययुक्तइत्याह॥ तथापीति एकाधिकरणपक्षेसूत्राणिकथंनेयानीत्यतआह॥ सूत्राणीति॥ स्वपक्षेसूत्रसामंजस्यंचेत्याह॥ अपिचेति॥ ६॥

अ·पा
३।२

राम
३१३

अवश्यापेक्षितगत्यर्थत्वेनोत्तरसूत्राणां पूर्वैकवाक्यत्वान्नाधिकरणभेद इति भावः ॥ आकारश्रुतीनां कल्पिताकारो गतिरिति स्वमतमुक्तं ॥ प्रपंचविलयवादिनस्तु मनोमयः प्राणशरीरः सत्यकाम इत्यादिश्रुतीनां तदितराकारप्रविलयो गतिरित्याहुः मनोमय इति कोर्थः मनोतिरिक्तोपाधिशून्य इत्यर्थः ॥ एवं प्राणशरीरपदेन प्राणातिरिक्तोपाधिनिषेधान्मनसोप्यभावसिद्धिः एवं सर्वे शब्दा अनाकारब्रह्मपरा एवेति तन्मतमनूद्य दूषयति ॥ यद्यपीत्यादिना ॥ किं ज्ञेयब्रह्मप्रकरणस्थानामाकारशब्दानां निषेधपरत्वं उतोपासनाप्रकरणस्थानामपि नाद्यमंगीकरोति ॥ ये हीति ॥ अस्य जीवभावं प्राप्तस्येश्व

यदप्याहुः आकारवादिन्योपि श्रुतयः प्रपंचप्रविलयमुखेनानाकारप्रतिपत्त्यर्था एव न पृथगर्था इति तदपि न समीचीनमिव । लक्ष्यते ॥ कथं ये हि परविद्याधिकारे केचित्प्रपंचा उच्यन्ते ॥ यथा युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोयं दश च सहस्राणि बहूनि चानंतानि चेत्येवमादयः ते भवंति प्रविलयार्थाः ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्युपसंहारात् ॥ ये पुनरुपासनाविधानाधिकारे प्रपंचा उच्यन्ते ॥ यथा मनोमयः प्राणशरीरो भारूप इत्येवमादयो न तेषां प्रविलयार्थत्वं न्याय्यं ॥ स क्रतुं कुर्वीतेत्येवंजातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबंधात् ॥ श्रुत्या चैवंजातीयकानां गुणानामुपासनार्थत्वेऽवकल्प्यमाने न लक्षणया प्रविलयार्थत्वमवकल्पते ॥ सर्वेषां च साधारणे प्रविलयार्थत्वे सति अरूपवदेव हि तत्प्रधानत्वादिति विनिगमन । कारणवचनमनवकाशं स्यात् ॥ फलमप्येषां यथोपदेशं क्वचिद्दुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित्क्रममुक्तिरित्यवगम्यत एवेति ॥ अतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वं ॥

ऽऽहरय दश हरयो विषयाहरणादिंद्रियाणि प्राणिभेदापेक्षया शतानि सहस्राणि च तेषामीश्वरात् भेदमाशंक्याह ॥ अयमिति ॥ ईश्वर एव हरय इत्यर्थः ॥ द्वितीयं दूषयति ॥ ये पुनरिति ॥ मनोमयादिशब्दानां मुख्यवृत्त्या गुणपरत्वसंभवे निषेधलक्षणापि न युक्तेत्याह ॥ श्रुत्या चेति ॥ किंचाकारानाकारश्रुतिद्वैविध्ये सति ब्रह्मानाकारमेवेत्यत्र किंविनिगमकमिति शंकान्यथानादस्थूलादिश्रुतीनां निराकारतात्पर्यं नियामकमिति कथनार्थमिदं सूत्रमर्थवद्भवति ॥ सर्वश्रुतीनां निषेधार्थत्वे तु शंकानुत्थानान्नियामकसूत्रं व्यर्थं स्यादित्याह ॥ सर्वेषां चेति ॥ ननूपासनार्थकवाक्यानां स्वार्थे फलाभावात्सफलनिषेधवाक्यशेषत्वमित्याशंक्य फलस्य श्रुतत्वान्नान्यशेषतेत्याह ॥ फलमपीति ॥

अर्थैक्याभावाच्चनैकवाक्यतेत्याह ॥ कथंचेति ॥ अर्थैक्यंशंकते ॥ एकेति ॥ यथाफलवत्परमापूर्वोत्पत्तिनियोगैक्यादंगप्रधानवाक्यानामेकवाक्यतातथातत्त्वावबोधकामस्यप्रपंचप्रविलयविषयकएकोनियोगरूपोर्थोस्तीत्याकारानाकारवाक्यानांसर्वेषामेकवाक्यतेत्यर्थः नियोगासिद्ध्यादूषयति ॥ नेति विपर्ययंशंकते ॥ ननुद्वैतेति ॥ प्रत्यनीकंप्रतिबंधकं ॥ ननुप्रपंचविलयेब्रह्मलयः स्यादभेदादित्यतआह ॥ ब्रह्मस्वभावोहिप्रपंचइतिकारणंहिकार्यस्य

कथंचैषामेकवाक्यतोत्प्रेक्ष्यतइतिवक्तव्यं ॥ एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदितिचेत् ॥ नब्रह्मवाक्येषुनियोगाभावात् ॥ वस्तुमात्रपर्यवसायीनिहिब्रह्मवाक्यानिननियोगोपदेशीनि ॥ एतद्विस्तरेणप्रतिष्ठापितंतत्तुसमन्वयादित्यत्र ॥ किंविषयश्चात्रनियोगोभिप्रेयतइतिवक्तव्यं ॥ पुरुषोहिनियुज्यमानः कुर्वितिस्वव्यापारेकस्मिंश्चिन्नियुज्येत ॥ ननुद्वैतप्रपंचप्रविलयोनियोगविषयोभविष्यति ॥ अप्रविलापितेहिद्वैतप्रपंचेब्रह्मतत्त्वावबोधोनभवति ॥ अतोब्रह्मतत्त्वावबोधप्रत्यनीकभूतोद्वैतप्रपंचः प्रविलाप्योयथास्वर्गकामस्ययागानुष्ठानंकर्तव्यमुपदिश्यते ॥ एवमपवर्गकामस्यप्रपंचप्रविलयः ॥ यथाचतमसिव्यवस्थितंघटादितत्त्वमवबुभुत्समानेनतत्प्रत्यनीकभूतंतमः प्रविलाप्यते ॥ एवंब्रह्मतत्त्वमवबुभुत्समानेनतत्प्रत्यनीकभूतः प्रपंचः प्रविलापयितव्यः ॥ ब्रह्मस्वभावोहिप्रपंचोनप्रपंचस्वभावंब्रह्मतेननामरूपप्रपंचप्रविलापनेनब्रह्मतत्त्वावबोधोभवतीति ॥ अत्रवयंपृच्छामः । कोयंप्रपंचप्रविलापोनाम ॥ किमग्निप्रतापसंपर्कात् घृतकाठिन्यप्रविलयइवप्रपंचप्रविलयः कर्तव्यः ॥ आहोस्विदेकस्मिंश्चंद्रेतिमिरकृतानेकचंद्रप्रपंचवदविद्याकृतोब्रह्मणिनामरूपप्रपंचोविद्ययाप्रविलापयितव्यइति ॥ तत्रयदितावद्विद्यमानोयंप्रपंचोदेहादिलक्षणआध्यात्मिकोबाह्यश्चपृथिव्यादिलक्षणः प्रविलापयितव्यइत्युच्येत ॥ सपुरुषमात्रेणाशक्यः प्रविलापयितुमितितत्प्रविलयोपदेशोशक्यविषयएवस्यात् ॥ एकेनचादिमुक्तेनपृथिव्यादिप्रविलयः कृतइतीदानींपृथिव्यादिशून्यंजगदभविष्यत् ॥

स्वरूपंअतः कार्यनाशेपिकारणस्यनलयः ॥ घटनाशेपिमृद्दर्शनादित्यर्थः प्रपंचस्यसत्यस्यकल्पितस्यवालयेविधिरितिविकल्प्याद्यंदूषयतियदिपदंतत्रतावदिति ॥ सत्यस्यज्ञानाद्ध्वंसेमुसलादिनाचकृत्स्नद्वैतध्वंसायोगादंभोग्रसनविधिवदशक्यविषयोयंविधिः किंचशुकादिमुक्त्यासर्वमुक्तिःस्यादित्यर्थः ॥

द्वितीयमनूद्य दूषयति अथेत्यादिना ॥ उपदेशजन्यज्ञानादेवाविद्यातज्जप्रपंचलयसिद्धेर्नियोगो वृथेत्यर्थः ॥ किंच ब्रह्मज्ञानादौ विधिः किं ब्रह्मण्यज्ञाते ज्ञाने वा नाद्यः अशक्यत्वादित्याह ॥ अनावेदिते त्विति ॥ द्वितीयं शंकते ॥ नन्विति ॥ उपदेशादेव ज्ञाने ब्रह्मणि साक्षात्कारहेतुनबाधयोः सिद्धेर्विधिवैयर्थ्यं सिद्धस्य विधिना कर्तुमयोगादित्याह ॥ नेति ॥ एवं विषयाभावान्नियोगाभावमुक्त्वा नियोज्याभावात्तदभावमाह ॥ नियोज्योऽपि चेति प्रपंचान्तर्भूतो ब्रह्म वेत्यर्थः ॥ आ

अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपंचो विद्यया प्रविलाप्यत इति ब्रूयात् ॥ ततो ब्रह्मैवाविद्याध्यस्तप्रपंचप्रत्याख्यानेनावेदयितव्यं ॥ एकमेवाद्वितीयं ब्रह्म तत्सत्यं स आत्मा तत्त्वमसीति एवमावेदिते तस्मिन्विद्या स्वयमेवोत्पद्यते ॥ तया चाविद्या बाध्यते ततस्त्वाविद्याध्यस्तः सकलोऽयं नामरूपप्रपंचः स्वप्नप्रपंचवत्प्रविलीयते ॥ अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपंचप्रविलयं चेति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपंचविलयो वा जायते ॥ नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपंचविलयविषयो वा नियोगः स्यात् ॥ न निष्प्रपंचब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः ॥ रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपंचविलयश्च भवति ॥ न च कृतमेव पुनः क्रियते ॥ नियोज्योऽपि च प्रपंचावस्थायां योऽवगम्यते जीवो नाम स प्रपंचपक्षस्यैव वा स्यात् ब्रह्मपक्षस्यैव वा ॥ प्रथमे विकल्पे निष्प्रपंचब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात् ॥ कस्य प्रपंचप्रविलये नियोग उच्येत ॥ कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत ॥ द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगाभाव एव ॥ द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधानाः ॥ लोकेऽपीदं पश्येदमाकर्णयेति चैवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते न साक्षात् ज्ञानमेव कुर्विति ॥ ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्ज्ञायते कदाचिन्न जायते ॥ ६ ॥

द्ये जीवनाशाद्विध्ययोगः ॥ द्वितीये नियोज्यासिद्धिः ॥ तर्हि ज्ञाने विधिप्रत्ययानां का गतिरित्यत आह ॥ द्रष्टव्यादिशब्दा इति ॥ ननु श्रुतं ज्ञानं त्यक्त्वा तत्साधनव्यापारविधिः किमिति कल्प्यत इत्याशंक्य ज्ञानस्य पुरुषकृत्यसाध्यत्वादित्याह ॥ ज्ञेयाभिमुखस्यापीति ॥ ६ ॥ ॥ ६ ॥

किंचज्ञानविधिवादिनाज्ञेयंब्रह्मावश्यंवेदांतैर्ज्ञापनीयंविषयानवबोधेविधिबोधायोगात्तथाचवेदांतैरेवज्ञानोत्पत्तेर्विध्यानर्थक्यमित्याह तस्मादिति॥तंज्ञानार्थिनंप्रतीत्यर्थः॥ननूत्पन्नंज्ञानमन्यथाकर्तुंविधिरर्थवानितिनेत्याह॥नचेति॥नन्वनग्नौयोषिदिति प्रत्यक्षप्रामाण्यादुत्पन्नमपिज्ञानंतत्राग्निंध्यायेदितिविधिनान्यथाकृतंदृश्यतइत्यतआह॥यदीति॥अन्यथाधीःकृतिसाध्याचेत्क्रियैवकृतिंविनैवचेज्ज्ञातिरेवातोमानंविनाविधिनोज्ञानासिद्धेर्मानवस्तुतंत्रेज्ञानेविधिर्मुधेत्यर्थः॥वेदांतेषुविधिवादिनोन्यच्चदूषणमस्तीत्याह॥किंचान्यदिति॥ब्रह्मात्मैक्येनियोगेचवेदांतवाक्यस्यप्रामाण्यमाशंक्यार्थभेदाद्वाक्यभेदोवि

तस्मात्तंप्रतिज्ञानविषयस्वरूपंप्रदर्शयितव्योज्ञापयितुकामेनतस्मिन्दर्शितेस्वयमेवयथाविषयेयथाप्रमाणंचज्ञानमुत्पद्यते॥नचप्रमाणांतरेणान्यथाप्रसिद्धेर्थेन्यथाज्ञानंनियुक्तस्याप्युपपद्यते॥यदिपुनर्नियुक्तोहमित्यन्यथाज्ञानंकुर्यात्॥नतुतत्ज्ञानंकिंतर्हिमानसीसाक्रियास्वयमेवचेदन्यथोत्पद्येतभ्रांतिरेवस्यात्॥ज्ञानंतुप्रमाणजन्यंयथाभूतविषयंचनतन्नियोगशतेनापिकारयितुंशक्यतेनचप्रतिषेधशतेनापिवारयितुंशक्यते॥नहितत्पुरुषतंत्रंवस्तुतंत्रमेवहितत्॥अतोपिनियोगाभावः॥किंचान्यत्नियोगनिष्ठतयैवपर्यवस्यत्याम्नायेयदभ्युपगतमनियोज्यब्रह्मात्मत्वंजीवस्यतदप्रमाणकमेवस्यात्॥अथशास्त्रमेवानियोज्यब्रह्मात्मत्वमप्याचक्षीततदवबोधेचपुरुषंनियुंजीतततोब्रह्मशास्त्रस्यैकस्यद्व्यर्थपरताविरुद्धार्थपरताचप्रसज्येयातां॥नियोगपरतायांचश्रुतहानिरश्रुतकल्पनाकर्मफलवन्मोक्षस्यादृष्टफलत्वमनित्यत्वंचेत्येवमादयोदोषानकेनचित्परिहर्तुंशक्यास्तस्मादवगतिनिष्ठान्येवब्रह्मवाक्यानिननियोगनिष्ठान्यतश्चैकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तं॥अभ्युपगम्यमानेपिचब्रह्मवाक्येषुनियोगसद्भावेतदेकत्वंनिष्प्रपंचोपदेशेषुसप्रपंचोपदेशेषुचासिद्धं॥नहिशब्दांतरादिभिःप्रमाणैर्नियोगभेदेऽवगम्यमानेसर्वत्रैकोनियोगइतिशक्यमाश्रयितुं॥

रुद्धार्थत्वादप्रामाण्यंचेतिदूषयति॥अथेत्यादिना॥किंचश्रुतंब्रह्मनश्रुतोविधिर्वेदांतेषुतत्कल्पने चकर्मजन्यत्वान्मोक्षस्यानित्यत्वसातिशयत्वादिप्रसंगइत्याह॥नियोगपरतायांचेतिफलितमाह॥अतश्चेति॥इदानींप्रौढवादेननियोगमंगीकृत्यतदेकत्वंखंडयति॥अभ्युपगम्यमानेपीति॥भिन्नक्रियावाचीधातुः शब्दांतरंयथायजतिददातीतितथेहापिवेदोपासीतेतिशब्दभेदः॥निर्गुणसगुणरूपभेदःप्रकरणभेदःमुक्त्यभ्युदयफलभेदइत्येतैःप्रमाणैर्निर्गुणज्ञानसगुणोपासनाविषयकनियोगभेदइत्यर्थः॥

कथं तर्ह्यंगांगिवाक्येषु नियोगैक्यं तत्राह प्रयाजेति ॥ एकस्यैव स्वर्गकामस्य सांगप्रधानाधिकारात्तत्साध्यफलापूर्वैक्यादेकवाक्यतेत्यर्थः इहापि निर्गुणसगुणविद्ययोरेकाधिकारान्नियोगैक्यमस्त्वित्याह ॥ नन्विहेति ॥ मुक्त्यभ्युदयार्थिभेदान्मिथो विरुद्धार्थविद्ययोरंगांगित्वायोगाच्च न नियोगैक्यं न च निर्गुणविद्या नियोग एक एव सगुणविद्यानंगीकारादिति वाच्यं ॥ अहो विपरीतं पांडित्यमायुष्मतः विध्ययोग्यविद्यायां विधिर्विधियोग्यायामविधिरिति तस्मान्नाकारवाक्यानामाकारलयद्वारा निर्गुणवाक्यैकवाक्यतागति —— रसद्गतिरेव किंतु तेषां कस्मिन्नाकारे गतिस्तदुपासनयाभ्युदयसिद्धेः ॥ निर्गुणवाक्यानां तु परमार्थालंबनत्वमित्यसदुक्त एव विभागः साधीयानित्युपसंहरति ॥ तस्मादिति ॥ २१ ॥ ब्रह्मणो निर्विशेषचिन्मात्रत्वमुक्त्वा सर्वनिषेधावधित्वेन सद्रूपत्वमाह ॥

प्रयाजदर्शपौर्णमासवाक्येषु तु अधिकारांशेनाभेदाद्युक्तमेकत्वं ॥ न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वाधिकारांशोऽस्ति ॥ न हि भारूपत्वादयो गुणाः प्रपंचप्रविलयापकारिणो नापि प्रपंचप्रविलयो भारूपत्वादिगुणोपकारी परस्परविरोधित्वात् ॥ न हि कृत्स्नप्रपंचप्रविलापनं प्रपंचैकदेशापेक्षणं च एकस्मिन् धर्मिणि युक्तं समावेशयितुं ॥ तस्मादस्मदुक्त एव विभाग आकारवदनाकारोपदेशानां युक्ततर इति ॥ २१ ॥ पू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्तं चेत्युपक्रम्य पंचमहाभूतानि द्वैराश्येन प्रविभज्यामूर्त्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः पठ्यते ॥ अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति ॥

॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ पृथिव्यप्तेजोभूतत्रयं मूर्त्तं वाय्वाकाशद्वयममूर्त्तमिति राशिद्वयमुक्त्वा भूतद्वयस्यामूर्त्तस्य सारः करणात्मा हिरण्यगर्भो य एष एतस्मिन्सूर्यमंडले पुरुषो यस्चायं दक्षिणेऽक्षणि पुरुष इत्युक्तस्तस्य वासनामयानि स्वप्नरूपाणि तद्यथा माहारजनं वासो यथा पांड्वाविकं यथेंद्रगोप इत्युपमाभिरुक्तानि विचित्राणि तत्र माहारजनं हरिद्रातया लिप्तं वस्त्रं माहारजनं पांड्वाविकमिति धवलं कंबलादिकं चित्रश्रुतिमुपलक्षणं कृत्वा सूक्ष्मपंचभूतान्यमूर्त्तानि पंचीकृतानि मूर्त्तानि ततश्चामूर्त्तरसत्वोक्त्या करणानां पांचभौतिकत्वसिद्धिरिति व्याचक्षते अथ सत्यद्वात्मकप्रपंचोक्त्यनंतरं अत उक्तारोपस्य निषेधार्थत्वान्नेति नेतीति निषेधेनोपदेशः क्रियत इत्यर्थः ॥ नेति शब्दार्थमाह ॥ न हीति एतस्मादात्मनोऽन्यन्नास्तीति नेतीत्युच्यत इत्यर्थः ॥ शून्यतानिरासार्थं परं ब्रह्मास्तीत्युक्तमिति सिद्धांतरीत्यास्फुर

भावाह्याकार्या+३

शा.भा. अत्रनिषेधविशेषानुपलंभात्संशयमाह ॥ तत्रकोस्येत्यादिना । नञ्प्रयोगस्यनकारस्येतिशब्दोपस्थापितवस्तुनिषेधकत्वादित्यर्थः ॥ इतिशब्दान्निषेध्य अ.पा.
टी. सामान्यसमर्पणेविशेषाकांक्षायांप्रकरणाद्रूपद्वयस्यरूपिब्रह्मणश्चनिषेध्यत्वभानात्संशयमुक्त्वापूर्वोक्तंनिर्विशेषब्रह्मनास्तीत्याक्षेपसंगत्यापूर्वपक्ष ३।२
र.प्र. यतितत्रप्रकृतत्वेति ॥ पूर्वपक्षेतत्पदार्थाभेदासिद्धिः सिद्धांतेतत्सिद्धिरितिफलंनिरधिष्ठाननिषेधादर्शनात्सर्वनिषेधोनयुक्तइत्यारुच्याप्रपंचेब्र॥
२२६

तत्रकोस्यप्रतिषेधस्यविषयइतिजिज्ञासामहे नह्यत्रेदंतदितिविशेषितंकिंचित्प्रतिषेध्यमुपलभ्यते॥ इतिशब्देनत्वत्र।
प्रतिषेध्यंकिमपिसमर्प्यतेनेतिनेतिइतिपरत्वान्नञ्प्रयोगस्य॥ इतिशब्दश्चायंसन्निहितालंबनएवंशब्दसमानवृत्तिःप्र
युज्यमानोदृश्यते॥ इतिहस्मोपाध्यायःकथयत्येवमादिषुसन्निहितंचात्रप्रकरणसामर्थ्याद्रूपद्वयंसप्रपंचंब्रह्मणः॥
तच्चब्रह्मयस्यैतेद्वेरूपे॥ तत्रनःसंशयउपजायतेकिमयंप्रतिषेधोरूपेरूपवच्चोभयमपिप्रतिषेधत्याहोस्विदेकतरंय।
दाप्येकतरंतदापिकिंब्रह्मप्रतिषेधतिरूपेपरिशिनष्टिआहोस्विद्रूपेप्रतिषेधतिब्रह्मपरिशिनष्टीति॥ तत्रप्रकृतत्वावि
शेषादुभयमपिप्रतिषेधतीत्याशंकामहे॥ द्वौचैतौप्रतिषेधौद्विर्नेतिशब्दप्रयोगात्॥ तयोरेकेनसप्रपंचंब्रह्मणोरूपंप्रतिषि
ध्यतेअपरेणरूपवद्ब्रह्मेतिभवतिमतिः॥ अथवाब्रह्मैवरूपवत्प्रतिषिध्यतेतद्धिवाङ्मनसातीतत्वात्संभाव्यमानसद्भावं
प्रतिषेधार्हंनतुरूपप्रपंचःप्रत्यक्षादिगोचरत्वात्प्रतिषेधार्हः॥ अभ्यासस्त्वादरार्थइति॥ एवंप्राप्तेब्रूमः॥ नतावदुभय
प्रतिषेधउपपद्यतेशून्यवादप्रसंगात्॥ किंचिद्धिपरमार्थमालंब्यापरमार्थंप्रतिषिध्यतेयथारज्ज्वादिषुसर्पादयस्तच्च राम.
परिशिष्यमाणेकस्मिंश्चिद्भावेऽवकल्पतेउभयप्रतिषेधेतुकोन्योभावःपशिष्येत॥ २२६

ह्मनिषेधइत्याह॥ अथवेतिएकब्रह्मणएवनिषेधेनकारद्वयस्यपौनरुक्त्यमित्यतआह अभ्यासस्त्विति॥ उत्सूत्रमेवतावत्सिद्धांतमुपक्रमते॥
एवमिति॥ शून्यप्रसंगइष्टइतिवदंतंप्रत्याह॥ किंचिद्धीति॥ तच्चेति॥ प्रतिषेधनमित्यर्थः अधिष्ठानाऽनवशेषेतत्प्रमारूपहेत्वभावान्निषेधवा॰
क्यार्थप्रमानस्यात्॥ इदमत्रनास्तीतिलोकेनिषेधस्यसाधिष्ठानस्यैवप्रमितिदर्शनादित्यर्थः॥

किंच यद्भातितत्सदित्युत्सर्गस्य भानार्थाभावाधिष्ठानप्रमितिरपवादः तयापूर्वभानस्य भ्रमत्वनिश्चयेनार्थसत्त्वापलापात् अपवादानंगीकारे तूत्सर्गेण
प्रपंचस्य सत्यत्वापत्तेः निषेधानुपपत्तिरित्याह ॥ अपरिशिष्यमाणे चेति ॥ अधिष्ठानसत्त्वं विना भ्रांतिनिषेधयोरयोगाच्छून्यवादो न युक्त इत्युक्त्वा पूर्ववा
दिनः पक्षांतरं दूषयति ॥ नापीति ॥ देहात्माभिमानवल्लौकिकमानप्राप्तं हि तस्य निषेधो युक्तो न वेदांतप्रमितं ब्रह्मण इति भावः यदुक्तं वाङ्मनसातीत

अपरिशिष्यमाणे चान्यस्मिन् य इतरः प्रतिषेद्धुमारभ्यते तेन तस्य प्रतिषेद्धुमशक्यत्वात्तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः
॥ नापि ब्रह्मप्रतिषेध उपपद्यते ॥ ब्रह्म ते ब्रवाणीत्याद्युपक्रमविरोधात् ॥ असन्नेव स भवति असद्ब्रह्मेति वेद चेत् इत्यादिनिंदा
विरोधात् ॥ अस्तीत्येवोपलब्धव्य इत्यवधारणविरोधात् ॥ सर्ववेदांतव्याकोपप्रसंगात् ॥ वाङ्मनसातीतत्वमपि ब्रह्मणो ना
भावाभिप्रायेणाभिधीयते ॥ न हि महता परिकरबंधेन ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्मेत्येवमादिना वेदांतेषु ब्रह्म प्र
तिपाद्य तस्यैव पुनरभावोऽभिलप्येत ॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति हि न्यायः ॥ प्रतिपादनप्रक्रिया त्वेषा यतो वाचो
निवर्तंते अप्राप्य मनसा सहेति ॥ एतदुक्तं भवति ॥ वाङ्मनसातीतमविषयांतःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्त
स्वभावं ब्रह्मेति ॥ तस्माद्ब्रह्मणो रूपं प्रपंचं प्रतिषेधति परिशिनष्टि ब्रह्मेत्यभ्युपगंतव्यं ॥ तदेतदुच्यते प्रकृतैतावत्त्वं हि प्रतिषेध
तीति प्रकृतं यदेतावत् इयत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति ॥ तद्धि प्रकृतं प्रपंचितं च पू
र्वस्मिन्ग्रंथे अधिदैवतमध्यात्मं च ॥ तज्जनितमेव च वासनालक्षणमपरं रूपममूर्तरसभूतं पुरुषशब्दोदितं लिंगात्मव्यपा
श्रयं माहारजनाद्युपमाभिर्दर्शितममूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः ॥ ६ ॥

त्वान्निषेधार्हं ब्रह्मेति तत्राह ॥ वाङ्मन
सेति ॥ ब्रह्मणो वागाद्यतीतत्वं निषेधार्थं न चेत्किमर्थं तदुक्तमित्यत आह प्रतिपादनेति ॥ उक्तार्थं सूत्रं योजयति ॥ तदेतदित्यादिना ॥ द्वे वाव ब्रह्मणो रूपे इति रूप
द्वयस्यैव प्राधान्येन प्रकृतत्वात्तन्नेतीति निषेध इत्यर्थः ॥ नन्वादित्यमंडले पुरुष इति ब्रह्माप्यत्र प्राधान्येनोक्तमित्याशंक्य पुरुषो लिंगात्मा अमूर्तरसत्वश्रुत्या ।
भूतजनितत्वभानात् सप्रपंचरूप तच्छ्रुतेश्चेत्याह ॥ तज्जनितमेवेति ॥ रूपरूपिणोरभेद उक्तः ॥ ननु वासनामयं रूपमेव किमित्युपमीयते प्रसिद्धरूपमेव किं
नत्वादित्यत आह अमूर्तरसस्येति ॥

रूपद्वयस्यैव प्राधान्येन प्रकृतत्वे फलितमाह॥ तदिति प्रतियोगित्वेन समर्पयत इत्यर्थः॥ न चार्थतः प्राधान्याद्ब्रह्मणो निषेधः राज्ञो भृत्यो नास्तीत्यत्र राजनिषेधप्रसंगादिति भावः॥ किंचात्र ब्रह्मणः प्रतिपाद्यत्वान्न निषेध इत्याह प्रपंचिते चेति॥ ननु ब्रह्मणि निषिद्धस्याप्यन्यत्र स्थितिसंभवात्कथं कल्पितत्वमित्यत आह॥ तदास्पदमिति॥ उपादाने निषिद्धस्यान्यत्र न स्थितिरित्यर्थः॥ यत्तु द्वैतनिषेधे प्रत्यक्षादिविरोध इति तत्राह युक्तं चेति॥ स्थापिते हि आरंभणाधिकरणे प्रत्यक्षादेर्व्यावहारिकप्रामाण्यं न तत्त्वावेदकमिति॥ अतस्तत्त्वतो निषेधान्न ——— विरोध इति भावः॥ ननु वस्तुत्वाद्द्वैतवद्ब्रह्म

तदेतत्सप्रपंचं ब्रह्मणो रूपं सन्निहितालंबनेनेतिकरणेन प्रतिषेधकं नञं प्रत्युपनीयत इति गम्यते॥ ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रंथे न स्वप्रधानत्वेन प्रपंचिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रान्तं॥ अथात आदेशो नेति नेतीति॥ तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते॥ तदास्पदं हीदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धं॥ युक्तं च कार्यस्य वाचारंभणशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनं॥ न तु ब्रह्मणः सर्वकल्पनामूलत्वात् न चात्रेयमाशंका कर्तव्या कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव पुनः प्रतिषेधति॥ प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति॥ यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति॥ लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति प्रतिषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यं॥ द्वौ चैतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः॥ यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधति॥ उत्तरो वासनाराशिं प्रतिषेधति॥ अथवा नेति नेतीति वीप्सेयमितीति यावत् किंचिदुत्प्रेक्ष्यते तत्सर्वं न भवतीत्यर्थः॥ परिगणितप्रतिषेधे हि क्रियमाणे यदि नैतद्ब्रह्म किमन्यद्ब्रह्म भवेदिति जिज्ञासा स्यात्॥ वीप्सायां तु सर्वस्य समस्तस्य विषयजातस्य प्रतिषेधादविषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते॥ तस्मात्प्रपंचमेव ब्रह्मणि कल्पितं प्रतिषेधति परिशिनष्टि ब्रह्मेति

णोऽपि निषेधोऽस्तु नेत्याह॥ नत्विति॥ द्वैतभावाभावसाक्षित्वादशक्यो निषेध इत्यर्थः न चेत्यादि स्पष्टार्थं॥ यच्चोक्तं निषेधाभ्यां रूपं रूपि ब्रह्म च निषिध्यत इति। तत्राह द्वौ चैताविति उद्देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबंध इति न्यायो यथासंख्यमनुदेशः समानानामिति पाणिनिसूत्रसिद्धस्तेनात्र रूपद्वयोद्देशेन निषेधद्वयविधिरित्यर्थः॥ वीप्सापक्षे सर्वदृश्यनिषेधाज्जिज्ञासाशांतिरिति विशेषमाह॥ परिगणितेति मूर्तं नामूर्तं नेत्येवं विशिष्य निषेधे जिज्ञासा न शाम्यती

द्वी

सूत्रशेषं व्याचष्टे ॥ इतश्चेति प्रतिषेधानुपपत्त्या ब्रह्मास्तीत्यवगतं भूयः पुनः परमस्तीति श्रुतिः साक्षादपि ब्रवीतीत्यर्थः नह्येति ॥ अवशिष्टं ब्रह्मेत्यर्थः ॥ सत्यमन्यत् ॥ २२ ॥ ननु ग्राह्यत्वाद्ब्रह्म नास्तीति शंकानिरासार्थं सूत्रं व्याचष्टे ॥ यत्प्रनिषिद्धादिति ॥ रूपाद्यभावादव्यक्तमिंद्रियाग्राह्यं न त्वसत्त्वादित्यर्थः ॥

इतश्चैष एव निर्णयो यतस्ततः प्रपंचः प्रतिषेधाद्भूयो ब्रवीति अन्यत्परमस्तीति अभावावसाने हि प्रतिषेधे क्रियमाणे किमन्यत्परमस्तीति ब्रूयात्तत्रैषाक्षरयोजना नेति नेतीति ब्रह्मादिश्य तमेवादेशं पुनर्निर्वक्ति नेति नेतीत्यस्य कोऽर्थः न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेति नेतीत्युच्यते न पुनः स्वयं नास्तीत्यर्थः तच्च दर्शयत्यन्यत्परमप्रतिषिद्धं ब्रह्मास्तीति ॥ यदा पुनरेवमक्षराणि योज्यंते। न ह्येतस्मादिति न हि नेति नेतीति प्रपंचप्रतिषेधरूपादादेशनादन्यत्परमादेशनं ब्रह्मणोऽस्तीति तदा ततो ब्रवीति च भूय इत्येतन्नामधेयविषयं योजयितव्यं ॥ अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति हि ब्रवीति ॥ तच्च ब्रह्मावसाने प्रतिषेधे समंजसं भवति ॥ अभावावसाने तु प्रतिषेधे किं सत्यस्य सत्यमित्युच्येत ॥ तस्माद्ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान इत्यध्यवसामः ॥२२॥ तदव्यक्तमाह हि ॥ २३ ॥ यत्प्रतिषिद्धात्प्रपंचजातादन्यत्परं ब्रह्म तदस्ति चेत् कस्मान्न गृह्यत इत्युच्यते ॥ तदव्यक्तमनिंद्रियग्राह्यं ॥ सर्वदृश्यसाक्षित्वात् ॥ आह ह्येवं श्रुतिः ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते ॥ यत्तदद्रेश्यमग्राह्यं ॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने इत्याद्या ॥ स्मृतिरपि अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यत इत्याद्या ॥२३॥ अपि च संराधने प्रत्यक्षानुमानाभ्यां ॥ २४ ॥ अपि चैनमात्मानं निरस्तसमस्तप्रपंचमव्यक्तं संराधनकाले पश्यंति योगिनः ॥ संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानं ॥ कथं पुनरवगम्यते संराध-
नकाले पश्यंतीति

अन्यैर्देवैरिंद्रियांतरैर्न गृह्यत इत्यन्वयः ॥ २३ ॥ नर्हि कदा ग्राह्यमिति शंकोत्तरं सूत्रं व्याख्याति ॥ अपि चैनमिति चस्त्वर्थः इंद्रियैर्न गृह्यते अपि तु संराधने शास्त्रसंस्कृतमनसेत्यर्थः भक्तिध्यानाभ्यां प्रत्यगात्मनश्चित्ते प्रकर्षेण निधानं स्थापनं प्रणिधानं जपनमस्कारादिरादिशब्दा-

स्वयंभूरीश्वरः॥खानींद्रियाणिपरांच्यनात्मग्राहकाणिकृत्वाव्यतृणन्नाशितवान्सद्दिनेषांनाशोयदसदर्थग्राहितयासर्जनंतस्मात्तेषांतथासृष्टत्वात्सर्वोलोकःपरागर्थमेवपश्यतिनांतरात्मानंकश्चित्तुधीरोधीमानावृत्तचक्षुर्निरुद्धेंद्रियःशुद्धेचेतसिप्रत्यगात्मानंशास्त्रेणपश्यतिमोक्षार्थीत्यर्थः॥ततःकर्मणाविशुद्धचित्तोज्ञानात्मसत्वोत्कर्षेणसंध्यायंस्तंनिष्कलंपश्यतीत्यर्थः॥विनिद्राःविनमस्कास्तत्रहेतुर्जितश्वासत्वंप्राणायामनिष्ठत्वंयुंजानाध्यायिनः॥योगलभ्यःआत्मायोगात्मा॥२४॥यथाप्रकाशादयःउपाधिषुभिद्यंतेनस्वतः॥एवंप्रकाशश्चिदात्मापिध्यानादिकर्मण्युपाधौभिद्यतेनस्वतस्तस्यावैशेष्य

प्रत्यक्षानुमानाभ्यांश्रुतिस्मृतिभ्यामित्यर्थः॥तथाहिश्रुतिः॥परांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्॥कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति॥ज्ञानप्रसादेनविशुद्धसत्वःततस्तुतंपश्यतिनिष्कलंध्यायमानइतिचैवमाद्या॥स्मृतिरपियंविनिद्राजितश्वासाःसंतुष्टाःसंयतेंद्रियाः॥ज्योतिःपश्यंतियुंजानास्तस्मैयोगात्मनेनमः॥योगिनस्तंप्रपश्यंतिभगवंतंसनातनमितिचैवमाद्या॥२४॥ननुसंराध्यसंराधकभावाभ्युपगमात्परेतरात्मनोरन्यत्वंस्यादितिनेत्युच्यते॥प्रकाशादिवच्चावैशेष्यंप्रकाशश्चकर्मण्यभ्यासात्॥२५॥यथाप्रकाशाकाशसवितृप्रभृतयोंगुलिकरकोदकप्रभृतिषुकर्मसूपाधिभूतेषुसविशेषाइवावभासंते॥नचस्वाभाविकीमविशेषात्मतांजहति॥एवमुपाधिनिमित्तएवायमात्मभेदःस्वतस्त्वैकात्म्यमेव॥तथाहिवेदांतेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदःप्रतिपाद्यते॥२५॥अतोनंतेनतथाहिलिंगं॥२६॥अतश्चस्वाभाविकत्वादभेदस्याविद्याकृतत्वाच्चभेदस्यविद्ययाऽविद्यांविधूयजीवःपरेणानंतेनप्राज्ञेनात्मनैकतांगच्छति॥तथाहिलिंगं॥सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिब्रह्मैवसन्ब्रह्माप्येतीत्यादि॥२६॥उभयव्यपदेशात्त्वहिकुंडलवत्॥२७॥तस्मिन्नेवसंराध्यसंराधकभावेमतांतरमुपन्यस्यतिस्वमतविशुद्धये॥क्वचिज्जीवप्राज्ञयोर्भेदोव्यपदिश्यते॥ ७ ॥

मेकरसत्वमेवतत्त्वमसीत्यभ्यासादितिसूत्रयोजना॥२५॥जीवस्यब्रह्मात्मत्वफलश्रुतिरूपलिंगादपिभेदऔपाधिकएवेत्याहसूत्रकारः॥अतोनंतेनेति॥२६॥भेदाभेदपूर्वपक्षसूत्रद्वयस्यसंगतिमाह॥तस्मिन्नेवेतियथाहित्वेनाभेदः॥कुंडलाख्यस्यसर्पावस्थाविशेषस्यकुंडलत्वेनभेदस्तथाजीवस्यब्रह्मत्वेनाभेदोजीवत्वेनभेदःयद्वासूर्यप्रकाशयोरेकतेजस्त्वधर्मावच्छेदेनभेदाभेदवज्जीवपरयोरप्येकेनैवात्मत्वधर्मेणभेदाभेदौश्रुतिबलात्स्वीका

[illegible] राम

कुंडलत्वं वलयाकारत्वं आभोगत्वं वक्राकारत्वं प्रांशुत्वं दीर्घदंडाकारत्वं उन्नतमुखत्वं आदिशब्दार्थः २८ ॥ सिद्धांतसूत्रं पूर्ववद्वेति धर्मभेदेनैकधर्मेण वाभेदाभेदस्वीकारे भेदस्यासत्यत्वादभेदवदनिवृत्तिः स्यात् एकत्रैव भेदाभेदस्वीकारे लोके विरोधकथोच्छेदः इत्यपि द्रष्टव्यं तस्मान्निष्प्रपंचं चिदेकरसं ब्रह्म तत्पदलक्ष्य

ततस्तु तं पश्यति निष्कलं ध्यायमान इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च परात्परं पुरुषमुपैति दिव्यमिति गंतृगंतव्यत्वेन यः सर्वाणि भूतान्यंतरो यमयतीति नियंतृनियंतव्यत्वेन ॥ क्वचित्तु योरेवाभेदो व्यपदिश्यते ॥ तत्त्वमस्यहं ब्रह्मास्म्येष आत्मा सर्वांतर एष त आत्मांतर्याम्यमृत इति ॥ तत्रैवमुभयव्यपदेशे सति यद्यभेद एवैकांततो गृह्यते भेदव्यपदेशो निरालंबन एव स्यात् ॥ अत उभयव्यपदेशदर्शनादहिकुंडलवदत्र तत्त्वं भवितुमर्हति ॥ यथाहिरित्यभेदः कुंडलाभोगप्रांशुत्वादीनीति तु भेदः ॥ एवमिहापीति ॥ २७ ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यं ॥ यथा प्रकाशः सावित्रस्तदाश्रयश्च सविता नात्यंतभिन्नौ उभयोरपि तेजस्त्वाविशेषात् ॥ अथ च भेदव्यपदेशभाजौ भवतः एवमिहापीति ॥ २८ ॥ पूर्ववद्वा ॥ २९ ॥ यथा वा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यमिति तथैव तद्भवितुमर्हति ॥ तथाह्यविद्याकृतत्वाद्बंधस्य विद्यया मोक्ष उपपद्यते ॥ यदि पुनः परमार्थत एव बद्धः कश्चिदात्माऽहिकुंडलन्यायेन परस्यात्मनः संस्थानभूतः प्रकाशाश्रयन्यायेन चैकदेशभूतोऽभ्युपगम्येत ॥ ततः पारमार्थिकस्य बंधस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत ॥ न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति ॥ अभेदमेव हि —— प्रतिपाद्यत्वेन निर्दिशति भेदं तु पूर्वप्रसिद्धमेवानुवदति अर्थांतरविवक्षया ॥ तस्मात्प्रकाशादिवच्चावैशेष्यमित्येष एव सिद्धांतः ॥ २९ ॥ प्रतिषेधाच्च ॥ ३० ॥ इतश्चैष एव सिद्धांतः ॥ यत्कारणं परस्मादात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रं ॥ नान्योऽतोऽस्ति द्रष्टेत्येवमादि ॥ अथात आदेशो नेति नेति ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमिति च ब्रह्मव्यतिरिक्तप्रपंचनिराकरणात् ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धांत इति गम्यते ॥ ३० ॥ ६ ॥ १ ॥

मस्तीति सिद्धं ॥ ३० ॥ ६ ॥ यदुक्तं नेति नेतीत्यादिश्रुतिभिर्ब्रह्मातिरिक्तं वस्तु निषिध्यत इति तदयुक्तं सेत्वादिश्रुतिभिर्वस्त्वंतरास्तित्वभानादित्याक्षिपति ॥ १ ॥

शा·भा· परमतइतियद्यपिद्युभ्वाद्यधिकरणेसेतुशब्दोविधारकत्वेनगौणोव्याख्यातस्तथाप्युन्मानादिश्रुतीनांगतिमजाननोयंपूर्वपक्षस्तत्रोन्मानादिश्रु अध्या·
टी· तीनांमुख्यत्वात् सद्वयंब्रह्मेतिफलं॥सिद्धांतेतूक्ताद्वितीयतत्त्वदलस्यसिद्धिरितिविवेकः॥ब्रह्मसद्वयंसेतुत्वात् लौकिकसेतुवत्तीर्णत्वश्रुतेश्चेत्याह॥ ३।२
र·प्र· सेतुंतीर्त्वेतिजांगलत्वानभूयिष्टमितिवैद्योक्तेर्वातप्रचुरोदेशोजांगलं॥इहतुदेशमात्रंग्राह्यं दिशश्चतस्रःकलाःप्रकाशवान्नामपादःपृथिव्यंतरिक्षं
३९५

परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः॥३१॥ यदेतन्निरस्तसमस्तप्रपंचंब्रह्मनिर्धारितं॥ अस्मात्परमन्यत्तत्त्वमस्तिनास्तीतिश्रुतिविप्रतिपत्तेः संशयः॥ कानिचिद्वाक्यान्यापातेनैवप्रतिभासमानानिब्रह्मणोपिपरमन्यत्तत्त्वंप्रतिपादयंतीवतेषांहिपरिहारमभिधातुमयमुपक्रमः क्रियते॥ परमतोब्रह्मणोन्यत्तत्त्वंभवितुमर्हति॥ कुतः सेतुव्यपदेशात्॥ उन्मानव्यपदेशात्॥ संबंधव्यपदेशात् भेदव्यपदेशाच्च॥ सेतुव्यपदेशस्तावत् अथयआत्माससेतुर्विधृतिरित्यात्मशब्दाभिहितस्यब्रह्मणः सेतुत्वंसंकीर्तयति॥ सेतुशब्दश्चलोकेजलसंतानविच्छेदकरेमृद्दार्वादिप्रचयेप्रसिद्धः॥ इहतुसेतुशब्दआत्मनिप्रयुक्तइतिलौकिकसेतोरिवात्मसेतोरन्यस्यवस्तुनोस्तित्वंगमयति॥ सेतुंतीर्त्वेतिचतरतिशब्दप्रयोगात्॥ यथालौकिकंसेतुंतीर्त्वाजांगलमसेतुंप्राप्नोति॥ एवमात्मानंसेतुंतीर्त्वाअनात्मानमसेतुंप्राप्नोतीतिगम्यते॥ उन्मानव्यपदेशश्चभवति॥ तदेतत्। ब्रह्मचतुष्पादष्टाशफंषोडशकलमिति॥ यच्चलोकेउन्मितमेतावदिदमितिपरिच्छिन्नंकार्षापणादितत्ततोन्यद्वस्त्वस्तीतिप्रसिद्धं॥ तथाब्रह्मणोप्युन्मानात्ततोन्येनवस्तुनाभवितव्यमितिगम्यते॥ तथासंबंधव्यपदेशोपिभवति॥ सतासोम्यतदा सम· संपन्नोभवतीति॥ शारीरआत्माप्राज्ञेनात्मनासंपरिष्वक्तइतिच॥ मितानांचमितेनसंबंधोदृष्टः॥ यथानराणांनगरेण॥

द्यौःसमुद्रइत्यनंतवान्नामपादः अग्निःसूर्यश्चंद्रोविद्युदितिज्योतिष्मान्नामपादःचक्षुःश्रोत्रंवाङ्मनइत्यायतनवान्नामपादइतिचतुष्पाद्ब्रह्मेतिपादानामर्द्धान्यष्टौशफाअस्येत्यष्टाशफंपादेषुचतुर्षुप्रत्येकंचतस्रःकलाइतिषोडशकलमित्यर्थः॥ षोडशपणपरिमितंताम्रंकार्षापणसंज्ञंभवति॥तद्वत्सद्वयंब्रह्मपरिमितत्वादित्यर्थः॥संबंधित्वाच्चनगरवदित्याह॥ तथासंबंधेति॥

अन्यदमितमिति असंख्यानमित्यर्थः ॥ अन्यस्पर्शे अल्पत्वेन मितत्वनियमादिति मितत्वं भेदेनोक्तत्वाच्च घटवदित्याह ॥ भेदव्यपदेशाच्चेति अस्याक्षिस्थस्यामुनादित्यस्थेन सहेति यावत् ॥ आधारतो निर्देशतश्च भेदमुक्त्वाऽवधितोपि तमाह ॥ सावधिकं चेति ॥ ३१ ॥ सिद्धांतसूत्रं व्याचष्टे तु शब्देनेत्यादिना ॥ यदन्यत्तत्किं

जीवानां च ब्रह्मणा संबंधं व्यपदिशति सुषुप्तौ अतस्ततः परमन्यदमितमस्तीति गम्यते ॥ भेदव्यपदेशश्चैतमेवार्थं गमयति ॥ तथा हि ॥ अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति ॥ अथ य एषोंतरक्षिणि पुरुषो दृश्यत इति अतिदेशं चास्यामुना रूपादिषु करोति ॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति ॥ सावधिकं चेश्वरत्वमुभयोर्व्यपदिशति ॥ ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्येकस्य ॥ ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्येकस्य ॥ यथेदं मागधस्य राज्यमिदं वैदेहस्येति ॥ ३१ ॥ एवमेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपाद्यते सामान्यात्तु ॥ ३२ ॥ तु शब्देन प्रदर्शितां प्राप्तिं निरुणद्धि न ब्रह्मणोऽन्यत्किंचिद्भवितुमर्हति ॥ प्रमाणाभावात् ॥ न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे सर्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितं ॥ अनन्यत्वं च कारणात्कार्यस्य ॥ न च ब्रह्मव्यतिरिक्तं किंचिदजं संभवति ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधारणात् एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानान्न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वमवकल्पते ॥ ननु सेत्वादिव्यपदेशा ब्रह्मव्यतिरिक्तं तत्त्वं सूचयंतीत्युक्तं ॥ नेत्युच्यते ॥ सेतुव्यपदेशस्तावन्न ब्रह्मणा वाह्यस्य सद्भावं प्रतिपादयितुं क्षमं नै सेतुरात्मेति ह्याह न ततः परमस्तीति ॥ नत्र परस्मिन्नसति सेतुत्वं नाऽवकल्पत इति परं किमपि कल्प्येत ॥ न चैतन्न्याय्यं ॥ हठाद्ध्यप्रसिद्धकल्पना ॥

१ साम्यमादिवानाद्यः मानाभावात्कार्यस्य ब्रह्मानन्यत्वनिर्णयाच्चेत्युक्त्वा न द्वितीयः प्रागुत्पत्तेरद्वयत्वावधारणादित्याह ॥ न च ब्रह्मव्यतिरिक्तमिति उक्तात् मानानामागमबाध इति भावः उक्तं स्मारयित्वा हेतूनामसिद्धिमाह ॥ ननु सेत्वित्यादिना ॥ किं सेतुश्रुत्या परसिद्धिरर्थाद्वा नाद्य इत्युक्त्वा द्वितीयं शंकते ॥ नत्र परस्मिन्निति सेतुत्वलिंगेनाद्वितीयत्वश्रुतिबाधनमन्याय्यमित्याह ॥ न चेति ॥ १०१ ॥

लिंगंचासिद्धमित्याह अपिचेति॥ विधारकत्वंतुकस्मिन्नद्वितीयापेक्षमपियुज्यतइतिभावः तीर्णत्वहेतुरप्यसिद्धइत्याह॥ सेतुंतीर्त्वेति॥ ३२॥ परिमितत्वमप्यसिद्धमित्याह बुद्ध्यर्थइति वाक्प्राणचक्षुःश्रोत्राणिमनसःपादाः अग्निवाय्वादित्यदिशआकाशस्यपादाः ध्यानार्थंकल्पितास्तद्वद्ब्रह्मणउन्मानमित्यर्थः लौकिकंदृष्टांतमाह॥ अथवेतिपादकल्पनांविनातत्रव्यवहारःकिंनस्यादित्यतआह नहीति॥ कार्षापणस्यव्यवहारायपादकल्पनावत् मंदधियांध्यानव्यवहारायब्रह्मणउन्मान

अपिचसेतुव्यपदेशादात्मनोलौकिकसेतुनिदर्शनेनसेतुबाह्यवस्तुतांप्रसंजयतामृद्दारुमयतापिप्रासंक्ष्यत नचैतन्न्याय्यंअजत्वादिश्रुतिविरोधात्॥ सेतुसामान्यात्तु सेतुशब्दआत्मनिप्रयुक्तइतिश्लिष्यतेजगतस्तन्मर्यादानांचविधारकत्वंसेतुसामान्यमात्मनः॥ अतःसेतुरिवसेतुरितिप्रकृत आत्मास्तूयते॥ सेतुंतीर्त्वेत्यपितरतेरतिक्रमासंभवात् प्राप्नोत्यर्थएववर्तते॥ यथाव्याकरणंतीर्णइतिप्राप्तइत्युच्यतेनातिक्रांतस्तद्वत्॥ ३२॥ बुद्ध्यर्थःपादवत्॥ ३३॥ यदप्युक्तमुन्मानव्यपदेशादस्तिपरमिति॥ तत्राभिधीयतेउन्मानव्यपदेशोपिनब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः॥ किमर्थस्तर्हिबुद्ध्यर्थःउपासनार्थइतियावत्॥ चतुष्पादष्टाशफंषोडशकलमित्येवंरूपाबुद्धिःकथंनुनामब्रह्मणिस्थिरास्यादितिविकारद्वारेणब्रह्मणउन्मानकल्पनैवक्रियते॥ नह्यविकारेऽनंतेब्रह्मणि सर्वैःपुंभिःशक्याबुद्धिःस्थापयितुंमंदमध्योत्तमबुद्धित्वात्पुंसामिति॥ पादवत्॥ यथामनआकाशयोरध्यात्ममधिदैवतंचब्रह्मप्रतीकयोराम्नातयोश्चत्वारोवागादयोमनःसंबंधिनःपादाःकल्प्यंते॥ चत्वारश्चाग्न्यादयआकाशसंबंधिनआध्यानायतद्वत्॥ अथवापादवदिति यथाकार्षापणेपादविभागोव्यवहारप्राचुर्यायप्रकल्प्यते॥ नहिसकलेनैवकार्षापणेनसर्वदासर्वेजनाव्यवहर्तुमीशते॥ क्रयविक्रयपरिमाणानियमात् तद्वदित्यर्थः॥ ३३॥ स्थानविशेषात्प्रकाशादिवत्॥ ३४॥ इदंसूत्रंद्वयोरपिसंबंधभेदव्यपदेशयोःपरिहारोभिधीयते॥ यदप्युक्तंसंबंधव्यपदेशाद्भेदव्यपदेशाच्चपरमतःस्यादिति॥ तदप्यसत्॥

कल्पनेत्यर्थः॥ ३३॥ संबंधभेदौकल्पितौनसत्यद्वितीयसाधकौइत्याह॥ स्थानेति॥ स्थानमुपाधिर्बुद्ध्यादिः एकस्यैवोपाधिनाभिन्नस्योपाधिशांतौसत्यांसंबंधउपचर्यतेयथासौरालोकादेरंगुल्याद्युपाधिनाभिन्नस्योपाधिवियोगेमहालोकाद्यात्मनासंबंधोपचारस्तद्वत् तथादित्यचक्षुषोःस्थानयोर्भेदाद्धिरण्मयपुरुषभेदकल्पनेत्यर्थः॥

मुख्यावेवसंबंधभेदौकिंनस्यातामित्यत्रसूत्रं ॥ उपपत्तेश्चेति ॥ स्वरूपेणब्रह्मणाजीवस्यसंबंधोभेदनिवृत्तिरूपोयुज्यतेनमुख्यःसंयोगादिःवस्तुद्वयासत्त्वात्तथाभेदोपिनस्वतएकत्वश्रुतेरित्यर्थः ॥ ३६ ॥ ननुद्वितीयाभावेसर्वगतत्वश्रुतिविरोधइत्यतआह ॥ अनेनसर्वगतत्वमिति ॥ द्वितीयसत्त्वंचेत्सेत्वादिव

संबंधभेद ५

यतएकस्यापिस्थानविशेषापेक्षयाएतौव्यपदेशावुपपद्येते ॥ संबंधव्यपदेशेतावदयमर्थः बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्यविशेषविज्ञानस्योपाध्युपशमेयउपशमःसपरमात्मनःसंबंधइत्युपाध्यपेक्षयोपचर्यते ॥ नपरिमितत्वापेक्षयातथाभेदव्यपदेशोपिब्रह्मणउपाधिभेदापेक्षयैवोपचर्यतेनस्वरूपभेदापेक्षया ॥ प्रकाशादिवदित्युपमोपादानं ॥ यथैकस्यप्रकाशस्यसौर्यस्यचांद्रमसस्यवोपाधियोगादुपजातविशेषस्योपाध्युपशमात्संबंधव्यपदेशोभवत्युपाधिभेदाच्चभेदव्यपदेशोयथावासूचीपाशाकाशादिषूपाध्यपेक्षयैवैतौव्यपदेशौभवतस्तद्वत् ॥ ३४ ॥ उपपत्तेश्च ॥ ३५ ॥ उपपद्यतेचात्रेदृशएवसंबंधोनान्यादृशः स्वमपीतोभवतीतिहिस्वरूपसंबंधमेनमामनंति ॥ स्वरूपस्यचानपायित्वात् ननरनगरन्यायेनसंबंधोघटतेउपाधिकृतस्वरूपतिरोभावात्तुस्वमपीतोभवतीत्युपपद्यते ॥ तथाभेदोपिनान्यादृशःसंभवति ॥ बहुतरश्रुतिप्रसिद्धैकेश्वरत्वविरोधात् ॥ तथाचश्रुतिः एकस्याप्याकाशस्यस्थानकृतंभेदव्यपदेशमुपपादयति ॥ योयंबहिर्द्धापुरुषादाकाशोयोयमंतःपुरुषआकाशोयोयमंतर्हृदयआकाशइति ॥ ३५ ॥ तथान्यप्रतिषेधात् ॥ ३६ ॥ एवंसेत्वादिव्यपदेशान्परपक्षहेतूनुन्मथ्यसंप्रतिस्वपक्षंहेत्वंतरेणोपसंहरति ॥ तथान्यप्रतिषेधादपिनब्रह्मणःपरंवस्त्वंतरमस्तीतिगम्यते ॥ तथाहिसएवाधस्तादहमेवाधस्तादात्मैवाधस्तात्सर्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदब्रह्मैवेदंसर्वमात्मैवेदंसर्वंनेहनानास्तिकिंचनयस्मात्परंनापरमस्तिकिंचित्तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्येवमादिवाक्यानिस्वप्रकरणस्थान्यन्यार्थत्वेनपरिणेतुमशक्या। निब्रह्मव्यतिरिक्तंवस्त्वंतरंवारयंति ॥ सर्वांतरश्रुतेश्चनपरमात्मनोन्योंतरात्मास्तीत्यवधार्यते ॥ अनेनसर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

न्ब्रह्मणोन्यतास्यात् ॥ यत्रान्यत्पश्यतीतितदल्पमितिश्रुतेः ॥ किंचनिरवयवासंगब्रह्मणःसत्यप्रपंचसंबंधायोगात् नचैवसर्वगतत्वश्रुतिविरोधइतिभावः ॥

अधिष्ठानेनाध्यस्तंजगद्व्याप्तंअध्यस्तत्वात्रज्ज्वाव्याप्तसर्पवदितिन्यायः ॥३७॥ एवंतत्पदलक्ष्यंसंशोध्यवाच्यार्थमाह फलमतउपपत्तेःनिर्विशेषत्वादस्यःस्वभावःफलहेतुत्वाख्यः ॥ इष्टंसुखंदेवादीनांअनिष्टंदुःखंनारकिनांव्यामिश्रंमनुष्याणांसंसारोजन्ममृतिप्रवाहःगोचरःआश्रयोयस्यतत्संसारगोचरं ॥ अत्रकर्मेश्वरयोःफलहेतुत्वश्रुतेःसंशयमाह ॥ किमिति ॥ अत्रपूर्वपक्षेफलदातुरीश्वरस्यतत्पदवाच्यस्यासिद्धेर्लक्ष्यासिद्धिःसिद्धांतेनतत्सिद्धिरितिफलभेदःपूर्वो

अनेनसेत्वादिव्यपदेशनिराकरणेनअन्यप्रतिषेधसमाश्रयणेनचसर्वगतत्वमप्यात्मनःसिद्धंभवति ॥ अन्यथाहितन्नसिद्ध्येत्सेत्वादिव्यपदेशेषुमुख्येष्वंगीक्रियमाणेषुपरिच्छेदआत्मनःप्रसज्येत ॥ सेत्वादीनामेवमात्मकत्वात् ॥ तथान्यप्रतिषेधेप्यसतिवस्तुवस्त्वंतराद्व्यावर्ततइतिपरिच्छेदएवात्मनःप्रसज्येत ॥ सर्वगतत्वंचास्यायामशब्दादिभ्योविज्ञायते ॥ आयामशब्दोव्याप्तिवचनःशब्दः यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशः ॥ आकाशवत्सर्वगतश्चनित्योज्यायान्दिवोज्यायानाकाशान्नित्यःसर्वगतःस्थाणुरचलोयमित्येवमादयोहिश्रुतिस्मृतिन्यायाःसर्वगतत्वमात्मनोऽवबोधयंति ॥३७॥ फलमतउपपत्तेः ॥३८॥ तस्यैवब्रह्मणोव्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यःस्वभावोवर्ण्यतेयदेतदिष्टानिष्टव्यामिश्रलक्षणंकर्मफलंसंसारगोचरंत्रिविधंप्रसिद्धंजंतूनां ॥ किमेतत्कर्मणोभवतिआहोस्विदीश्वरादितिभवतिविचारणा ॥ तत्रतावत्प्रतिपाद्यते ॥ फलमतईश्वराद्भवितुमर्हति ॥ कुतःउपपत्तेःसहिसर्वाध्यक्षःसृष्टिस्थितिसंहारान्विचित्रान्विदधदेशकालविशेषाभिज्ञत्वात्कर्मिणांकर्मानुरूपंफलंसंपादयतीत्युपपद्यते ॥ कर्मणस्त्वनुक्षणविनाशिनःकालांतरभाविफलंभवतीत्यनुपपन्नं ॥ अभावाद्भावानुत्पत्तेः ॥ स्यादेतत्कर्मविनश्यत्स्वकालमेवस्वानुरूपंफलंजनयित्वाविनश्यति ॥६॥

क्तनिर्विशेषत्वमुपजीव्यफलदातृत्वमपीश्वरस्यनास्तीतिपूर्वपक्षोत्थानात्संगतिःयद्यपिसर्वगतत्ववत्फलदातृत्वंव्यवहारदशायांसिध्यतितथापिकर्मणएवफलदातृत्वमितिशंकानिरासेनोक्तलक्ष्यार्थनिर्वाहकवाच्यार्थनिर्णयार्थमस्याधिकरणस्यारंभइतिमत्वासिद्धांतंतावदाह ॥ तत्रतावदिति ॥ स्वर्गादिकंविशिष्टदेशकालकर्माभिज्ञदातृकंफलत्वात्सेवाफलवदित्युपपत्तिःयागादिक्रियाख्यंकर्मतावत्क्षणिकंतत्किंस्वनाशात्फलंजनयतिउतफलमुत्पाद्यनश्यति ॥ आहोस्विदपूर्वात्फलसिद्धिर्नोचेदित्याह ॥ अभावादिति ॥

द्वितीयंशंकतेस्यादिति ॥

कर्मनाशक्षणमारभ्याऽनभिव्यक्तस्वर्गसुखादिसत्वे मानं नास्तीति दूषयति ॥ तदपीत्यादिना ॥ तृतीयं शंकते अथेति अपूर्वं किं स्वतंत्रमेव फलदानाय प्रवर्तते चेतनाधिष्ठितं वा नाद्य इत्याह ॥ तदपीति ॥ द्वितीये त्वदृष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगात् ईश्वरस्याधिष्ठातृत्वसिद्धिरिति भावः मौढवादेनापूर्वं नास्तीत्याह तदस्तित्वइति ॥ क्षणिकयागादेः श्रुतस्वर्गादिहेतुत्वानुपपत्त्यास्याप्यपूर्वसिद्धिरिति चेन्न कर्मभिराराधितादीश्वरादेव स्थायिनः फलसिद्धेरित्यर्थः ॥ न केवलं तर्केणापूर्वं सिध्यतीति भावः ॥ कृतात्ययेऽनुशयवानित्यत्रोदाहृताभिर्य इह रमणीयचरणा इत्यादिश्रुतिस्मृतिभिरपूर्वसिद्धि

तत्फलं कालांतरितं कर्त्रा भोक्ष्यत इति ॥ तदपि न परिशुध्यति ॥ प्राक् भोक्तृसंबंधात् फलत्वानुपपत्तेः ॥ यत्कालं हि यत्सुखं दुःखं वात्मना भुज्यते ॥ तस्यैव लोके फलत्वं प्रसिद्धं ॥ न ह्यसंबद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियंति लौकिकाः ॥ अथोच्येत ॥ माभूत्कर्मानंतरं फलोत्पादः ॥ कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति ॥ तदपि नोपपद्यते ॥ अपूर्वस्याचेतनस्य काष्ठलोष्टसमस्याचेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः ॥ तदस्तित्वे च प्रमाणाभावात् ॥ अर्थापत्तिः प्रमाणमिति चेत् ॥ न ईश्वरसिद्धेरर्थापत्तिक्षयात् ॥ ३८ ॥ श्रुतत्वाच्च ॥ ३९ ॥ न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः ॥ किं तर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे ॥ तथा च श्रुतिर्भवति ॥ स वा एष महानज आत्मान्नादो वसुदानः इत्येवंजातीयका ॥ ३९ ॥ धर्मं जैमिनिरत एव ॥ ४० ॥ जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते ॥ अत एव हेतोः श्रुतेरुपपत्तेश्च श्रूयते तावदयमर्थः स्वर्गकामो यजेतेत्येवमादिषु वाक्येषु तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते ॥ अन्यथा ह्यननुष्ठातृको यागआपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात् ॥ नन्वक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः

श्चेनाभि———रीश्वरस्यापि फलदातृत्वं स्वीकार्यमित्याह ॥ श्रुतत्वाच्चेति ॥ सूत्रकारः अन्नमासमंतात्प्राणिभ्यो ददातीत्यन्नादः ॥ वसुदानो धनदाता ॥ कर्मणोऽपूर्वस्य वा जडत्वेनोपकरणमात्रत्वात् स्वतंत्रईश्वर एव फलदातेति सिद्धांतो दर्शितः ॥ ३९ ॥ इदानीं पूर्वपक्षयति धर्ममिति विधिश्रुतेर्विध्यर्थः ॥ तस्य लिङर्थस्य प्रेरणात्मनो यागो विषयस्तज्ज्ञावावगमाद्यागः स्वर्गसाधनमिति गम्यते यागस्येष्टसाधनत्वाभावे प्रेरणानुपपत्तेरित्यर्थः ॥

अपूर्वद्वाराकर्मणः फलमुपपद्यत इत्युक्त्वा सिद्धांतं दूषयति ईश्वरस्त्विति ॥ ईश्वरः किं कर्मानपेक्षः फलं ददाति उत तत्सापेक्षो वा आद्य आह ॥ अविचित्रत्वेनेत्यादिना ॥ द्वितीये संवेष्टनसंस्कारमात्रात्करादौ वेष्टनवत्कर्मापूर्वादेव फलसिद्धेः किमीश्वरेणेति भावः ॥ ४० ॥ अत्र वयं वदामः ॥ चंदनकंटकादिदृष्टसंपत्त्यैव सुखादिसंभवे कृतं धर्माधर्माभ्यामिति श्रुतिस्मृतिबलात्तदपेक्षायामीश्वरेण किमपराद्धं अतः ईश्वरात्तदपेक्षात्केवलात्कर्मणः फलमित्ययुक्तमिति सिद्धांत

नैष दोषः श्रुतिप्रामाण्यात् ॥ श्रुतिश्चेत्प्रमाणं यथायं कर्मफलसंबंधः श्रुत उपपद्यते तथा कल्पयितव्यः ॥ न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत्कालांतरितं फलं दातुं शक्नोति ॥ अतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा पूर्वावस्था पूर्वं नामास्तीति तर्क्यते ॥ उपपद्यते चायमर्थः उक्तेन प्रकारेण ॥ ईश्वरस्तु फलं ददातीत्यनुपपन्नं ॥ अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसंगादनुष्ठानवैयर्थ्यापत्तेश्च तस्माद्धर्मादेव फलमिति ॥ ४० ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥ बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात्कर्मणोऽपूर्वाद्वा केवलात्फलमित्ययं पक्षस्तुशब्देन व्यावर्त्यते ॥ कर्मापेक्षादपूर्वापेक्षाद्वा यथा तथास्तु ईश्वरात्फलमिति सिद्धांतः ॥ कुतः हेतुव्यपदेशात् ॥ धर्माधर्मयोरपि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन ॥ एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति ॥ स्मर्यते चायमर्थो भगवद्गीतासु यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहितान्हि तानिति ॥ सर्ववेदांतेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यंते ॥ तदेव चेश्वरस्य फलहेतुत्वं यत्स्वकर्मानुरूपाः प्रजाः सृजतीति ॥ विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यंते ॥ ८ ॥ इति श्रीमत्शारीरकमीमांसाभाष्ये भगवत्पादकृतौ तृतीयस्याध्यायस्य द्वितीयः पादः ४१ ॥ समाप्तः ॥

पति ॥ पूर्वं त्विति ॥ अचेतनस्य कर्मणः स्वतः प्रवृत्त्ययोगात्सेवादिदृष्टांतानुसारिश्रुतेर्बलीयस्त्वात्सर्ववेदांतेष्वीश्वरस्य जगद्धेतुत्वश्रुतेश्चेश्वराधिष्ठितात्कर्मणो जगदंतःपातिफलसिद्धिरिति समुदायार्थः ॥ ४१ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभायां तृतीयस्याध्यायस्य द्वितीयपादः समाप्तः ॥ २ ॥ भाष्य ६०० ॥ टीका ४७५ सर्वं ॥ १०७५ ॥

ॐ तत्सत् ॥ ॐ ॥ ॐ ॥ तत्सत् ॥ ॐ ॥ ॐ ॥ तत्सत्

ॐ तत्सत् ॥ [illegible]

ॐ ॥ तत्सत् ॥ ॐ ॥ तत्सत्

॥अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यतृतीयपादःप्रारम्भः॥

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ

ॐ ॥ तत्सत् ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

श्रीगणेशाय नमः ॥ ओं ॥ मार्तंडं ध्वांतनाशाय तिलकस्वामिनं मुदे ॥ विघ्नेशं विघ्नविध्वस्त्यै प्रणमामि मुहुर्मुहुः ॥ १ ॥ ब्रह्मस्वरूपं निर्धार्य तत्तज्ज्ञानसाधनोपासनास्वरूपमाह ॥ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ पादसंगतिमाह व्याख्यातमिति ॥ पूर्वपादे तत्त्वंपदार्थविवेकः कृतः इह तत्फलं वाक्यार्थज्ञानमानंदादयः प्रधानस्येति सूत्रेण पुनरुक्तापेक्षितं तत्तत्पदतद्वाच्यार्थोपसंहारेण निर्धार्यत इति फलफलिभावः संगतिः ॥ सगुणवाक्यार्थविद्याचिंतातु तद्विद्यानां चित्तैकाग्र्यद्वारा निर्गुणज्ञानसाधनत्वात् क्रियत इति मंतव्यं ॥ संप्रति निर्गुणज्ञानं भेदाभेदविचारविषयत्वेनोक्तमिति मन्वान आक्षिपति नन्विति ॥ वेद्यभेदे विद्या

ओं ॥ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वं ॥ इदानीं तु प्रतिवेदांतं विज्ञानानि भिद्यंते न वेति विचार्यते ॥ ननु विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितमेकरसं सैंधवघनवदवधारितं तत्र कुतो विज्ञानभेदाभेदचिंतावतारः ॥ नहि कर्मबहुत्ववत् ब्रह्मबहुत्वमपि वेदांतेषु प्रतिपिपादयिषितमिति शक्यं वक्तुं ॥ ब्रह्मण एकत्वात् ॥ एकरूपत्वाच्च न चैकरूपे ब्रह्मण्यनेकरूपाणि विज्ञानानि संभवंति ॥ न ह्यन्यथार्थोन्यथाज्ञानमित्यभ्रांतं भवति ॥ यदि पुनरेकस्मिन् ब्रह्मणि बहूनि विज्ञानानि वेदांतेषु प्रतिपिपादयिषितानि तेषामेकमभ्रांतं भ्रांतानीतराणीत्यनाश्वासप्रसंगो वेदांतेषु ॥ तस्मान्न तावत्प्रतिवेदांतं ब्रह्मविज्ञानभेद आशंकितुं शक्यते ॥ नाप्यस्य चोदनाद्यविशेषादभेद उच्यते ॥ ब्रह्मविज्ञानस्याचोदनालक्षणत्वात् ॥ अविधिप्रधानैर्हि वस्तुपर्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यस्तत्तु समन्वयादित्यत्र तत्कथमिमां भेदाभेदचिंतामारभत इति ॥ तदुच्यते ॥ सगुणब्रह्मविषया प्राणादिविषया चेयं विज्ञानभेदाभेदचिंतेत्यदोषः ॥ अत्र हि कर्मवदुपासनानां भेदाभेदौ संभवतः ॥

भेदचिंता स्यात् ब्रह्मणस्तु वेद्यस्यैक्यान्न चिंतावसर इत्यर्थः ॥ ब्रह्मैक्येपि धर्मभेदाच्चिंतेत्यत आह एकरूपत्वाच्चेति ॥ निर्धर्मत्वादित्यर्थः ॥ एकरूपेपि ब्रह्मण्यनेकप्रकारसंभवाद्भेदशंकेत्यत आह ॥ न चेत्यादिना ॥ पूर्वपक्षे ज्ञानभेदशंकानुपपत्तिमुक्त्वा चोदनाद्यभेदाज्ज्ञानाभेद इति सिद्धांतोप्ययुक्त इत्याह ॥ नाप्यस्येति ॥ एवं पादारंभमाक्षिप्य समाधत्ते ॥ तदुच्यत इति सगुणविद्यास्वेव भेदाभेदचिंता क्रियते निर्गुणविद्यायां त्वैक्यं सिद्धमिति वाच्यार्थरूपगुणोपसंहारमात्रं क्रियते वाक्यार्थनिर्णयायेति भावः ॥ पंचाग्निप्राणदहरशांडिल्यवैश्वानरादिविद्या मिथो भिन्ना इति नानाशब्दादिभेदादित्यत्र वक्ष्यते ॥

अत्रनुमित्योभिन्नास्ताःकिंप्रतिशाखंभिद्यंतेनवेतिनामादिभेदाच्चोदनाद्यविशेषाच्चसंशयः॥पूर्वपक्षेविद्याभेदाद्गुणानुपसंहारःसिद्धांतेत्वभेदादुपसंहारइतिफलभेदः॥पूर्वतंत्रेशाखांतराधिकरणपूर्वपक्षसूत्रं॥नामरूपधर्मविशेषपुनरुक्तिनिंदाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखांतरेकर्मभेदःस्यादिति॥तत्रोक्ताहेतवोनामादयोविद्याभेदार्थमिहोच्यंते॥अथैषज्योतिरथैषसर्वज्योतिरेतेनसहस्रदक्षिणेनयजेतेत्यत्रप्रकृतज्योतिष्टोमानुवादेनसहस्रदक्षिणाख्यगुणविधिमाशंक्यज्योतिरितिपदस्यकर्मांतरनामत्वसंभवेज्योतिष्टोमलक्षकत्वायोगादथेतिप्रकरणविच्छेदाच्चज्योतिष्टोमात्कर्मांतरंविशिष्टदक्षिणाकंविधीयतइतिनाम्नःकर्मभेदकत्वमुक्तं॥ज्योतिरादिष्वित्यादिपदेनाध्वर्यवंहौत्रमितिसंज्ञाभेदात्कर्मभेदोग्राह्यः॥तप्तंक्षीरंदध्याकठिनमामिक्षातत्रद्रवंजलरूपंवाजिनमितिभेदःतप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिनमित्यत्रवैश्वदेव्यामिक्षायागेवाजिनाख्यगुणविधिःवाजिभ्य

कर्मवदेवचोपासनानिदृष्टफलान्यदृष्टफलानिचोच्यंते क्रममुक्तिफलानिचकानिचित्सम्यग्ज्ञानोत्पत्तिद्वारेणतेष्वेषाचिंतासंभवति॥ किंप्रतिवेदांतंविज्ञानभेदआहोस्विन्नेति॥तत्रपूर्वपक्षेहेतवस्तावदुपन्यस्यंते॥नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वंप्रसिद्धंज्योतिरादिषु॥अस्तिचवेदांतांतरविहितेषुविज्ञानेषुअन्यँन्नाम न्य तैत्तिरीयकंवाजसनेयकंकौथुमकंशाट्यायनकमित्येवमादि॥

इतिविश्वेदेवानुवादादित्याशंक्यामिक्षांप्रत्युपसर्जनत्वेनोक्तविश्वेदेवानांवाजिभ्यइत्यनुवादायोगादुत्पत्तिशिष्टामिक्षावरुद्धेकर्मणिवाजिनद्रव्यस्यानाकांक्षितस्यविध्ययोगाद्वाजिदेवताकोवाजिनयागःकर्मांतरमितिद्रव्यदेवतारूपरूपभेदात्कर्मभेदःसिद्धांतितः॥आदिपदादैंद्रंदध्यैंद्रंपयइतिद्रव्यभेदाद्यागभेदोग्राह्यः॥एवमिहापिपंचाग्निषडग्निरूपभेदाद्विद्याभेदोवाजिछंदोगयोः॥तथारेतोन्यूनावागास्यःछांदोग्येतत्सहितावाजिनामितिप्राणविद्याभेदः॥कारीरिवाक्याध्ययनेतैत्तिरीयकाणांभूमौभोजनंधर्मविशेषोनान्येषामग्न्यध्ययनेकेषांचिदुपाध्यायार्थमुदकुंभाहरणंधर्मोनान्येषामश्वमेधाध्ययनेऽश्वघासानयनंकेषांचिदेवनान्येषांनचनान्येवकारीर्यादीनिकर्माणिधर्मविशेषमपेक्षंतेनापेक्षंतेचेतियुक्तं॥अतोधर्मविशेषाच्छाखांतरेकर्मभेदःशंकितस्तथात्रापिमुंडकाध्ययनेकेषांचिदेवशिरसंगारपात्रधारणरूपंव्रतंनान्येषामितिविद्याभेदःस्यात्॥पुनरुक्तिरभ्यासःयथासमिधोयजतितनूनपातंयजतीति॥यजत्यभ्यासात्प्रयाजानांभेदउक्तस्तथाशाखांतरेभ्यासाद्विद्याभेदः॥

आक्षिपत्सान्निंदादिग्रहः प्रातः प्रातरनृतं ते वदंति पुरोदयाज्जुह्वति येऽग्निहोत्रमित्यनुदितहोमस्य यद्युदिते सूर्ये प्रातर्जुहुयात् यथातिथये प्रद्रुताय शून्याया
वसथायाहार्यं हरंति तादृगेव तदित्युदितहोमस्य च निंदाश्रुतेर्भेदः॥ एकस्यैवोदितेनुदिते चानुष्ठानायोगात्॥ तयोदितानुदितहोमातिक्रमकृतप्रायश्चित्तादप्य
ग्निहोत्रभेदः शंकितः॥ एतेन निंदाप्रायश्चित्ते वेदांतविद्यासु न विद्येते इति नोदाह्रियेते॥ यथा सर्वशाखाविहितस्य कर्मणो ज्ञातुं कर्तुं चाऽशक्तेर्भेदस्तथा सर्ववेदां
ताध्ययनज्ञानाद्यशक्तेस्तत्र वेदांतविद्याभेदः स्यात्॥ तथा शाखानां सर्वासामेकरूपा समाप्तिर्नोच्यते किंतु कस्यांश्चित्क्वचित्कर्मणि समाप्तिरतः समाप्तिवचनभे
दात्प्रतिशाखं कर्मभेदः शंकितस्तथा कस्यचिद्वेदांतस्योंकारसार्वात्म्ये समाप्तिः कस्यचिदन्यत्रेति विद्याभेदः॥ अन्यार्थदर्शनमर्थवादस्तद्भेदात्कर्मभेद

तथा रूपभेदोपि कर्मभेदस्य प्रतिपादकः प्रसिद्धः वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु अस्ति चात्र रूपभेदः॥ तद्य
थाके चिच्छाखिनः पंचाग्निविद्यायां षष्ठमपरमग्निमामनंति॥ अपरे पुनः पंचैव पठंति॥ तथा प्राणसंवादादिषु केचिदूनान्वागादीनामनं
ति केचिदधिकान्॥ तथा धर्मविशेषोपि कर्मभेदस्य प्रतिपादकः आशंकितः कारीर्यादिषु॥ अस्ति चात्र धर्मविशेषः॥ यथाथर्वणि-
कानां शिरोव्रतमिति॥ एवं पुनरुक्त्यादयोपि भेदहेतवो यथासंभवं वेदांतांतरेषु योजयितव्याः॥ तस्मात्प्रतिवेदांतं विज्ञानभेद इति॥
एवं प्राप्ते ब्रूमः॥ सर्ववेदांतप्रत्ययानि विज्ञानानि तस्मिन् तस्मिन् वेदांते तानि तान्येव भवितुमर्हंति॥ कुतश्चोदनाद्यविशे
षात्॥ आदिग्रहणेन शाखांतराधिकरणसिद्धांतसूत्रोदिता अभेदहेतव इहाकृष्यंते॥ संयोगरूपचोदनाख्याऽविशेषादित्यर्थः॥

वद्विद्याभेद इति पूर्वपक्षसूत्रोक्ता हेतवो दर्शितास्ते केचित्सिद्धांते पूर्वपक्षे चात्रोपयुज्यंत इति॥ तथा शब्दांतराभ्याससंख्यागुणप्रक्रियानामधेयानि क-
र्मभेदकानि॥ तत्र नामधेयं गुणो रूपमभ्यासश्चेति त्रयं व्याख्यातं॥ यजेद्दद्याज्जुहुयादिति प्रकृतिशब्दभेदेन धात्वर्थभेदात्तदवच्छिन्नभावनाख्यक-
र्मभेद उक्तस्तथात्र वेदोपास्तीत्यादिशब्दभेदाद्विद्याभेदः॥ तिस्र आहुतीर्जुहोतीति संख्यया कर्मभेदवद्वायुप्राणौ द्वौ संवर्गौ विनिर्दिष्टसंख्यया संव
र्गविद्याभेदः स्यात्॥ नित्याग्निहोत्रप्रकरणात् प्रकरणांतरे कुंडपायिनामयने मासमग्निहोत्रं जुह्वतीति श्रुतमग्निहोत्रं प्रकरणांतरस्थत्वात्कर्मांतरमि
ति सिद्धांतितं तथात्र वेदांतभेदे प्रकरणभेदादुपास्तिभेद इति पूर्वपक्षः॥ सिद्धांतयति॥ एवमिति॥ सर्वैर्वेदांतैः प्रतीयंत इति सर्ववेदांतप्रत्ययानि तैर्विहि

उक्तनामादिभिरग्निहोत्रादिकर्मणांप्रतिशाखंभेदप्राप्तेशाखांतराधिकरणसिद्धांतसूत्रं॥एकंवासंयोगरूपचोदनाख्याविशेषादिति॥तत्रचोदनाविधायकःशब्दश्चोदितःप्रयत्नोवातस्याऽविशेषमाह॥यथैकस्मिन्निति॥एकधानर्थहोमावच्छिन्नप्रयत्नैक्यवदुपास्तियत्नैक्यमित्यर्थः यथाज्येष्ठत्वादिगुणकप्राणविद्यासर्वशाखास्वेकातथापंचाग्निविद्याप्येकाफलसंयोगाद्यविशेषात्तथान्यापिविद्याऽभिन्नेत्याह॥एवंपंचाग्नीति॥पूर्वपक्षहेतून्निराचष्टे॥येत्विति।काठकमित्यादिनाम्नाकर्मभेदोनयुक्तःकुतः॥अचोदनाभिधानत्वात्॥काठकादिशब्दानांग्रंथनामतयाकर्मवाचित्वाभावादतोभिन्ननामकशाखाग्रंथभेदेपिनहिहितंकर्मैकमेवअल्परूपभेदोपिनकर्मैक्यविरोधीधर्मविशेषस्त्वध्ययनांगंनकर्मांगमतोनकर्मभेदकंशाखाभेदेपुनरुक्तिरसिद्धानिं

यथैकस्मिन्नग्निहोत्रेशाखाभेदेपिपुरुषप्रयत्नस्तादृशएवचोद्यतेजुहुयादिति एवंयोहवैज्येष्ठंचश्रेष्ठंचवेदेतिवाजसनेयिनांछंदोगानांचतादृश्येवचोदना॥ प्रयोजनसंयोगोप्यविशिष्टएवज्येष्ठश्चश्रेष्ठश्चस्वानांभवतीति॥रूपमप्युभयत्रतदेवविज्ञानस्ययदुतज्येष्ठश्रेष्ठादिगुणविशेषणान्वितंप्राणतत्वं॥ यथाचद्रव्यदेवतेयागस्यरूपं॥एवंविज्ञेयंरूपंविज्ञानस्यतेनहितद्रूप्यते॥समाख्यापिसैवप्राणविद्येति॥ तस्मात्सर्ववेदांतप्रत्ययत्वंविज्ञानानां॥एवंपंचाग्निविद्यावैश्वानरविद्याशांडिल्यविद्येत्येवमादिष्वपियोजयितव्यं॥येतुनामरूपादयोभेदहेत्वाभासास्तेप्रथमएवकांडे ननाम्नास्यादचोदनाभिधानत्वादित्यारभ्यपरिहृताः॥१॥इहापिकंचिद्विशेषमाशंक्यपरिहरति॥भेदान्नेतिचेन्नैकस्यामपि॥२॥स्यादेतत्सर्ववेदांतप्रत्ययत्वंविज्ञा नां॥ नानांगुणभेदान्नोपपद्यते॥तथाहि॥वाजसनेयिनःपंचाग्निविद्यांप्रस्तुत्यषष्ठमपरमग्निमामनंतितस्याग्निरेवाग्निर्भवतीत्यादि

दान्यार्थदर्शनयोरपिनभेदकत्वंतत्तद्विधिस्तुतिमात्रत्वात्बहुशाखाध्ययनाशक्तावपिस्वशाखानुक्तविशेषस्यापेक्षितस्यान्यतोग्रहसंभवादशक्तिरभेदिकाएकस्मिन्नपिकर्मण्यंगलोपादिनाप्रायश्चित्तसंभवतिएवंसमाप्तिवच्चनभेदोअप्यप्रयोजकइत्येवंकर्मभेदप्रमाणप्राबल्येभेदहेतवःपरिहृताइत्यर्थः॥१॥तर्हिशाखांतरन्यायेनैवकर्मैक्यवद्विद्यैक्यसिद्धेःपुनरुक्तिरित्यतआह॥इहापीति॥रूपस्यान्यविशिष्टत्वंविशेषः॥पंचाग्नीन्वेदेत्याद्युपासनोत्पत्तिविधिस्थपंचाग्न्यादिरूपभेदादुपासनाभेदःस्यादामिक्षावाजिनरूपभेदात्कर्मभेदवदित्यधिकाशंकानिरासार्थत्वान्नपौनरुक्त्यमस्याधिकरणस्येतिमत्वाशंकांव्याचष्टे॥स्यादित्यादिना॥

ब्र·भा·
रत्नप्र·टी·
३२५

अ·पा·
३ ३

अस्यपृथक्शास्त्रत्वात्कर्मन्यायानांमानसविद्यासुविनास्त्रंदुर्योजत्वाच्चपुनरुक्तिगंधोपिनास्तीतिमंतव्यं॥ ननुतस्यमृतस्यदाहार्थमग्निरंत्येष्टि
गतः षष्ठोयःप्रसिद्धवद्वाजिभिरुक्तःसः छांदोग्यैरुपसंहार्यइतिनरूपभेदस्तत्राह नचात्रेति अस्तुप्रजननगुणवत्तोरेतसोवाजिनामावापः छं
दोगानांचतस्योद्वापस्ततःकिमित्यतआह॥ आवापेति छांदोग्येषष्ठाग्न्यभावमंगीकृत्याल्परूपभेदोनविद्यैक्यविरोधीतिपरिहरति॥ नैषइत्यादिना॥
अंगीकारंत्यजति॥ पठ्यतेपीति॥ इतोस्माल्लोकादिष्टंलोकांतरंप्रेतंगतंज्ञातयोग्नयेहरंतीत्यर्थः ननुछांदोग्येग्निमात्रंश्रुतंवाजिभिस्तुसमिदादिविशेषःप

छंदोगास्तुतंनामनंतिपंचसंख्ययैवचतउपसंहरंति॥ अथहयएतानेवंपंचाग्नीन्वेदेति॥ येषांचसगुणोस्तियेषांचनास्ति
कथमुभयेषामेकाविद्योपपद्येत॥ नचात्रगुणोपसंहारःशक्यतेप्रत्येतुंपंचसंख्याविरोधात्॥ तथाप्राणसंवादेश्रेष्ठादन्यांश्च
तुरःप्राणान्वाक्चक्षुःश्रोत्रमनांसिछंदोगाआमनंति॥ वाजसनेयिनस्तुपंचममप्यामनंतिरेतोवैप्रजापतिःप्रजायतेहप्रजया
पशुभिर्यएवंवेदेति॥ आवापोद्वापभेदाच्चवेद्यभेदोभवति॥ वेद्यभेदाच्चविद्याभेदोद्रव्यदेवताभेदादिवत् यागस्येतिचेत्॥ नैषदोषः॥
यतएकस्यामपिविद्यायामेवंजातीयकोगुणभेदउपपद्यते॥ यद्यपिषष्ठस्याग्नेरुपसंहारोनसंभवति॥ तथापिद्युप्रभृतीनां
पंचानामग्नीनामुभयत्रप्रत्यभिज्ञायमानत्वान्नविद्याभेदोभवितुमर्हति नहिषोडशिग्रहणाग्रहणयोरतिरात्रोभिद्यते॥ प
ठ्यतेपिचषष्ठोग्निश्छंदोगैः॥ तंप्रेतंदिष्टमितोग्नयएव हरंतीति॥ वाजसनेयिनस्तुसांपादिकेषुपंचस्वग्निष्वनुवृत्तायाःस
मिद्धूमादिकल्पनायानिवृत्तयेतस्याग्निरेवाग्निर्भवतिसमित्समिदित्यादिसमामनंतिसनित्यानुवादः॥ अथाप्युपासनार्थएव
वादस्तथापिसगुणःशक्यतेछंदोगैरप्युपसंहर्तुंनचात्रपंचसंख्याविरोधआशंक्यःसांपादिकाग्न्यभिप्रायाह्येषापंचसंख्यानित्या
नुवादभूतानविधिसमवायिनीत्यदोषः॥ः

राम·
३२५

रूपतइतिरूपभेदस्तदवस्थस्तत्राह॥ वाजसनेयिनस्त्विति॥ षष्ठाग्नेस्तद्विशेषस्य
चानुवादमात्रत्वेनानुपास्यत्वात्पंचाग्नयएवोपास्याउभयत्रेतिनरूपभेदइत्यर्थः॥ सविशेषस्यषष्ठाग्नेरुपास्यत्वेपिनरूपभेदइत्याह॥
अथापीति॥ द्युलोकादीनांपंचानामनग्नीनांअग्नित्वसंपत्तिविधिनैवार्थात्पंचत्वंसंपत्तिकल्पिताग्नीनांसिद्धमनूद्यतेनध्येयत्वेनविधीयतइ

हरिः

छंदोगैर्वाजिशाखास्थंरेणउपसंहर्तव्यमित्युक्ताऽनुपसंहारेपिनविद्याभेदइत्याहनचावापेति॥४॥एवंरूपभेदोनविद्याभेदकइत्युक्ताधर्मविशेषोपिनभेदकं
इत्याह॥स्वाध्यायस्येतिगोदानवदध्ययनांगत्वेनशिरोव्रतमाथर्वणिकानां सूत्रेविहितंनविद्यांगमित्यर्थः॥अधिकाराच्चेतिव्याचष्टेनैतदिति एतत्प्रकृतं
मुंडकमननुष्ठितशिरोव्रतोनरोनाधीतइतिश्रुतेर्मुंडकाध्ययनांगमेवशिरोव्रतमित्यर्थः॥ननुविद्यांगत्वेनापीदंव्रतंश्रुतमितिशंकते॥नन्विति॥सर्वशाखासुब्रह्मविद्यैकैवचेद्विद्यासंयुक्तंव्र
तमपिसर्वत्रसंबध्येतनचसंबध्यतइतिविद्याभेदइत्यर्थः॥प्रकृतग्रंथवाच्येतच्छब्दबलाद्ब्रह्मप्रकाशकग्रंथपरोब्रह्मविद्याशब्दइतिपरिहर
तिनेति॥तस्यशिरोव्रतस्यमुंडकाध्ययनेनियमइत्यत्रसववदितिनिदर्शननिर्देशः॥सवाःहोमाः॥आथर्वणैःस्वसूत्रेउ दितएकोग्निरेकर्षिसंज्ञयाप्रसि
द्धस्तस्मिन्नग्नौकार्याइतितथानियम्यंतेतथेत्यर्थः॥३॥किंचवेदैक्येननिर्गुणब्रह्मविद्यैक्यंतावच्छ्रुतिर्दर्शयति॥तत्सन्निधिपाठात्सगुणविद्यानामपिसर्वशाखा
स्यैक्यसिद्धिरित्याहसूत्रकारः॥दर्शयतिचेति॥

एवंप्राणसंवादेष्वप्यधिकस्यगुणस्येतरत्रोपसंहारोनविरुध्यते॥नचावापोद्वापभेदाद्वेद्यभेदोविद्याभेदश्चाशंकाःकस्यचिद्वे
द्यांशस्यावापोद्वापयोरपिभूयसोवेद्यराशेरभेदावगमात्॥तस्मादेकविद्यमेव॥२॥स्वाध्यायस्यतथात्वेनहिसमाचारेधिकाराच्चसववच
्चतन्नियमः॥३॥यदप्युक्तमाथर्वणिकानांविद्यांप्रतिशिरोव्रताद्यपेक्षणादन्येषांचतदनपेक्षणाद्विद्याभेदइति॥तत्रप्रत्युच्यते॥स्वा
ध्यायस्यैषधर्मोनविद्यायाः॥कथमिदमवगम्यते॥यतस्तथात्वेनस्वाध्यायधर्मत्वेनसमाचारेवेदव्रतोपदेशपरेग्रंथेआथर्वणिकाइ
दमपिवेदव्रतत्वेनव्याख्यातमितिसमामनंतिनैतदचीर्णव्रतोधीतइतिचाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्चस्वोपनिषद
ध्ययनधर्मएवैषइतिनिर्धार्यते॥ननुचतेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णमितिब्रह्मविद्यासंयोगश्रवणादेकै
वसर्वत्रब्रह्मविद्येतिसंकीर्येतैषधर्मः॥नतत्राप्येतामितिप्रकृतप्रत्यवमर्शात्प्रकृतत्वंचब्रह्मविद्यायाग्रंथविशेषापेक्षमितिग्रंथवि
शेषसंयोग्येवैषधर्मः॥सववच्चतन्नियमइतिनिदर्शननिर्देशः॥यथाचसवाः॥सप्तसौर्यादयः॥शतौदनपर्यंतावेदांतरोदितत्रेताग्न्यनभिसं
बंधादाथर्वणोदितैकाग्न्यभिसंबंधाच्चाथर्वणिकानामेवनियम्यंते॥तथैवायमपिधर्मःस्वाध्यायविशेषसंबंधात्तत्रैवनियम्यते॥तस्मादप्य
नवद्यंविद्यैकत्वं॥३॥दर्शयतिच॥४॥दर्शयतिचवेदोपिविद्यैकत्वंसर्ववेदांतेषुवेद्यैकत्वोपदेशात्॥

सगुणमप्येकंवेदत्रयेवेद्यंदर्शयतीत्याह॥ तथेति॥ किंचशाखांतरोक्तपदार्थस्यशाखांतरेसिद्धवत्परामर्शोविद्यैक्यंदर्शयतीत्याह॥ तथामहद्भयमित्यादिनाएष
नरएतस्मिन्नुदरेऽल्पमप्यंतरंभेदंयदापश्यत्यथतदातस्यसंसारभयंभवत्येवयस्माद्विदुषोनरस्यभेददर्शिनस्तदेवब्रह्मभयंकरंभवतिब्रह्मैवाहमित्यमन्वा॥
नस्येत्यर्थः॥ प्रादेशमात्रमुपास्तइतिसिद्धवदुपादानंवैश्वानरविद्यैक्यंदर्शयतीत्याह तथेति॥ किंचसर्वेषुवेदांतेषूक्थादीनांप्रतीयमानत्वेनहेतुनैतदवगम्यते॥
अन्यत्रोक्तानांतेषामन्यत्रोपास्त्यर्थमुपादानमिति॥ ततस्तदुपास्तीनामपिसर्ववेदांतप्रमाणकत्वेनैक्यंबाहुल्येनसिध्यतीत्याह॥ तथेति॥ ब्रह्मविद्यैक्यवदु

सर्ववेदायत्पदमामनंतीति॥ तथैतंह्येवबह्वृचामहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाइतिच॥ तथामहद्भयंव
ज्रमुद्यतमितिकाठकेउक्तस्येश्वरगुणस्यभयहेतुत्वस्यतैत्तिरीयकेभेददर्शननिंदायैपरामर्शोदृश्यते॥ यदाह्येवैषएतस्मिन्नुदरमंतरं
कुरुते॥ अथतस्यभयंभवतितत्त्वेवभयंविदुषोमन्वानस्येति॥ तथावाजसनेयकेप्रादेशमात्रसंपादितस्यवैश्वानरस्यछांदोग्येसिद्धवदुपा
दानंयस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तइति॥ तथासर्ववेदांतप्रत्ययत्वेनान्यत्रविहितानामुक्थादीनामन्य-
त्रोपासनविधानायोपादानात्प्रायदर्शनन्यायेनोपासनानामपिसर्ववेदांतप्रत्ययत्वसिद्धिः॥४॥१॥ उपसंहारोर्थाभेदाद्विधिशेषवत्स
मानेच॥५॥ इदंप्रयोजनसूत्रं॥ स्थितेचैवंसर्ववेदांतप्रत्ययत्वेसर्वविज्ञानानामन्यत्रोदितानांविज्ञानगुणानामन्यत्रापिसमानेविज्ञाने
उपसंहारोभवतिअर्थाभेदात्॥ यएवहितेषांगुणानामेकत्रार्थोविशिष्टविज्ञानोपकारःसएवान्यत्राप्युभयत्रापिहितदेवैकंविज्ञानंतस्मा
दुपसंहारोविधिशेषवत् यथाहिविधिशेषाणामग्निहोत्रादिधर्माणांतदेवैकमग्निहोत्रादिकर्मसर्वत्रेत्यर्थाभेदादुपसंहरणं॥ एवमिहापि″

क्थादिविद्यैक्यमित्यर्थः॥४॥१॥ सर्वशाखासुविद्यैक्यचिंतायाःफलमाह॥ उपसंहारइति॥ शाखाभेदेसमानविद्यायांश्रुतागुणायथाश्रुतिव्यवस्थिताःउतसर्व
त्राश्रुताइतरशाखात उपसंहर्तव्याइतिसंदेहेविद्यैक्येपितत्रतत्रोक्तैरेवगुणैर्विद्योपकारसिद्धेःशाखाभेदेनगुणाव्यवस्थिताइतिपूर्वपक्षः॥ तत्रप्रकृत
विद्यैक्यचिंतानैष्फल्यमितिफलं॥ सिद्धांतत्वेनसूत्रंव्याचष्टे॥ स्थितेचेत्यादिना॥ गुणानांगुण्यविनाभावादेतच्छाखास्थविद्याशाखांतरोक्ततद्विद्यागुणवती।
तदभिन्नत्वात्तद्विद्यावदित्यनुमानाद्विद्यैक्येगुणोपसंहारसिद्धिरित्यर्थः प्रधानैक्येतत्तदुपकारकाणामंगानामुपसंहारेदृष्टांतमाह॥ विधिशेषवदिति॥ ५॥

उक्तमेव व्यतिरेकमुखेनाह यदिहीति नन्वाग्नेययागावरुद्धानां गुणानां ततो भिन्ने सौर्ये प्राप्तिवद्विद्यांतरस्य गुणानां विद्यांतरे प्राप्तिः किं न स्यादित्यत आह ॥ प्रकृतीति ॥ प्रकृतिगुणानां विकारे प्राप्तिर्युक्ता विद्यानां तु प्रकृतिविकृतिभावासिद्धेर्न तत्प्राप्तिरित्यर्थः नैवमिति ॥ गुणानुपसंहारो नेत्यर्थः ॥ उत्तरसूत्राणामनेन सूत्रेण पौनरुक्त्यं वारयति ॥ अस्यैवेति ॥ ६ ॥ पूर्वं चोदनाद्यविशेषादुत्सर्गतो विद्यैकत्वमुक्तं तस्यापवादं वक्तुमाह ॥ अन्यथात्वमिति ॥ अत्र वाजिनामुद्गीथब्राह्मणं छंदोगानामुद्गीथाध्यायं च विषयमाह ॥ वाजेत्यादिना ॥ तेह देवाः सात्विकवृत्तयः प्राणा अन्योन्यमूचुर्हंतेदानीमस्मिन्यज्ञे उद्गीथेनोद्गात्रेण कर्मणा रजस्तमोवृत्तिरूपानसुरानतीत्य देवत्वं

यदि हि विज्ञानभेदो भवेत्ततो विज्ञानांतरनिबद्धत्वाद्गुणानां प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः ॥ विज्ञानैकत्वे तु नैवमिति ॥
अस्यैव तु प्रयोजनसूत्रस्य प्रपंचः सर्वाभेदादित्यारभ्य भविष्यति ॥ २ ॥ ५ ॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ वाजसनेयके तेह देवा ऊचुर्हंतासुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति प्रक्रम्य वागादीन्प्राणानासुरपाप्मविद्धत्वेन निंदित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते ॥ अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायदिति ॥ तथा छांदोग्येपि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति प्रक्रम्येतरान्प्राणानसुरपाप्मविद्धत्वेन निंदित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते ॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिर इत्युभयत्रापि च प्राणप्रशंसया प्राणविद्याविधिरध्यवसीयते ॥ तत्र संशयः किमत्र विद्याभेदः स्यात् आहोस्विद्विद्यैकत्वमिति ॥ किं तावत्प्राप्तं ॥ पूर्वेण न्यायेन विद्यैकत्वमिति ननु न युक्तं विद्यैकत्वं प्रक्रमभेदात् ॥ अन्यथा हि प्रक्रमंते वाजसनेयिनः ॥ अन्यथा छंदोगाः ॥ त्वं न उद्गायेति वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राणमामनंति ॥

गच्छामेति ते चैवं निर्दिष्टमुद्गीथकर्तारमुपास्यं निर्धारयितुं कृतसंवादाः प्रथमं वाचं परीक्षितवंतस्त्वमेव नोद्गाता त्वं नोऽस्माकं कुर्विति तया त्वनृतं कृतं तथा घ्राणचक्षुःश्रोत्रमनांस्यपि कामेनासुरपाप्मना ग्रस्तानीति निंदित्वा आसन्यमास्ये भवं मुखमध्यस्थं प्राणमुपास्यं निर्धारितवंत इत्यर्थः ॥ तत्रान्योन्याभिभवात्मके युद्धे प्रवृत्ते देवाः पूर्ववदुद्गीथमाहृतवंतः अनेनोद्गीथेनैनानसुरान्जयेमेत्यर्थः ॥ भेदाभेदमानाभ्यां संशयमाह ॥ तत्रेति ॥ अत्र पूर्वाधिकरणसिद्धांतन्यायेनोद्गीथविद्येति संज्ञैक्येन विद्यैक्यमिति पूर्वपक्षे मिथो गुणोपसंहारः फलं सिद्धांते संज्ञैक्येऽपि विद्यैक्यापवादादनुपसंहार इति ॥ एवं यत्र पूर्वन्यायेन पूर्वपक्षस्तत्रापवादिकी संगतिरिति मंतव्यं ॥ सूत्रस्य सिद्धांतिशंकाभागं व्याचष्टे ॥ ननु न युक्तमिति ॥

संपूर्णोद्गीथकर्मकर्त्ताप्राणोवाजिनामुपास्यः उद्गायेतिकर्तृशब्दात् छंदोगानांतूद्गीथावयवॐकारःप्राणदृष्ट्योपास्यः ॐमित्येतदक्षरमुद्गीथमित्युपक्रम्यप्राणमुद्गी
थमितिकर्मरूपत्वशब्दात्तथाचकर्तृकर्मणोरुपास्ययोर्भेदाद्विद्ययोरन्यथात्वंभेदइतिशंकार्थः॥ उद्गीथत्वेनेति॥ ओंकारत्वेनेत्यर्थः अल्परूपभेदोनविद्यैक्यविरोधी
त्युक्तन्यायेनपूर्वपक्षीपरिहरतिनैवइति॥ असुरात्ययाभिप्रायः असुरजयार्थसंवादः॥ यथाश्मानंप्राप्यलोष्टोविध्वंसनेनतथाप्राणंहंतुमागताअसुरास्तस्यवीर्ये
पास्वयमेवध्वस्ताइतिश्रुतमुभयत्रेत्यर्थः॥ अल्परूपभेदमंगीकृत्यापिविद्यैक्यमुक्तंसोपिनास्तीत्याह॥ वाजेति॥ उद्गीथकर्तृरूपत्वेनप्राणस्योभयत्रश्रुतत्वादेक

छंदोगास्तूद्गीथत्वेनतमुद्गीथमुपासांचक्रिरइति॥ तत्कथंविद्यैकत्वंस्यादितिचेत् नैषदोषः॥ नह्येतावताविशेषेणविद्यैकत्वम
पगच्छति अविशेषस्यापिबहुतरस्यप्रतीयमानत्वात्॥ तथाहिदेवासुरसंग्रामोपक्रमत्वं असुरात्ययाभिप्रायउद्गीथोपन्यासोवागादिसंकी
र्तनंतन्निंदयामुख्यप्राणव्यपाश्रयस्तद्वीर्याच्चासुरविध्वंसनमश्मलोष्टनिदर्शनेनेत्येवंबहवोर्थाउभयत्राप्यविशिष्टाःप्रतीयंते॥ वाज
सनेयकेपिचोद्गीथसामानाधिकरण्यंप्राणस्यश्रुतमेषउवाउद्गीथइति॥ तस्माच्छांदोग्येपिकर्तृत्वंलक्षयितव्यं॥ तस्माच्चविद्यैकत्व
मिति॥ ६॥ नवाप्रकरणभेदात्परोवरीयस्त्वादिवत्॥ ७॥ नवाविद्यैकत्वमत्रन्याय्यं विद्याभेदएवात्रन्याय्यः कस्मात्प्रकरणभेदात् इत्यु
पक्रमभेदादित्यर्थः॥ तथाहीहप्रक्रमभेदोदृश्यते॥ छांदोग्येतावत् ओमित्येतदक्षरमुद्गीथमुपासीतेत्येवमुद्गीथावयवस्योंकार
स्यउपास्यत्वंप्रस्तुत्यरसतमादिगुणोपव्याख्यानंतत्रकृत्वाथखल्वेतस्यैवाक्षरस्योपव्याख्यानंभवतीतिपुनरपितमेवोद्गीथाव
यवमोंकारमनुवर्त्यदेवासुराख्यायिकाद्वारेण तंप्राणमुद्गीथमुपासांचक्रिरइत्याह॥ तत्रयद्युद्गीथशब्देनसकलाभक्तिरभि
प्रेयेततस्याश्चकर्त्तोद्गातर्त्विक्॥ ततउपक्रमश्चोपरुध्येतलक्षणाचप्रसज्येत॥

त्रश्रुतंकर्तृत्वमप्युभयत्रद्रष्टव्यमित्यर्थः॥ ६॥ बहु
विरुद्धरूपभेदाच्चविद्यैक्यमितिसिद्धांतयतिनवेति अक्षरंविशिनष्ट्युद्गीथमितिनतदवयवमित्यर्थः॥ पृथिव्यादिरसानांरसतमओंकारः आप्तिःसमृद्धि
रितिगुणान्उक्त्वागुणवत्योंकारेप्राणदृष्टिविधानायाख्यायिकाप्रस्तुतेत्याह॥ रसतमेति॥ ननुवाजिवाक्यैकवाक्यत्वार्थंछांदोग्योपक्रमस्थमुद्गीथपदंसंपूर्ण
सामभक्तिपरमस्तुप्राणमुद्गीथमित्यत्राप्युद्गीथकर्त्ताप्राणउपास्यइतिव्याख्यायतामित्यतआहतत्रयद्युद्गीथेति ओंकारोपास्त्युपक्रमभंगउद्गीथपदेकर्तृल
क्षणाचेतिदोषद्वयंस्यादित्यर्थः॥

॥ ननुसिद्धांतेपितत्पदेऽवयवलक्षणास्वीकार्याततोवरंकर्तृलक्षणाश्रुत्यंतरानुग्रहात्तथाचोपसंहारेकर्तृप्राणोपास्तिनिश्चयादुपक्रमेपितन्निश्चय इत्यत आह॥ उपक्रमेति॥ संदिग्धोपक्रमोहिवाक्यशेषान्निश्चीयतेयथाक्ताः शर्कराइत्यत्रांजनद्रव्यसंदेहेतेजोघृतमितिशेषान्निश्चयः॥ इहतूपक्रमेऽ क्षरस्योपास्यत्वंनिश्चितंतत्समानाधिकरणोद्गीथपदस्यावयवलक्षणाचविनिश्चितेतिप्राणमुद्गीथमित्युपसंहारस्तदेकार्थतयानेय इत्यर्थः॥ एवंछांदोग्यओंकारउपास्यउक्तः इतरत्रतुप्राण इत्युपास्यभेदाद्विद्याभेद इत्याहवाजेति॥ यदुक्तंवाजिश्रुतावपिप्राण

उपक्रमानुरोधेनचैकस्मिन्वाक्येउपसंहारेणभवितव्यं॥ तस्मादत्रतावदुद्गीथावयवओंकारेप्राणदृष्टिरुपदिश्यते॥ वाजसनेयकेतुउद्गीथशब्देनावयवग्रहणेकारणाभावात्सकलैवभक्तिरावेद्यतेत्वंनउद्गायेत्यपितस्याःकर्तोद्गातृत्विक्प्राणत्वेननिरूप्यतइतिप्रस्थानांतरं॥ यदपितत्रोद्गीथसामानाधिकरण्यंप्राणस्यतदप्युद्गातृत्वेनैवदिदर्शयिषितस्यप्राणस्यसर्वात्मत्वप्रतिपादनार्थमितिनविद्यैकत्वमावहति॥ सकलभक्तिविषयएवचतत्राप्युद्गीथशब्दइतिवैषम्यं॥ नचप्राणस्योद्गातृत्वमसंभवेनहेतुनापरित्यज्यतेउद्गीथभाववदुद्गातृभावस्याप्युपासनार्थत्वेनोपदिश्यमानत्वात्॥ प्राणवीर्येणैवचोद्गात्रंकरोतीतिनास्त्यसंभवः तथाचतत्रैवश्रावितंवाचाचह्येवसप्राणेनचोदगायदिति॥ नचविवक्षितार्थभेदेऽवगम्यमानेवाक्य च्छायानुकारमात्रेणसमानार्थत्वमध्यवसातुंयुक्तं॥

तौद्गा२

स्योद्गीथरूपत्वश्रुतेरुपास्यैक्यमितितद्दूषयतियदपीत्यादिनातत्रोद्गीथउपास्यतयानोक्तः किंतुप्राणस्योपास्यस्यगुणतयेत्यर्थः॥ किंचोद्गीथओंकारः छांदोग्येअत्रतुभक्तिरित्युपास्यभेद इत्याह॥ सकलेति॥ प्राणस्यजडत्वान्नोद्गातृत्वंकिंतुउद्गीथत्वमेववाजिभिरपिग्राह्यमित्येकामाशंक्याह॥ नचेति॥ सउद्गातावाग्विशिष्टप्राणेनौद्गात्रंकृतवानितिश्रुतेरसंभवोपिनेत्यर्थः॥ यदुक्तंबहुतरार्याविशेषाद्विद्यैक्यमितितत्राह॥ नचेतिएकत्रोद्गाताप्राणउपास्योन्यत्रोंकार इत्यंतरंगोपास्यरूपभेदेस्पष्टेसतिबहिरंगार्थवादसाम्यमात्रेणनोपासनैक्यंयुक्तमित्यर्थः॥

शा·भा वाक्यसाम्यमात्रेणार्थैक्यं नास्तीत्यत्र दृष्टांतमाह॥ तथा हीति॥ विवाएतं प्रजया पशुभिरर्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्यु अ·पा·
र·भ·टी· देति त्रेधा तंडुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरं येणिष्ठास्तान्विष्णवे शिपिविष्टा ३२
३२८ य शृते चरुमित्यभ्युदयवाक्यं॥ अस्यार्थः॥ यस्य यजमानस्य चतुर्दश्यामेवामावास्याभ्रांत्या दर्शकर्मार्थं प्रवृत्तस्य पुरस्तात्पूर्वं हविस्तंडुलदधिपयोरूपं निरु
प्तं दर्शदेवताभ्योग्न्यादिभ्यः संकल्पितं चंद्रमाश्च पश्चादभ्युदेति तमेनं यजमानं कालव्यत्ययापराधात्तद्देवनिरुप्तं हविः प्रजादिनार्धयति वियोजयति श
त्रुं चास्य वर्धयति यस्मात्कालभ्रांतिमान्यजमानो ये मध्यमादिभावेन त्रेधाभूतास्तंडुलाद्ध्यादिसहिता निरुप्तास्तान्विभजेदग्न्यादिभ्यो वियोजयेद्वियोज्य च
दातृत्वादिगुणकाग्न्यादिभ्यो दर्शदेवभिन्नेभ्यो निर्वपेदिति दधन्दधनिस्थविष्ठतंडुलचरुं शृते दुग्धेऽणिष्ठचरुमित्यर्थः॥ अत्र कालापराधे देवांतरयुक्तं

तथाह्यभ्युदयवाक्ये पशुकामवाक्ये च त्रेधा तंडुलान् विभजेत् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यादित्या
दिनिर्देशसाम्येप्युपक्रमभेदादभ्युदयवाक्ये देवतापनयोध्यवसितः॥ पशुकामवाक्ये तु यागविधिः तथेहाप्युपक्रमभेदा
द्विद्याभेदः॥ परोवरीयस्त्वादिवत्॥ यथा परमात्मदृष्ट्यध्याससाम्येपि आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोव
रीयानुद्गीथः स एषोनंत इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमस्यादित्यगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भि

प्रायश्चित्तरूपं दर्शाद्भिन्नं कर्म विधीयत इति प्राप्ते तंडुलत्रेधात्वाद्यनुवादेन विभजेदिति हविषः प्रकृतदेववियोगेन तस्मिन्नेव दर्शकर्मणि देवतांतरसंबंधमा
त्रविधानं न कर्मांतरमिति सिद्धांतितं एवमभ्युदयवाक्ये कालापराधेनोपक्रमाद्दर्शकर्मण्येव हविषः पूर्वदेवताभ्योपनयो वियोगोध्यवसितः पशुकामवाक्ये तु
यद्यपि ये स्थविष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं ये क्षोदिष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुमिति निर्देशोभ्युद राम·
यवाक्यसमोस्ति तथापि यः पशुकामः स्यात्सोमावास्यामिष्ट्वा वत्सानपाकुर्यादिति नित्यं दर्शकर्म समाप्य पुनर्दोहार्थं वत्सापकरणविध्युपक्रमात्पशु ३२८
कामस्य यागांतरविधिरेव नाभ्युदयवाक्येनार्थैक्यमिति॥ तथा प्रकृतेपि निर्देशसाम्यं न विद्यैक्यप्रयोजकमित्यर्थः वत्सानपाकुर्यान्मातृदेशाद्देशांतरं नये
दित्यर्थः सूत्रोक्तं दृष्टांतं व्याचष्टे॥ परोवरीयस्त्वादिवदिति॥ परइति सकारांतं परस्मात्परश्चासौ वराच्च वरतर इति परोवरीयानित्येकं पदं अनंतश्च आकाशा

परमात्मानदृष्ट्यालंबनत्वादुद्गीथस्तथोक्तइत्यर्थः॥आकाशात्मनाहिरण्यश्मश्रुपुरुषात्मनाचोद्गीथोपास्तिसाम्येपिविद्याभेदवदिहापिभेदइत्यर्थः॥६॥७॥संज्ञैक्यंपूर्वपक्षबीजमुद्भाव्यदूषयतिसंज्ञातइति उपास्यरूपभेदाद्विद्यानानात्वंयदुक्तंतच्छ्रुत्यक्षरानुगतबलवत्संज्ञातुपौरुषेयीदुर्बलेत्यर्थः संज्ञैक्यंकर्मैक्यव्यभिचारिचेत्याह॥अस्तिचेतिकिंसंज्ञैक्यंसर्वत्राप्रमाणमेवनेत्याह॥यत्रत्विति॥असतिबाधकेसंज्ञैक्यमपिमानंयथासंवर्गविद्येतिसं

नचेतरेतरगुणोपसंहारएकस्यामपिशाखायांतद्वच्छाखांतरस्थेष्वप्येवंजातीयकेषूपासनेष्विति॥७॥संज्ञातश्चेत्तदुक्तमस्तितुतदपि॥८॥अथोच्येतसंज्ञैकत्वाद्विद्यैकत्वमत्रन्याय्यंउद्गीथविद्येतिह्युभयत्राप्येकासंज्ञेतितदपिनोपपद्यते॥उक्तंह्येतत् नवाप्रकरणभेदात्परोवरीयस्त्वादिवदितितदेवचात्रन्याय्यतरं॥श्रुत्यक्षरानुगतंहितत्॥संज्ञैकत्वंतुश्रुत्यक्षरबाह्यमुद्गीथशब्दमात्रप्रयोगात् लौकिकैर्व्यवहर्तृभिरुपचर्यते॥अस्तिचैतत्संज्ञैकत्वंप्रसिद्धभेदेष्वपिपरोवरीयस्त्वाद्युपासनेषुउद्गीथविद्येति॥तथाप्रसिद्धभेदानामपिअग्निहोत्रदर्शपौर्णमासादीनांकाठकैकग्रंथपरिपठितानांकाठकसंज्ञैकत्वंदृश्यतेतथेहापिभविष्यति॥यत्रतुनास्तिकश्चिदेवंजातीयकोभेदहेतुः॥भवतुतत्रसंज्ञैकत्वाद्विद्यैकत्वं॥यथासंवर्गविद्यादिषु॥८॥व्याप्तेश्चसमंजसं॥९॥ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्राक्षरोद्गीथशब्दयोःसामानाधिकरण्येश्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाणांप्रतिभानात्कतमोत्रपक्षोन्याय्यःस्यादितिविचारः॥तत्राध्यासोनामद्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्यते॥यस्मिन्नितरबुद्धिरध्यस्यतेअनुवर्ततएवतस्मिंस्तद्बुद्धिरध्यस्तेतरबुद्धावपि॥यथानाम्निब्रह्मबुद्धावध्यस्यमानायामप्यनुवर्ततएवनामबुद्धिर्नब्रह्मबुद्ध्यानिवर्तते॥यथावाप्रतिमादिषुविष्ण्वादिबुद्ध्यध्यासएवमिहाप्यक्षरउद्गीथबुद्धिरध्यस्यतेउद्गीथेवाक्षरबुद्धिरिति॥अपवादोनामयत्रकस्मिंश्चिद्वस्तुनिपूर्वनिविष्टायांमिथ्याबुद्धौनिश्चितायांपश्चादुपजायमानायथार्थाबुद्धिःपूर्वनिविष्टायामिथ्याबुद्धेर्निवर्तिकाभवति॥

ज्ञैक्यात्सर्वशाखासुनहिविद्यैक्यंतथापंचाग्न्यादिविद्यैक्यमित्याद्यसूत्रेदर्शितमित्यर्थः॥८॥व्याप्तेश्चसमंजसं॥९॥ सामानाधिकरण्यंविषयीकृत्यसंशयमाह॥ओमित्येतदिति ॥ अध्यासादिपदार्थान्व्याचष्टे तत्राध्यासइत्यादिनाबुद्धिपूर्वकाभेदारोपोऽध्यासः बाधोऽपवादः॥ ~ ॥

एकत्वंवास्तवाभेदः विशेषणंव्यावर्त्तकमितिविवेकः पूर्वमुद्गातृकर्मात्मकोद्गीथावयवत्वमोंकारस्यध्येयस्यविशेषणंसिद्धवत्कृत्यध्येयभेदाद्विधाभे
दःसिद्धांतितः॥सनयुक्तइत्याक्षेपसंगत्यापूर्वपक्षयति॥तत्रेति॥अत्रपूर्वपक्षेपूर्वोक्तसिद्धांतासिद्धिःफलंसिद्धांतेनतत्सिद्धिरितिमत्वासिद्धांतसूत्रंव्याचष्टेचश
ब्दइत्यादिनापक्षत्रयस्यदुष्टत्वंप्रतिज्ञायाध्यासपक्षेदोषमाह॥तत्राध्यासइति॥यस्योद्गीथस्यबुद्धिरोंकारेध्यस्यतेतद्वाचकोद्गीथशब्दस्योंकारेलक्षणास्या

यथादेहेंद्रियसंघाते आत्मबुद्धिः॥आत्मन्येवात्मबुद्ध्यापश्चाद्भाविन्यातत्त्वमसीत्यनयायथार्थबुद्ध्यानिवर्त्यते॥यथावादि
ग्भ्रांतिबुद्धिर्दिग्याथात्म्यबुद्ध्यानिवर्त्तते॥एवमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निवर्त्यतेउद्गीथबुद्ध्यावाक्षरबुद्धिरिति॥एक
त्वंत्वक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वं॥यथाद्विजोत्तमोब्राह्मणोभूमिदेवइति॥विशेषणंपुनः सर्ववेदव्यापिनओ
मित्येतस्याक्षरस्यग्रहणप्रसंगेऔद्गात्रविशेषस्यसमर्पणंयथानीलंयदुत्पलंतदानयेति॥एवमिहाप्युद्गीथोयओंकार
स्तमुपासीतेति॥एवमेतस्मिन्सामानाधिकरण्यवाक्येविमृश्यमानेएतेपक्षाःप्रतिभांति॥तत्रान्यतमनिर्धारणकारणा
भावादनिर्धारणप्राप्ताविदमुच्यते॥व्याप्तेश्चसमंजसमिति॥चशब्दोयंतुशब्दस्थाननिवेशीपक्षत्रयव्यावर्त्तनप्रयोजनः
॥तदिहत्रयःपक्षाःसावद्याइतिपर्युदस्यंते॥विशेषणपक्षएवैकोनिरवद्यइत्युपादीयते॥तत्राध्यासेतावद्याबुद्धिरितर
त्राध्यस्यतेतच्छब्दस्यलक्षणावृत्तित्वंप्रसज्येततत्फलंचकल्प्येत॥श्रूयतएवफलमापयिताहवैकामानांभवतीत्यादिरि
तिचेत्तन॥तस्यान्यफलत्वात्॥आप्त्यादिदृष्टिफलंहितत्नोद्गीथाध्यासफलं॥अपवादेपिसमानःफलाभावः॥मिथ्या
ज्ञाननिवृत्तिःफलमितिचेत्तन॥पुरुषार्थोपयोगानवगमात्॥नचकदाचिदप्योंकारादोंकारबुद्धिर्निवर्त्तमानेनउद्गीथाद्वोद्गीथबुद्धिः॥

नबुद्धिविषयत्वगुणपरत्वात्तथासंबंधोप्यसिद्धः कल्पनीयः प्रतीकोपास्तेः फलंचकल्प्यमितिगौरवंस्यादित्यर्थः फलंनकल्प्यमितिशंकते श्रूयतइ
ति॥आप्त्यादीति॥ओंकारः आप्तिः समृद्धिरितियउपास्तेसकामानाप्नोतीतिश्रुतंफलंनाध्यासस्येत्यर्थः॥उद्गीथोंकारयोरन्यतरबुद्ध्यान्यतरबुद्ध्यपवादमंगी
कृत्यान्यतरमिथ्याबुद्धिनिवृत्तिवैफल्यमुक्तंसंप्रत्यन्यतरबुद्धेरभ्रांतित्वान्नापवादइत्याह नचकदाचिदपीति॥भ्रांतिश्चेन्निवर्त्तेतनतुनिवर्त्ततइत्यभ्रांतिरित्यर्थः॥

किंच तत्त्वबोधकाद्याकाङ्क्षान्यपवादो भवति नेदं वाक्यं न तत्त्वपरमित्याह॥ नचेति॥ घटकुंभशब्दयोरिवोंकारोद्गीथशब्दयोः पर्यायत्वपक्षं दूषयति॥ नापीति॥ पर्यायत्वमपि नास्तीत्याह॥ नचेति॥ परिशिष्टविशेषणपक्षे सूत्रं योजयति॥ व्याप्तेरिति॥ ओमित्यक्षरमुपासीतेत्युक्ते सर्ववेदव्याप्योंकार इहोपास्यो मस्त्वित्येतन्निरासार्थमुद्गीथावयवत्वं विशेषणं समंजसमित्यर्थः॥ अध्यासपक्षे तद्बुद्धिविषयत्वगुणयोगरूपः संबंधः कल्प्य इति विप्रकृष्टा लक्षणा॥

नचेदं वाक्यं वस्तुतत्त्वप्रतिपादनपरं उपासनाविधिपरत्वात् नाप्येकत्वपक्षः संगच्छते निःप्रयोजनं हि तदा शब्दद्वयोच्चारणं स्यात्॥ एकेनैव विवक्षितार्थसमर्पणात्॥ नच हौत्रविषय आध्वर्यवविषये वाक्षरे ओंकारशब्दवाच्ये उद्गीथशब्दप्रसिद्धिरस्ति॥ नापि सकलायां साम्नो द्वितीयायां भक्तावुद्गीथशब्दवाच्यायामोंकारशब्दप्रसिद्धिर्येनाऽनतिरिक्तार्थता स्यात्॥ परिशेषाद्विशेषणपक्षपरिग्रहे तु व्याप्तेः सर्ववेदसाधारण्यात्सर्वव्याप्यक्षरमिह मा प्रसंजीत्यत उद्गीथशब्देनाक्षरं विशेष्यते॥ कथं नामोद्गीथावयवभूत ओंकारो गृह्येतेति॥ नन्वस्मिन्नपि पक्षे समाना लक्षणा उद्गीथशब्दस्यावयवलक्षणार्थत्वात्॥ सत्यमेवमेतत्॥ लक्षणायामपि तु संनिकर्षविप्रकर्षौ भवत एव॥ अध्यासपक्षे ह्यर्थान्तरबुद्धिरर्थान्तरे निक्षिप्यत इति विप्रकृष्टा लक्षणा॥ विशेषणपक्षे त्ववयविवचनेन शब्देनावयवः समर्प्यत इति सन्निकृष्टा॥ समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्वपि प्रवर्त्तमाना दृष्टाः पटग्रामादिषु॥ अतश्च व्याप्तेर्हेतोरोमित्येतदक्षरमिति॥ एतस्योद्गीथमित्येतद्विशेषणमिति समंजसमेतन्निरवद्यमित्यर्थः॥४॥ सर्वाभेदादन्यत्रेमे॥१०॥ वाजिनां छंदोगानां च प्राणसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपास्यत्वमुक्तं॥ वागादयोपि हि तत्र वसिष्ठत्वादिगुणान्विता उक्ताः स्तेच गुणाः प्राणे पुनः प्रत्यर्पिताः यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोसीत्यादिना॥

“ अवयवलक्षणा तु सन्निकृष्टा अवयवावयविसंबंधस्य क्लृप्तत्वात्पटावयवे दग्धे पटो दग्ध इति लोके प्रयोगाच्च नामादौ ब्रह्मशब्दस्य त्वगत्या ब्रह्मबुद्धिग्राह्यत्वगुणलक्षणाश्रिता तत्र प्रतीकोपास्तेर्विवक्षितत्वात् इह तु प्रतीकोपास्तिविधिकल्पने आप्त्यादिगुणकोंकारे प्राणदृष्टिविधाने च वाक्यभेदः स्यात्॥ अतः सर्ववेदव्याप्योंकारनिरासेनोंकारे प्राणदृष्टिविधानार्थं विशेषणमेव समंजसं कल्पनालाघवादिति सिद्धं॥९॥ सर्वाभेदादन्यत्रेमे॥ विषयं वक्तुं संगतमर्थमाह॥ वाजिनामिति॥ ”

वाचोवसिष्ठत्वंगुणः वाग्मिनः सुखवासदर्शनात् चक्षुषः प्रतिष्ठागुणः चक्षुष्मतः पादप्रतिष्ठादर्शनात्॥ श्रोत्रंसंपद्गुणकंश्रवणात्सर्वार्थसंपत्तेः। मनआयतनत्वंगुणंतस्यवृत्तिद्वारासर्वभोग्याश्रयत्वात् तेचगुणाःप्राणश्रैष्ठ्यंनिश्चित्यवागादिभिस्तस्मिन्नर्पिता इतिशाखाद्वयसंमतोर्थः॥ विषयमाह॥ अन्येषामित्यादिना॥ निःश्रेयसस्यश्रैष्ठ्यस्यादानंनिर्धारणंप्रस्तूयतइत्यर्थः देवतावागादयोहंश्रेयसेस्वश्रैष्ठ्यायेत्यर्थः॥ एवंशब्दात्क्लृप्तगुणकप्राणप्रत्यभिज्ञानाच्चसंशयमाह॥ तत्रेतिगुणानामनुपसंहारोपसंहारावेवपूर्वोत्तरपक्षयोःफलं उद्गीथत्वविशेषणादोंकारस्यसर्ववेद।

अन्येषामपितुशाखिनांकौषीतकिप्रभृतीनांप्राणसंवादेष्वथातोनिःश्रेयसादानं॥ एताहवैदेवता अहंश्रेयसेविवदमानाइत्येवंजातीयकेषुप्राणस्यश्रैष्ठ्यमुक्तं॥ नत्विमेवसिष्ठत्वादयोपिगुणाउक्ताः॥ तत्रसंशयः॥ किमिमेवसिष्ठत्वादयोगुणाःक्वचिदुक्ता अन्यत्राप्यस्येरन् उतनास्येरन्निति॥ तत्रप्राप्तंतावन्नास्येरन्निति॥ कुतः॥ एवंशब्दसंयोगात्॥ अथोयएवंविद्वान्प्राणेनिःश्रेयसंविदित्वेतितत्रतत्रैवंशब्देनवेद्यंवस्तुनिवेद्यते॥ एवंशब्दश्चसन्निहितालंबनोनशाखांतरपरिपठितमेवंजातीयकंगुणजातंशक्नोतिनिवेदयितुं॥ तस्मात्स्वप्रकरणस्थैरेवगुणैर्निराकांक्षत्वमित्येवंप्राप्ते प्रत्याह॥ अस्येरन्निमेगुणाःक्वचिदुक्तावसिष्ठत्वादयोन्यत्रापिकुतः सर्वाभेदात्॥ सर्वत्रैवहितदेवैकंप्राणविज्ञानमभिन्नंप्रत्यभिज्ञायतेप्राणसंवादादिसारूप्यात्॥ अभेदेचविज्ञानस्यकथमिमेगुणाःक्वचिदुक्ताःअन्यत्रनास्येरन्॥ नन्वेवंशब्दस्तत्रतत्रभेदेनैवंजातीयकंगुणजातंवेद्यत्वायसमर्पयतीत्युक्तं॥ अत्रोच्यते॥ यद्यपिकौषीतकिब्राह्मणगतेनैवंशब्देनवाजसनेयिब्राह्मणगतंगुणजातमसंशब्दितमसन्निहितत्वात्॥

व्याप्तिव्यावृत्तिवत्प्रकृतगुणमात्रग्राहकैवंशब्दाच्छाखांतरगुणव्यावृत्तिरितिदृष्टांतेनपूर्वपक्षयति॥ तत्रप्राप्तमिति॥ यथावागादिभ्यःप्राणश्रैष्ठ्यंसिद्धमथोतथायएवंश्रैष्ठ्यगुणंविद्वानुपास्तेसप्राणेश्रैष्ठ्यंविदित्वाध्यात्वाश्रेष्ठोभवतीतिश्रुत्यर्थः॥ एवंजातीयकविद्यैक्यात्प्राप्तमार्थिकंवसिष्ठत्वादिगुणजातमेवंशब्दोनगृह्णातिश्रुतावलंबित्वादितिप्राप्तेसिद्धांतयति॥ अस्येरन्नितिवाजसनेयिब्राह्मणेतावदेवंशब्देनवसिष्ठत्वादिगुणजातस्य। प्राणविद्यासंबंधःसिद्धःसैवविद्याकौषीतकिश्रुतौप्रत्यभिज्ञायते तयाचगुणानांगुण्यविनाभावेनार्थतः॥

म्नातानामपि श्रुतगुणैरविरोधात्सहैव श्रुतमार्थं च गुणजातं श्रुत्यर्थाभ्यां सन्निहितत्वाविशेषात्कौषीतकिगतेनैवंशब्देन परामृश्यत इत्याह॥ तथा-
पीति॥ कौषीतकिश्रुतिस्थः प्राणो वसिष्ठत्वादिगुणकः श्रेष्ठप्राणत्वाद्वाजिश्रुतिस्थप्राणवदित्यश्रुतगुणानुमाने सति श्रुतहानिर्नास्ति अविरोधा-
दित्युक्तं स्मर्यते न चैवं सतीति॥ अपरिगणितानामपि गुणाः श्रुता एवेत्यत्र दृष्टांतमाह॥ नहीति॥ फलितमाह॥ तस्मादिति॥ १०॥ आनंदादयः प्रधान-
स्य॥ ब्रह्मणो ज्ञेयस्यैकत्वान्निर्विशेषत्वाच्च संशयमाह॥ तेषु संशय इति पूर्वपक्षे सत्यादिपदानुपसंहाराद्वाक्यार्थानवधारणं सिद्धांते त्ववधारणमिति॥

तथापि तस्मिन्नेव विज्ञाने वाजसनेयिब्राह्मणगतेनैवंशब्देन नत्संशब्दितमिति न परशाखागतमप्यभिन्नविज्ञानावबद्धं गु-
णजातं स्वशाखागताद्विशिष्यते॥ न चैवं सति श्रुतहानिरश्रुतकल्पना वा भवति॥ एकस्यामपि हि शाखायां श्रुता गुणाः श्रुता ए-
व सर्वत्र भवंति गुणवतो भेदाभावात् नहि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशांतरगतस्तद्देश्यैरविभावितशौर्यादिगुणोप्य-
तद्गुणो भवति॥ यथा च तत्र परिचयविशेषाद्देशांतरेपि देवदत्तगुणा विभाव्यंते॥ एवमभियोगविशेषाच्छाखांतरेष्वप्युपास्या गुणाः
शाखांतरेष्वस्येरन्॥ तस्मादेकप्रधानसंबद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्या इति॥ ५॥१०॥ आनंदादयः प्रधा-
नस्य॥ ११॥ ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषु आनंदरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवंजातीयका ब्रह्मणो ध-
र्माः क्वचित्केचिच्छ्रूयंते॥ तेषु संशयः॥ किमानंदादयो ब्रह्मधर्मा यत्र यावंतः श्रूयंते तावंत एव तत्र प्रतिपत्तव्याः किं वा सर्वे सर्वत्रेति॥
तत्र यथाश्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायां इदमुच्यते आनंदादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः॥ ६ ॥

फलं प्राणस्य सविशेषत्वाद्युक्तः शाखांतरीयवसिष्ठत्वाद्युपसंहारः ब्रह्मणस्तु निर्विशेषत्वात्स्वशाखागतपदैरेव प्रमितिसिद्धेर्व्यर्थः पदांतरोपसंहार
इति प्रत्युदाहरणेन पूर्वपक्षः॥ सिद्धांतमाह॥ इदमिति॥ आनंदत्वसत्यत्वज्ञानत्वादिसामान्यानि पदानि ब्रह्मणि कल्पिता धर्मास्तेषां सर्वशाखासूपसं-
हारो नाम तद्वाचकानंदादिपदानामेकवाक्यतयोच्चारणमानंदः सत्यं ज्ञानमनंतं ब्रह्म शुद्धमद्वयमात्मेति तानि च सामानाधिकरणानि पदानि विरु-
द्धधर्मत्यागेन सर्वाधिष्ठानभूतामेकामखंडव्यक्तिं लक्षयंति॥ न चैकेनैव पदेन लक्ष्यसिद्धेः पदांतरं व्यर्थमिति वाच्यं एकस्मिन्पदे विरोधाभावेन लक्ष्य

यद्यपिपदद्वयेपिलक्षणावतरतितथाप्यानंदोब्रह्मेत्युक्तेदुःखत्वाल्पत्वभ्रांतिनिरासेप्यसत्त्वजडत्वादिभ्रमोभवेत्॥अतस्तन्निरासार्थंसत्यज्ञानादिप
दानिप्रयोक्तव्यानिनचभ्रमस्यानवधित्वाद्वाक्यमपर्यवसितंस्यादितिवाच्यंसच्चिदानंदात्मकंसर्वधर्मशून्यमद्वयमविकल्पंब्रह्माहमितिविशेषदर्श
नेसर्वभ्रमनिरासात्॥तच्चविशेषदर्शनंयावद्भिःसंदर्भैर्भवतितावंतिपदान्युपसंहर्तव्यानीतिभावः॥११॥ब्रह्मैक्याच्चेदानंदत्वादिधर्माणांसर्वत्रप्राप्ति
स्तर्हिसगुणब्रह्मविद्यागतधर्मप्राप्तिरपिस्यादितिशंकानिरासार्थंसूत्रंव्याचष्टे॥प्रियेति॥पुत्रदर्शनसुखंप्रियंतद्वार्तादिनामोदस्तस्यविद्याद्यतिश॥

कस्मात्सर्वाभेदादेवसर्वत्रैवहितदेवैकंप्रधानंविशेष्यंब्रह्मनभिद्यते॥तस्मात्सार्वत्रिकत्वंब्रह्मधर्माणांतेनैवपूर्वाधिकरणोदितेन।
देवदत्तशौर्यादिनिदर्शनेन॥११॥नन्वेवंसतिप्रियशिरस्त्वादयोपिधर्माः सर्वेसर्वत्रसंकीर्येरन्॥तथाहि॥तैत्तिरीयकेआनंदमयमा
त्मानंप्रक्रम्याम्नायते॥तस्यप्रियमेवशिरः मोदोदक्षिणःपक्षःप्रमोदउत्तरःपक्षः आनंदआत्माब्रह्मपुच्छंप्रतिष्ठेति॥अत्रोत्तरंपठति
प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदे॥१२॥प्रियशिरस्त्वादीनांधर्माणांतैत्तरीयकेआम्नातानांनास्त्यन्यत्रप्राप्तिः॥यत्कार
णंप्रियंमोदःप्रमोदआनंदइत्येतेपरस्परापेक्षयाभोक्त्रंतरापेक्षयाचोपचितापचितरूपाउपलभ्यंते॥उपचयापचयौचसतिभेदे
संभवतः॥निर्भेदंतुब्रह्मएकमेवाद्वितीयमित्यादिश्रुतिभ्यः॥नचैतेप्रियशिरस्त्वादयोब्रह्मधर्माः॥कोशधर्मास्त्वेतइत्युपदिष्ट
मस्माभिरानंदमयोभ्यासादित्यत्र॥अपिचपरस्मिन्ब्रह्मणिचित्तावतारोपायमात्रत्वेनैतेपरिकल्प्यंतेनद्रष्टव्यत्वेन॥एवम
पिसुतरामन्यत्राप्राप्तिःप्रियशिरस्त्वादीनां॥ब्रह्मधर्मांस्त्वेतान्कृत्वान्यायमात्रमिदमाचार्येणप्रदर्शितंप्रियशिरस्त्वाद्यप्राप्ति
रिति॥सचन्यायोन्येषुनिश्चितेषुब्रह्मधर्मेषूपासनायोपदिश्यमानेषुनेतव्यःसंयद्वामत्वादिषुसत्यकामादिषुच॥ ॥

येप्रमोदइत्येवंतारतम्यवंतोधर्मास्तद्वयेज्ञेयेनप्राप्नुवंतितेषामब्रह्मस्वरूपाणांब्रह्मज्ञानानुपयोगादितिभावः॥तेषांब्रह्मधर्मत्वंचासिद्धमित्या
ह॥नचैतइति॥ब्रह्मणिचित्तावतारोपायत्वेपितेषांप्राप्तिःस्यादित्याशंक्याह॥एवमपीति॥अज्ञेयत्वादेषांनज्ञेयेब्रह्मणिप्राप्तिरित्यर्थः॥किमर्थंत
र्हिसूत्रमित्यतआह॥ब्रह्मधर्मानितिकृत्वाचिंताफलमाह॥संवेतिज्ञेयेबाह्यधर्माणामनुपयोगादप्राप्तिरितिन्यायात्संयद्वामत्वादीनामप्राप्तिरितिसूत्रंव्याख्येयमित्यर्थः॥

ज्ञानानुपयोगेपि ध्यानेतेषां धर्मिणामुपयोगादुपास्यब्रह्मैक्यात्प्राप्तिरन्योन्यविद्यासु स्यादित्याशंक्याह तेषु हीति॥ ध्यानविधिपरतंत्राणां धर्माणां यथाविधिव्यवस्थेत्यर्थः॥ १२॥ संयद्वामत्वादिधर्मेष्वआनंदादीनां वैषम्यं ज्ञानोपयोगित्वादित्याह॥ इतरेत्विति॥ सत्यज्ञानानंदात्मब्रह्मशब्दाः पंच सर्वत्रोपसंहर्त्तव्या इति सिद्धं॥ १३॥ आध्यानाय॥ वाक्यभेदाभेदानवधारणात्संशयमाह॥ तत्रेति॥ पूर्वपक्षे वाक्यभेदाद्विद्याभेदः॥ सिद्धांते वाक्यैक्या।

तेषु हि सत्यप्युपास्यस्य ब्रह्मण एकत्वे प्रक्रमभेदादुपासनाभेदे सति नान्योऽन्यधर्माणामन्योन्यत्र प्राप्तिः॥ यथा च द्वे नार्यावेकं नृपतिमुपासाते छत्रेणैका चामरेणाऽन्या तत्रोपास्यैकत्वेप्युपासनभेदो धर्मव्यवस्था च भवति॥ एवमिहापीति॥ उपचितापचितगुणत्वं हि सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यते॥ न निर्गुणे परस्मिन् ब्रह्मणि॥ अतो न सत्यकामत्वादीनां धर्माणां क्वचिच्छ्रुतानां सर्वत्र प्राप्तिरित्यर्थः॥ १२॥ इतरे त्वर्थसामान्यात्॥ १३॥ इतरे त्वानंदादयो धर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमाना अर्थसामान्यात्प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात्सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यं प्रतिपत्तिमात्रप्रयोजना हि त इति॥ ६॥ आध्यानाय प्रयोजनाभावात्॥ १४॥ काठके हि पठ्यते॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥ मनसस्तु परा बुद्धिरित्यारभ्य पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति॥ तत्र संशयः॥ किमिमे सर्व एवार्थादयस्ततस्ततः परत्वेन प्रतिपाद्यंत उत पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति॥ तत्र तावत्सर्वेषामेवैषां परत्वेन प्रतिपादनमिति भवति मतिः यथा हि श्रूयते इदमस्मात्परमिदमस्मात्परमिति॥ ननु बहुष्वर्थेषु परत्वेन प्रतिपिपादयिषितेषु वाक्यभेदः स्यात् नैष दोषः॥ वाक्यबहुत्वोपपत्तेः बहून्येव ह्येतानि वाक्यानि प्रभवंति बहुविषयान्परत्वोपेतान्प्रतिपादयितुं॥ तस्मात्प्रत्येकमेषां परत्वप्रतिपादनमित्येवं प्राप्ते ब्रूमः॥ पुरुष एव ह्येभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति युक्तं न प्रत्येकमेषां परत्वप्रतिपादनं कस्मात्प्रयोजनाभावात्॥

द्विद्यैक्यमिति फलं॥ पूर्वत्र ब्रह्मस्वभावानामानंदादीनामुपसंहार्याणां ब्रह्मज्ञानफलोपायत्वमुक्तं अत्र त्वब्रह्मस्वभावस्यार्थादिपरत्वस्यानुपसंहार्यस्य तदुपायत्वमुच्यत इत्येकफलकत्वं संगतिः॥ तत्र परत्वविशिष्टत्वेनार्थादीनामपूर्वतया प्रतिपाद्यानां भेदाद्वाक्यभेदो न दोष इति पूर्वपक्षः॥ उत्सूत्रं सिद्धांतं प्रतिज्ञाय सौत्रं हेतुं व्याचष्टे॥ पुरु

फलवत्वेसत्यपूर्वत्वात्पुरुषस्यैवप्राधान्येनप्रतिपाद्यत्वं अफलार्थादीनांपरत्वंतुनत्वेष त्वेनोच्यतइत्यर्थः॥ किंचपुरुषान्नपरंकिंचित्साकाष्ठेतिवेदः
परनिषेधेनलिंगेनसर्वबाधावधित्वलिंगेनचपुरुषेनात्यर्थंदर्शयन्पूर्वस्मात्पूर्वस्मादपरस्मापरस्यपरत्वोक्तिस्तदर्थेतिदर्शयतीत्याह॥ अपिचेति॥ अ
र्यादीनामत्रोक्तिराध्यानायतत्तत्परत्वध्यानपूर्वकंपुरुषदर्शनायैवस्वतःप्रयोजनाभावादितिसूत्रंयोजयति॥ आध्यानायेति॥१४॥ आत्मत्वादिलिं।

नहीतरेषुपरत्वेनप्रतिपन्नेषुकिंचित्प्रयोजनंदृश्यतेश्रूयतेवा॥ पुरुषेत्विंद्रियादिभ्यःपरस्मिन्सर्वानर्थव्रातातीतेप्रतिपन्नेदृश्य
तेप्रयोजनंमोक्षसिद्धिः॥ तथाचश्रुतिः॥ निचाय्यतंमृत्युमुखात्प्रमुच्यतइति॥ अपिचपरप्रतिषेधेनकाष्ठाशब्देनचपुरुषविष
यमादरंदर्शयन्पुरुषप्रतिपत्त्यर्थैवपूर्वापरप्रवाहोक्तिरितिदर्शयति॥ आध्यानायेत्याध्यानपूर्वकायसम्यग्दर्शनायेत्यर्थः॥ स
म्यग्दर्शनार्थमेवहीहाध्यानमुपदिश्यतेनत्वाध्यानमेवस्वप्रधानं॥१४॥ आत्मशब्दाच्च॥१५॥ इतश्चपुरुषप्रतिपत्त्यर्थैवेयमिं
द्रियादिप्रवाहोक्तिः॥ यत्कारणांएषसर्वेषुभूतेषुगूढोत्मानप्रकाशते॥ दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिप्र
कृतंपुरुषमात्मेत्याह॥ अतश्चानात्मत्वमितरेषांविवक्षितमितिगम्यते॥ तस्यैवचदुर्विज्ञानतांसंस्कृतमतिगम्यतांचदर्शयति
॥ तद्विज्ञानायैवचयच्छेद्वाङ्मनसीप्राज्ञइत्याध्यानंविदधाति॥ नन्वाख्यानंआनुमानिकमप्येकेषामित्यत्र॥ एवमनेकप्रकार
आशयातिशयःश्रुतेःपुरुषेलक्ष्यतेनेतरेषु॥ अपिचसोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदमित्युक्तेकिंतदध्वनःपारंविष्णोः
परमंपदमित्यस्यामाकांक्षायामिंद्रियाद्यनुक्रमेणात्परमपदप्रतिपत्त्यर्थएवायमायासइत्यवसीयते॥७॥ आत्मगृहीतिरितर
वदुत्तरात्॥१६॥ ऐतरेयकेश्रूयते॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृ
जत।अंभोमरीचीर्मरमापइत्यादि॥

गैश्चपुरुषएवप्रतिपाद्यइत्याह॥ आत्मशब्दाच्चेति॥ किंचतद्विष्णोःपरमंपदंपुरुषान्नपरंकिंचिदित्युपक्र
मोपसंहारयोरैकरूप्यात् कृत्स्नफलवदेकपुरुषपरत्वेनैकवाक्यत्वनिश्चयेसतिवाक्यभेदफलभेदकल्पनानयुक्तागौरवादित्याह॥ अपिचेति॥ ९
॥१५॥ आत्मगृहीतिः।मिषत्चलत् लोकानाह अंभइति॥ अंभःस्वर्गःमरीचयोंतरिक्षलोकःमरोमर्त्यलोकः॥ आपःपातालस्थलोकइत्यर्थः॥ ९

ॐ तत्सत्

आत्मशब्दस्य ब्रह्मणि सूत्रात्मनि च प्रयोगात्संशयमाह॥ तत्रेति॥ अत्र पूर्वपक्षे वाक्यस्य सूत्रोपास्तिपरत्वात्परब्रह्मधर्माणामानंदादीनामैतरेयकेनुपसंहारः सिद्धांते ब्रह्मपरत्वादुपसंहार इति फलं॥ पुरुषवाक्याद्भेदप्रसंगादर्थादिवाक्यानां नानार्थादिप्रतिपादकत्वमित्युक्तं तद्वदिहापि प्रजापतेरेतो देवा इति पूर्वस्मात्प्रजापतिवाक्याद्भेदप्रसंगादात्मा वा इत्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टांतेन पूर्वपक्षयति॥ न परमात्मेत्यादिना॥ वाक्यस्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः॥ पूर्वपक्षमाक्षिप्य लोकस्रष्टृत्वलिंगात्तु प्रजापतौ वाक्यान्वय इत्याह नन्वित्यादिना॥ लोका एव महाभूता

तत्र संशयः किं पर एवात्मा इहात्मशब्देनाभिलप्यते॥ उतान्यः कश्चिदिति॥ किं तावत्प्राप्तं॥ न परमात्मेहात्मशब्दाभिलप्यो भवितुमर्हति॥ कस्मात् वाक्यान्वयदर्शनात्॥ ननु वाक्यान्वयः सुतरां परमात्मविषयो दृश्यते प्रागुत्पत्तेरात्मैकत्वावधारणात् ईक्षणपूर्वकस्रष्टृत्ववचनाच्च॥ नेत्युच्यते॥ लोकसृष्टिवचनात् परमात्मनि हि स्रष्टरि गृह्यमाणे महाभूतसृष्टिरादौ वक्तव्या लोकसृष्टिस्त्विहादावुच्यते लोकाश्च महाभूतसंनिवेशविशेषाः॥ तथा चांभःप्रभृतीन् लोकत्वेनैव निर्ब्रवीति॥ अदोंभः परेण दिवमित्यादिना॥ लोकसृष्टिश्च परमेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते॥ तथा हि श्रुतिर्भवति आत्मैवेदमग्र आसीत्पुरुषविध इत्याद्या॥ स्मृतिरपि स वै शरीरी प्रथमः स वै पुरुष उच्यते॥ आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्ततेति॥ ऐतरेयिणोपि अथातो रेतसः सृष्टिः प्रजापते रेतो देवा इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनंति॥ आत्मशब्दोपि तस्मिन्प्रयुज्यमानो दृश्यते॥ आत्मैवेदमग्र आसीत्पुरुषविध इत्यत्र एकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते॥

त्रार

नीत्यत आह॥ लोकाश्चेति॥ लोकशब्दस्य महाभूतेष्वरूढत्वाद्भौतिका एव लोकाः निर्वचनाच्चेत्याह॥ तथा चेति॥ अंभो मरीचीर्मरमाप इति॥ सूत्रयित्वा स्वयमेव श्रुतिर्व्याचष्टे परेण दिवं दिवः परस्ताद्दिवि प्रतिष्ठितस्वर्गमंभसा व्याप्तो यो लोकस्तदंभोंतरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति ननु लोकसृष्टिरपीश्वरादेवास्त्वित्याह॥ लोकेति॥ पुरुषविधो नराकार आत्मा हिरण्यगर्भः॥ आपिपीलिकाभ्यः सर्वमसृजतेत्यर्थः॥ भूतानां लोकानामित्यर्थः॥ प्रकरणादपि लोकस्रष्टा प्रजापतिरित्याह॥ ऐतरेयिणोपीति॥ रेतः कार्यमिति यावत्॥ ब्रह्मलिंगानि प्रजापतौ योजयति॥ आत्मशब्दोपीत्या

ॐ तत्सत्

किंचप्रजाः सृष्ट्वाताः प्रतिभोगार्थं गामानयल्लोकस्रष्टा तथाश्वमानयत्ताभ्यस्तु गवाश्वप्राप्यानतृप्तास्ततः पुरुषशरीरे आनीतेता अब्रुवन्तृप्ताः।
स्मइति अयंचव्यवहारोलोकस्रष्टुः प्रजापतित्वेलिंगमित्याह॥ अपिचेति॥ आत्मशब्दस्य चिदात्मनि मुख्यत्वात्मुख्यग्रहेबाधकाभावादुत्तरस्येक्षण

ईक्षणमपितस्यचेतनत्वाभ्युपगमादुपपन्नं॥ अपिचताभ्योगामानयत्ताभ्योश्वमानयत्ताभ्यः पुरुषमानयत्ता अब्रुवन्इत्येवंजा
तीयकोभूयान्व्यापारविशेषोलौकिकेषुविशेषवत्स्वात्मसुप्रसिद्ध इहानुगम्यते॥ तस्माद्विशेषवानेवकश्चिदिहात्मास्यादिति॥ ए
वंप्राप्तेब्रूमः परएवात्मेहात्मशब्देनगृह्यते इतरवत्॥ यथेतरेषुसृष्टिश्रवणेषुतस्माद्वाएतस्मादात्मनआकाशः संभूतइत्ये
वमादिषुपरस्यात्मनोग्रहणं॥ यथाचेतरस्मिन्लौकिकात्मशब्दप्रयोगेप्रत्यगात्मैवमुख्य आत्मशब्देनगृह्यते॥ तथेहापिभवितु
मर्हति॥ यत्रत्वात्मैवेदमग्रआसीदित्येवमादौपुरुषविधइत्येवमादिविशेषणांतरंश्रूयतेभवेत्तत्रविशेषवतआत्मनोग्रहणं॥ अ
त्रपुनः परमात्मग्रहणानुगुणमेवविशेषणमप्युत्तरमुपलभ्यते॥ सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजतेत्ये वमादि॥ तस्मा
त्तस्यैवग्रहणमितिन्याय्यं॥१६॥ अन्वयादितिचेत्स्यादवधारणात्॥१७॥ वाक्यान्वयदर्शनान्नपरमात्मग्रहणमितिपुनर्यदु
क्तंतत्परिहर्तव्यमत्रोच्यते॥ स्यादवधारणादिति॥ भवेदुपपन्नंपरमात्मनोग्रहणंकस्मादवधारणात्॥ परमात्मग्रहणेहिप्रागु
त्पत्तेरात्मैकत्वावधारणमांजसमवकल्पते॥ अन्यथाह्यनांजसंतत्परिकल्प्येत॥ लोकसृष्टिवचनंतुश्रुत्यंतरप्रसिद्धमहाभूतसृ
ष्ट्यनंतरमितियोजयिष्यामि॥ यथातत्तेजोसृजतेत्येतच्छ्रुत्यंतरप्रसिद्धवियद्वायुसृष्ट्यनंतरमित्ययूयुजं॥ एवमिहापिश्रुत्यं
तरप्रसिद्धोहिसमानविषयोविशेषःश्रुत्यंतरेष्वुपसंहर्तव्योभवति॥ योप्ययंव्यापारविशेषानुगमस्ताभ्योगामानयदित्येवमादिः
सोपिविवक्षितार्थावधारणानुगुण्येनैवगृहीतव्यः॥ नह्ययंसकलःकथाप्रबंधोविवक्षितइतिशक्यतेवक्तुं॥ देरनुकूलत्वात्परमात्म

ग्रहणमितिसिद्धांतयति॥ एवंप्राप्तइति॥ महाभूतसृष्टिपूर्वकंलोकानसृजतेतिश्रुतिर्व्याख्येयेतिभावः॥१६॥ पूर्वपक्षबीजमनूद्यदूषयति॥ अन्वयादि
ति॥ आत्मावाइदमेकएवाग्रआसीत्प्रज्ञानंब्रह्मेतिचोपक्रमोपसंहारस्थात्मब्रह्मश्रुतिभ्यामेकत्वावधारणप्रवेशादिलिंगैश्चलोकस्रष्टृत्वादिलिंगबा
धेनप्रत्यग्ब्रह्मग्राह्यमितिभावः॥

सपरमेश्वरएतमेवसीमानंमूर्ध्नःकेशविभागावसानंविदार्यछिद्रंकृत्वातयाब्रह्मरंध्राख्ययाद्वारालिंगविशिष्टःप्रविष्टवानित्यर्थः॥ मांविनायदिवागादिभिःस्वस्वव्यापारःकृतःअथतदाहंकइतित्वंपदार्थंविचार्यस्वयमेतमेवशोधितमात्मानंब्रह्मततनतमंव्याप्ततममपश्यत्तकारलोपःछांदसः॥ प्रज्ञाचिदात्मानेत्रंनीयतेनेनेतिनियामकंयस्यतत्प्रज्ञानेत्रंचिदात्मनियम्यमित्यर्थः॥ उक्तव्याख्यानेगुणोपसंहारस्यास्फुटत्वात्पादस

तत्प्रतिपत्तौपुरुषार्थाभावात्॥ ब्रह्मात्मत्वंत्विहविवक्षितं॥ तथाह्यंभःप्रभृतीनांलोकानांलोकपालानांचाग्न्यादीनांसृष्टिंशिष्ट्वाकरणानिकरणायतनंचशरीरंउपदिश्यसएवस्रष्टाकथंन्विदंमदृतेस्यादितिवीक्ष्यइदंशरीरंप्रविवेशेतिदर्शयति॥ सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतेति॥ पुनश्चयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितमित्येवमादिनाकरणव्यापारविवेचनपूर्वकंअथकोहमितिवीक्ष्यसएतमेवपुरुषंब्रह्मततममपश्यदितिब्रह्मात्मत्वदर्शनमवधारयति॥ तथोपरिष्टादेषब्रह्मैषइंद्रइत्यादिनासमस्तभेदजातंसहमहाभूतैरनुक्रम्यसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकःप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मेतिब्रह्मात्मत्वदर्शनमेवावधारयति॥ तस्मादिहात्मगृहीतिरित्यनपवादं॥ अपरायोजना॥ आत्मगृहीतिरितरवदुत्तरात्॥ वाजसनेयकेकतमआत्मेतियोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषइत्यात्मशब्देनोपक्रम्यतस्यैवसर्वसंगविनिर्मुक्तत्वप्रतिपादनेनब्रह्मात्मतामवधारयति॥ तथाह्युपसंहरतिसवाएषमहानजआत्माजरोऽमरोऽमृतोऽभयोब्रह्मेति॥ छांदोग्येतुसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्यंतरेणैवाऽऽत्मशब्दमुपक्रम्योदर्केसआत्मातत्त्वमसीतितादात्म्यमुपदिशति॥ तत्रसंशयः॥ तुल्यार्थत्वंकिमनयोराम्नानयोःस्यात्॥ अतुल्यार्थत्वंवेति॥ अतुल्यार्थत्वमितितावत्प्राप्तंअतुल्यत्वादाम्नानयोः॥ ६॥

गतिरितिमत्वैवव्याख्यांतरमाह॥ अपरेति॥ उदर्कः॥ उपसंहारः॥ सच्छब्दस्यात्मानात्मसाधारण्यात्संशयमाह॥ तत्रेति॥ पूर्वपक्षेसत्तासामान्येब्रह्मात्मत्वसंपदुपास्तिःछांदोग्ये॥ वाजिश्रुतौनिर्गुणविद्येतिभेदात्तयोर्गुणानुपसंहारः॥ सिद्धांतेतूभयत्रनिर्गुणविद्यैक्यादुपसंहारइतिफलभेदः॥ पदानांजातौशक्तिग्रहात्सच्छब्दोपिसत्ताजातिवाचीत्युपक्रमस्यनिश्चितार्थत्वादसंजातविरोध्युपक्रमबलेनतादात्म्योपदेशःसंपत्तिपरतयानेयइतिपूर्वपक्षनिष्कर्षः॥

शा·भा· पूर्वत्रवाक्यैक्यादर्थादिपरत्वंन्यत्ता विधैक्यमुक्तं इहतु सदात्मशब्दाभ्यांजात्यात्मवाचिभ्यामुपक्रमभेदाद्वाक्यभेदेसतिविद्याभेद इतिप्रत्युदाहरणसं अ·पा·
र·प्र·टी· गतिः नचात्मशब्दोजातिवाचकः॥ आत्मव्यक्तेरैक्याज्जात्यभावात्किंतुसर्वांतरवस्तुवाचकः कश्चित्तजातिवाचित्वेप्युपक्रमभेदः स्फुटएवस ३ ३
३३४ त्तात्मत्वयोर्भेदादितिमंतव्यं॥ सिद्धांतयति॥ नचेत्यादिना॥ उपक्रमान्वयादिति॥ उपक्रमाधीनत्वादुपसंहारस्येत्यर्थः॥ नच्चावधारणंसत्य

नह्याम्नानवैषम्येसत्यर्थसाम्यंयुक्तंप्रतिपत्तुं॥ आम्नानतंत्रत्वादर्थपरिग्रहस्य॥ वाजसनेयकेचात्मशब्दोपक्रमादात्मतत्त्वो
पदेशइतिगम्यते॥ छांदोग्येतूपक्रमविपर्ययादुपदेशविपर्ययः॥ ननुछंदोगानामप्यस्तिउदर्केतादात्म्योपदेशइत्युक्तं॥ सत्यमुक्तमुप-
क्रमतंत्रत्वादुपसंहारस्यतादात्म्यसंपत्तिःसेतिमन्यते॥ तथाप्राप्तेऽभिधीयते॥ आत्मगृहीतिः सदेवसोम्येदमग्रआसीदित्यत्र
छंदोगानामपिभवितुमर्हतिइतरवत्॥ यथाकतमआत्मेत्यत्रवाजसनेयिनामात्मगृहीतिस्तथैवकस्मात्॥ उत्तरात्तादात्म्योप
देशात्॥ अन्वयादितिचेत्स्यादवधारणात्॥ यदुक्तं॥ उपक्रमान्वयात् उपक्रमेचात्मशब्दश्रवणाभावान्नात्मगृहीतिरितितस्य
कः परिहारइतिचेत्सोभिधीयते॥ स्यादवधारणादितिभवेदुपपन्नेहात्मगृहीतिः॥ अवधारणात् तथाहियेनाश्रुतंश्रुतं
भवत्यमतंमतमविज्ञातंविज्ञातमितिएकविज्ञानेनसर्वविज्ञानमवधार्यतत्संपिपादयिषयासदेवेत्याह॥ तच्चात्मगृहीतौ
सत्यांसंपद्यते॥ अन्यथाहियोयंमुख्यआत्मासतविज्ञातइतिनैवसर्वविज्ञानंसंपद्येत॥ तथाप्रागुत्पत्तेरेकत्वावधारणंजीवस्य-
चात्मशब्देनपरामर्शःस्वापावस्थायांचतत्स्वभावसंपत्तिकथनंपरिचोदनापूर्वकंचपुनःपुनस्तत्त्वमसीत्यवधारणमितिच राम·
सर्वमेतत्तादात्म्यप्रतिपादनायामेवावकल्पते॥ नतादात्म्यसंपदायां॥ नचात्रोपक्रमतंत्रत्वोपन्यासोन्याय्यः॥ ❦ ॥ ३३४

देनात्मगृहीतौसत्यांयुज्यतइत्याह॥ नचेतिसदेकमेवेत्यवधारणंअनेनजीवेनात्मनेतिसदेवताकर्तृकोजीवस्यात्मशब्देनपरामर्शः॥ सुप्तोजीवःसता
संपन्नोभवतीतिकथनंभूयएवमाभगवान्विज्ञापयत्विति परिचोदना॥ सदितिपदेनसत्ताश्रयउच्यते॥ नजातिमात्रंकर्तृवाचिशतृप्रत्ययांतत्वात्॥ त
स्याचोपक्रमेसत्ताश्रयसामान्योक्तौकआश्रयइत्याकांक्षायांवाक्यशेषादात्मेतिनिश्चीयतइत्याह॥ नचेति॥

सच्छब्दस्यात्मानात्मसाधारण्यं उपेत्योक्तं तदपि नास्ति आकाशपदवत् सत्पदस्य व्यक्तिवाचित्वात् ॥ व्यक्तिश्च बाधायोग्या चिदात्मैवेति न वाजिच्छंदोगयोरुपक्रमवैषम्यमित्याह ॥ सच्छब्देति ॥ वैषम्यमुपेत्याप्याह ॥ आम्नानेति वाजिवाक्ये त्वमर्थस्य तत्तदर्थपर्यन्तस्य लक्ष्यस्य प्रतिपादनं छांदोग्यवाक्ये तु तदर्थस्य त्वमर्थपर्यंतस्य प्रतिपादनमिति प्रकारभेदेपि वाक्यार्थैक्याद्विद्यैक्यमिति ॥ फलितमाह ॥ तस्मादिति ॥ १८ ॥ कार्याख्यानादपूर्वं ॥ मे किमन्नं किं वासः इति प्राणेन पृष्टा वागादय ऊचुः ॥ यदिदं किंचाश्वभ्य आकृमिभ्यस्तत्तेन्नमापो वास इति सर्वप्राणिभिर्भुज्यमानं यदिदं प्रसिद्धं।

न ह्युपक्रमे आत्मत्वसंकीर्तनमनात्मत्वसंकीर्तनं वास्ति सामान्योपक्रमश्च न वाक्यशेषगतेन विशेषेण विरुध्यते विशेषाकांक्षित्वात्सामान्यस्य ॥ सच्छब्दार्थोपि च पर्यालोच्यमानो न मुख्यादात्मनोन्यः संभवति ॥ अतोन्यस्य वस्तुजातस्यारंभणशब्दादिभ्योऽनृतत्वोपपत्तेः ॥ आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति ॥ आहर पात्रं पात्रमाहरेत्येवमादिष्वर्थसाम्येपि तद्दर्शनात् ॥ तस्मादेवंजातीयकेषु वाक्येषु प्रतिपादनप्रकारभेदेपि प्रतिपाद्यार्थाभेद इति सिद्धं ॥ ८ ॥ १८ ॥ कार्याख्यानादपूर्वं ॥ १८ ॥ छंदोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्यादं प्राणस्यान्नमाम्नायन्तस्यैवापो वास आमनन्ति ॥ अनंतरं च छंदोगा आमनन्ति तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधतीति ॥ वाजसनेयिनस्त्वामनन्ति तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाऽऽचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाऽऽचामेदेतमेव तदनमनग्नं कुरुत इति ॥ तत्र त्वाचमनमनग्नताचिन्तनं च प्राणस्य प्रतीयते ॥ तत्किमुभयमपि विधीयत उताऽऽचमनमेवोतानग्नताचिन्तनमेवेति विचार्यते ॥

श्वादिपर्यन्तमन्नं तत्प्राणस्य तवान्नं आप आच्छादनमित्युपासकेन चिन्तनीयमित्यर्थः ॥ शाखाद्वयेप्यविशेषश्रुतिमुक्त्वा विशेषश्रुतिभेदमाह ॥ अनंतरं चेति ॥ तस्मादपां प्राणवस्त्रत्वादशिष्यन्तोशनं कुर्वन्तः श्रोत्रिया एतत्कुर्वन्ति किं तद्भोजनात्पूर्वमूर्ध्वं चाचामन्तीति यत्तत्तदद्भिः प्राणं परिदधत्याच्छादयन्तीत्यर्थः ॥ पूर्वोत्तराचमनसंबंधिनीष्वप्सु प्राणवासस्त्वचिन्तनरूपमनग्नताध्यानं कार्यमिति भावः ॥ तत्तस्मादित्युक्तार्थे यतः पूर्वे विद्वांसोशनात्प्राक् ऊर्ध्वं चाचामन्त एतमेवानं प्राणं तत्तेनाचमनेनानग्नमाच्छादितं कुर्वन्तो मन्यन्ते चिन्तयन्ति तस्मादेवंविदिदानीन्तनोप्युपासक एवं कुर्यादिति वाजिश्रुत्यर्थः ॥ अत्रोभयोरप्यपूर्वत्वात्संशयमाह तत्किमिति ॥

संदिग्धसदुपक्रमस्यवाक्यशेषान्निर्णयवदाचामंतीतिपदस्यविधित्वसंदेहेआचामेदितिवाक्यशेषाद्विधित्वनिर्णयइतिदृष्टांतसंगत्यापूर्वपक्षमाह॥ किं॥
नावदिति॥ ज्ञानसाधनोपासनांगविधिविचारात्मादसंगतिर्बोध्या॥ पूर्वपक्षेप्राणविद्यांगत्वेनापूर्वाचमनंविहितमन्यत्रोपसंहर्तव्यमितिफलं॥ सिद्धांतेनस्यावि
धेयत्वान्नांगत्वेनोपसंहारइतिविवेकः॥ उभयविधानेवाक्यभेदःस्यादित्यरुच्यापक्षांतरमाह॥ अथवेति॥ प्रशस्तंहीदमाचमनंयस्मादनेनप्राणमनग्नंमन्यंत
इतिश्रुतिः॥ प्रसिद्धानुवादेनाप्रसिद्धंविधेयमितिन्यायात्सिद्धांतयति॥ एवमिति॥ प्रयतस्यप्रयतत्वनोभावःप्रायत्यंशुद्धिस्तदर्थमित्यर्थः॥ स्मृत्याशुद्ध्यर्थंकार्य॥

किंतावत्प्राप्तमुभयमपिविधीयतइतिकुतः॥ उभयस्याप्यवगम्यमानत्वात्उभयमपिचैतदपूर्वत्वाद्विध्यर्हं॥ अथवाऽऽचमनमेव
विधीयते॥ विस्पष्टाहितस्मिन्विधिविभक्तिः॥ तस्मादेवंविदशिष्यन्नाचामेदशित्वाचाचामेदिति॥ तस्यैवस्तुत्यर्थमनग्नतासंकीर्त-
नमित्येवंप्राप्तेब्रूमः॥ नाचमनस्यविधेयत्वमुपपद्यतेकार्याख्यानात्॥ प्राप्तमेवहीदंकार्यत्वेनाचमनंप्रायत्यार्थंस्मृतिप्रसिद्धमन्वाख्या-
यते॥ नन्वियंश्रुतिरस्याःस्मृतेर्मूलंस्यात्॥ नेत्युच्यतेविषयनानात्वात्॥ सामान्यविषयाहिस्मृतिःपुरुषमात्रसंबद्धंप्रायत्यार्थमाचम-
नंप्रापयति॥ श्रुतिस्तुप्राणविद्याप्रकरणपठितातद्विषयमेवाचमनंविदधतीविदध्यात्॥ नचभिन्नविषययोःश्रुतिस्मृत्योर्मूलमू-
लिभावोवकल्पते॥ नचेयंश्रुतिःप्राणविद्यासंयोग्यपूर्वमाचमनंविधास्यतीतिशक्यमाश्रयितुंपूर्वस्यैवपुरुषमात्रसंयोगिनआच-
मनस्येहप्रत्यभिज्ञायमानत्वात्॥ अतएवचनोभयविधानंउभयविधानेचवाक्यंभिद्येत॥ तस्मात्प्राप्तमेवाशिशिषतामशित-
वतांचउभयत्राचमनमनूद्यसत्तमेवतदनमनग्नंकुर्वंतोमन्यंतइतिप्राणस्यानग्नताकरणसंकल्पोऽनेनवाक्येनाचमनीयास्वप्सुप्रा-
णविद्यासंबंधित्वेनापूर्वउपदिश्यते॥

त्वेनविहितंसकलकर्मांगतयाप्राप्ताचमनानुवादेनापूर्वमनग्नताध्यानमेवविधीयतइतिसूत्रार्थः॥ स्मार्तमा-
चमनंश्रुत्यानानूद्यतेकिंत्वनयाश्रुत्याविहितंस्मृत्यानूद्यतइतिशंकते॥ नन्विति॥ श्रुतिस्मृत्योरनयोर्नमूलमूलीभावःभिन्नविषयत्वादितिपरिहरति
॥ नेति॥ द्विजोनित्यमुपस्पृशेदित्याद्यास्मृतिः॥ आचमनांतरविधिमुपेत्यमूलमूलित्वंनिरस्तंसंप्रतिविधिरसिद्धइत्याहनचेयंश्रुतिरिति॥ अतएवे-
ति॥ आचमनविध्यभावादेवेत्यर्थः॥ अप्सुप्राणवासस्त्वध्यानात्मः संकल्पः प्राणविद्यांगत्वेनविधीयतइत्याह तस्मादिति॥ ॥

स्वयंचेति॥ अपूर्वत्वादित्यर्थः॥ शुध्यर्थंविनियुक्तस्याचमनस्यप्राणाच्छादनार्थत्वंविरुद्धमित्याशंक्याह॥ नचैवंसतीति॥ आचमनस्याच्छादनार्थत्वमसिद्धमित्यर्थः किंचयथापूर्ववाक्येप्राणस्यान्नध्यानमंगंविहितं तथात्राप्युवासोध्यानंविधीयते अन्यथाचमनविधौपूर्वत्रध्यानविधिरुक्तस्तत्रक्रियाविधिरित्यर्द्धवैशसंस्यादित्याह॥ अपिचेति॥ भक्षयेदितिशब्दाभावात्स्वाद्यन्नस्यसर्वस्यमनुष्येणोपासकेन भोक्तुमशक्यत्वाच्चनपूर्ववाक्येक्रियाविधिरित्यर्थः॥ इतश्चाचमन

नचायमनग्नतावादः आचमनस्तुत्यर्थइतिन्याय्यं आचमनस्याविधेयत्वात्॥ स्वयंचानग्नतासंकल्पस्यविधेयत्वप्रतीतेः॥ नचैवंसत्येकस्याचमनस्योभयार्थताभ्युपगताभवतिप्रायत्यार्थतापरिधानार्थताचेति क्रियांतरत्वाभ्युपगमात्क्रियांतरमेवह्याचमनंनामप्रायत्यार्थंपुरुषस्याभ्युपगम्यते॥ तदीयासुत्वप्युवासःसंकल्पनंनामक्रियांतरमेवपरिधानार्थंप्राणस्याभ्युपगम्यत इत्यनवद्यं॥ अपिचयदिदंकिंचाश्वभ्यआक्रिमिभ्यआकीटपतंगेभ्यस्तत्तेन्नमित्यत्रतावत्सर्वान्नाभ्यवहारश्चोद्यत इतिशंक्यंवक्तुं॥ अशब्दत्वादशक्यत्वाच्चसर्वंतुप्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते॥ तत्साहचर्याच्चापोवासइत्यत्रापिनापामाचमनंचोद्यते॥ प्रसिद्धास्वेवत्वाचमनीयास्वप्सुपरिधानदृष्टिश्चोद्यत इतियुक्तं नह्यर्धवैशसंसंभवति॥ अपिचाचामंतीतिवर्त्तमानोपदेशित्वान्नायंशब्दोविधिक्षमः॥ ननुमन्यंत इत्यपिसमानंवर्त्तमानोपदेशित्वं॥ सत्यमेवमेतत्॥ अवश्यविधेयत्वेत्वन्यतरस्मिन्वासःकार्याख्यानात् अपोवासःसंकल्पनमेवापूर्वंविधीयतेनाचमनं॥ पूर्ववद्धितदित्युपपादितं॥ यदप्युक्तंविस्पष्टाचमनेविधिविभक्तिरितितदपिपूर्ववत्त्वेनैवाचमनस्यप्रत्युक्तं॥ अतएवाचमनस्याविधित्सितत्वादेतमेवतदनमनग्नंकुर्वंतोमन्यंत इत्यत्रैवकाण्वाःपर्यवस्यंतिनामनंति तस्मादेवंविदित्यादि॥ तस्मान्माध्यंदिनानामपिपाठेआचमनानुवादेनैवंवित्त्वमेवप्रकृतंप्राणवासोवित्त्वंविधीयत इतिप्रतिपत्तव्यं॥

मत्रनविधेयमित्याह॥ अपिचेति॥ अनग्नंमन्यंत इत्यत्रवासस्त्वध्यानमपिनविधेयंदोषसाम्यादितिशंकते॥ नन्विति॥ उभयोरप्यनुवादत्वेवैफल्यादवश्यमेकानुवादेनैकंविधेयंतच्चविधेयंवासोध्यानमेववासःकार्यस्यानग्नत्वस्याख्यानादपूर्वत्वाच्चेतिसमाधानार्थः॥ पूर्ववदितिस्मृत्याप्राप्तमित्यर्थः॥ आचामेदितिनविधिः किंतुविष्णुरूपांसुपस्पृश्य इतिवदनुवाद इत्यत्रलिंगमाह॥ अतएवेति॥ तस्मादेवंविदशिष्यन्नाचामेदशित्वाचाचामेदितिवाक्यस्यविधित्वेकाण्वैरपठनंलिंगमित्यर्थः॥ १॥

तर्हिपाठबलान्माध्यंदिनेआचमनविधिःकाण्वेध्यानविधिरितिकस्यचिन्मतंनिराकरोति॥योपीति॥१८॥समानएवंचाभेदात्॥शांडि-
ल्येनदृष्टत्वात्तन्नाम्नांकिता अंतर्हृदयेव्रीह्यादिवत् सूक्ष्मस्तिष्ठतीत्यर्थः॥अभ्यासप्रत्यभिज्ञानाभ्यांसंशयमाह॥नन्वेति॥गुणानुसंहारोपसं-
हारौपूर्वोत्तरपक्षयोःफलं॥पूर्वत्रप्राप्ताचमनानुवादेनानग्नताध्यानविधिरुक्तः॥इहत्वेकशाखायांविप्रकृष्टदेशस्थवाक्ययोरेकस्यविधि-

योप्ययमभ्युपगमःक्वचिदाचमनंविधीयते क्वचिद्वासोविज्ञानमितिसोपिनसाधुः॥आपोवासइत्यादिकायावाक्यप्रवृत्तेःसर्व-
त्रैकरूप्यात्॥तस्माद्वासोविज्ञानमेवेहविधीयतेनाचमनमितिन्याय्यं॥१८॥समानएवंचाभेदात्॥१९॥वाजसनेयिशाखायामग्निर-
हस्येशांडिल्यनामांकिताविद्याविज्ञाता॥तत्रचगुणाःश्रूयंतेसआत्मानमुपासीतमनोमयंप्राणशरीरंभारूपमित्येवमादयः॥त-
स्यामेवशाखायांबृहदारण्यकेपुनःपठ्यतेमनोमयोयंपुरुषोभाःसत्यस्तस्मिन्नंतर्हृदयेयथाव्रीहिर्वायवोवासएषसर्वस्येशा-
नःसर्वस्याधिपतिःसर्वमिदंप्रशास्तियदिदंकिंचेति॥तत्रसंशयः॥किमियमेकाविद्याग्निरहस्यबृहदारण्यकयोर्गुणोपसंहा-
रश्चउतनेद्वेइमेविद्येगुणानुपसंहारश्चेति॥किंतावत्प्राप्तंविद्याभेदोगुणव्यवस्थाचेति॥कुतःपौनरुक्त्यप्रसंगात्॥भिन्नासुहिशा-
खास्वध्येतृवेदितृभेदात्पौनरुक्त्यपरिहारमालोच्यविद्यैकत्वमध्यवसायैकत्राऽतिरिक्तागुणाइतरत्रोपसंह्रियंतेप्राणसंवादा-
दिष्वित्युक्तंएकस्यांपुनःशाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारंपौनरुक्त्यंनविप्रकृष्टदेशस्थैकाविद्याभवितुमर्हति
॥नचात्रैकमाम्नानंविद्याविधानार्थंअपरंगुणविधानार्थमितिविभागःसंभवति॥तदाह्यतिरिक्ताएवगुणाइतरत्रेतरत्रचाम्ना-
येरन्नसमानाः॥समानाअपितूभयत्राम्नायंतेमनोमयत्वादयस्तस्मान्नान्योन्यंगुणोपसंहारइत्येवंप्राप्तेब्रूमहे॥

त्वमन्यस्यानुवादत्व-
मित्यनिश्चयात्द्वयोरपिविद्याविधित्वमितिप्रत्युदाहरणेनपूर्वपक्षयति॥किंतावदिति॥यत्पुनरुक्तंनद्विद्यांतरमितितिनव्याप्तिःप्राणपंचाग्न्यादि-
विद्यासुव्यभिचारादित्याशंक्यशाखाभेदेपुनरुक्तिरसिद्धेत्युक्तमित्याह॥भिन्नास्विति॥यथाग्निहोत्रवाक्येकर्मविधिःदध्नाजुहोतिइतिवाक्येगु-
णविधिस्तथात्राप्यस्तुनविद्याभेदइत्याशंक्याह॥नचात्रैकमिति॥उक्तगुणानांपुनरुक्तिर्व्यर्थास्यात्अतोभ्यासाद्विद्याभेदःप्रयाजभेदवदितिभा-

उक्तगुणोक्तिर्नवृथाकतिपयगुणविशिष्टोपास्याभेदप्रत्यभिज्ञानार्थत्वादतउपास्यरूपाभेदाद्भिन्नशाखास्विवसमानशाखायामपिविद्यैक्यमितिसिद्धांत
सूत्रंयोजयति॥ यथेति॥ सौत्रश्चकारोप्यर्थोव्याख्यातः यत्रबहवोगुणाःश्रुतास्तत्रप्रधानविधिरन्यत्रतदनुवादेनगुणविधिरितिनिश्चयादग्निरहस्ये
प्रधानविधिरुत्तरत्रगुणविधिरितिभावः॥१९॥ संबंधादेवमन्यत्रापि॥ सद्भूतत्रयंत्यद्याख्याकाशात्मकंसत्यंपरोक्षभुतात्मकंहिरण्यगर्भाख्यंब्रह्म

यथाभिन्नासुशाखासुविद्यैकत्वंगुणोपसंहारश्चभवतिएवमेकस्यामपिशाखायांभवितुमर्हति॥ उपास्याभेदात्॥ तदेवहिब्र-
ह्ममनोमयत्वादिगुणकमुभयत्राप्युपास्यंअभिन्नंप्रत्यभिजानीमः॥ उपास्यंचरूपंविद्यायाः॥ नचविद्यमानेरूपाभेदेविद्याभेदमध्यव-
सातुंशक्नुमः॥ नापिविद्याऽभेदेगुणव्यवस्थानं॥ ननुपौनरुक्त्यप्रसंगाद्विद्याभेदोऽध्यवसितोनेत्युच्यते॥ अर्थविभागोपपत्तेःएकंह्याम्ना-
नंविद्याविधानार्थंअपरंगुणविधानार्थमितिनकिंचिन्नोपपद्यते॥ नन्वेवंसतियत्पठितमग्निरहस्येतदेवबृहदारण्यकेपठितव्यंस
एषसर्वस्येशानइत्यादियत्तुपठितमेवमनोमयइत्यादितन्नपठितव्यं॥ नैषदोषः॥ तद्बलेनैवप्रदेशांतरपठितविद्याप्रत्यभिज्ञानात्॥
समानगुणाम्नानेनहिविप्रकृष्टदेशांशांडिल्यविद्यांप्रत्यभिज्ञाप्यतस्यामीशानत्वाद्युपदिश्यते॥ अन्यथाहिकथंतस्यामयंगुणविधि-
रभिधीयते॥ अपिचाप्राप्तांशोपदेशेनार्थवतिवाक्येसंजातेप्राप्तांशपरामर्शस्यनित्यानुवादतयाप्युपपद्यमानत्वान्नतद्बलेनप्रत्य-
भिज्ञाबाधितुंशक्यते॥ तस्मादत्रसमानायामपिशाखायांविद्यैकत्वंगुणोपसंहारश्चेत्युपपन्नं॥१९॥१०॥ संबंधादेवमन्यत्रापि॥२०॥
बृहदारण्यकेसत्यंब्रह्मेत्युपक्रम्यतद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायंदक्षिणेऽक्षन्पुरुषइतितस्यै-
वसत्यस्यब्रह्मणोऽधिदैवतमध्यात्मंचायतनविशेषमुपदिश्यव्याहृतिशरीरत्वंचसंपाद्यद्वेउपनिषदावुपदिश्येतेतस्योपनिषदहरित्य।
((धिदैवतंतस्योपनिषदहमित्य
पक्रम्यतदुक्तंयत्सत्यंतत्सयोसावादित्यःकिंमंडलंनतत्रस्थानेपुरुषःकरणात्मकःसएवाध्यात्ममक्षिस्थान
स्यइत्युपदिश्यतस्यभूरितिशिरोभुवइतिबाहूस्वरितिपादावितिव्याहृतिरूपंशरीरमुक्त्वाद्वेउपनिषदौरहस्यदेवतानामनीउपदिश्येतेतस्यादित्य।
मंडलस्थस्याहरितिनामप्रकाशकत्वात्तस्याक्षिस्थस्याहमितिनामप्रत्यक्त्वादितिइदंनामद्वयंविषयस्तत्रनामिनःसत्यस्यब्रह्मणएकत्वा-

स्थानभेदोक्तेश्च संशयमाह ॥ नवेति ॥ पूर्वपक्षे प्रतिस्थानं नामद्वयानुष्ठानं सिद्धान्ते यथाश्रुत्यैकैकनामानुष्ठानमिति फलं दृष्टान्तसंगत्या पूर्वपक्षसूत्रं । व्याचष्टे ॥ यथेति ॥ यथा विद्यैक्यादुपसंहार उक्तः एवमन्यत्राप्येकविद्यायामुपसंहारो भवितुमर्हतीत्यर्थः ॥ सत्यं ब्रह्मेत्युपक्रमाभेदस्तावेनावस्थादित्यपुरुषावन्योन्यस्मिन्प्रतिष्ठितौ आदित्यरश्मीनां चक्षुषि चक्षुषश्चादित्ये प्रतिष्ठानादिति व्यतिषक्तपाठो मिथःसंश्लेषपाठस्ताभ्यां विद्यैक्यसिद्धिः ॥ विद्यैक्ये

तत्र संशयः ॥ किमविभागेनैवोभे अप्युपनिषदावुभयत्रानुसंधातव्ये उत विभागेनैकाधिदैवमेकाध्यात्ममिति ॥ तत्र सूत्रेणैवोपक्रमते ॥ यथा शांडिल्यविद्यायां विभागेनाप्यधीतायां गुणोपसंहार उक्तः ॥ एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति ॥ एकविद्याभिसंबंधात् ॥ एका हीयं सत्यविद्याधिदैवमध्यात्मं चाधीता उपक्रमाभेदात् व्यतिषक्तपाठाच्च ॥ कथं तस्यामुदितो धर्मस्तस्यामेव न स्यात् ॥ यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितः स ग्रामगते ऽरण्यगते च तुल्यवदेव भवति ॥ तस्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरिति ॥ २० ॥ एवं प्राप्ते प्रतिविधत्ते ॥ न वा विशेषात् ॥ २१ ॥ न वोभयोरुभयत्र प्राप्तिः ॥ कस्माद्विशेषात् ॥ उपासनस्थानविशेषोपनिबंधादित्यर्थः ॥ कथं स्थानविशेषोपनिबंध इति ॥ उच्यते ॥ य एष एतस्मिन्मंडले पुरुष इति ह्याधिदैविकं पुरुषं प्रकृत्य तस्योपनिषदहरिति श्रावयति ॥ योऽयं दक्षिणेक्षन्पुरुष इति ह्याध्यात्मिकं पुरुषं प्रकृत्य तस्योपनिषदहमिति ॥ तस्येति चैतत्संनिहितालंबनं सर्वनाम ॥ तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदिश्येते कुत उभयोरुभयत्र प्राप्तिः ॥ नन्वेक एवायमधिदैवतमध्यात्मं च पुरुषः एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात् ॥ सत्यमेवमेतत् ॥ एकस्यापि त्ववस्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात्तदवस्थस्यैव सा भवितुमर्हति ॥

पि किं स्यात्तत्राह ॥ कथमिति ॥ विद्यैक्येऽपि स्थानभेदादुपनिषदोरसंकरः स्यादित्याशंकां दृष्टान्तेन परिहरति योहीति ॥ २१ ॥ नाम्नैक्यान्नाम संकरो युक्तः तथा चास्मिन्स्थो हरिरिति नामवान्सत्यब्रह्मत्वादादित्यस्थवदिति प्राप्ते सिद्धान्तसूत्रं योजयति ॥ न वेति ॥ नाम्नोरुपासनस्थानविशिष्टसंबंधित्वादित्यर्थः ॥ तस्योपनिषदहरहमिति च वाक्यद्वयेन तच्छब्दपरामृष्टयोः संनिहितस्थानविशिष्टयोः पुरुषयोर्नामसंबंधपरेणोपसंहारानुमानं बाध्यमिति भावः ॥ विशेष्यैक्यान्नामसंकर इत्याशंक्य स्थानभेदेन विशिष्टपुरुषभेदान्नामव्यवस्थामा

विशिष्टसंबंधे दृष्टांतमाह॥ अस्तीति प्रतिदृष्टांतस्य स्वस्वरूपसंबंधित्वाद्विशिष्टे ध्येये प्रकृते दृष्टांतत्वं नास्तीत्याह॥ ग्रामेति॥ २१॥ उक्तनामव्यवस्थायामतिदेशो लिंगमित्याह॥ दर्शयति चेति॥ विद्यैक्याद्देवोपसंहारसिद्धावतिदेशोदृष्टार्थः स्यात्तस्मादेकविद्यायामपि स्थानभेदेनोक्तगुणानां विनातिदेशमनुपसंहार इति सिद्धं॥ २२॥ संभृतिद्युव्याप्त्यपि चातः॥ ब्रह्मैव ज्येष्ठं कारणं येषां तानि ब्रह्मज्येष्ठानि निलोपश्छांदसः वीर्याणि पराक्रमविशेषा आकाशोत्पादनादयः॥ तानि च वीर्याणि संभृतानि निर्विघ्नं समृद्धानि सर्वं नियंतुः कार्ये विघ्नकर्तुरसत्त्वात्॥ तच्च ज्येष्ठं ब्रह्माग्रे देवाद्युत्पत्तेः प्रागेव दिवं स्वर्गमाततान व्याप्तवत् तस्य सर्वव्यापक

अस्ति चायं दृष्टांतः सत्यप्याचार्यस्वरूपानपाये यदाचार्यस्यासीनस्यानुवर्त्तनमुक्तं न तत्तिष्ठतो भवति॥ यच्च तिष्ठत उक्तं न तदासीनस्येति॥ ग्रामारण्ययोस्त्वाचार्यस्वरूपानपायात्तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावादुभयत्रतुल्यवद्भाव इत्यदृष्टांतः सः॥ तस्माद्व्यवस्थाऽनयोरुपनिषदोः॥ २१॥ दर्शयति च॥ २२॥ अपि चैवंजातीयकानां धर्माणां व्यवस्थेति लिंगदर्शनं भवति॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति॥ कथमस्य लिंगत्वमिति तदुच्यते॥ अक्ष्यादित्यस्थानभेदभिन्नान् धर्मानन्योन्यस्मिन्ननुपसंहार्यान्पश्यन्निहातिदेशेनादित्यपुरुषगतान् रूपादीनक्षिपुरुष उपसंहरति तस्यैतस्य तदेव रूपमित्यादिना॥ तस्माद्व्यवस्थिते एवैते उपनिषदाविति निर्णयः॥ २२॥ ११॥ संभृतिद्युव्याप्त्यपि चातः॥ २३॥ ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानेत्येवं राणायनीयानां खिलेषु वीर्यसंभृतिद्युनिवेशप्रभृतयो ब्रह्मणो विभूतयः पठ्यंते॥ तेषामेव चोपनिषदि शांडिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यंते॥ तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसंह्रियेरन्न वेति विचारणायां ब्रह्मसंबंधादुपसंहारप्राप्तौ पठति॥ संभृतिद्युव्याप्तिप्रभृतयो विभूतयः शांडिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः॥

मित्यर्थः॥ सर्वमाप्यं स्पर्द्धानर्हत्वमिति वाक्यशेषस्था गुणाः प्रभृतिपदग्राह्याः॥ खिलेष्विति॥ विधिनिषेधशून्यवाक्येष्वित्यर्थः॥ ब्रह्मसंबंधाद्विद्याभेदभानाच्च संशयमाह॥ नान्विति अनारभ्याधीतब्रह्मविभूतीनां ब्रह्मसंबंधेन सर्वब्रह्मविद्यासु प्रत्यभिज्ञानादुपसंहार इति पूर्वपक्षः॥ सिद्धांतमाह॥ संभृतीति॥ संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ति तदपि सर्वत्र नोपसंहर्तव्यमुपनिषदोरिव व्यवस्थापकविशेषयोगादिति सूत्रयोजना आध्यात्मिकायतनविशेषयुक्तासु विद्यास्वपि॥

शा·भा·
र·प्र·दी·
३३८

अ·पा
३ ३

दैविकविभूतीनांप्रत्यभिज्ञानेहेत्वभावान्नप्राप्तिरित्युक्तेहेतुंशंकते॥नन्वेतास्विति॥आधिदैविकत्वसाम्यादाध्यात्मिकायतनहीनत्वसाम्याद्वातत्तद्विद्या
सुसंभृत्यादीनांप्राप्तिरितिशंकार्थः॥उक्तहेतुद्वयंनगुणप्रापकमाधिदैविकविद्यानांशांडिल्यदहरादीनामायतनहीनविद्यानांचमिथोगुणसांकार्यप्रसंगा
त्तस्मात्कतिपयसमानगुणविशिष्टोपास्यरूपैक्यंविद्यैक्यमावहद्गुणप्राप्तिहेतुस्तदभावान्नप्राप्तिरितिपरिहरति॥सत्यमित्यादिना॥स्थानविशिष्टभेदान्न

षउएववामनीए४

अतएवचायतनविशेषयोगात्तथाहिशांडिल्यविद्यायांहृदयायतनत्वंब्रह्मणउक्तंएषमेआत्मांतर्हृदयइति॥तद्वदेवदहरविद्यायाम
पिदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशइति॥उपकोसलविद्यायांतुअस्यायतनत्वंयएषोक्षिणिपुरुषोदृश्यतइति॥एवंतत्रतत्रत
त्तदाध्यात्मिकमायतनमेतासुविद्यासुप्रतीयते॥आधिदैविकास्त्वेताविभूतयःसंभृतिद्युव्याप्तिप्रभृतयःतासांकुतएतासुप्राप्तिः॥नन्वे
तास्वप्याधिदैविकोविभूतयःश्रूयंतेज्यायान्दिवोज्यायानेभ्योलोकेभ्यःएषउएवभामनीरेषहिसर्वेषुलोकेषुभातियावान्वाअयमा
काशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेइत्येवमाद्याः॥संतिचान्याआयतनविशेषहीनाअपिदह
ब्रह्मविद्याःषोडशकलाद्याः॥सत्यमेवमेतत्॥तथाप्यत्रविद्यतेविशेषःसंभृत्याद्यनुपसंहारहेतुः॥समानगुणाम्नानेनहिप्रत्युपस्था
पितासुविप्रकृष्टदेशास्वपिविद्यासुविप्रकृष्टदेशागुणाउपसंह्रियेरन्नितियुक्तं॥संभृत्यादयस्तुशांडिल्यादिवाक्यगोचराश्चगुणाःप
रस्परव्यावृत्तस्वरूपत्वाच्चप्रदेशांतरवर्तिविद्याप्रत्युपस्थापनक्षमाः॥नचब्रह्मसंबंधमात्रेणप्रदेशांतरवर्तिविद्याप्रत्युपस्थापन
मित्युच्यते॥विद्याभेदेपितदुपपत्तेःएकमपिहिब्रह्मविभूतिभेदैरनेकधोपास्यतइतिस्थितिः॥परोवरीयस्त्वादिवद्भेददर्शनात्॥
तस्माद्वीर्यसंभृत्यादीनांशांडिल्यविद्यादिष्वनुपसंहारइति॥२३॥१२॥पुरुषविद्यायामिवचेतरेषामनाम्नानात्॥२४॥ मनोमयत्वादयो२
१ मनोर्व्यवस्थावत्सं

राम·
३३८

भृत्यादिगुणविशिष्टस्यब्रह्मणःशांडिल्यादिविद्योक्तगुणविशिष्टब्रह्मणश्चमिथोभेदेनरूपभेदात्संभृत्यादीनांनोपसंहारइत्युक्तन्यायातिदेश
त्वादस्यनसंगत्याद्यपेक्षा॥यथैकस्मिन्नुद्गीथेपरोवरीयस्त्वादिगुणोपास्तेर्हिरण्यश्मश्रुत्वाद्युपास्तिर्भिद्यतेतथैकस्मिन्नपिब्रह्मणिविद्याभेदोपपत्ते
र्ब्रह्मप्रत्यभिज्ञानगुणप्रापिकेत्याह॥परोवरीयस्त्वादिवदिति॥तस्मात्संभृत्यादिगुणविशिष्टविद्यांतरविधिरितिसिद्धं॥२३॥१२॥पुरुषविद्यायां॥

छांदोग्यस्थां विद्यामाह॥ अस्तीति॥ पुरुषोवावयज्ञस्तस्ययानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमथयानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनंसवनमथयान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयंसवनमितिप्रसिद्धयज्ञसाम्यार्थंसवनत्रयंकल्पितं॥ सयदशिशिषतियत्पिपासतियन्नरमतेतादीक्षाः॥ अथयदश्नातियत्पिबतियद्रमतेताउपसदः अथयद्धसतियज्जक्षतियन्मैथुनंचरतितानिस्तुतशस्त्राणि अथयत्तपोदानादिसादक्षिणामरणमेवावभृथः॥ वस्वादिरूपामेप्राणाः इदंसवनत्रयंयावदायुरनुसंतनुतेत्याशीः॥ अक्षितमस्यच्युतमसिप्राणसंशितमसीतिमंत्रत्रयप्रयोगः॥ शोडशाधिकशतवर्षजीवित्वंफलमितिदर्शितं॥ संशयार्थंशाखांतरीयपुरुषविद्यामाह॥ तैत्तिरीयकाइति॥ अत्रविदुषोयज्ञस्येतिषष्ठ्योः सामानाधिकरण्यवैय्यधिकरण्यानि

अस्तितांडिनांपैंगिनांचरहस्यब्राह्मणेपुरुषविद्या॥ तत्रपुरुषोयज्ञःकल्पितः तदीयमायुस्त्रेधाविभज्यसवनत्रयंकल्पितमशिशिषादीनिचदीक्षादिभावेनकल्पितानि अन्येचधर्मास्तत्रसमधिगताश्चाशीर्मंत्रप्रयोगादयः॥ तैत्तिरीयकाअपिकंचित्पुरुषयज्ञंकल्पयंति॥ तस्यैवंविदुषोयज्ञस्यात्मायजमानःश्रद्धापत्नीत्येतेनानुवाकेन॥ तत्रसंशयः किंयइतरत्रोक्ताःपुरुषयज्ञस्यधर्मास्तेतैत्तिरीयकेप्युपसंहर्तव्याःकिंवानोपसंहर्तव्याइति॥ पुरुषयज्ञत्वाविशेषादुपसंहारप्राप्तावाचक्ष्महे॥ नोपसंहर्तव्याइति॥ कस्मात्॥ तद्रूपप्रत्यभिज्ञानाभावात्॥ तदाहाचार्यः पुरुषविद्यायामिवेतियथैकेषांशाखिनांतांडिनांपैंगिनांचपुरुषविद्यायामाम्नानं॥ नैवमितरेषांतैत्तिरीयाणामाम्नानमस्ति॥ तेषांहीतरविलक्षणमेवयज्ञसंपादनंदृश्यते॥ पत्नीयजमानवेदवेदिबर्हिर्यूपाज्यपशुऋत्विगाद्यनुक्रमणात्॥ यदपिसवनसंपादनंतदपीतरविलक्षणमेवयत्सायंप्रातर्मध्यंदिनंचतानिसवनानीति॥

श्चयासंशयमाह॥ तत्रेति॥ उपसंहारानुपसंहारावेवफलं॥ पूर्वत्रासाधारणप्रत्यभिज्ञानाभावात्संभृत्यादौविद्याभेदउक्तः॥ इहत्वसाधारणमरणावभृथगुणविशिष्टपुरुषयज्ञरूपैक्यप्रत्यभिज्ञानाद्विद्यैक्यमितिप्रत्युदाहरणेनप्राप्तेसिद्धांतयति॥ नोपसंहर्तव्याइतितस्यैवंविदुषोयज्ञस्यात्मायजमानःश्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लोमानिबर्हिर्वेदः शिखाहृदयंयूपःकामआज्यंमन्युःपशुस्तपोग्निर्दमःशमयितादक्षिणावाग्घोताप्राणउद्गाताचक्षुरध्वर्युर्मनोब्रह्मेतिबहुतरधर्मवैलक्षण्यात्तद्रूपैक्यप्रत्यभिज्ञेत्यर्थः वेदःकुशमुष्टिः शमयितादमोदक्षिणेत्यन्वयः॥ किंचछांदोग्येत्रिधाविभक्तायुषिसवनत्वकल्पनाअत्रतुसायंकालादावितिवैरूप्यमाह॥ यदपीति॥

यन्मरणंतदवभृथोयदश्नंतदुपसदइतितन्निरस्तंनोसारूप्यमपिभातीत्यतआह॥यदपिकिंचिदिति॥गजोष्ट्रयोश्चतुष्पात्त्वसारूप्यवदिदंसारूप्यंनैकप्रयोजकमित्यर्थः॥किंचछांदोग्येपुरुषयज्ञयोरैक्यंश्रुतंअत्रतुभेदइतिवैरूप्यांतरमाह॥नचेति॥यद्यपिनिषादस्थपतिन्यायेनसामानाधिकरण्यंषष्ठ्योर्युक्तंतथाप्यप्रसिद्धैक्यकल्पनागौरवाद्यज्ञस्यात्मेतिभेदोक्तेरेकस्यैवयज्ञत्व — यजमानत्वविरोधादात्मविदोयोयज्ञःप्रसिद्धस्तस्येतिवैयधिकरण्यमेवयुक्तं॥किंचविद्वत्संबंधियज्ञरूपविशेष्यानुवादेनविद्वदंगैरंगसंपद्विधावेकवाक्यताप्रतीयतेतस्यांसत्यांविशेष्यस्यांगानांचपृथग्विधिवाक्यभे

यदपिकिंचिन्मरणावभृथत्वादिसाम्यंतदल्पीयस्त्वाद्भूयसावैलक्षण्येनाभिभूयमानंनप्रत्यभिज्ञापनक्षमं॥नचैतैत्तिरीयकेपुरुषस्ययज्ञत्वंश्रूयतेविदुषोयज्ञस्येति॥नचैतेसमानाधिकरणेषष्ठ्यौविद्वानेवयोयज्ञस्तस्येति॥नहिपुरुषस्यमुख्यंयज्ञत्वमस्तिव्यधिकरणेत्वेतेषष्ठ्यौविदुषोयोयज्ञस्तस्येति॥भवतिहिपुरुषस्यमुख्योयज्ञसंबंधःसत्यांचगतौमुख्यएवार्थआश्रयितव्योनभाक्तः॥आत्मायजमानइतिचयजमानत्वंपुरुषस्यनिर्ब्रुवन्वैयधिकरण्येनैवास्ययज्ञसंबंधंदर्शयति॥अपिचतस्यैवंविदुषइतिसिद्धवदनुवादश्रुतौसत्यांपुरुषस्ययज्ञभावंआत्मादीनांचयजमानादिभावंप्रतिपित्समानस्यवाक्यभेदःस्यात्॥अपिचससंन्यासामात्मविद्यापुरस्तादुपदिश्यानंतरंतस्यैवंविदुषइत्याद्यनुक्रमणंपश्यंतःपूर्वशेषएवैषआम्नायोनस्वतंत्रइतिप्रतीमः॥तथाचैकमेवफलंउभयोरप्यनुवाकयोरुपलभामहेब्रह्मणोमहिमानमाप्नोतीति॥इतरेषांत्वनन्यशेषःपुरुषविद्याम्नायः॥आयुरभिवृद्धिफलोह्यसौसएषहषोडशवर्षशतंजीवतीतियएवंवेदेतिसमभिव्याहारात्॥तस्माच्छाखांतराधीनानांपुरुषविद्याधर्माणामाशीर्मंत्रादीनामप्राप्तिस्तैत्तिरीयके॥२४॥१३॥वेधाद्यर्थभेदात्॥२५॥अस्याथर्वणिकानामुपनिषदारंभेमंत्रसमाम्नायः॥ ९

ददोषःस्यादित्यर्थः॥किंचसत्यादिभ्योन्यासएवात्यरेचयदितिसंन्यासमुक्त्वासवैसर्वमिदंजगदित्येवंतमात्मानंज्ञात्वाभूयोनमृत्युमुपयातिविद्वानितिसंन्याससाध्यामात्मविद्यांपुरस्तात्प्राजापत्यानुवाकेउपदिश्यानंतरानुवाकेतस्यैवंविदुषइत्युक्तात्मविद्यानुवादेनप्रशंसार्थत्वेनतच्छेषतयायज्ञसंपत्तिःक्रियतेफलैक्यश्रुतेः छंदोगानांतुस्वतंत्रविद्याविधिरित्याह॥अपिचससंन्यासामितिचिंताफलमाह॥तस्मादिति॥२४॥वेधाद्यर्थभेदात्॥

तत्पतिंचेतिपठोऽन्यत्रदृश्यते=२

देवनामभिचारकर्त्ताप्रार्थयते॥सर्वमिति॥हेदेवत्वमद्रिपोःसर्वमंगंप्रविध्यविदार्यविशेषतश्चहृदयंभिंधिधमनीःशिराःप्रवृंज्यत्रोट्यशिरश्चाभिनोनाशयसर्वंत्रिधाविपृक्तोविश्लिष्टोभवतुमेशत्रुरित्यर्थः॥हेदेवसवितःयज्ञंतत्फलंचप्रसुवनिर्वर्त्तयेत्यर्थः॥उच्चैःश्रवाःश्वेतोश्वोयस्येंद्रस्यसत्वंहरितमणिवन्नीलोसीत्यर्थः॥नोस्माकंशंसुखकरोभवत्वित्यर्थः॥अग्निष्टोमोब्रह्मैवसयस्मिन्नहनिक्रियतेतदपिब्रह्मतस्माद्यएतदहःसाध्यंकर्मोपयंत्यनुतिष्ठंतितेब्रह्मणैवसाधनेनब्रह्मोपयंतितेचक्रमेणामृतत्वमाप्नुवंतीतियोजना॥मंत्रादिषुतत्तदुपनिषद्विद्याशेषत्वेप्रमाणभावोस्यांसंशयमाह॥किंमितिफलंपूर्व

भावा१

सर्वंप्रविध्यहृदयंप्रविध्यधमनीःप्रवृज्यशिरोभिप्रवृज्यत्रिधाविपृक्तइत्यादिः॥तांडिनांदेवसवितःप्रसुवयज्ञमित्यादिःशाट्यायनीनांश्वेताश्वोहरितनीलोसीत्यादिः॥कठानांतैत्तिरीयकाणांचशंनोमित्रःशंवरुणइत्यादिर्वाजसनेयिनांतूपनिषदारंभेप्रवर्ग्यंब्राह्मणंपठ्यतेदेवाहवैसत्रंनिषेदुरित्यादिः कौषीतकिनामप्यग्निष्टोमब्राह्मणंब्रह्मवाअग्निष्टोमोब्रह्मै तदहर्ब्रह्मणैवतेब्रह्मोपयंतितेमृतत्वमाप्नुवंतियएतदहरुपयंतीति॥किमिमेसर्वेप्रविध्यादयोमंत्राःप्रवर्ग्यादीनिचकर्माणिविद्यासूपसंह्रियेरन्किंवानोपसंह्रियेरन्नितिमीमांसामहे॥किंतावन्नःप्रतिभातिउपसंहारएवैषांविद्यास्विति॥कुतःविद्याप्रधानानामुपनिषद्ग्रंथानांसमीपेपाठात्॥नन्वेषांविद्यार्थतयाविधानंनोपलभामहे॥बाढं॥अनुपलभमानाअपित्वनुमास्यामहेसन्निधिसामर्थ्यात्॥नहिसन्निधेरर्थवत्वेसंभवत्यकस्मादसावनाश्रयितुंयुक्तः॥ननुनैषांमंत्राणांविद्याविषयंकिंचित्सामर्थ्यंपश्यामः॥कथंचप्रवर्ग्यादीनिकर्माणिअन्यार्थत्वेनैवविनियुक्तानिसंतिविद्यार्थत्वेनापिप्रतिपद्येमहीति॥

१ वत्ननुतेषांशेषत्वेमानाभावान्नोपसंहारइतिशंकते॥नन्वेषामिति॥मंत्रादयस्तत्तद्विद्याशेषाःफलवद्विद्यासन्निहितत्वात्तैत्तिरीयकगतपुरुषयज्ञवदितिसमाधत्ते॥बाढमिति॥तथाचदृष्टांतसंगतिः॥सिद्धांतिपक्षेसन्निधिवैयर्थ्यंबाधकमाह॥नहीति॥अफलमंत्रादीनांफलवच्छेषत्वबोधनेसन्निधेरर्थवत्वेसंभवेसत्यकस्मादर्थशून्यत्वेनासौसन्निधिराश्रयितुंनहियुक्तइत्यर्थः॥नत्रपाठेत्वकस्माद्धेतुंविनासावर्थोनाश्रयितुंनहियुक्तइत्यर्थः॥ननुमंत्राणांविद्यासंभवेनार्थप्रकाशनसामर्थ्याभावात्नविद्याशेषत्वमितिशंकते॥नन्विति॥पुरस्तादुपसदांप्रवर्ग्येणप्रचरंतीतिवाक्येनप्रवर्ग्यस्यक्रतुशेषत्वंश्रुतं॥अग्निष्टोमादेश्चतत्तद्वाक्येनस्वर्गाद्यर्थत्वमतोनविद्यार्थत्वमित्याह॥कथंचेति॥

मंत्राणां विद्यासमवेतहृदयताड्यादिप्रकाशकत्वमस्तीत्याह ॥ नैष इति ॥ उपास्तिषु मंत्रप्रयोगः क्वापि न दृष्ट इत्यत आह ॥ दृष्टश्चेति ॥ पुत्रस्य दीर्घायु
ष्यार्थं छांदोग्ये त्रैलोक्यस्य कोशत्वेनोपास्तिरुक्ता तत्र पितुः स्वयं प्रार्थनामंत्रः ॥ तत्राऽमुनेति पुत्रस्य त्रिर्नाम गृह्णाति ॥ अमुना पुत्रेण सह भूरितीमं लोकममुं च प्रप
द्येन मे पुत्रवियोगः स्यादित्यर्थः ॥ ननु द्वाक्येनाऽन्यत्र विनियुक्तानामपि कर्मणां सन्निधिना विद्यासु विनियोगो न विरुध्यत इत्यत्र दृष्टांतमाह ॥ वाजपेय इति ॥ ब्र
ह्मवर्चसकामो बृहस्पतिसवेन यजेतेति वाक्येन ब्रह्मवर्चसफले विनियुक्तस्यापि बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयप्रकर
णस्थवाक्येन वाजपेयांगतया विनियोगवदविरोध इत्यर्थः ॥ यद्यप्येकेन वाक्येन प्रकरणांतरस्थबृहस्पतिसवस्य प्रत्यभिज्ञानमंगत्वविधानं च
कर्तुमयुक्तं वाक्यभेदप्रसंगात् नो मासाग्निहोत्रवत्कर्मांतरमेव बृहस्पतिसवाख्यमंगतया विधीयत इति न विनियुक्तस्य विनियोग इति भट्टगुरुतंत्रहृद

नैष दोषः सामर्थ्यं तावन्मंत्राणां विद्याविषयमपि किंचिच्छक्यं कल्पयितुं हृदयादिसंकीर्तनात् ॥ हृदयादीनि हि प्रायेणो
पासनेष्वायतनादिभावेनोपदिष्टानि तद्द्वारेण च हृदयं प्रविध्येत्येवंजातीयकानां मंत्राणामुपपन्नमुपासनांगत्वं ॥ दृष्टश्चोपासने
ष्वपि मंत्रनियोगो भूः प्रपद्येऽमुनाऽमुनेत्येवमादिः तथा प्रवर्ग्यादीनां कर्मणामन्यत्रापि विनियुक्तानां सतामविरुद्धो विद्यासु वि
नियोगः ॥ वाजपेय इव बृहस्पतिसवस्येत्येवं प्राप्ते ब्रूमः ॥

२२ यसिद्धं तथापि यथा नित्याग्निहोत्रस्याश्वमेधप्रकरणे नंर वाग्यतस्येतां रात्रि
मग्निहोत्रं जुहोतीति नाम्ना प्रत्यभिज्ञा यथा वा दर्शपूर्णमासविकृतीष्टावाज्यभागौ यजतीत्येकस्मिन्वाक्ये प्रकृतिस्थाज्यभागयोः पदेन प्रत्यभिज्ञा वाक्येन विधानं
तथात्रापि बृहस्पतिसवपदेन प्रत्यभिज्ञानं वाक्येनांगताविधानं किं न स्यात् ॥ न च साध्यभावार्थविधायकाख्यातपरतंत्रनामपदं न सिद्धकर्मप्रत्यभिज्ञास्स मा
मिति वाच्यं सिद्धस्याप्यंगतया पुनः साध्यत्वसंभवेऽन्यथा सिद्धाख्यातस्यैव प्रसिद्धार्थकनामपारतंत्र्योपपत्तेः ॥ न चैवं सति कुंडपायिसत्रेप्यंगत्वेन नि
त्याग्निहोत्रस्यैव विधिः स्यादिति वाच्यं इष्टत्वान्न च पूर्वतंत्रविरोधः ॥ उत्तरतंत्रस्य बलीयस्त्वात्पूर्वतंत्रस्य स्वतंत्रपरतंत्रभावनाभेदे तात्पर्याच्चेन
स्यादेकस्यैव बृहस्पतिनामकस्य धात्वर्थस्य ब्रह्मवर्चसे विनियुक्तस्यापि वाजपेयांगतया विनियोग इति भगवत्पादतात्पर्यमस्ति च विनियुक्तस्य
विनियोगे सर्वसंमतमुदाहरणं खादिरत्वादिकं तस्य क्रतौ विनियुक्तस्य वीर्यादिफलेपि विनियोगात्तथा मंत्रकर्मणामन्यत्र विनियुक्तानां विद्याशेषत्वमिति

प्राप्ते सिद्धांतयति ॥

नैषामित्यादिना॥विद्यासुहृदयादिसंबंधेपिवेधाद्यर्थानामसंबंधात्कृत्स्नमंत्रार्थानामभिचारादिसंबंधलिंगेनसन्निधेर्बलीयस्त्वाअभिचारादावेवमंत्राणांविनियोगइत्यर्थः॥देवसवितःप्रसुवेतिप्रदक्षिणतोग्निंपर्युक्षेदितिवाक्यादग्निपर्युक्षणेसावित्रंजुहोतिकर्मणःपुरस्तात्सवनेसवनेजुहोतीतिवाक्याद्वाजपेयेकर्मविशेषेसंबंधोस्यमंत्रस्येत्याह॥नहिशेषेति॥उक्तन्यायंश्वेताश्वइत्यादिष्वतिदिशति॥एवमन्येषामिति॥प्रमाणांतरंप्रकरणादिकं॥ननुलिंगादिभिरन्यत्रविनियुक्तानामपिसन्निधिनाविद्यास्वपिविनियोगोस्त्वविरोधादित्युक्तंतत्राह॥दुर्बलोहीति॥समवायेसमानविषयत्वेनद्वयोर्विरोधेपरस्यदौर्बल्यंकुतः॥अर्थविप्रकर्षात्स्वार्थबोधनेपरस्यपूर्वव्यवधानेनप्रवृत्तेरित्यर्थः॥अयमाशयःएकत्रविनियुक्तस्यनिराकांक्षत्वादन्यत्रविनियोगोविरुद्धएवपरंतुविनियोजकप्रमाणयोःसमबलत्वेन्यतरविनियोगत्यागायोगादन्यत्राकांक्षोत्पादनेनविनियुक्तविनियोगःस्वीक्रियतेयथाखादिरोयूपोभवतिखादिरंवीर्यकामस्ययूपंकुर्यादितिवाक्याभ्यांक्रतौविनियुक्तस्यखादिरत्वस्यवीर्यफलेविनियोगः॥यत्रतुप्रमाणयोरतुल्यत्वं।तत्रनस्वीक्रियतेप्रबलप्रमाणेनदुर्बलविनियोगबाधात्॥यथाकदाचनस्तरीरसिनेंद्रसश्चसीत्यस्याःऋचःऐंद्र्यागार्हपत्यमुपतिष्ठतइतितृतीयाविभक्तिश्रुत्याद्यनिरपेक्षतया॥

नैषामुपसंहारो विद्यास्विति॥कस्माद्वेधाद्यर्थभेदात्हृदयंप्रविध्येत्येवंजातीयकानांहिमंत्राणांयेऽर्थाहृदयवेधादयोभिन्नाः। अनभिसंबद्धा स्तउपनिषदुदिताभिर्विद्याभिर्नतेषांताभिःसंगंतुंसामर्थ्यमस्ति॥ननुहृदयस्योपासनेष्वप्युपयोगात्तद्द्वारकउपासनासंबंधउपन्यस्तः॥नेत्युच्यते॥हृदयमात्रसंकीर्तनस्यह्येवमुपयोगःकथंचिदुत्प्रेक्ष्येत॥ नचहृदयमात्रमत्रमंत्रार्थः हृदयंप्रविध्यधमनीःप्रवृज्येत्येवंजातीयकोहिनसकलोमंत्रार्थोविद्याभिरभिसंबध्यते॥आभिचारिकविषयोह्येषोर्थः। तस्मादाभिचारिकेणकर्मणासर्वंप्रविध्येत्येतस्यमंत्रस्याभिसंबंधः॥तथादेवसवितःप्रसुवयज्ञमित्यस्ययज्ञप्रसवलिंगत्वाद्यज्ञेनकर्मणासंबंधः॥नहिशेषसंबंधस्तुप्रमाणांतरादनुसर्तव्यः॥एवमन्येषामपिमंत्राणांकेषांचिल्लिंगेनकेषांचिद्वचनेनकेषांचित्प्रमाणांतरेणेत्येवमर्थांतरेषुविनियुक्तानांरहस्यपठितानामपिसतांनसन्निधिमात्रेणविद्याशेषत्वोपपत्तिर्दुर्बलोहिसन्निधिःश्रुत्यादिभ्यइत्युक्तंप्रथमेतंत्रेश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपारदौर्बल्यमर्थविप्रकर्षादित्यत्र॥

गार्हपत्योपस्थानशेषत्वबोधिकयैंद्रप्रकाशनसामर्थ्यरूपलिंगप्राप्तमिंद्रशेषत्वंबाध्यते लिंगं हि नसाक्षाच्छेषत्वंबोधयति किंत्विंद्रप्रकाशनमात्रंकरोतिते
नचलिंगेनानेनमंत्रेणेंद्रउपस्थापयितव्यइतिश्रुतिःकल्पनीयातयाशेषत्वबोधइतिश्रुतिव्यवधानेनशेषत्वबोधकंलिंगंझटितिस्वार्थबोधकश्रुत्याबाध्यंत
थालिंगेनवाक्यंबाध्यंयथास्योनंतेसदनंकरोमिघृतस्यधारयासुशेवंकल्पयामितस्मिन्सीदामृतेप्रतितिष्ठव्रीहीणांमेधसुमनस्यमानइतिमंत्रभागयोःप्र
त्येकंसदनकरणेपुरोडाशासादनेचतत्प्रकाशनसामर्थ्यलिंगेनश्रुतिद्वाराविनियोगेसतिप्रतीतमेकवाक्यत्वंबाध्यतेनस्यकृत्स्नेपिमंत्रेसदनकरणप्रकाशन
सामर्थ्यंपुरोडाशासादनप्रकाशनसामर्थ्यंचलिंगंकल्पयित्वाश्रुतिकल्पनयोभयत्रकृत्स्नमंत्रविनियोगबोधनेद्वाभ्यांलिंगश्रुतिभ्यांव्यवधानेनश्रुत्येकव्यवा
हितक्लृप्तलिंगात्दुर्बलत्वात्॥नचसामर्थ्यंनकल्प्यमितिवाच्यं॥असमर्थस्यविनियोगायोगात्अतएवगंगापदस्यतीरबोधविनियोगेलक्षणारूपंसामर्थ्यं
कल्प्यते॥तथावाक्येनप्रकरणंबाध्यंयथासाह्नप्रकरणाम्नातद्वादशोपसदांद्वादशाहीनस्येतिवाक्येनाहीनांगत्वबोधकेनप्रकरणप्राप्तसाह्नांगत्वबाधादु

तथाकर्मणामपिप्रवर्ग्यादीनांअन्यत्रविनियुक्तानांनविद्याशेषत्वोपपत्तिः॥नह्येषांविद्याभिःसहैकार्थ्यंकिंचिदस्ति॥वाजपेये
तुबृहस्पतिसवस्यस्पष्टंविनियोगांतरंवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेति॥ त्कर्षः॥प्रधानस्यांगाकांक्षारूपंप्रकरणंतस्यांगप्रधानवाक्यै

स्व॰२

कवाक्यतासामर्थ्यश्रुतिभिःकल्प्यमानाभिःसा र्थविनियोगप्रमितौव्यवधानेनांगसामर्थ्यश्रुत्योर्द्वयोःकल्प्यकवाक्यात्दुर्बलत्वात्॥तथाप्रकरणेनसन्निधिर्बाध्यः
॥यथाराजसूयप्रकरणेनतदंतर्गताभिषेचनीयसोमयागविशेषसन्निधिपाठप्राप्तंशुनःशेपोपाख्यानादेरभिषेचनीयशेषत्वंबाधित्वाकृत्स्नराजसूयशेषत्वमा
पादितंसन्निधेःप्रकरणादिकल्पकत्वेनक्लृप्तप्रकरणात्दुर्बलत्वात्॥तथासन्निधिनासमाख्याबाध्यतेतथाहिपौरोडाशिकेसमाख्याकेकांडेआग्नेयपुरोडाशा
दिकर्मणांक्रमेणमंत्राआम्नातास्तत्रदधिपयोरूपसान्नाय्यसन्निधौशुंधध्वंदैव्यायकर्मणइतिमंत्रआम्नातस्तत्रसमाख्याबलेनास्यमंत्रस्यपुरोडाशपात्रशुंध
नशेषत्वंप्राप्तसन्निधिनाबाधित्वासान्नाय्यपात्रशुंधनशेषत्वमापाद्यते॥पुरोडाशसंबंधिकांडंपौरोडाशिकमितिपौरुषसमाख्यायाःकांडांतर्गतमंत्रस्यपु
रोडाशसंबंधसामान्यबोधकत्वेपिशेषिभावरूपविनियोगबोधकत्वेसन्निध्याद्यपेक्षत्वेनदुर्बलत्वादिति॥एवंविरोधेसतिश्रुतिर्बाधिकैवसमाख्याबाध्यैवम
ध्यस्थानांतुचतुर्णांपूर्वबाध्यत्वंपरबाधकत्वंचेतिश्रुतिलिंगसूत्रार्थः॥तस्माल्लिंगादिनाऽन्यत्रविनियुक्तानांमंत्राणांदुर्बलसन्निधिनानविद्यासुविनियोगइतिसिद्धं॥

षशे२

तथाकर्मणामिति॥कर्मणांवाक्यविद्योपकारत्वेनताभिःसहैकफलत्वेचस्प
नंकिंचिन्नास्तीत्यर्थः॥

॥अपिचेत्युक्तार्थं॥ ननु तर्हि वेधादिवाक्यानामुपनिषद्भिः सहपाठस्य का गतिस्तत्राह॥ अरण्येति॥ तस्माद्वेधादिमंत्रकर्मणां विद्यास्वनुपसंहार इति सिद्धं॥२५॥ हानौ तूक्तं॥ यथाश्वो रजोयुक्तानि जीर्णरोमाणि त्यक्त्वा निर्मलो भवति॥ तथाहमपि पापं विधूय कृतात्मा निर्मलीकृतचित्तः सन्यथा वा राहुग्रस्तश्चंद्रो राहोर्मुखात्प्रमुच्य स्वच्छो भवति॥ तथा शरीरं धूत्वा त्यक्त्वा देहाभिमानान्मुक्तः सन्नकृतं कूटस्थं ब्रह्मात्मकं लोकं अभिप्रत्य।

अपि चैकोयं प्रवर्ग्यः सकृदुत्पन्नो बलीयसा प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेनान्यत्रापि विनियोगमर्हति॥ अगृह्यमाणविशेषत्वे हि प्रमाणयोरेतदेवं स्यात्॥ न तु बलवदबलवतोः प्रमाणयोरगृह्यमाणविशेषता संभवति बलवदबलवत्त्वविशेषादेव॥ तस्मादेवंजातीयकानां मंत्राणां कर्मणां वा न सन्निधिपाठमात्रेण विद्याशेषत्वमाशंकितव्यमरण्यानुवचनत्वादिधर्मसामान्यात्तु सन्निधिपाठ इति संतोष्टव्यं॥२४॥२५॥ हानौ तूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तं॥२६॥ अस्ति तांडिनां श्रुतिः॥ अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति॥ तथाथर्वणिकानां तथा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति॥ तथा शाट्यायनिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति॥ तथैव कौषीतकिनस्तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंत्यप्रिया दुष्कृतमिति॥ तदिह क्वचित्सुकृतदुष्कृतयोर्हानं श्रूयते क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचित्तूभयमपि हानमुपायनं च॥ तद्यत्रोभयं श्रूयते तत्र तावन्न किंचिद्वक्तव्यमस्ति॥ यत्राप्युपायनमेव श्रूयते न हानं तत्राप्यर्थादेव हानं सन्निपतति॥ अन्यैरात्मीययोः सुकृतदुःकृतयोरुपेयमानयोरावश्यकत्वात्तद्धानस्य॥ यत्र तु हानमेव श्रूयते नोपायनं तत्राप्युपायनं सन्निपतेद्वा न वेति विचिकित्सायामश्रवणादसंनिपातो विद्यांतरगोचरत्वाच्च शाखांतरीयस्य

श्रवणस्य॥

त्के न संभवामीत्यर्थः॥ यथा नद्यः समुद्रं प्राप्य नामरूपे त्यजंति तथा विद्वानित्यर्थः निरंजनः शुद्धः साम्यं ब्रह्म॥ तस्य मृतस्य विदुषः दायं धनं॥ तत्तेन विद्याबलेन सुकृतदुःकृते त्यजतीत्यर्थः॥ उपायनं ग्रहणं तस्य त्यागपूर्वकत्वादन्यकृतयोर्ग्रहणायोगात्त्यागोर्थादायाति॥ यत्र तु त्याग एव श्रुतः तत्र हानोपायनयोः सहभावस्यावश्यकत्वानावश्यकत्वाभ्यां संशयमाह॥ यत्र त्विति॥ अत्र पूर्वपक्षे स्तुतिप्रकर्षासिद्धिः सिद्धांतेन तत्सिद्धिरिति फलं॥ ८॥

यद्यपि तांड्याथर्वणश्रुत्योर्निर्गुणविद्यार्थयोः कर्महानमेव श्रुतं नोपायनं तथापि कौषीतकिश्रुतौ पर्यंकस्थसगुणब्रह्मविद्यायामुपायनं श्रुतमतोऽपसंहर्तव्यमि त्याशंक्य विद्याभेदान्नोपसंहार इत्याह ॥ विद्यांतरे इति ॥ किंच यथा मंत्रकर्मणामनावश्यकत्वाद्विद्यास्वनुपसंहार उक्तस्तथा परैरुपादानं विनापि हानसंभवेनो पादानस्यानावश्यकत्वान्न प्राप्तिरिति दृष्टांतसंगत्या प्राप्ते सिद्धांतयति ॥ हानौ त्वित्यादिना ॥ उपायनशब्दस्य शेषत्वाद्धानशब्देनापेक्षितत्वादिति सूत्रार्थः ॥

अपि च आत्मकर्तृकं सुकृतदुष्कृतयोर्हानं परकर्तृकं तूपायनं तयोरसत्यावश्यकभावे कथं हानेनोपायनमाक्षिप्येत ॥ तस्मादसन्निपातो हानावुपायनस्येत्यस्यां प्राप्तौ पठति ॥ हानौ त्विति ॥ हानौ त्वेतस्यां केवलायामपि श्रूयमाणायामुपायनं सन्निपतितुमर्हति तच्छेषत्वात् ॥ हानशब्दशेषो ह्युपायनशब्दः समधिगतः कौषीतकिरहस्ये ॥ तस्मादन्यत्र केवलहानशब्दश्रवणेऽप्युपायनानुवृत्तिः ॥ यदुक्तमश्रवणाद्विद्यांतरगोचरत्वादनावश्यकत्वाच्चासन्निपात इति ॥ तदुच्यते ॥ भवेदेषा व्यवस्थोक्तिर्यद्यनुष्ठेयं किंचिदन्यत्र श्रुतमन्यत्र निनीष्येत ॥ न त्विह हानमुपायनं वानुष्ठेयत्वेन संकीर्त्यते ॥ विद्यास्तुत्यर्थं त्वनयोः संकीर्तनं इत्थं महाभागा विद्या यत्सामर्थ्यादस्य विदुषः सुकृतदुष्कृते संसारकारणभूते विधूयेते ते चास्य सुहृद्द्विषत्सु निविशेते इति स्तुत्यर्थं चास्मिन्संकीर्तने हानानंतरभावित्वेनोपायनस्य क्वचिच्छ्रुतत्वादन्यत्रापि हानश्रुतावुपायनानुवृत्तिं मन्यते स्तुतिप्रकर्षलाभाय ॥ प्रसिद्धा चार्थवादांतरापेक्षार्थवादांतरप्रवृत्तिरेकविंशो वा इतोऽसावादित्य इत्येवमादिषु ॥ कथं हीहैकविंशतादित्यस्याभिधीयेतानपेक्ष्यमाणेऽर्थवादांतरे द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश इत्येतस्मिन् ॥ तथा त्रिष्टुभौ भवतः सेंद्रियत्वायेत्येवमादिवादेषु इंद्रियं वै त्रिष्टुप् इत्येवमाद्यर्थवादांतरापेक्षा दृश्यते ॥

११ अश्वरोमदृष्टांतेन विधूतयोः पुण्यपापयोः परत्रावस्थानसापेक्षत्वात्परैरुपादानं वाच्यमिति भावः ॥ विद्याभेदे गुणानुपसंहार इति व्यवस्थानुष्ठानविषया न स्तुतिविषयेत्याह ॥ तदुच्यत इति ॥ मन्यते सूत्रकार इत्यर्थः ॥ ननु श्रुतहानार्थवादेनापि स्तुतिसिद्धेः किमर्थमुपायनार्थवाद आनीयते तत्राह ॥ स्तुतिप्रकर्षलाभायेति ॥ नन्वर्थवादस्य विधिना संबंधः प्रसिद्धो नार्थवादांतरेणेत्यत आह ॥ प्रसिद्धा चेति ॥ इतो भूर्लोकादित्यर्थः ॥ हेमंतशिशिरयोरैक्यात्पंचर्तवः ॥ यज्ञस्य पुरुषरूपकल्पनायां सेंद्रियत्वाय त्रिष्टुभौ भवत इत्युक्तं च कृत्स्नब्राह्मणे तत्र त्रिष्टुभौ शं

सेमात्रत्वात्कथमिंद्रियत्वकल्पनेत्याकांक्षायां यजुर्वाक्यं संबध्यत इत्यर्थः

नन्वमूर्त्तयोः पुण्यपापयोरुपादानस्यासंभवादनुपसंहार इत्यत आह ॥ स्तुत्यर्थत्वाच्चेति ॥ विद्वन्निष्ठयोरेव तयोः फलं परे प्राप्नुवंति विद्यासामर्थ्यादित्युपयंतिपदेनोच्यत इत्यर्थः ॥ नन्वन्यनिष्ठकर्मणोरन्यत्र फलसंचारः कथं ॥ ननु वचनबलादिति चेन्न फलमुपयंतीत्यश्रुतेः ॥ न च यथा पुत्रकृतश्राद्धस्य पितृषु फलं तथात्रेति वाच्यं यस्य फलमुद्दिश्य यत्कर्म विहितं तस्य तत्फलमिति न्यायेन पितॄणां तृप्त्युद्देशेन कृतकर्मणो व्यधिकरणफलत्वेपि विदुषः कर्मकालेनुद्दिष्टव्यधिकरणफलायोगात् किंच विदुषो देहपाते कर्मणोऽसत्वाद्यावज्जीवं विद्वत्सेवकस्य द्वेषिणो वा फलं स्यादित्यत आह ॥ नातीवाभिनिवेष्टव्यमिति ॥ विद्वत्सेवाद्वेषाभ्यां विद्वन्निष्ठपुण्यपापतुल्ये पुण्यपापे सेव

॥ स्तुत्यर्थत्वाच्चास्योपायनवादस्य ॥ कथमन्यदीये सुकृतदुष्कृते अन्यैरुपेयेते इति ॥ नातीवाभिनिवेष्टव्यं ॥ उपायनशब्दशेषत्वादिति तु —— शब्दमुच्चारयन् स्तुत्यर्थमेव हानावुपायनानुवृत्तिं सूचयति ॥ गुणोपसंहारविवक्षायामुपायनार्थस्यैव हानावनुवृत्तिं ब्रूयात् ॥ तस्माद्गुणोपसंहारविचारप्रसंगेन स्तुत्युपसंहारप्रकारप्रदर्शनार्थमिदं सूत्रं ॥ कुशाच्छंदस्तुत्युपगानवदित्युपमोपादानं ॥ तद्यथा भाल्लविनां कुशा वानस्पत्याः स्थ ता मा पातेत्यस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे शाट्यायनिनामौदुंबराः इति विशेषवचनादौदुंबर्यः कुशा आश्रीयंते ॥ यथा च क्वचिद्देवासुरच्छंदसामविशेषेण पौर्वापर्यप्रसंगे देवच्छंदांसि पूर्वाणीति पैंग्याम्नानान्नीयं

कुशाः

कद्वेषिणोर्जीयेते जातयोः फलतः स्वीकार उपायनमिति परिहारस्य सुलभत्वादनाग्रह इत्यर्थः ॥ उपायनादेः स्तुतित्वे लिंगमाह ॥ उपायनेति ॥ उपायनविवक्षायामुपायनस्यैवोपसंहारं सूत्रकारो ब्रूयादतः शब्दस्य तं ब्रुवन् स्तुतिं सूचयतीत्यर्थः ॥ विद्याविचारात्मके पादे स्तुतिविचारस्य का संगतिरित्यत आह ॥ तस्मादिति ॥ शाखांतरस्थो विशेषः शाखांतरेपि ग्राह्य इत्यत्र दृष्टांतमाह ॥ कुशेति ॥ कुशा उद्गातृणां स्तोत्रगणनार्थाः शलाकाद्रुमय्यः ॥

वन

भो कुशा यूयं वानस्पत्याः स्थ महावृक्षो वनस्पतिः तत्प्रभावाः स्थ ता इत्थंभूता यूयं मा पात मां रक्षतेति यजमानप्रार्थना ॥ अत्र ता इति स्त्रीलिंगनिर्देशादौदुंबर्य इति भाष्याच्च शलाकासु कुशशब्दस्य स्त्रीत्वं मंतव्यं दर्भविषयस्य न स्त्रीत्वं अस्त्री कुशं इत्यनुशासनात् ॥ छंदो दृष्टांतं व्याचष्टे ॥ यथा चेति ॥

शा·भा·
र·प्र·टी·
३४३

नवाक्षराणिछंदांसिआसुराण्यन्यानिदैवानितेषांकश्चिच्छंदोभिस्तुवतइत्यत्राविशेषप्राप्तौपैंगिवाक्याद्विशेषग्रहइत्यर्थः॥ स्तुतिंविहृणोति॥यथेति॥
अतिरात्रेषोडशिनोग्रहस्सांगसूतंस्तोत्रंकरदेति छंदोगादीनामाकांक्षायामुदयसमयाविषृसेसूर्येषोडशिनःस्तोत्रमित्यार्चश्रुतेःकालविशेषग्रहइत्यर्थःऋ
चोधीयतइत्यार्चाः॥ उपगानंविभजते॥यथेति॥ऋत्विजउपगायंतीत्यविशेषश्रुतेर्नाध्वर्युरुपगायतीतिश्रुत्यंतरादध्वर्युभिन्नाऋत्विजउपगायंतीतिविशेष
ग्रहइत्यर्थः॥ ननुकुशादिवाक्यानामपिकिमितिविशेषश्रुत्यंतरैकवाक्यताभ्युपगम्यतेतत्राह॥श्रुत्यंतरकृतंहीति॥ सामान्यविशेषयोरेकवाक्यतारू
पायांगतौसत्यांवाक्यभेदंहृत्वानाध्वर्युरितितिनिषेधादविशेषश्रुतेश्चाध्वर्युरुपगायतिनोपगायतिचेत्येवंसर्वत्रविकल्पोनयुक्तः॥ व्रीहियवयोस्त्व
गत्याविकल्पआश्रितइत्यर्थः॥ विकल्पस्यान्याय्यत्वमष्टदोषदुष्टत्वात्तथाहियदिव्रीहिवाक्यमाश्रीयते॥तदायववाक्यस्थप्रामाण्यत्यागःअनिष्टा
प्रामाण्यस्वीकारःकदाचिद्यववाक्याश्रयणेत्यक्तप्रामाण्यस्वीकारःस्वीकृतप्रामाण्यत्यागश्चेत्येकस्मिन्यववाक्येचत्वारोदोषाभवंति॥एवंव्रीहिवाक्येपि
से२

मात्रं२
यथाचषोडशिस्तोत्रेकेषांचित्कालाविशेषप्राप्तौसमयाध्युषितेसूर्यइत्यार्च — श्रुतेःकालविशेषप्रतीतिः॥यथैवचावि
शेषेणोपगानंकेचित्समामनंतिविशेषेणभाल्लविनो॥यथैतेषुकुशादिषुश्रुत्यंतरगतविशेषान्वयःएवंहानावप्युपायनान्वयइत्य
र्थः॥श्रुत्यंतरकृतंहिविशेषंश्रुत्यंतरेऽनभ्युपगच्छतःसर्वत्रैवविकल्पःस्यात्सचान्याय्यःसत्यांगतौ॥तदुक्तंद्वादशलक्षण्यां॥

चत्वारोदोषाइति॥ एवंदुष्टविकल्पपरिहारायभिन्नशाखाश्रुत्योरपिएकवाक्यताजैमिनिसंमतेत्याह॥तदुक्तमिति ज्योतिष्टोमप्रकरणेदीक्षि
तोनजुहोतीतिश्रुतंयावज्जीवमग्निहोत्रंजुहुयादितिचान्यत्रश्रुतंतत्रयदिनदीक्षितवाक्यंहोमप्रतिषेधकंस्यात्तदाकृत्वर्थत्वान्निषेधोनुष्ठेयः॥या
वज्जीवविधिनाहोमोवानुष्ठेयइतिविकल्पःस्यात्सचान्याय्यः॥अपितुयावज्जीववाक्यंप्रतिनदीक्षितवाक्यस्यशेषत्वान्नकारइतरपर्युदासार्थकःस्याद्दी
क्षितान्यलक्षकःस्यान्नहोमप्रतिषेधस्तस्माद्दीक्षितोयावज्जीवंजुहुयादित्येकवाक्यतेतिनदीक्षिताधिकरणसिद्धांतसूत्रार्थः॥अत्रभगवत्पादैः
सूत्रमेवपठितंमिश्रैस्तुपर्युदासाधिकरणसिद्धांतसूत्रंअपितुवाक्यशेषःस्यादन्याय्यत्वाद्विकल्पस्यविधीनामेकदेशःस्यादितिस्थितमत्रार्थतःपठि
तमित्युक्तंतच्चिंत्यंसूत्रार्थस्तुयदुक्तमात्रेयेयजामहइतिप्रयोक्तव्यमितिश्रुतंनानुयाजेषुयजामहंकरोतीत्यपिश्रुतंतत्रनकारस्यनिषेधकत्वेअतिरात्रेषोड
शिग्रहणाग्रहणयो॥

अ·पा·
२ २

एम·
३४३

रिवानुयाजेषु यज्ञत्वाविशेषात्प्रयोक्तव्यं निषेधात्त्वप्रयोक्तव्यमिति विकल्पः स्यात्तस्यान्याय्यत्वाद्येयजामह इति विधेरेव नानुयाजवाक्यमेकदेशः स्यात्पर्युदासवृत्त्या विधिवाक्यशेषः स्यादिति यावत्तथा चानुयाजभिन्नेषु यागेषु येयजामह इति प्रयोक्तव्यमित्येकवाक्यत्वेनेति॥ वर्णितांतरमाह॥ अथवेति॥ पूर्वत्र विधूननं कर्म हानिरिति सिद्धवत्कृत्य उपायनोपसंहार उक्तः अत्र सैव साध्यत इति भेदः॥ उभयत्र लक्षणासाम्यात्संशयमाह॥ किमिति॥ विधूननस्य हि फलद्वयमश्वरोमादिषु दृष्टं पूर्वस्वभावात्च्युतिरन्यत्र संक्रांतिश्चेति तत्र संक्रांतिरूपहानिर्लक्षणीया किं वा च्युतिरिति संशयार्थः तत्र विधूननशब्दस्य कंपनं मुख्यार्थ इति तावत्सर्वसंमतं तच्चामूर्त्तयोः पुण्यपापयोर्न संभवति अतस्तयोर्यः स्वभावः फलदातृत्वशक्तिस्तनश्चालनं विद्यया प्रतिबंधात्च्युतिः सा लक्षणीया न हा।

अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यादिति॥ अथ वैनास्येव विधूननश्रुतिषु एतेनैव सूत्रेणैतच्चिंतयितव्यं किमनेन विधूनवचनेन सुकृतदुःकृतयोर्हानमभिधीयते॥ किं वार्थांतरमिति॥ तत्र चैवं प्रापयितव्यं न हानं विधूननमभिधीयते॥ धूञ् कंपन इति स्मरणात् दोधूयंते ध्वजाग्राणीति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात् तस्माच्चालनं विधूननमभिधीयते चालनं तु सुकृतदुष्कृतयोः कंचित्कालं फलप्रतिबंधनादित्येवं प्रापय्य प्रतिवक्तव्यं॥ हानावेवैष विधूननशब्दो वर्त्तितुमर्हति॥ उपायनशब्दशेषत्वात्॥ नहि परपरिग्रहभूतयोः सुकृतदुष्कृतयोरप्रहीणयोः परैरुपायनं संभवति॥ यद्यपीदं परकीययोः सुकृतदुष्कृतयोरप्रहीणयोः परैरुपायनं नांजसं संभाव्यते तथापि तत्संकीर्त्तनात्तावत्तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते॥ क्वचिदपि चेदं विधूननसन्निधावुपायनं श्रूयमाणं कुशाच्छंदस्तुत्युपगानवद्विधूननश्रुत्या सर्वत्रापेक्ष्यमाणं सार्वत्रिकं निर्णयकारणं संपद्यते॥

१ निरमूर्त्तयोरन्यत्र संक्रांत्ययोगादन्यसापेक्षत्वाच्चेति पूर्वपक्षार्थः॥ सिद्धांतयति॥ हानावेवेति॥ यदि च्युतिमात्रं लक्ष्यं तदोपायनं नीत्यनन्वितं स्यात्तच्च यत्र धुनोतेरुपायनशब्दसान्निध्यं तत्र हानिर्लक्ष्यते न केवलधुनोतेर्हानिश्चान्यत्र विदुषः सेवकादौ तुल्यकर्मसंक्रांतिरिति नासंभवदिति वाच्यं केवलधुनोतेरपि मुख्यार्थासंभवेनान्यत्र लक्षणया बुद्धिस्थहानिलक्षणाया एव युक्तत्वादिति भावः॥ उपायनस्यामुख्यत्वात्तत्रापि हानिलक्षणाबीजत्वमिति शंकित्वा पुण्यपापयोः फलतः स्वीकारात्मकमुपायनं हानिं विनानुपपन्नं तत्त्वलक्षणानिर्णायकमिति परिहरति॥ यद्यपीत्यादिना यथान्यत्र श्रुतमौदुंबरत्वादिकं कुशादिनिर्णायकं तथेदमुपायनं विधूननस्य हानत्वे निश्चायकमित्याह क्वचिदपीति॥

विधूननंमुख्यंकिमितिनोच्यतेतत्राह॥नचेति॥तथापिहानंकथंलक्ष्यतइत्याशंक्यमुख्यसंबंधादित्याह॥अश्वस्येति॥अनुपपत्तिसंबंधौलक्षणाबीजरूपावुक्तौलक्षकंपदंनिर्दिशति॥अश्वइवेति॥विधूयेतिपदंदृष्टांतेहानपर्यंतंसद्दार्ष्टांतिकेपिहानलक्षकमित्यर्थः॥यद्वाहानवाचकमेवास्तुनचधूञ्कंपनइतिधातुपाठविरोधस्तस्योपलक्षणार्थत्वादित्याह॥अनेकेति॥शास्त्रांतरस्थमुपायनंविधूननस्यहानत्वनिश्चायकमित्यत्रजैमिनिसूत्रंतदुक्तमितिप्रहीनंपूर्वव्याख्यातमित्यर्थः॥एवंविधूननस्यहानित्वसिद्धेःकेवलहानावुपायनोपसंहारइतिसिद्धं॥२६॥१५॥सांपरायेऽन्ये॥व्यध्वनिअर्धमार्गे॥पूर्वोक्तंवि॥

नचचालनंध्वजाग्रवत्सुकृतदुष्कृतयोर्मुख्यंसंभवतिअद्रव्यत्वात्॥अश्वश्चरोमाणिविधून्वानस्त्यजन्रजःसहैवतेनरोमाण्यपिजीर्णानिशातयति॥अश्वइवरोमाणिविधूयपापमितिचब्राह्मणं॥अनेकार्थत्वाभ्युपगमाच्चधातूनांनस्मरणविरोधः॥तदुक्तमितिव्याख्यातं॥२६॥१५॥सांपरायेतर्तव्याभावात्तथाह्यन्ये॥२७॥देवयानेनपथापर्यंकस्थंब्रह्माभिप्रस्थितस्यव्यध्वनिसुकृतदुष्कृतयोर्वियोगंकौषीतकिनःपर्यंकविद्यायामामनंति॥सएतंदेवयानंपंथानमासाद्याग्निलोकमागच्छतीत्युपक्रम्यसआगच्छतिविरजांनदींतांमनसैवात्येतितत्सुकृतदुःकृतेविधूनुतइति॥तत्किंयथाश्रुतंव्यध्वन्येववियोगवचनंप्रतिपत्तव्यंआहोस्विदादावेवदेहादपसर्पणइतिविचारणायांश्रुतिप्रामाण्यात्तुयथाश्रुतिप्रतिपत्तिप्रसक्तौपठति॥सांपरायइति॥सांपरायेगमनएवदेहादपसर्पणइदंविद्यासामर्थ्यात्सुकृतदुष्कृतहानंभवतीतिप्रतिजानीते॥हेतुंव्याचष्टेतर्तव्याभावादिति॥नहिविदुषःसंपरेतस्यविद्ययाब्रह्मप्रेप्सतोंतरालेसुकृतदुष्कृताभ्यांकिंचित्प्राप्तव्यमस्ति॥यदर्थंकतिचित्क्षणानक्षीणेतेकल्प्येयातां॥ ॥ १ ॥

धूननस्यहानत्वमुपजीव्यहानस्यनदीतरणानंतर्यश्रुतेरश्वइवरोमाणीत्यादौदेहत्यागात्प्राक्कालत्वश्रुतेश्चसंशयमाह॥तत्किमिति॥ब्रह्मलोकमार्गमध्येविरजाख्यानदीमत्येतितत्सुकृतदुष्कृतेविधूनुतइत्यत्रतदितिसर्वनामश्रुत्यानेनेत्यर्थतयासन्निहितनदीतरणस्यकर्महानिहेतुत्वोक्तेरर्धपथेकर्मक्षयइतिपूर्वपक्षः॥तत्रविद्यायाःकर्मक्षयहेतुत्वासिद्धिःपूर्वपक्षेसिद्धांतेतत्सिद्धिरितिमत्वासिद्धांतयति॥सांपरायइति॥मरणात्प्रागित्यर्थः॥संपरेतस्यमृतस्यकंचित्कालंकर्मसत्वेफलाभावाद्देवयानमार्गप्रवेशायोगाच्चादावेवक्षयइत्यर्थः॥

क्षयहेतोर्विद्याया मध्ये मार्गमसत्त्वाच्चेत्याह विद्याविरुद्धेति॥ नदीतरणानंतरपाठस्तु बाध्यः अर्थविरोधादित्याह॥ तस्मादिति॥ तदिति सर्वनाम्नापि प्रक्रांतविद्यैवोच्यत इति भावः॥२७॥ किंच मृतस्य छंदतो यथाकामं विद्यानुष्ठानानुपपत्तेरुभयोर्विद्याकर्मक्षययोः श्रुतो हेतुफलभावो विरुध्यते किंच सति पुष्कले हेतौ न कार्यविलंब इति न्यायोपेततांड्यादिश्रुतिविरोधस्तव स्यादस्मत्पक्षे त्वविरोध इत्याह॥ छंदत इति॥ तस्मात्कर्महानस्य विद्याफलत्वात्केवलहानावुपायनोपसंहारो विद्यास्तुतय इति॥

विद्याविरुद्धफलत्वात्तु विद्यासामर्थ्येन तयोः क्षयः॥ सच यदैव विद्याफलाभिमुखी तदैव भवितुमर्हति॥ तस्मात्प्रागेव सन्नयं सुकृतदुष्कृतक्षयः पश्चात्पठ्यते॥ तथा ह्यन्येपि शाखिनस्तांडिनः शाट्यायनिनश्च प्रागवस्थायामेव सुकृतदुष्कृतहानिमामनंति॥ अश्व इव रोमाणि विधूय पापमिति॥ तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति च॥२७॥ छंदत उभयाविरोधात्॥ ॥२८॥ यदि च देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्यार्धपथे सुकृतदुष्कृतक्षयोऽभ्युपगम्येत ततः पतिते देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषप्रयत्नस्येच्छातोऽनुष्ठानानुपपत्तेरनुपपत्तिरेव तद्धेतुकस्य सुकृतदुष्कृतक्षयस्य स्यात्॥ तस्मात्पूर्वमेव साधकावस्थायां छंदतोऽनुष्ठानं तस्य स्यात्॥ तत्पूर्वकं च सुकृतदुष्कृतहानमिति द्रष्टव्यं॥ एवं निमित्तनैमित्तिकयोरुपपत्तिस्तांडिशाट्यायनश्रुत्योश्च संगतिरिति॥२८॥२६॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः॥२९॥ क्वचित्पुण्यपापहानसंनिधौ देवयानः पंथाः श्रूयते क्वचिन्न॥ तत्र संशयः किं हानावविशेषेणैव देवयानः पंथाः संनिपतेत्॥ उत विभागेन क्वचित्संनिपतेत् क्वचिन्नेति॥ यथा तावद्धानावविशेषेणोपायनानुवृत्तिरुक्ता एवं देवयानानुवृत्तिरपि भवितुमर्हतीत्यस्यां प्राप्तावाचक्ष्महे॥ गतेर्देवयानस्य पथोऽर्थवत्त्वमुभयथा विभागेन भवितुमर्हति॥ क्वचिदर्थवती गतिः क्वचिन्नेति॥ नाविशेषेण॥ अन्यथा ह्यविशेषेणैवैतस्यां गतावंगीक्रियमाणायां विरोधः स्यात्॥

९ सिद्धं॥२८॥ २६॥ गतेरर्थवत्त्वं॥ क्वचित्सगुणविद्यायां मार्गः श्रूयते निर्गुणविद्यायां न श्रूयते॥ तत्र हानसन्निधौ मार्गस्य श्रुतत्वादनपेक्षितत्वाच्च संशये दृष्टांतसंगत्या पूर्वपक्षमाह॥ यथा तावदिति॥ उपायनवत् मार्गस्यापि क्वचिच्छ्रुतत्वात्सर्वत्रोपसंहार इत्यर्थः॥ अत्र निर्गुणविदोपि मुक्त्यर्थं मार्गापेक्षा पूर्वपक्षे सिद्धांते त्वनपेक्षेति फलं॥ देशादिव्यवहितवस्तुप्राप्तौ मार्गसापेक्षेति न्यायानुगृहीतश्रुतिविरोधान्नोपसंहार इति

सिद्धांतः॥

निरंजनोऽसंगःसाम्यंब्रह्म॥२९॥ ननुतर्हिसगुणविद्यायामपिमार्गोव्यर्थइत्यतआह उपपन्नइति॥ सागतिःलक्षणंकारणंयस्यार्थस्यसतल्लक्षणार्थः॥३०॥ अनियमःसर्वासां॥ अत्राप्यर्चिरादिमार्गस्यैवविषयस्तत्रविद्याविशेषप्रकरणादविशेषश्रुतेश्चसंशयेपूर्वपक्षमाह॥ किंतावदिति॥ सगुणनिर्गुणविद्यासु

पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैतीत्यस्यांश्रुतौदेशांतरप्रापणीगतिर्विरुध्येत॥ कथंहिनिरंजनोगंतादेशांतरंगच्छेत्॥ गंतव्यंचपरमंसाम्यंनदेशांतरप्राप्त्यायत्तमिति॥ आनर्थक्यमेवात्रगतेर्मन्यामहे॥२९॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥३०॥ उपपन्नश्चायमुभयथाभावः क्वचिदर्थवतीगतिः क्वचिन्नेति॥ तल्लक्षणार्थोपलब्धेः गतिकारणभूतोह्यर्थः पर्यंकविद्यादिषुसगुणेषूपासनेषूपलभ्यते॥ तत्रहिपर्यंकारोहणंपर्यंकस्थेनब्रह्मणासंवदनंविशिष्टगंधादिप्राप्तिश्चेत्येवमादिबहुदेशांतरप्राप्त्यायत्तंफलंश्रूयते तत्रार्थवतीगतिः॥ नहिसम्यक्दर्शनेतल्लक्षणार्थोपलब्धिरस्ति॥ नह्यात्मैकत्वदर्शिनामाप्तकामानामिहैवदग्धाशेषक्लेशबीजानामारब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यंकिंचिदस्ति तत्रानर्थिकागतिः॥ लोकवच्चैषविभागोद्रष्टव्यः॥ यथालोकेग्रामप्राप्तौदेशांतरप्रापणःपंथाअपेक्ष्यतेनारोग्यप्राप्तौएवमिहापीति॥ भूयश्चैनंविभागंचतुर्थाध्यायेनिपुणतरमुपपादयिष्यामः॥१७॥३०॥ अनियमःसर्वासामविरोधःशब्दानुमानाभ्यां॥३१॥ सगुणासुविद्यासुगतिरर्थवतीननिर्गुणायांपरमात्मविद्यायामित्युक्तं॥ सगुणास्वपिविद्यासुकासुचिद्गतिःश्रूयते॥ यथापर्यंकविद्यायांउपकोसलविद्यायांपंचाग्निविद्यायांदहरविद्यायामिति॥ नान्यासुयथामधुविद्यायांशांडिल्यविद्यायांषोडशकलविद्यायांवैश्वानरविद्यायामिति॥ तत्रसंशयः किंयास्वेवैषागतिःश्रूयतेतास्वेवनियम्येत॥ उतानियमेनसर्वाभिरेवंजातीयकाभिर्विद्याभिरभिसंबध्येतेति॥ किंतावत्प्राप्तंनियमइति॥ यत्रैवश्रूयतेतत्रैवभवितुमर्हतिप्रकरणस्यनियामकत्वात्॥ यद्यन्यत्राश्रूयमाणापिगतिर्विद्यांतरंगच्छेत्श्रुत्यादीनांप्रामाण्यंहीयेतसर्वस्यसर्वार्थत्वप्रसंगात्॥ अपिचार्चिरादिकाएकैवगतिरुपकोसलविद्यायांपंचाग्निविद्यायांचतुल्यवन्निरूप्यतेतत्सर्वार्थत्वेऽनर्थकंपुनर्वचनंस्यात्॥ तस्मान्नियमइत्येवंप्राप्तेपठति॥ अनियमइति॥

॥मार्गस्यभावाभावव्यवस्थावत्सगुणास्वपिव्यवस्थेतिदृष्टांतेनप्राप्तौसिद्धांतेव्यवस्थापवादात्संगतिः॥ नियमोनियमउभयत्रफलं॥ नियमेप्रकरणमुक्त्वापुनरुक्तिंलिंगमाह अपिचेति एकत्रोक्तगतेरन्यत्रप्राप्तौपुनरुक्तिःस्यादित्यर्थः॥

न१

॥सिद्धांतयति॥सर्वसामिति॥अभ्युदयोब्रह्मलोकः अविशेषश्रुत्यादिनाप्रकरणबाधोनदोषइत्याह॥नैषइति॥तत्र अधिकृतानांमध्येयइत्थंपंचाग्नीन्विदुर्येचामीअरण्येश्रद्धातपइत्युपासतेश्रद्धातपउपलक्षितंब्रह्मध्यायंतितेनेर्चिषमभिसंभवंतीत्यन्वयः॥ननुश्रद्धातपोमात्रश्रुतेस्ताभ्यामेवअर्चिरादिगमनंस्यान्नवैश्वानरादिविद्याशीलानामितिशंकते॥कथंपुनरिति॥अविदुषांगतिनिषेधाच्छ्रद्धातपःशब्दाभ्यांतत्साध्यब्रह्मविद्यालक्षणेतिपरिहृ

सर्वासामेवाभ्युदयप्राप्तिफलानांसगुणानांविद्यानामविशेषेणैषादेवयानाख्यागतिर्भवितुमर्हति॥नन्वनियमाभ्युपगमेप्रकरणविरोधउक्तः॥नैषोस्तिविरोधः॥शब्दानुमानाभ्यांश्रुतिस्मृतिभ्यामित्यर्थः॥तथाहिश्रुतिः॥तद्यइत्थंविदुरितिपंचाग्निविद्यावतांदेवयानंपंथानमवतारयंतीयेचेमेरण्येश्रद्धातपइत्युपासतइतिविद्यांतरशीलिनामपिपंचाग्निविद्याविद्भिःसमानमार्गतांगमयति॥कथंपुनरवगम्यतेविद्यांतरशीलिनामियंगतिरिति॥ननुश्रद्धातपःपरायणानामेवस्यात्तन्मात्रश्रवणान्नैषदोषः॥नहिकेवलाभ्यांश्रद्धातपोभ्याममंतरेणविद्याबलमेषागतिर्लभ्यते॥विद्ययातदारोहंतियत्रकामाःपरागताः॥नतत्रदक्षिणायंतिनाविद्वांसस्तपस्विनइतिश्रुत्यंतरात्॥तस्मादिहश्रद्धातपोभ्यांविद्यांतरोपलक्षणं॥वाजसनेयिनस्तुपंचाग्निविद्याधिकारेधीयते॥यएवमेतद्विदुर्येचामीअरण्येश्रद्धांसत्यमुपासतइति॥तत्रश्रद्धालवोयेसत्यंब्रह्मोपासतइतिव्याख्येयं॥सत्यशब्दस्यब्रह्मण्यसकृत्प्रयुज्यमानत्वात्॥पंचाग्निविद्याविदांचेत्थंवित्तयैवोपात्तत्वान्विद्यांतरपरायणानामेवैतदुपादानंन्याय्यं॥अथययएतौपंथानौनविदुस्तेकीटाःपतंगायदिदंदंदशूकंइतिचमार्गद्वयभ्रष्टानांकष्टामधोगतिंगम१यंतीदेवयानपितृयाणयोरेवैतानंतर्भावयतितत्रापिविद्याविशेषादेषांदेवयानप्रतिपत्तिः॥ ११

रति॥नैषदोषइतितत्रब्रह्मलोकस्थानंपरागताःपरावृत्ताःकामक्रोधदोषानसंतीतियावत्॥दक्षिणाःकेवलकर्मिणस्तपस्विनोप्यविद्वांसोनगच्छंतीत्यर्थःलक्षणादोषहीनंवाक्यमाह॥वाजसनेयिनस्त्विति॥किंचविद्याकर्मलक्षणमार्गद्वयभ्रष्टानामधोगतिश्रुतेर्वैश्वानराद्युपासकानामर्चिरादिमार्गप्राप्तिरित्याह॥अथययएताविति॥दंदशूकःसर्पः॥किंवाग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणं॥तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाइत्यविशेषेणोपासका॥

नामर्चिरादिगतिमुक्त्वोपसंहारस्मृतेश्चतेषांतत्प्राप्तिरित्याह॥स्मृतेरिति॥शुक्लागतिरर्चिरादिकाकृष्णाधूमादिका॥जगतोविद्याकर्माधिकृतस्यशाश्वतेध्रुवेसंमतेतत्रैकयाशुक्लयापुनरावृत्तिवर्जंकार्यंब्रह्मगच्छतिअन्ययास्वर्गंगत्वापुनरायातीत्यर्थः॥पुनरुक्तिदोषंदूषयति॥यत्पुनरिति॥तत्रतत्रमार्गश्रुतिरन्वहंमार्गचिंतनार्थंप्रकरणेनमार्गध्यानस्यविद्यांगत्वावगमात्तथाचवक्ष्यतिसूत्रकारः॥तच्छेषगत्यनुस्मृतियोगाच्चेति॥येषांतुश्रुतोमार्गस्तेमार्गध्यानंविनापिविद्यासामर्थ्यात्मार्गंलभंतइतिज्ञापनार्थापुनरुक्तिरित्यर्थः॥तस्मात्सर्वोपासनासुप्रतीकभिन्नास्वर्चिरादिप्राप्तिरितिसिद्धं॥३१॥यावदधिकारं॥नि

स्मृतिरपिशुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमतेएकयायात्यनावृत्तिमन्ययावर्ततेपुनरिति॥यत्पुनर्देवयानस्यपथोद्विराम्नानमुपकोसलविद्यायांपंचाग्निविद्यायांचतदुभयत्राप्यनुचिंतनार्थं॥तस्मादनियमः॥३१॥यावदधिकारमवस्थितिराधिकारिकाणां॥३२॥विदुषोवर्तमानदेहपातानंतरंदेहांतरमुत्पद्यतेनवेतिचिंत्यते॥ननुविद्यायाःसाधनभूतायांसंपन्नौकैवल्यनिर्वृत्तिःस्यान्नवेतिनेयंचिंतोपपद्यते॥नहिपाकसाधनसंपत्तावोदनोभवेन्नवेतिचिंतासंभवतिनापिभुंजानस्तृप्येन्नवेतिचिंत्येत॥उपपन्नात्वियंचिंताब्रह्मविदामपिकेषांचिदितिहासपुराणयोर्देहांतरोत्पत्तिदर्शनात्तथाह्यपांतरतमानामवेदाचार्यःपुराणर्षिर्विष्णुनियोगात्कलिद्वापरयोःसंधौकृष्णद्वैपायनःसंबभूवेतिस्मरंति॥वसिष्ठश्चब्रह्मणोमानसःपुत्रःसन्निमिशापादपगतपूर्वदेहःपुनर्ब्रह्मादेशान्मित्रावरुणाभ्यांसंबभूवेति॥भृग्वादीनामपिब्रह्मणएवमानसानांपुत्राणांवारुणेयज्ञेपुनरुत्पत्तिःश्रूयते॥सनत्कुमारोपिब्रह्मणएवमानसःपुत्रःस्वयंरुद्रायवरप्रदानात्स्कंदत्वेनप्रादुर्बभूव॥एवमेवदक्षनारदप्रभृतीनांभूयसीदेहांतरोत्पत्तिःकथ्यतेतेनतेननिमित्तेनस्मृतौ॥श्रुतावपिमंत्रार्थवादयोःप्रायेणोपलभ्यते॥तेचकेचित्पतितेपूर्वदेहेदेहांतरमाददतेकेचित्तुस्थितएवतस्मिन्योगैश्वर्यवशादनेकदेहादानन्यायेन॥सर्वेचैतेसमधिगतसक

[illegible]

र्गुणविद्यार्थागतिर्व्यर्थामुक्तिफलत्वात्सगुणविद्यासुसर्वत्रअर्थवतीब्रह्मलोकफलत्वादितिव्यवस्थाकृतासानयुक्तातत्वज्ञानिनामपीतिहासादौपुनर्जन्मदर्शनेनज्ञानस्यमुक्तिफलत्वाभावादित्याक्षेपात्संगतिः॥ज्ञानिनांपुनर्जन्मदर्शनंसंशयबीजंभाष्येदर्शितं॥पूर्वपक्षेज्ञानान्मुक्तिश्रुतीनांज्ञानस्तुतिमात्रत्वेनज्ञानस्यमुक्तिफलत्वाभावेसतिब्रह्मलोकफलत्वाविशेषादर्चिरादिमार्गोपसंहारःफलंसिद्धांतेतूक्तव्यवस्थासिद्धिरितिविवेकः॥श्रुतावपीति॥ऽ

मेधातिथेर्मेषेतिमंत्रेइंद्रस्यमेषजन्मोपलक्ष्यते॥ वसिष्ठउर्वशीपुत्रोजातइत्येवमर्थोवह्वृचार्थवादइत्यर्थः॥ पाक्षिकमित्यापाततः॥ अहेतुत्वमेवेतिपूर्वपक्षः॥ ज्ञानस्यमुक्तिहेतुत्वंनेतिसिद्धांतयति॥ नेति॥ लोकव्यवस्थासुस्वामित्वमधिकारःतत्प्रापकंप्रारब्धंयावदस्तितावत्कालंजीवन्मुक्तत्वेनाधिकारिकाणामवस्थितिः॥ प्रारब्धक्षयेप्रतिबंधकाभावाद्विदेहकैवल्यमित्यत्रमानमाह॥ अथेति॥ अथप्रारब्धक्षयानंतरंततःपश्चादूर्ध्वोविलक्षणःकेवलब्रह्मस्वरूपःसन्उदेत्योद्गम्यदेहंत्यक्त्वेतियावत्एकलएवअद्वितीयोमध्येउदासीनात्मकस्वरूपेतिष्ठतीत्यर्थः॥ ननुज्ञानिनामपिजन्मांतरंचेत्कथंमुक्तिरित्य

तदेतेषांदेहाद्देहांतरोत्पत्तिदर्शनात्प्राप्तंब्रह्मविद्यायाःपाक्षिकंमोक्षहेतुत्वमहेतुत्वंवेत्यतउत्तरमुच्यते॥ नतेषामपांतरतमःप्रभृतीनांवेदप्रवर्तनादिषुलोकस्थितिहेतुष्वधिकारेषुनियुक्तानामधिकारतंत्रत्वात्स्थितेः॥ यथाऽसौभगवान्सवितासहस्रयुगपर्यंतंजगतोधिकारंचरित्वातदवसानेउदयास्तमयवर्जितंकैवल्यमनुभवति॥ अथततऊर्ध्वउदेत्यनैवोदेतानास्तमेतैकलएवमध्येस्थातेतिश्रुतेः॥ यथाचवर्तमानाब्रह्मविदआरब्धभोगक्षयेकैवल्यमनुभवंति॥ तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्यइतिश्रुतेः॥ एवमपांतरतमःप्रभृतयोपीश्वराःपरमेश्वरेणतेषुतेष्वधिकारेषुनियुक्ताःसंतःसत्यपिसम्यक्दर्शनेकैवल्यहेतावक्षीणकर्माणोयावदधिकारमवतिष्ठंतेतदवसानेचापवृज्यंतइत्यविरुद्धं॥ सकृत्प्रवृत्तमेवहितेफलदानायकर्माशयमतिवाहयंतःस्वातंत्र्येणैवगृहादिवगृहांतरमन्यमन्यदेहंसंचरंतःस्वाधिकारनिवर्तनायापरिमुषितस्मृतयएवदेहेंद्रियप्रकृतिवशित्वान्निर्मायदेहान्युगपत्क्रमेणवाधितिष्ठंति॥ नचैतेजातिस्मराइत्युच्यंते॥ तएवैतइतिस्मृतिप्रसिद्धेः॥ ३२ ॥

नआह॥ सकृत्प्रवृत्तमितियदिज्ञानिनांप्रारब्धातिरिक्तकर्माधीनंजन्मान्तरंस्यात्तदाज्ञानान्मुक्त्यभावःस्यान्नैतदस्तिकिंतुबहुजन्मफलायसकृत्प्रवृत्तंप्रारब्धंतेक्षपयंतिजन्मग्रहणेपिज्ञानयोगबलान्नशोचंतिप्रारब्धसमाप्तौमुच्यंतइत्यर्थः॥ ज्ञानिनांजन्मांतरस्यपूर्वजन्महेतुप्रारब्धाधीनतयामलुप्तस्मृतित्वेहेतुः॥ योह्यजातिस्मरत्वेसतिकर्मांतराधीनजन्मांतरवान्सलुप्तस्मृतिरितिव्याप्तेःज्ञानिषुव्यापकाभावाद्विशिष्टव्याप्याभावसिद्धिः॥ ननुतेषांजाति स्
स्मरत्वादलुप्तस्मृतित्वमन्यथासिद्धमित्यतआह॥ नचैतइति॥ तथाचतेषामजातिस्मरत्वरूपविशेषणेसतिविशेष्याऽभावादेवविशिष्टाभावसिद्धिरित्य

पूर्वदेहनामप्रत्यभिज्ञानहीनाः परतंत्राः साभिमानाः जातिस्मराः आधिकारिकास्तु पूर्वनामानः स्वतंत्रा निरभिमाना इति वैषम्यं॥ तेन जनकेन सहव्युद्य विवादं कृत्वेत्यर्थः॥ विदुषः प्रारब्धातिरिक्तकर्माभावान्न बंधः॥ निमित्ताभावे नैमित्तिकाभाव इति न्यायानुगृहीतानां ज्ञानान्मुक्तिश्रुतीनां न स्तुतिमात्रत्वमितीममर्थमुपपादयति॥ यदि ह्युपयुक्त इत्यादिना॥ श्रुतिस्मृत्युक्तार्थे युक्तिमप्याह॥ न चाविद्येति॥ विद्यया क्लेशदाहात्तत्कार्यकर्मक्षयश्चेत्तर्हि प्रा

यथा हि सुलभा नाम ब्रह्मवादिनी जनकेन विविदितुकामा व्युदस्य स्वं देहं जानकमाविश्य व्युद्य तेन पश्चात्स्वमेव देहमाविवेशेति स्मर्यते॥ यदि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्मांतरं देहांतरारंभकारणं आविर्भवेत्ततोन्यदप्यदग्धबीजं कर्मांतरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वाशंक्येत॥ न त्वियमाशंका युक्ता ज्ञानात्कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्॥ तथा हि श्रुतिः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावर इति॥ स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्ष इति चैवमाद्या॥ स्मृतिरपि॥ यथैधांसि समिद्धो ग्निर्भस्मसात्कुरुतेर्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति॥ बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति चैवमाद्या॥ न चाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्माशयस्यैकदेशदाह एकदेशप्ररोहश्चेत्युपपद्यते॥ न ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते॥ प्रवृत्तफलस्य तु कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः॥ तस्य तावदेव चिरमिति शरीरपातक्षेपकरणात्॥ तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः॥ न च ज्ञानफलस्यानैकांतिकता॥ तथा च श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति॥ तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति॥ ज्ञानांतरेषु चैश्वर्यादिफलेषु आसक्ताः स्युर्महर्षयः ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाः कैवल्यं प्रपुरित्युपपद्यते॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे॥

रब्धस्य कथं स्थितिस्तत्राह॥ प्रवृत्तफलस्येति॥ विदुषो देहपातावधि श्रुतेरनुभवाच्च ज्ञानस्यावरकाज्ञानांशनिवर्तकस्य प्रारब्धविक्षेपस्थित्यनुकूलाज्ञानांशनिवर्तनसामर्थ्याभावसिद्धेर्भोगेनैव प्रारब्धक्षय इति भावः॥ ज्ञानिनामाधिकारिकत्वं कथमित्याशंक्य ज्ञानात्प्राक्कृतोपासनादिवशादित्याह॥ ज्ञानांतरेषु चेति॥ प्रतिसंचरो महाप्रलयः॥

परस्यहिरण्यगर्भस्यअधिकारांतेसाक्षात्कृतात्मानोमुच्यंतइत्यर्थः॥ब्रह्मभावफलस्यापिभावित्वमाकांक्षीतिश्रुतिबाधमाह॥नहीति॥तस्मान्निर्गुणविद्यायांमार्गानुपसंहारइतिसिद्धं॥३२॥अक्षरधियां॥अत्राक्षरब्रह्मप्रमापकानिषेधशब्दाविषयास्तेतुयत्रयावंतःश्रुतास्तत्रतावतामशेषद्वैतनिषेधकत्वसंभवासंभवाभ्यांसंशयमाह॥तासामिति॥यथानिर्गुणविद्यायांमार्गस्यानपेक्षितत्वादनुपसंहारस्तथाश्रुतनिषेधानामुपलक्षणतयासर्वद्वैतनिषेधसंभवा।

परस्यांतेकृतात्मानःप्रविशंतिपरंपदमितिस्मरणात्॥प्रत्यक्षफलत्वाच्चज्ञानस्यफलविरहाशंकानुपपत्तिः॥कर्मफलेहिस्वर्गादावनुभवानारूढेस्यादाशंकाभवेद्वानवेति॥अनुभवारूढंतुज्ञानफलंयत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः तत्त्वमसीतिचसिद्धवदुपदेशात्॥नहितत्त्वमसीत्यस्यवाक्यस्यार्थस्तत्त्वंमृतोभविष्यसीत्येवंपरिणेतुंशक्यः॥तद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेऽहंमनुरभवंसूर्यश्चेतिचसम्यग्दर्शनकालमेवतत्फलंसर्वात्मत्वंदर्शयति॥तस्मादैकांतिकीविदुषःकैवल्यसिद्धिः॥३२॥१९॥अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥३३॥वाजसनेयकेश्रूयते॥एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमित्यादि॥तथाथर्वणेश्रूयते॥अथपराययातदक्षरमधिगम्यते॥यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमित्यादि॥तथैवान्यत्रापिविशेषनिराकरणद्वारेणाक्षरंपरंब्रह्मश्राव्यते॥तत्रचक्वचित्केचिदतिरिक्ताविशेषाःप्रतिषिध्यंते॥तासांविशेषप्रतिषेधबुद्धीनांकिंसर्वासांसर्वत्रप्राप्तिःउतव्यवस्थेतिसंशयेश्रुतिविभागात्व्यवस्थाप्राप्तौउच्यते॥अक्षरविषयास्तुविशेषप्रतिषेधबुद्धयःसर्वाःसर्वत्रावरोद्धव्याः॥सामान्यतद्भावाभ्यां॥समानोहिसर्वत्रविशेषनिराकरणरूपोब्रह्मप्रतिपादनप्रकारस्तदेवचसर्वत्रप्रतिपाद्यंब्रह्माभिन्नंप्रत्यभिज्ञायते॥तत्रकिमित्यन्यत्रकृताबुद्धयोन्यत्रनस्युः॥तथाचानंदादयःप्रधानस्येत्यत्रव्याख्यातं॥तत्रविधिरूपाणिविशेषणानिचिंतितानिइहप्रतिषेधरूपाणीतिविशेषः॥

१९ शाखांतरीयनिषेधशब्दानामनपेक्षितत्वादनुपसंहारइतिदृष्टांतेनपूर्वपक्षस्तत्रलाघवंफलंसिद्धांतेतुदोषद्वयाभावःफलंतथाहियदिश्रुतशब्दैरश्रुतनिषेधालक्ष्यंतेतदालक्षणादोषःयदिनलक्ष्यंतेतदासर्वद्वैतनिषेधासिद्धेर्निर्विशेषप्रमित्यभावदोषइतिविवेकः॥अक्षरेधर्मिणिद्वैतनिषेधधियोऽक्षरधियस्ताहेतवःशब्दादितियावत्तासामवरोधउपसंहारइतिसूत्रयोज

दे

तथा२

॥शेषिब्रह्मणः सर्वशाखासु भावात्तत्प्रमितेः समानत्वाच्छेषाणामुपसंहार इति चेन्नहि न्यायसाम्यात् पुनरुक्तितादवस्थ्यमित्यत आह॥ प्रपं-
चार्थ इति॥ आनंदादीनां स्वरूपत्वादस्तूपसंहारः निषेधानामनात्मत्वादानंत्याच्चानुपसंहार इत्यधि——काशंकायां तेषामनात्मत्वेपि निर्विशेषब्र-
ह्मप्रमित्यर्थत्वादविद्यातत्त्वनिषेधत्वेन संग्रहसिद्धेश्च निरपेक्षास्थूलानणुवाक्यस्यैकत्वनिषेधशब्दानामन्यत्र श्रुतनिषेधवाक्यैकवाक्यतयोप॥
संहार इति चिंतायुक्तेत्यर्थः॥ अन्यत्र श्रुतशेषाणां अन्यत्रस्थ शेषिसंबंधे दृष्टांतं व्याचष्टे॥ यथेति॥ जमदग्निः पुष्टिकामश्चतूरात्रेणायजत इत्युप-
क्रम्य विहितः जमदग्निना कृतो जामदग्न्य अहीनश्चतुरात्रः क्रतुस्तस्मिन्पुरोडाशिन्य उपसदो भवंतीति पुरोडाशसाध्या इष्टयस्तैत्तिरीयके विहि-
तास्तासामध्वर्युकर्तृकत्वात्सामवेदोत्पन्नमंत्राणां तासु विनियोगादध्वर्युणैव प्रयोगो नोद्गात्रेत्यर्थः॥ वेर्दैवगणस्य होत्रं अध्वरं च कर्माग्नेस्त्वत्र

प्रपंचार्थश्चायं चिंताभेदः॥ औपसदवदिति निदर्शनं॥ यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदिता-
सु पुरोडाशप्रदानमंत्राणामग्ने र्वेर्होत्रं वेरध्वरमित्येवमादीनामुद्गातृवेदोत्पन्नानामप्यध्वर्युभिरभिसंबंधो भव-
ति॥ अध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य॥ प्रधानतंत्रत्वाच्चांगानामेवमिहाप्यक्षरतंत्रत्वात्तद्विशेषणानां यत्रक्व-
चिदप्युत्पन्नानामक्षरेण सर्वत्राभिसंबंध इत्यर्थः॥ तदुक्तं प्रथमे कांडे गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्ये-
न वेदसंयोग इत्यत्र ॥ ३३ ॥ २० ॥ ॥

हूर२

एवेत्यग्नामंत्रणमंत्रार्थः॥ उत्पत्तिविधिर्गुणः फलापेक्षत्वादुत्पन्नस्य फले विनियोगविधिर्मुख्यः सफलत्वात्तथा च मंत्राणामुद्गातृवेदोत्पन्नत्वादु-
द्गात्राप्रयोगः॥ विनियोगविधिनाध्वर्युणाप्रयोग इति गुणमुख्ययोर्व्यतिक्रमे विरोधे सति मुख्येन बलीयसा मंत्रात्मकवेदस्याध्वर्युणा संप्रयोग उत्पत्तेर्विनियो-
गार्थत्वादिति जैमिनिसूत्रार्थः॥ यद्यपि शाबरभाष्ये वारवंतीयादिसाम्नामुच्चैः स्वरकसामवेदोत्पन्नत्वादाधानांगत्वेनोच्चैः स्वरप्रयोगः॥ यएवं विद्वान्वारवंती-
यं गायति यज्ञायज्ञीयं गायति वामदेव्यं गायतीत्याधाने तेषां विनियोगविधिना याजुषेण याजुषस्योपांशुस्वरस्य प्रयोग इति गुणमुख्ययोर्विरोधे सत्युत्पत्तेर्वि-
नियोगार्थत्वान्मुख्यविनियोगबलेन साम्नां यजुर्वेदस्वरसंयोग इति सूत्रं व्याख्यानं तथापि न्यायसाम्यादौपसदमंत्राः सूत्रविषयत्वेनोदाहृता इत्यविरोधः

इयदामननात्॥मंत्रद्वयेपिप्रतिपादनप्रकारभेदाज्ज्ञेयैक्याभानाच्चसंशयमाह॥किमत्रेति॥ऋतपानवाक्येऽक्षरंब्रह्मयत्परमितिगुणाः श्रुताःसुपर्णवाक्येऽनश्नत्वादयस्तेषांमिथोनुपसंहारइतिपूर्वपक्षफलंसिद्धांतेत्वसंसारिब्रह्मस्वरूपवाक्यार्थैक्यादुपसंहारइतिविवेकः अस्तुवेद्यैक्यात् अक्षरधियामुपसंहारइहतुवेद्यभेदान्नोपसं

॥इयदामननात्॥३४॥द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीत्यध्यात्माधिकारेमंत्रंआथर्वणिकाःश्वेताश्वतराश्चपठंति॥तथाकठाऋतंपिबंतौसुकृतस्यलोकेगुहाप्रविष्टौपरमेपरार्द्धे॥छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताइति॥किमत्रविद्यैकत्वंउतविद्यानानात्वंइतिसंशयः॥किंतावत्प्राप्तंविद्यानानात्वमिति॥कुतःविशेषदर्शनात्॥द्वासुपर्णेत्यत्रह्येकस्यभोक्तृत्वंदृश्यते॥एकस्यचाभोक्तृत्वं॥ऋतंपिबंतावित्यत्रउभयोरपिभोक्तृत्वमेवदृश्यतेतद्वेद्यरूपंभिद्यमानंविद्याभिद्यातइत्येवंप्राप्तेब्रवीति॥विद्यैकत्वमिति॥कुतःयतउभयोरप्यनयोर्मंत्रयोरियत्तापरिच्छिन्नंद्वित्वोपेतंवेद्यरूपमभिन्नमामनंति॥ननुदर्शितोरूपभेदोनेत्युच्यते॥उभावप्येतौमंत्रौजीवद्वितीयमीश्वरंप्रतिपादयतोनार्थांतरं॥द्वासुपर्णेत्यत्रतावत्अनश्नन्नन्योअभिचाकशीतीत्यशनायाद्यतीतःपरमात्माप्रतिपाद्यते॥वाक्यशेषेपिचसएवप्रतिपाद्यमानोदृश्यते॥जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमिति॥ऋतंपिबंतावित्यत्रतुजीवेपिबत्यशनायाद्यतीतःपरमात्मापिसाहचर्याच्छत्रिन्यायेनपिबतीत्युपचर्यते॥परमात्मप्रकरणंह्येतत्॥अन्यत्रधर्मादन्यत्राधर्मादित्युपक्रमात्॥तद्विषयएवचात्रापिवाक्यशेषोभवति॥यःसेतुरीजानानामक्षरंब्रह्मयत्परमिति॥गुहांप्रविष्टावात्मानौहीत्यत्रचैतत्प्रपंचितं॥तस्मान्नास्तिवेद्यभेदः॥तस्माच्चविद्यैकत्वं॥अपिचत्रिष्वप्येतेषुवेदांतेषुपौर्वापर्यालोचनेपरमात्मविद्यैवावगम्यते॥तादात्म्यविवक्षयैवजीवोपादानंनार्थांतरविवक्षया॥नचपरमात्मविद्यायांभेदाभेदविचारावतारोस्तीत्युक्तं॥तस्मात्प्रपंचार्थएवैषयोगः॥तस्माच्चाधिकधर्मोपसंहारइति॥३४॥२१॥

हारइतिप्रत्युदाहरणेनपूर्वपक्षः नन्वयंगुहाधिकरणेनिरस्तइतिचेन्सत्यंकिंतुपिबत्पदस्यमुख्यार्थत्वायस्वतःकल्पनयाचपानकर्तृत्वाश्रयौबुद्धिजीवौपिबंतौग्राह्यौसुपर्णौतुजीवेश्वरावित्यधिकाशंकायांमंत्रद्वयेपिद्विवचनशब्दसामान्यादौत्सर्गिकद्वित्वविशिष्टतयातुल्यवस्तुद्वयप्रत्यभिज्ञानस्यबाधकाभावात्प्रकरणाद्यनुग्रहाच्चजीवानुवादेनासंसारिब्रह्मणिमंत्रद्वयतात्पर्यमितिप्रपंचार्थमिदंसूत्रमितिभावः॥३४॥२१॥

अंतराभूतग्रामवत्स्वात्मनः घटादिकंचिद्विषयत्वेनापरोक्षंब्रह्मतुसाक्षादविषयत्वेनापरोक्षमितिप्रथमार्थेपंचमी॥अत्रश्रुतावात्मधर्मोऽपरोक्षत्वंब्रह्म
ण्युक्तंब्रह्मधर्मःसर्वांतरत्वमात्मन्युक्तंतेनतयोरैक्यंदृढीकर्तंमंतव्यं॥तन्मेव्याचक्ष्वेत्युषस्तप्रश्नेयाज्ञवल्क्येनप्राणादिप्रेरकोदृश्यादिसाक्षीप्रतिपादितःतथैव

अंतराभूतग्रामवत्स्वात्मनः।३५।यत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइत्येवंद्विरुषस्तकहोलप्रश्नयोर्नैरंतर्येणवाजसनेयिनःसमामनंति॥तत्रसंशयः॥विद्यैकत्वंवास्याद्विद्यानानात्वंवेति॥विद्यानानात्वमितितावत्प्राप्तं॥अभ्याससामर्थ्यादन्यथाह्यन्यूनानतिरिक्तार्थेद्विराम्नानमनर्थकमेवस्यात्॥तस्माद्यथाभ्यासात्कर्मभेदः॥एवमभ्यासाद्विद्याभेदइत्येवंप्राप्तेप्रत्याह॥अंतराम्नानाविशेषात्स्वात्मनोविद्यैकत्वमिति॥सर्वांतरोहिस्वआत्मोभयत्राप्यविशिष्टःपृच्छ्यतेचप्रत्युच्यतेच॥नहिद्वावात्मानावेकस्मिन्देहेसर्वांतरौभवतः॥तदाह्येकस्यांजसंसर्वांतरत्वमवकल्पेत॥एकस्यतुभूतग्रामवन्नैवसर्वांतरत्वंस्यात्॥यथाचपंचभूतसमूहेपृथिव्याआपोंतराअद्भ्यस्तेजोंतरमितिसत्यप्यापेक्षिकेंतरत्वेनैवमुख्यंसर्वांतरत्वंभवति॥तथेहापीत्यर्थः॥अथवाभूतग्रामवदितिश्रुत्यंतरंदर्शयति॥यथाएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मेत्यस्मिन्मंत्रेसमस्तेषुभूतग्रामेषुएकएवसर्वांतरआत्माआम्नायतेएवमनयोरपिब्राह्मणयोरित्यर्थः।तस्माद्वेद्यैक्याद्विद्यैक्यमिति॥३५॥अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशांतरवत्॥३६॥अथयदुक्तमनभ्युपगम्यमानेविद्याभेदेआम्नानभेदानुपपत्तिरितितत्परिहर्तव्यं॥अत्रोच्यतेनायंदोषः॥उपदेशांतरवदुपपत्तेः॥यथातांडिनामुपनिषदिषष्ठेप्रपाठकेसआत्मातत्त्वमसिश्वेतकेतोइतिनवकृत्वोप्युपदेशेनविद्याभेदोभवतिएवमिहापिभविष्यति॥कथंचनवकृत्वोप्युपदेशेविद्याभेदोनभवति॥उपक्रमोपसंहाराभ्यामेकार्थतावगमात्॥भूयएवमाभगवान्विज्ञापयत्वितिचैकस्यैवार्थस्यपुनःपुनःप्रतिपिपादयिषितत्वेनोपक्षेपात्॥आशंकांतरनिराकरणेनवाऽसकृदुपदेशोपपत्तेः॥

॰॰यदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तन्मेव्याचक्ष्वेतिकहोलप्रश्नेऽशनायाद्यतीतःप्रतिपादितस्तत्रब्राह्मणद्वयेपिप्रश्नाद्यभ्यासात्सर्वांतरत्वप्रत्यभिज्ञानाच्चसंशयेमंत्रयोर्वेद्यैक्यादस्तुविद्यैक्यंइहतुब्राह्मणयोर्वेद्यैक्येपिअभ्यासाद्विद्याभेदःप्रजत्यभ्यासात्प्रयाजभेदवदितिप्रत्युदाहरणेनपूर्वपक्षःतत्रमिथोधर्मानुपसंहारःफलंसिद्धांतेतूपसंहारइतिविवेकः॥द्वयोःसर्वांतरत्वानुपपत्त्यातावद्ब्राह्मणयोरेकवस्तुपरत्वंसिद्धंतथाचवेद्यैक्यान्निर्गुणविद्यैक्येनविवादः॥३५॥

नन्वन्यथाविद्यैक्यांगीकारेभ्यासानुपपत्तिरितिचेदुच्यते स एवाभ्यासःकर्मभेदकोयोनिरर्थकः इहतूषस्तब्राह्मणोक्तात्मनएवाशनायाद्यन्यरूपविशेषक
थनार्थत्वादभ्यासोन्यथासिद्धोनविद्याभेदकइतिसमुदायार्थः।३६।।२२।। व्यतिहारः।। जीवेशयोर्मिथोविशेषणविशेष्यभावोव्यतिहारस्तस्यश्रुतत्वादुक्त।

एवमिहापिप्रश्नरूपाभेदादतोन्यदार्त्तमितिचपरिसमाप्त्यविशेषादुपक्रमोपसंहारौतावदेकार्थविषयौदृश्येते।।यदे
वसाक्षादपरोक्षात् ब्रह्मेतिद्वितीयेप्रश्नेएवकारंप्रयुंजानःपूर्वप्रश्नगतमेवार्थमुत्तरत्रानुकृष्यमाणंदर्शयतिपूर्वस्मिंश्चब्राह्म
णेकार्यकरणव्यतिरिक्तस्यात्मनःसद्भावःकथ्यते ।।उत्तरस्मिंस्तुतस्यैवाशनायादिसंसारधर्मातीतत्वंकथ्यतइत्येकार्थतोपप
त्तिः।।तस्मादेकाविद्येति।।३७।।२२।। व्यतिहारोविशिंषंतिहीतरवत्।।३८।। तद्योहंसोसौयोसौसोहमित्यादित्यपुरुषंप्रकृत्यऐ
तरेयिणःसमामनंति।।तथाजाबालास्तुत्वंवाअहमस्मिभगवोदेवतेअहंवैत्वमसीति।।तत्रसंशयः।।किमिहव्यतिहा
रेणोभयरूपामतिःकर्त्तव्याउतैकरूपैवेतितावदाह।।नह्यत्रात्मनईश्वरेणैकत्वमुक्त्वान्यत्किंचिच्चिंतयितव्यमस्ति।।यदिचै
वंचिंतयितव्योविशेषःपरिकल्प्यतसंसारिणश्चेश्वरात्मत्वंईश्वरस्यचसंसार्यात्मत्वमिति।।तत्रसंसारिणस्तावदीश्वरात्मत्वेउ
त्कर्षोभवेत्।।ईश्वरस्यतुसंसार्यात्मत्वेनिकर्षःकृतःस्यात्।।तस्मादैकरूप्यमेवमतेर्व्यतिहाराम्नायस्त्वेकत्वदृढीकारार्थ
इत्येवंप्राप्तेप्रत्याह।।व्यतिहारोयमाध्यानायाम्नायतेइतरवत्।।यथेतरेगुणाःसर्वात्मत्वप्रभृतयआध्यानायाम्नायंतेत
द्वत्।।तथाहिविशिंषंतिसमाम्नातारः।।उभयोच्चारणेनत्वमहमस्मिअहंचत्वमसीति।।तच्चोभयरूपायांमतौकर्त्तव्यायामर्थ
वद्भवति।।अन्यथाहीदंविशेषेणोभयाम्नानमनर्थकंस्यात्एकेनैवकृतत्वात्।।ननूभयाम्नानस्यार्थविशेषपरिकल्प्यमानेदेव
तायाःसंसार्यात्मत्वापत्तेर्निकर्षःप्रसज्येतेत्युक्तं।।

२२ दृष्टिर्निकृष्टेकृताफलवतीतिन्यायाच्चसंशयेजीवेईश्वरत्वमतिरेवकार्याउक्तन्यायात्
व्यतिहारश्रुतिस्तुतस्याएवदृढीकरणार्थत्वेनाभ्यासवदन्यथासिद्धेतिदृष्टांतेनपूर्वपक्षः।।तत्रलाघवंफलंसिद्धांतेत्वनर्थवत्वमितिविवेकः।।एकेनैवत्वमहम
स्मीत्युच्चारणेनैकत्वमतेःकृतत्वादहंत्वमसीतिवृथास्यादित्यर्थः।।उक्तदोषंस्मारयति।।नन्विति।।

संदिग्धेर्थेन्यायःसावकाशःइहतुश्रुतत्वादन्योन्यात्मत्वंध्येयंब्रह्मणिमनोमयत्वादिवत्जीवात्मत्वस्यध्यानार्थंआरोपेपिनिकर्षप्रसक्त्यभावादितिपरिहरति
नैषदोषइतिब्रह्मणिनिकर्षंहित्वाजीवतादात्म्यध्यानेमदुक्तमेवागतमितिशंकतेनन्वेवमितिमतेर्द्विरूपत्वंतत्वदनुक्तमस्माभिरुच्यतेध्यानपरंवाक्यमि
दमेकत्वंतुमानांतराविरोधात्सिध्यतीतिसमाधत्ते॥ नवयमिति॥ अहंग्रहोपास्तिष्वयंव्यतिहारःउपसंहर्तव्यइत्याह॥ तस्मादिति॥ ३७॥ २३॥ सैवहिस
त्यादयः॥ सयःकश्चिदधिकारीमहद्यापकंयक्षंपूज्यंभौतिकेषुप्रथमजमेतंसच्चत्यच्चेतिसत्यंब्रह्महिरण्यगर्भाख्यंवेदोपास्तेतस्यलोकजयःफलमित्य
र्थः॥ सत्यमितिनामत्र्यक्षरंसतियमितितत्रप्रथमोत्तमेअक्षरेसत्यंमध्यस्थमक्षरमनृतमुभयतःसत्येनसंपुटितत्वात्सत्यप्रायमेवभवतीतिनामाक्ष

नैषदोषः॥ ऐकात्म्यस्यैवानेनप्रकारेणानुचिंत्यमानत्वात्॥ नन्वेवंसतिसएवैकत्वदृढीकारआपद्येत॥ नवयमेकत्वदृढीकारं
वारयामः॥ किंतर्हिव्यतिहारेणेहद्विरूपामतिःकर्तव्येतिवचनप्रामाण्यात्नैकरूपेत्येतावदुपपादयामः॥ फलतस्त्वेकत्वमपिदृ
ढीभवति॥ यथाध्यानार्थेपिसत्यकामादिगुणोपदेशेतद्गुणईश्वरःप्रसिध्यतितद्वत्॥ तस्मादयमाध्यातव्योव्यतिहारःसमानेच
विषयेउपसंहर्तव्योभवति॥ ३७॥ २३॥ सैवहिसत्यादयः॥ ३८॥ सयोहैतंमहद्यक्षंप्रथमजंवेदसत्यंब्रह्मेत्यादिनावाजसनेय
केसत्यविद्यांसनामाक्षरोपासनांविधायानंतरमाम्नायते॥ तद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायं
दक्षिणेक्षन्पुरुषइत्यादि॥ तत्रसंशयः॥ किंद्वेएतेसत्यविद्येकिंवैकैवेति॥ द्वेइतितावत्प्राप्तंभेदेनहिफलसंयोगोभवतिजय
तीमांल्लोकानितिपुरस्ताद्धंतिपाप्मानंजहातिचयएवंवेदेति॥ उपरिष्टात्प्रकृताकर्षणंतूपास्यैकत्वादित्येवंप्राप्तेब्रूमः॥ ९

अन्यपुस्तकेषुत्वेवंपाठोदृश्यते जहातिचेत्युपरिष्टात् इति=१

रोपासनासत्यविद्यांगत्वेनोक्ता॥ यत्तत्पूर्वंप्रकृतंहृदयाख्यंतत्सत्प्रत्युक्तयस्सत्वादिगुणकंसोसावादित्यमंडलेक्षिणिचपुरुषस्तस्याहरित्यहमितिच
नामह्यज्ञानात्पापक्षयःफलमित्यर्थः॥ अत्रपूर्वोत्तरवाक्ययोःफलभेदश्रुतेःप्रकृताकर्षणाच्चसंशयमाह॥ तत्रेति॥ पूर्वपक्षेगुणानांव्यवस्थयानुष्ठानं
सिद्धांतेत्वनुष्ठानैक्यमितिफलं॥ यथाजीवेशयोरन्योन्यात्मत्वश्रुतिभेदात्मतिद्वैरूप्यमुक्तंतथात्रफलश्रुतिभेदाद्विद्याभेदइतिदृष्टांतेनपूर्वपक्षयति॥
द्वेइति॥ विशेष्यब्रह्ममात्राकर्षणमयुक्तंतद्यत्तदितिसर्वनामभिःपूर्वोक्तगुणविशिष्टंब्रह्मआकृष्यादित्याक्षिस्थानादिगुणविधानात्तथाचवाक्यादेवंवि

[illegible]

सिद्धांतयति॥एकैवेति॥यथादहरशांडिल्यविद्ययोर्ब्रह्मैक्यप्रत्यभिज्ञानमात्रं न तथात्र नेत्याह॥नैतदिति॥कारणांतरं प्रकरणभेदादिकं एवं विद्याभेदेप्येतदुपास्यैक्यज्ञानं स्यादत्र तूभयथासंभवे विद्यैक्यनानात्वसंशये सत्यमित्युपास्यरूपैक्यज्ञानाद्विद्यैक्यनिश्चय इत्यक्षरार्थः॥असत्यपवादकारणे रूपैक्याद्विद्यैक्योत्सर्गसिद्धिः न च फलभेदादपवादः अंगे फलश्रुतेः स्तुतिमात्रतया फलभेदासिद्धिरित्याह॥यत्पुनरित्यादिना॥किंच यत्र प्रधानविधावेवं काम इति फलं श्रुतं तत्र प्रधानफलेनैवांगानां फलाकांक्षानिवृत्तेरंगे फलश्रुतेः स्तुतिमात्रत्वं इह तु प्रथमजं सत्यं ब्रह्मेति वेदेति प्रधानविद्याविधिस्थत्वं।

एकैवेयं सत्यविद्येति॥कुतः तद्यत्तत्सत्यमिति प्रकृताकर्षणात्॥ननु विद्याभेदेपि प्रकृताकर्षणमुपास्यैकत्वादुपपद्यत इत्युक्तं॥नैतदेवं॥यत्र तु विस्पष्टात्कारणांतराद्विद्याभेदः प्रतीयते तत्रैतदेवं स्यात्॥अत्र तूभयथासंभवे तद्यत्तत्सत्यमिति प्रकृताकर्षणात्पूर्वविद्यासंबद्धमेव सत्यमुत्तरत्राकृष्यत इत्येकविद्यात्वनिश्चयः॥यत्पुनरुक्तं फलांतरश्रवणाद्विद्यांतरमिति॥अत्रोच्यते॥तस्योपनिषदहरहमिति चांगांतरोपदेशस्य स्तावकमिदं फलांतरश्रवणमित्यदोषः॥अपि चार्थवादादेव फले कल्पयितव्ये सति विद्यैकत्वे चावयवेषु श्रूयमाणानि बहून्यपि फलानि अवयविन्यामेकविद्यायामुपसंहर्तव्यानि भवंति॥तस्मात्सैवेयमेका सत्यविद्या तेन तेन विशेषेणोपेताम्नातेत्यतः सर्व एव सत्यादयो गुणा एकस्मिन्नेव प्रयोग उपसंहर्तव्याः॥केचित्पुनरस्मिन्सूत्रे इदं च वाजसनेयकमक्ष्यादित्यपुरुषविषयं वाक्यं छांदोग्ये च अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते अथ य एषोंतरक्षिणि पुरुषो दृश्यत इत्युदाहृत्य सैवेयमक्ष्यादित्यपुरुषविषया विद्योभयत्रैकैवेति कृत्वा सत्यादीन् गुणान् वाजसनेयिभ्यः छंदोगानामुपसंहार्यान्मन्यंते तन्न साधु लक्ष्यते॥छांदोग्ये हि कर्मसंबंधिनीयमुद्गीथव्यपाश्रया विद्या विज्ञायते तत्र ह्यादिमध्यावसानेषु कर्मसंबंधिचिन्हानि भवंति॥ ⁂ ॥

ज्योतिष्टोम १

लोकजयफलत्वस्याभ्युपेत्यास्माभिर्नामरूपांगस्य फलश्रुतेः स्तुतित्वमुक्तं वस्तुतस्तु प्रधानविधावप्येवं कामपदाभावाद्रात्रिसत्रन्यायेन फले कल्पनीये सति प्रधाने तदंगे वा यत्किंचित्फलं श्रुतं तस्य सर्वस्यापि श्रुतत्वाविशेषाज्जातेष्टिफलन्यायेन समुच्चित्यैकप्रधानफलत्वकल्पनात्फलभेदोऽसिद्ध इत्याह॥अपि चेति॥सूत्रं योजयति॥तस्मादिति॥एकदेशिव्याख्यामुद्भाव्य दूषयति॥केचिदित्यादिना॥छांदोग्ये कर्मांगोद्गीथे हिरण्मयपुरुषदृष्टिरित्यत्र

पृथिव्यग्न्यात्मनादृष्टेऋक्सामेगेष्णोतस्मादृक्सामगेष्णत्वात्पुरुषउद्गीथइत्येवंविद्वाननुज्ञाताकर्मफलसमृद्धिसमर्थइतिश्रुत्यर्थः॥ सत्यविद्यातु नकर्मांगाश्रितेत्याह॥ नैवमिति॥ अंगविद्यातःस्वतंत्रहिरण्यगर्भविद्यायाभेदान्नगुणोपसंहारइत्यर्थः॥३८॥ कामादी॥ सगुणनिर्गुणविद्ययोःश्रुताःसत्य

इयमेवर्गग्निःसामेत्युपक्रमेतस्यर्क्चसामचगेष्णोतस्मादुद्गीथइतिमध्येयएवंविद्वान्सामगायतीत्युपसंहारे॥ नैवंवाजसनेयके किंचित्कर्मसंबंधिचिन्हमस्ति॥ तत्रप्रक्रमभेदाद्विद्याभेदेसतिगुणव्यवस्थैवयुक्तेति॥२४॥ कामादीतरत्रतत्रचायतनादिभ्यः॥३९॥ अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराऽऽकाशइतिप्रस्तुत्यछंदोगाअधीयते॥ एषआत्मापहतपाप्माविजरो विमृत्युर्विशोकोविजिघत्सोपिपासःसत्यकामःसत्यसंकल्पइत्यादि॥ तथावाजसनेयिनः सवाएषमहानजआत्मायोयंविज्ञानमयःप्राणेषुयएषोंतर्हृदयआकाशस्तस्मिञ्छेतेसर्वस्यवशीत्यादि॥ तत्रविद्यैकत्वंपरस्परगुणयोगश्चकिंवानेतिसंशयेविद्यैकत्वमिति॥ तत्रेदमुच्यते॥ कामादीति॥ सत्यकामादीत्यर्थः॥ यथादेवदत्तोदत्तःसत्यभामाभामेति॥ यदेतच्छांदोग्येहृदयाकाशस्यसत्यकामत्वादिगुणजातमुपलभ्यतेतदितरत्रवाजसनेयकेसवाएषमहानजआत्माइत्यत्रसंबध्यते॥ यच्चवाजसनेयकेवशित्वाद्युपलभ्यतेतदपीतरत्रछांदोग्येएषआत्मापहतपाप्मेत्यत्रसंबध्यते॥ आयतनादिसामान्यात्॥ समानंह्युभयत्रापिहृदयमायतनंसमानश्चवेद्यईश्वरःसमानंचतस्यसेतुत्वंलोकासंभेदप्रयोजनमित्येवमादिबहुसामान्यंदृश्यते॥ ननुविशेषोपिदृश्यतेछांदोग्येहृदयाकाशस्यगुणयोगोवाजसनेयकेत्वाकाशाश्रयस्यब्रह्मणइति॥ न॥ दहरउत्तरेभ्यइत्यत्रछांदोग्येपिआकाशशब्दंब्रह्मैवेतिप्रतिष्ठापितत्वात्॥ अयंत्वत्रविद्यतेविशेषः॥ सगुणाहिब्रह्मविद्याछांदोग्येउपदिश्यते॥ अथयइहात्मानमनुविद्यव्रजंत्येतांश्चसत्यान्कामानित्यात्मवत्कामानामपिवेद्यत्वश्रवणात्॥

कामाद्योवशित्वादयश्चगुणामिथउपसंहर्तव्यानवेत्युपसंहारस्यफलभावाभावाभ्यांसंदेहेसत्यविद्यायाएकत्वाद्गुणसांकर्येप्यत्रविद्ययोःसगुणनिर्गुणारूपभेदेनभेदान्निर्गुणविद्यायांगुणोपसंहारस्यफलाभावाच्चानुपसंहारइतिबहिरेवप्राप्तेसिद्धांतयति॥ तत्रेदमित्यादिना॥

एवं विद्याभेदे स्फुटे कथं गुणोपसंहारस्तत्राह ॥ गुणवत्त्वस्त्विति ॥ भिन्नविद्यास्थानामपि गुणानामायतनादिसाम्येन निर्गुणस्थलेबुद्धिस्थानां स्तुत्यर्थमुपसंहारो युक्तः ज्ञानस्तुतिप्रकर्षस्याकांक्षितत्वाद्यत्र क्वचिद्दृष्टगुणैः स्तुतेः कर्तुंयोग्यत्वात् यद्यपि सगुणस्य सत्यकामादिषु निर्गुणस्य गुणा अंतर्भूता एव तथापि नोपसंहारोक्तेर्वैयर्थ्यं निर्गुणास्तावकत्वेन श्रुतगुणानामन्यत्राप्यध्येयत्वमिति शंकानिरासेनांतर्भावदार्ढ्यार्थत्वादित्यनवद्यं ॥ ३९ ॥ २५ ॥ आदरादलोपः ॥ अत्र यच्छब्दाग्निहोत्रशब्दाभ्यां संशयमाह ॥ तत्रेदं विचार्यत इति वैश्वानरोपासकेनातिथिभोजनात्प्राक् कार्य

वाजसनेयके तु निर्गुणमेव परं ब्रह्मोपदिश्यमानं दृश्यते ॥ अत ऊर्ध्वं विमोक्षाय ब्रूहि असंगो ह्ययं पुरुष इत्यादि प्रश्नप्रतिवचनसमन्वयात् ॥ वशित्वादि तु तत्स्तुत्यर्थमेव गुणजातं वाजसनेयके संकीर्त्यते ॥ तथा चोपरिष्टात्स एष नेति नेत्यात्मेत्यादिना निर्गुणमेव ब्रह्मोपसंहरति ॥ गुणवत्तु ब्रह्मण एकत्वात् विभूतिप्रदर्शनायायं गुणोपसंहारः सूत्रितो नोपासनायेति द्रष्टव्यं ॥ ३९ ॥ २५ ॥ आदरादलोपः ॥ ४० ॥ छांदोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते ॥ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादि ॥ तत्र पंच प्राणाहुतयो विहितास्तासु च परस्तादग्निहोत्रशब्दः प्रयुक्तः स य एतदेवं विद्वानग्निहोत्रं जुहोतीति ॥ यथेह क्षुधिता बाला मातरं पर्युपासते ॥ एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इति च ॥ तत्रेदं विचार्यते किं भोजनलोपे लोपः प्राणाग्निहोत्रस्य उतालोप इति ॥ तद्यद्भक्तमिति भक्तागमनसंयोगश्रवणाद्भक्तागमनस्य च भोजनार्थत्वाद्भोजनलोपे लोपः प्राणाग्निहोत्रस्येति ॥ एवं प्राप्ते न लुप्येतेति तावदाह ॥ कस्मादादरात् ॥ तथा हि वैश्वानरविद्यायामेव जाबालानां श्रुतिः ॥ ५

त्वेन विद्यांगप्राणाग्निहोत्रविचारात् स्यादसंगतिः पूर्वपक्षे भोजनलोपेपि द्रव्यांतरेण प्राणाग्निहोत्रानुष्ठानं सिद्धांतेन लोप इति भेदः ॥ ननु यद्भक्तमिति यच्छब्देन भोजनाक्षिप्तभक्तमनूद्य तद्धोमीयमिति होमसंयोगविधानादाक्षेपकभोजनलोपेनदाक्षिप्तभक्ताश्रितहोमलोप इति सिद्धांती शंकते ॥ तद्यदिति ॥ निर्गुणस्योपास्तिलोपेपि स्तुत्यर्थगुणस्थैर्यवद्भोजनलोपेपि प्राणाग्निहोत्रस्यादरेण स्तुतिनिर्वाहार्थमलोप इति दृष्टांतेन पूर्वपक्षसूत्रेण परिहरति ॥ एवं प्राप्त इति ॥ ःः

स्वंतरिति स्वयं प्राणाग्निहोत्रमकृत्वातिथीनां तत्कारणमित्यर्थः॥ उक्तं स्मारयित्वा परिहरति नन्वित्यादिना॥ यथा कुंडपायिस्तत्रगते मासाग्निहोत्रे अग्निहोत्रशब्दाद्गौणान्नित्याग्निहोत्रवाचकान्नित्याग्निहोत्रधर्माणां पयोद्रव्यादीनां प्राप्तिस्तथेहापि प्राणाहुतीष्वग्निहोत्रशब्दवत्पयोद्रव्यादीनामुत्सर्गतः प्राप्तौ सत्यां भोजनार्थभक्तद्रव्यविधिनापवादः कृतः॥ अतो भक्तविधेरपवादार्थत्वाद्भोजनलोपे भक्ताख्यगुणस्यांगस्य लोपेपि न मुख्यस्याग्निहोत्रस्य लोपः अपवादाभावे उत्सर्गप्राप्तपय आदिना तस्य निष्पत्तिसंभवादिति प्राप्तमित्यर्थः॥ गुणलोपेन मुख्यस्येति जैमिनिसूत्रं आधाने संति पवमानेष्टयस्तत्राग्नये पवमानाय पुरोडाश

पूर्वोतिथिभ्योश्नीयात् यथा ह वै स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तदिति॥ अतिथिभोजनस्य प्राथम्यं निंदित्वा स्वामिभोजनं प्रथमं प्रापयंती प्राणाग्निहोत्र आदरं करोति॥ या हि न प्राथम्यलोपं सहते न तरां सा प्राथम्यवतोग्निहोत्रस्य लोपं सहेत इति मन्यते॥ ननु भोजनार्थं भक्तागमनसंयोगात् भोजनलोपे लोपः प्रापितः॥ न॥ न स द्रव्यविशेषविधानार्थत्वात्॥ प्राकृते ह्यग्निहोत्रे पयःप्रभृतीनां द्रव्याणां नियतत्वादिहाप्यग्निहोत्रशब्दात्कौंडपायिनामयनवत्तद्धर्मप्राप्तौ सत्यां भक्तद्रव्येकता गुणविशेषविधानार्थमिदं वाक्यं तद्युक्तमिति॥ अतो गुणलोपेन मुख्यस्येत्येवं प्राप्ते भोजनलोपेप्यद्भिरन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहोत्रस्यानुष्ठानमिति॥४०॥ अत उत्तरं पठति॥ उपस्थितेऽनस्तद्वचनात्॥४१॥ उपस्थिते भोजनेऽनस्तस्मादेव भोजनद्रव्यात्प्रथमोपनिपतितात्प्राणाग्निहोत्रं निर्वर्तयितव्यं॥ कस्मात् तद्वचनात्॥ तथा हि तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमिति सिद्धवद्भक्तोपनिपातनपरामर्शेन परार्थद्रव्यसाध्यतां प्राणाहुतीनां विदधाति॥ ता अप्रयोजकलक्षणापन्नाः सत्याः कथं भोजनलोपे द्रव्यांतरं प्रतिनिधापयेयुः॥

मष्टाकपालं निर्वपेदिति निर्वापः श्रुतस्तदंगत्वेनाग्निहोत्रहवण्यां हवींषि निर्वपेदिति दर्शपूर्णमासाख्यप्रकृतौ विहिताग्निहोत्रहवण्या निर्देशेन प्राप्ता आधानकाले चाग्निहोत्राभावात्तस्या गुणभूताया लोपेपि मुख्यस्य निर्वापस्य न लोप इत्यर्थः॥ आरब्धनित्यादिकर्मणोवश्यानुष्ठेयत्वाच्छ्रुतद्रव्यालाभे प्रतिनिहितद्रव्येणापि कर्म कर्तव्यमिति प्रतिनिधिन्यायः॥४०॥ सिद्धांतयति॥ उपस्थितेनतस्त नद्वचनादिति॥ तद्धोमीयमिति तच्छब्देन भोजनार्थसिद्धभक्तमाश्रित्य होमविधानादित्यर्थः॥ सिद्धवद्भक्तोपनिपातः प्रकृतभक्तागमनं तस्य तच्छब्देन परामर्शेनेत्यर्थः॥ आश्रित्य विहिताहुतीनामाश्रयलोपे लोप एव तद्द्रव्यांतराक्षेपकत्वं यथा क्रतुप्रयुक्ताप्रणयनाश्रितस्य गोदोहनस्य क्रतुलोपे लोपो न त्वाश्रयांतरप्रयोजकत्वं तथेति फलितमाह॥ ता इति॥

यदुक्तमग्निहोत्रशब्दात्तद्धर्मांतरप्राप्तिरितितत्राह॥नचात्रेति॥तद्भावोनित्याग्निहोत्रसादृश्यमर्थवादस्थशब्दस्यस्तुतित्वेनोपपत्तेरित्यर्थः॥धर्मप्रापकत्वेदोषमाहतद्धर्मप्राप्तौचेति॥अतएवेतितद्धर्मप्राप्त्यभावादेवेत्यर्थः॥प्राप्तौसंपादनंवृथास्यादितिभावः॥मुख्याग्निहोत्रांगानिसंपाद्यंतेचेत्कथंतदनंगंवेदिरत्रसंपाद्यतेतत्राह॥वेदिश्रुतिश्चेतिमुख्याग्निहोत्रस्याभ्युद्धरणवत्सायंप्रातःकालद्वयस्यापिनप्राप्तिरित्याह॥भोजनेनेति॥उपस्थानपरिस्तरणादयोप्य

नचात्रप्राकृताग्निहोत्रधर्मप्राप्तिरस्ति॥कुंडपायिनामयनेहिमासमग्निहोत्रंजुहोतीतिविध्युद्देशगतोग्निहोत्रशब्दस्तद्भावंविधापयेदितियुक्तातद्धर्मप्राप्तिः॥इहपुनरर्थवादगतोग्निहोत्रशब्दोनतद्भावंविधापयितुमर्हति॥तद्धर्मप्राप्तौचाभ्युपगम्यमानायांअभ्युद्धरणादयोपिप्राप्येरन्॥नचास्तिसंभवः॥अभ्युद्धरणंतावद्धोमाधिकरणभावाय॥नचायमग्नौहोमोभोजनार्थताव्याघातप्रसंगात्॥भोजनोपनीतद्रव्यसंबंधाच्चास्यएवैषहोमः॥तथाचजाबालश्रुतिः पूर्वोतिथिभ्योश्नीयादितिआसाधारामेवेमांहोमनिर्वृत्तिंदर्शयति॥अतएवचेहापिसांपादिकान्येवाग्निहोत्रांगानिदर्शयति॥उरएववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्योमनोन्वाहार्यपचनआस्यमाहवनीयइति॥वेदिश्रुतिश्चात्रस्थंडिलमात्रोपलक्षणार्थाद्रष्टव्यामुख्याग्निहोत्रेवेद्यभावात्तदंगानांचेहसंपिपादयिषितत्वात्॥भोजनेनैवचकृतकालेनसंयोगान्नाग्निहोत्रकालावरोधसंभवः॥एवमन्येप्युपस्थानादयोधर्माःकेचित्कथंचिद्धिरुध्यंते॥तस्माद्भोजनपक्षेएवैतेमंत्रद्रव्यदेवतासंयोगात्स्वंचहोमानिर्वर्त्तयितव्याः॥यत्त्वादरदर्शनवचनंतद्भोजनपक्षेप्राथम्यविधानार्थं॥नह्यस्तिवचनस्यातिभारः॥नत्वनेनास्यनित्यताशक्यतेदर्शयितुं॥तस्माद्भोजनलोपेलोपएवप्राणाग्निहोत्रस्येति॥२६॥तन्निर्धारणानियमस्तद्दृष्टेःपृथग्घ्यप्रतिबंधःफलं॥४२॥ संतिकर्मांगव्यपाश्रयाणिविज्ञानान्योमित्येतदक्षरमुद्गीथमुपासीतेत्येवमादीनि॥

न्यभावान्नप्राप्नुवंतीत्याहएवमिति॥यस्मात्तद्धर्मप्राप्त्यभावस्तस्माद्भोजनद्रव्येणैवहोमइत्युपसंहारः॥प्राणायस्वाहेत्यादयोमंत्राः॥ननुस्वामिभोजनस्योत्तरकालत्वंश्रुत्यादिविहितंकथंपूर्वोतिथिभ्योश्नीयादितिवचनेनबाध्यतेतत्राह नह्यस्तीति॥उपासकान्यस्वामिविषयमुत्तरकालत्वविधानमित्यर्थः॥नत्विति॥प्राथम्यमात्रेणेत्यर्थः॥प्राणोपासकस्यप्राप्तेभोजनेप्राथम्यार्थतयादरस्यान्यथासिद्धौफलि

उभयथा दृष्टांतदर्शनात्संशयमाह ॥ किं तानीति यथानारभ्याधीतपर्णमयीत्वं जुहूद्वारा क्रत्वंगतया कर्मसु नित्यं प्रयुज्यते तथांगाश्रितोपासनान्युद्गीथादिद्वारांगतया नित्यानि उत क्रत्वंगप्रणयनाश्रयो गोदोहनसंयोगः पशुफलार्थत्वादनित्यत्वेन यथा प्रयुज्यते ॥ यथा वा पश्वंगयूपाश्रयं बैल्वत्वमन्नाद्यफलत्वादनित्यं तथा कर्मसमृद्ध्यादिफलकत्वोपासनान्यनंगत्वेनानित्यानीति संशयार्थः पूर्वपक्षे उपासनानां प्रयोगनित्यत्वं सिद्धांते त्वनित्यत्वमिति फलभेदः ॥ अनित्यभोजनाश्रयप्राणाग्निहोत्रस्यानित्यत्ववन्नित्यकर्मांगोपास्तीनां नित्यत्वमिति प्रत्युदाहरणदृष्टांतेन पूर्वपक्षमाह ॥ किं तावदिति ॥ उपासनानि कर्मां

किं तानि नित्यान्येव स्युः कर्मसु पर्णमयीत्वादिवत् ॥ उतानित्यानि गोदोहनादिवदिति विचारयामः ॥ किं तावत्प्राप्तं नित्यानीति ॥ कुतः ॥ प्रयोगवचनपरिग्रहात् ॥ अनारभ्याधीतान्यपि ह्येतान्युद्गीथादिद्वारेण क्रतुसंबंधात्क्रतुप्रयोगवचनेनैवांगांतरवत्संस्पृश्यंते ॥ यत्त्वेषां स्ववाक्येषु फलश्रवणं आपयिता ह वै कामानां भवतीत्यादि तद्वर्तमानापदेशरूपत्वादर्थवादमात्रमेव अपापश्लोकश्रवणादिवन्न फलप्रधानं ॥ तस्माद्यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादीनामप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशात्प्रकरणपठितवन्नित्यता ॥ एवमुद्गीथाद्युपासनानामपीत्येवं प्राप्ते ब्रूमः तन्निर्धारणानियम इति ॥ यान्येतान्युद्गीथादिकर्मगुणयाथात्म्यनिर्धारणानि रसतम आप्तिः समृद्धिर्मुख्यप्राण आदित्य इत्येवमादीनि नैतानि नित्यवत्कर्मसु नियम्येरन् कुतः तद्दृष्टेः तथाह्यनित्यत्वमेवंजातीयकानां दर्शयति श्रुतिः ॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यविदुषोपि क्रियाभ्यनुज्ञानात् ॥ प्रस्तावादिदेवताविज्ञानविहीनानामपि प्रस्तोत्रादीनां याजनाध्यवसानदर्शनात् ॥ प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि तां चेदविद्वानुद्गास्यसि तां चेदविद्वान्प्रतिहरिष्यसीति च ॥

((गानि अफलत्वे सति कर्मांगाश्रितत्वात्पर्णमयीत्वादिवत्तथा चांगतया प्रयोगविधिना नित्येन प्रयुज्यंत इति प्राप्ते सिद्धांतसूत्रं व्याचष्टे यानीत्यादिना ॥ उद्गीथादयः कर्मणां गुणाः अंगानि तेषां याथात्म्यं रसतमत्वादिकं तन्निर्धारणान्युपासनानि यानि तानि कर्मसु नित्यपर्णमयीत्वादिवन्न नियम्येरन्नित्यर्थः ॥ एषां कर्मांगत्वे तद्धीनस्याविदुषः कर्म न स्यादंगलोपात्तस्माद्विदुषोपि कर्मकर्तृत्वश्रुतिलिंगैरंगत्वानुमानबाध इत्याह ॥ तद्दृष्टेरिति ॥ तस्यानियमस्य दर्शनादित्यर्थः ॥ तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते व्यपतिष्यतीति चाक्रायणेनर्त्विजामाक्षिप्तत्वादनुपासकानामपि कर्मप्रयोगोस्तीत्याह ॥ प्रस्तावादीति ॥

उपास्तीनांकर्मफलात्पृथक्फलश्रुतेर्नकर्मांगत्वमित्याह॥ अपिचेति॥ तेनोमित्यक्षरेणयश्चैतदक्षरमेवंरसतमत्वादिरूपेणवेदोपास्तेयश्चनवेदतावुभौकर्मकुरुतएवयद्यपितथापितुविद्याविद्ययोर्नानात्वंभिन्नफलत्वंदृष्टंहिमणिविक्रयेज्ञानाज्ञानाभ्यांवणिक्शबरयोःफलवैषम्यंतस्माद्यदेवकर्मविद्ययोद्गीथाद्युपास्त्याश्रद्धयास्तिक्यबुद्ध्योपनिषदारहस्यदेवताध्यानेनकरोतितदेवकर्मफलातिशयवदित्यर्थः॥ कर्मणोवीर्यवत्त्वंनामफलवत्त्वंविद्याहीनस्यापिगम्यमानंविद्यायाअनंगत्वेलिंगमितिभावः॥ साम्निलोकादिदृष्ट्योपासनेषुकर्मसमृद्ध्यतिरिक्तलोकादिफलश्रुतेश्चनांगत्वमित्याह॥ तथेति॥ अस्मैविदुषेकल्पन्ते

अपिचैवंजातीयकस्यकर्मव्यपाश्रयस्यविज्ञानस्यपृथगेवकर्मणःफलमुपलभ्यते॥ कर्मफलसिद्ध्यप्रतिबंधस्तत्समृद्धिरतिशयविशेषःकश्चित्॥ तेनोभौकुरुतोयश्चैतदेवंवेदयश्चनवेदनानातुविद्याचाविद्याचयदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभवतीति॥ तत्रनानात्विति विद्वदविद्वत्प्रयोगयोःपृथक्करणान्वीर्यवत्तरमितिचतरप्रत्ययप्रयोगाद्विद्याविहीनमपिकर्मवीर्यवदितिगम्यते॥ तच्चानित्यत्वेविद्यायाउपपद्यते॥ नित्यत्वेतुकथंनहिहीनंकर्मवीर्यवदित्यनुज्ञायेत॥ सर्वांगोपसंहारेहिवीर्यवत्कर्मेतिस्थिति॥ तथालोकसामादिषुप्रतिनियतानिप्रत्युपासनंफलानिशिष्यंतेकल्पंतेहास्मैलोकाऊर्ध्वाश्चावृत्ताश्चेत्येवमादीनि॥ नचेदंफलश्रवणमर्थवादमात्रंयुक्तंप्रतिपत्तुं॥ तथाहिगुणवादआपद्येत॥ फलोपदेशेतुमुख्यवादोपपत्तेः॥ प्रयाजादिषुत्वितिकर्तव्यताकांक्षस्यक्रतोःप्रकृतत्वात्तादर्थ्येसतियुक्तंफलश्रुतेरर्थवादत्वं॥ तथानारभ्याधीतेष्वपिपर्णमयीत्वादिषु॥ नहिपर्णमयीत्वादीनामक्रियात्मकानामाश्रयमंतरेणफलसंबंधोवकल्पते॥ गोदोहनादीनांहिप्रकृतापप्रणयनाद्याश्रयलाभादुपपन्नःफलविधिः॥

भोगायसमर्थाभवंति॥ भूमेरूर्ध्वालोकाआवृत्ताअधस्तनाश्चेत्यर्थः॥ तथाहिगुणवादइति॥ फलश्रुतेरर्थवादमात्रत्वेस्तुतिलक्षणास्यात्सानयुक्तामुख्यवृत्त्याफलपरत्वसंभवात्॥ प्रयाजानुयाजकर्मणांतुप्रकरणाद्दर्शाद्यंगत्वलाभात्भ्रातृव्याभिभूतिफलश्रुतेरगत्यास्तुतिलक्षकत्वं॥ यद्यपिपर्णमयीत्वादीनामंगत्वबोधकंप्रकरणंनास्तितथापितेषुफलश्रुतेःस्तुतित्वंतेषामक्रियात्वेनक्रियासंबंधंविनाफलहेतुत्वानुपपत्तेरतस्तेषांफलार्थक्रियापेक्षित्वात्क्रतोश्चजुहूप्रकृतिद्रव्याकांक्षित्वात्पर्णमयीजुहूरित्यादिवाक्येनैवप्रकृतिद्रव्यार्पकेणजुहूद्वारासन्निहितक्रत्वंगत्वसिद्धेर्युक्तंफलश्रुतेरर्थवादत्वमितिभावः॥ अक्रियात्मकगोदोहनादेरपिफलश्रुतिरर्थवादःस्यादतआह॥ गोदोहनादीनांहीति॥

यदपःप्रणयेत्पशुकामस्यसतोगोदोहनेनब्रह्मवर्चसकामस्यकांस्येनेतिफलार्थविधिरेवनार्थवादःगोदोहनादेःक्रत्वनाकांक्षितत्वेनांगत्वाभावाच्चमसेननिराकांक्षक्रियासंबंधितयास्वफलसाधकत्वसंभवात्तथाखादिरत्वेननिराकांक्षक्रत्वंगयूपमाश्रित्यबैल्वमन्नाद्यकामस्यखादिरंवीर्यकामस्येतिफलार्थविधिरेवेत्यर्थः॥पर्णमयीत्वादिष्वपिफलविधिःकिंनस्यादतआह॥नत्विति॥एवंविधोयूपादिवन्निराकांक्षइत्यर्थः जुहूरेवाश्रयइत्यतआह॥वाक्येनेतिजुह्वाःप्रकृतिद्रव्यापेक्षित्वादनेनैववाक्येनक्रत्वंगतयाजुहूप्रकृतिद्रव्यसंबंधोविधेयःपश्चान्निराकांक्षजुहूमाश्रित्यतस्यैवप्रकृतिद्रव्यस्यफलसंयोगोविधेयइतिवाक्यभेदइत्यर्थः॥पर्णतादि

तथाबैल्वादीनामपिप्रकृतयूपाद्याश्रयलाभादुपपन्नःफलविधिः॥ननुपर्णमयीत्वादिष्वेवंविधःकश्चिदाश्रयःप्रकृतोस्ति॥वाक्येनैवतुजुह्वाद्याश्रयतांविवक्षित्वाफलेपिविधिंविवक्षतोवाक्यभेदःस्यात्॥उपासनानांतुक्रियात्मकत्वाद्विशिष्टविधानोपपत्तेरुद्गीथाद्याश्रयाणांफलेविधानंनविरुध्यते॥तस्माद्यथाक्रत्वाश्रयाण्यपिगोदोहनादीनिफलसंयोगादनित्यान्येवमुद्गीथाद्युपासनान्यपीतिद्रष्टव्यं॥अतएवचकल्पसूत्रकारानैवंजातीयकान्युपासनानिक्रतुषुकल्पयांचक्रुः॥४२॥२४॥प्रदानवदेवतदुक्तं॥४३॥वाजसनेयकेवदिष्याम्येवाहमितिवाग्दध्रइत्यत्राध्यात्मंवागादीनांप्राणःश्रैष्ठ्योवधारितः॥अधिदैवतमग्न्यादीनांवायुस्तथाछांदोग्येवायुर्वावसंवर्गइत्यत्राधिदैवतमग्न्यादीनांवायुःसंवर्गोवधारितः॥प्राणोवावसंवर्गइत्यत्रअध्यात्मंवागादीनांप्राणः॥तत्रसंशयःकिंपृथगेवेमौवायुप्राणावुपगंतव्यौस्यातांअपृथगेवेति॥अपृथगेवेतितावत्प्राप्तंतत्त्वाभेदात्॥नह्यभिन्नेनतत्त्वेनपृथगनुचिंतनंन्याय्यं॥दर्शयतिचश्रुतिरध्यात्ममधिदैवतंचतत्त्वाभेदं॥अग्निर्वाग्भूत्वामुखंप्राविशदित्यारभ्यतथातएतेसर्वएवसमाःसर्वेनंताइत्याध्यात्मिकानांप्राणानामाधिदैविकींविभूतिमात्मभूतांदर्शयति॥६

वैलक्षण्यमुपासनानामाह॥उपासनानांत्विति॥स्वयंक्रियात्वाद्यागादिवत्फलविशिष्टत्वेनविधानोपपत्तिरित्यर्थः॥तस्मादिति॥अंगत्वावेदकमानाभावादित्यर्थः॥अतएवेति॥अनंगत्वादेवेत्यर्थःतस्मादंगोपास्त्यभावेपिकर्माधिकारइतिसिद्धं॥४२॥२४॥प्रदानवदेवतदुक्तं॥वायुप्राणयोर्भेदाभेदवाक्याभ्यांसंशयमाह॥तत्रेति॥अस्तुकर्मांगानांतत्संबद्धोपासीनांचफलभेदान्नित्यत्वानित्यत्वरूपःप्रयोगभेदःइहतुवायुप्राणयोःस्वरूपाभेदात्तत्स्वरूपप्राप्तिलक्षणफलैक्याच्चध्यानप्रयोगैक्यमितिपूर्वपक्षयतिअपृथगिति॥अग्निर्वाग्भूत्वेत्यारभ्यवायुःप्राणोभूत्वानासिकेप्राविशदित्यभेदंदर्शयतीत्यर्थः॥ ❁ ॥

यतश्चोदेतिसूर्यस्तंवदेतिप्रश्नसूत्रात्मकवायुर्वाच्योवायुस्थानेप्राणंवदन्नेकत्वंतयोर्दर्शयतीत्याह॥तथेति॥किंचयदिवायुप्राणयोःपृथक्ध्यानंस्यात्तर्हिध्या
नांगत्वनभेदोपिस्यादिहतुप्राणापाननिरोधात्मकव्रतैक्यश्रुतेर्ध्यानैक्यमित्याहतस्मादिति॥व्रतैक्यस्यप्रशस्तत्वादित्यर्थः॥किंचवायुप्राणौसंवर्गौभेदेनोपक्रम्य
परस्ताद्वाक्यशेषेसंवर्गदेवैक्यश्रुतेःप्रयोगैक्यमित्याह॥तथेति॥महात्मनइतिद्वितीयाबहुवचनंचतुरश्चतुःसंख्याकानग्निसूर्योदकचंद्रानपरांश्चवाक्चक्षुः
श्रोत्रमनोरूपानेकोदेवःकःप्रजापतिर्जगारजीर्णवानुपसंहृतवानित्यर्थः॥नब्रवीतिभेदमितिशेषः॥यथाग्निहोत्रंजुहोतीत्युत्पन्नाग्निहोत्रस्यैकस्यै

तथान्यत्रापितत्रतत्राध्यात्ममधिदैवतंचबहुधातत्त्वाभेददर्शनंभवति॥क्वचिच्चयःप्राणःसवायुरितिस्पष्टमेववायुंप्राणंचैकंक
रोति॥तथोदाहृतेपिवाजसनेयिब्राह्मणेयतश्चोदेतिसूर्यइत्यस्मिन्नुपसंहारश्लोकेप्राणाद्वाएषउदेतिप्राणेऽस्तमेतीतिप्राणेनैवोपसंह
रन्नेकत्वंदर्शयति॥तस्मादेकमेवव्रतंचरेत्प्राण्याच्चैवापान्याच्चेतिचप्राणव्रतेनैकेनोपसंहरन्नेतदेवदृढयति॥तथाछांदोग्ये
पिपरस्तान्महात्मनश्चतुरोदेवएकःकःसजगारभुवनस्यगोपाइत्येकमेवसंवर्गंगमयति॥नब्रवीतिएकएकेषांचतुर्णांसं
वर्गोऽपरोऽपरेषामिति॥तस्मादपृथक्त्वमुपगमनस्येत्येवंप्राप्तेब्रूमः॥पृथगेववायुप्राणावुपगंतव्याविति।कस्मात्पृथगुपदे
शात्॥आध्यानार्थोह्ययमध्यात्माधिदैवविभागोपदेशःसोऽसत्याध्यानपृथक्त्वेऽनर्थकएवस्यात्॥ननूक्तमपृथगनुचिंतनं
तत्त्वाभेदादिति॥नैषदोषः॥तत्त्वाभेदेप्यवस्थाभेदादुपदेशभेदवशेनानुचिंतनभेदोपपत्तेः॥श्लोकोपन्यासस्यचतत्त्वाभेदाभिप्राये
णाप्युपपद्यमानस्यपूर्वोदितध्येयभेदनिराकरणसामर्थ्याभावात्॥ ((वदधितंदुलादिगुणभेदेनसायंप्रातःकालभेदेनप्रयोगभेदस्तथा

त्रादोभवतियएवंवेदेत्युत्पन्नायाःसंवर्गविद्यायाएकत्वेप्युत्पन्नशिष्टवायुप्राणाख्यगुणभेदात्प्रयोगभेदइत्युक्तंतंसिद्धांतयति॥पृथगेवेति॥तौवा
एतौद्वौसंवर्गावित्युपास्यभेदवाक्यस्यप्रयोगभेदपरत्वाद्वाक्यादेवभेदसिद्धिरित्यर्थः॥पूर्वपक्ष्युक्तमनूद्यप्रत्याहननूक्तमित्यादिना॥उपास्यतयाप्रधान
भूतसंवर्गगुणविशिष्टोपास्यभेदवाक्यविरोधादनुपास्यवायुतत्त्वैक्यवाक्यंनप्रयोगैक्यप्रापकमितिभावःसूर्योदयास्तमययोर्वाय्वधीनत्वात्तदभेदा
भिप्रायेणप्राणात्तावुक्तौनतोध्यात्माधिदैवावस्थाभेदेनोक्तस्यध्येयभेदस्यनिरासेयतश्चोदेतीतिश्लोकस्यनशक्तिरित्याह॥श्लोकेति॥ ⁂ ६ ⁂ ॥

असामर्थ्येलिंगमाह॥ सयथेति॥ श्लोकोपन्यासवद्वैक्योपन्यासोपितत्वाभेदाभिप्रायेणेत्याह॥ एतेनेति॥ नन्वेवकाराद्वायुव्रतनिवृत्तेः प्राणएवैकोध्येयो
भातीत्यतआह॥ एकमेवेति॥ वदनदर्शनादीनिवाक्चक्षुरादीनांव्रतानिश्रमरूपमृत्युनाभग्नानीत्युक्त्वाप्राणस्याभग्नव्रतत्वंनिर्धारितंतथाज्वलनतापादीन्य
ग्न्यादित्यादीनांव्रतानिभग्नानीत्युक्त्वावायोरभग्नव्रतत्वंनिर्धारितंसयथैषांप्राणानांमध्यमःप्राणःस्थिरव्रतएवमेतासांदेवतानांवायुर्म्लोचंतिह्यन्यादेवताः
नवायुःसैषानस्तमितादेवतायद्वायुरितिश्रुतेरतोभग्नव्रतनिरासार्थएवकारोनवायुव्रतनिवृत्त्यर्थइत्यर्थः॥ अत्रैवार्थेलिंगमाहएकमिति॥ उकारश्चा

सयथैषांप्राणानांमध्यमःप्राणएवमेतासांदेवतानांवायुरितिचोपमानोपमेयकरणात्॥ एतेनव्रतोपन्यासोव्याख्यातः॥ एकमे
वव्रतमितिचैवकारोवागादिव्रतनिवर्तनेनप्राणव्रतप्रतिपत्त्यर्थः॥ भग्नव्रतानिहिवागादीन्युक्तानितानिमृत्युःश्रमोभूत्वोपयेमइतिश्रुतेः
नवायुव्रतनिवृत्त्यर्थः॥ अथातोव्रतमीमांसेतिप्रस्तुत्यतुल्यवद्वायुप्राणयोरभग्नव्रतत्वस्यनिर्धारितत्वात्॥ एकमेवव्रतंचरेदितिचो
क्त्वातेनोएतस्यैदेवतायैसायुज्यंसलोकतांजयतीतिवायुप्राप्तिफलंब्रुवन्वायुव्रतमनिवर्तितंदर्शयति॥ देवतेत्यत्रवायुःस्यात्
॥ अपरिच्छिन्नात्मकत्वस्यप्रेप्सितत्वात्॥ पुरस्तात्प्रयोगाच्चसैषानस्तमितादेवतायद्वायुरिति॥ तथातौवाएतौद्वौसंवर्गौवायुरे
वदेवेषुप्राणःप्राणेष्वितिभेदेनव्यपदिशति॥ तेवाएतेपंचान्येपंचान्येदशसंतस्तत्कृतमितिचभेदेनैवोपसंहरति॥ तस्मात्पृथ
गेवोपगमनंप्रदानवद्यथेंद्रायराज्ञेपुरोडाशमेकादशकपालमिंद्रायाधिराजायेंद्रायस्वराज्ञइति॥ अस्यांत्रिपुरोडाशिन्यामिष्टौ
सर्वेषामभिगमयन्नवद्यत्यछंबट्कारमिति॥ अतोवचनादिंद्राभेदाच्चसहप्रदानाशंकायां॥

र्थः तेनव्रतेनवायोःसायुज्यंसमानदेह
त्वंसलोकतांचजयतीत्यर्थःनन्वत्रवायुप्राप्तिर्नश्रुतेत्यत्राह॥ देवतेति॥ तस्मात्तत्त्वाभेददृष्ट्याव्रतैक्यमितिस्थितंसंप्रतिपूर्वोक्तंपृथगुपदेशंविवृणो
तितथातौवाइतिसौत्रंदृष्टांतंव्याचष्टे॥ प्रदानवदिति॥ त्रयःपुरोडाशाअस्यांसंतीतित्रिपुरोडाशिनीइष्टिस्तस्यांकिंसहप्रदानमुतभेदेनेतिसंदेहेपूर्वपक्षमा
ह॥ सर्वेषामिति॥ सर्वेषांदेवानामाभिमुख्येनप्रापयन्हविरवद्यतिगृण्हातिअछंबट्कारंवषट्काराख्यदेवभागमित्यर्थः॥ यद्वासर्वदेवार्थंयुगप
दवदानंकार्यमित्यत्रहेतुरछंबट्कारमिति॥ अव्यर्थत्वायेत्यर्थः॥ एकार्थमवत्तेहविषिशेषोयागानर्हतयावृथास्यादितिभावः॥ ॥

एवं सहप्रदानश्रुतेर्दैवैक्याच्च पुरोडाशानां सहप्रक्षेपे प्राप्ते पृथक्प्रक्षेप इति सिद्धांतमाह ॥ राजेति ॥ राजाधिराजस्वराजगुणभेदेन विशिष्टदेवताभेदादित्यर्थः किंचाध्वर्युणा यजेति प्रैषे उक्ते होत्रा यो मंत्रः पठ्यते सा याज्या अनुब्रूहीति प्रैषानंतरं मंत्रः पुरोनुवाक्येति भेदोस्ति तत्रास्यामिष्टौ प्रथमपुरोडाशप्रदाने या कृता याज्या सा द्वितीयप्रदाने पुरोनुवाक्या या च पूर्वमनुवाक्या सा पश्चाद्याज्येति व्यत्यासमन्वाहेति श्रुत्या विधानात् यथाश्रुति प्रक्षेपपृथक्त्वमित्याह ॥ याज्येति ॥ संकर्षे देवताकांडं ॥ वाशब्दोवधारणे नानैव देवता राजादिगुणभेदेन भेदावगमादिति सूत्रार्थः दृष्टांते देवताभेदात्कर्मभेदवद्विद्याभेदः स्यात् इत्यत आह ॥ तत्रान्विति कर्मोत्पत्तिवाक्यस्थदेवताभेदः कर्मभेदे हेतुः इह त्वन्नादो भवति य एवं वेदेत्युत्पन्नवाक्येन ज्ञातविद्यायाः पश्चाच्छ्रुतवायुप्राणभेदो न

राजादिगुणभेदाद्याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात्प्रदानपृथक्त्वं भवति ॥ एवं तत्त्वाभेदेपि आध्येयांशपृथक्त्वाद्ध्यानपृथक्त्वमित्यर्थः ॥ ननूक्तं संकर्षे नाना वा देवता पृथक्ज्ञानादिति ॥ तत्र तु द्रव्यदेवताभेदाद्यागभेदोपि विद्यते नैवमिह विद्याभेदोस्ति उपक्रमोपसंहाराभ्यामध्यात्माधिदैवोपदेशेषु एकविद्याविधानप्रतीतेः विद्यैक्येपि त्वध्यात्माधिदैवभेदात्प्रवृत्तिभेदो भवति अग्निहोत्र इव सायंप्रातःकालभेदादित्येतावदभिप्रेत्य प्रदानवदित्युक्तं ॥ २ ॥ ४३ ॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ४४ ॥ वाजसनेयिनोग्निरहस्ये नैव वा इदमग्रे सदासीदित्येतस्मिन् ब्राह्मणे मनोधिकृत्याधीयते तत् षट्त्रिंशतं सहस्राण्यपश्यदात्मनोग्नीनर्कान्मनोमयान्मनश्चित इत्यादि ॥ तथैव वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोग्निचित इति पृथगग्नीनामनं-
((ति सांपादिकान् ॥

भेदकः ॥ अग्निहोत्रस्येव दध्यादिद्रव्यभेद इत्यर्थः तर्हि केनांशेन प्रदानस्य दृष्टांतत्वमित्यत आह विद्यैक्येपीति अवस्थाभेदाद्देवताभेदः प्रयोगभेदश्चेत्यंशेनायं दृष्टांत इत्यर्थः ॥ ४३ ॥ लिंगभूयस्त्वात् ॥ उत्पत्तेः प्रागिदं सर्वं नैव सदासीन्नाप्यसदित्युपक्रम्य मनःसृष्टिमुक्त्वा तन्मन आत्मानमैक्षतेतीक्षणपूर्वकमग्नीनपश्यदिति मनोधिकृत्य पठंतीत्यर्थः पुरुषायुषेन कॢप्तशतवर्षान्तर्गतैः षट्त्रिंशत्सहस्रैरहोरात्रैरवच्छिन्नतया मनोवृत्तीनामसंख्येयानामपि षट्त्रिंशत्सहस्रत्वं ताभिरिष्टकात्वेन कल्पिताभिर्मनसैव संपादिता अग्नयो मनश्चितस्तानर्कान्पूज्यान्मनोमयान्मनोवृत्तिषु संपादितानात्मनः स्वस्य संबंधित्वेन मनोपश्यत् ॥ तथा वाक्प्राणादयोपि स्ववृत्तिरूपानग्नीनपश्यन्नित्याह ॥ तथेति ॥ प्राणो घ्राणं कर्मेंद्रियेण हस्तादिना चितः

कर्मचितः ॥ अग्नित्वक् ॥

शा.भा.
१.प्र.टी.
३५६

अ.पा.
२ ३

पूर्वत्राग्निचयनप्रकरणात्किमेतेऽग्नयः क्रत्वर्था उत प्राधान्यज्ञापकलिंगादिभूयस्त्वात्पुरुषार्था वेति संशयमाह॥ तेष्विति॥ केवलविद्यात्मकाः क्रियांगत्वविनाभावनामया इत्यर्थः॥ एकप्रयोगासंभवाच्छ्रूयमाणयोर्ध्यानप्रयोगभेदोऽस्तु इह तु मनश्चिदाद्यग्नीनां प्रकरणात्कर्मांगत्वेनैकप्रयोगत्वमिति प्रापय्य। सिद्धांतमुपक्रमते तत्रेत्यादिना॥ पूर्वपक्षे भावनाग्नीनां क्रत्वंगत्वमिष्टं तेषां क्रियाग्निना विकल्पः समुच्चयो वास्तु सिद्धांते पुरुषार्थत्वमिति फलं॥ नन्वत्र सर्वप्राणिमनोवृत्तिभिर्मम सदाग्नयश्चीयंत इति ध्यानदार्ढ्ये सति सर्वभूतानि यत्किंचिन्मनसा संकल्पयंति तेषामेवाग्नीनां साकृतिः करणमित्येकं लिंगं क्रियांगस्य

तेषु संशयः॥ किमेते मनश्चिदादयः क्रियानुप्रवेशिनस्तच्छेषभूताः उत स्वतंत्राः केवलविद्यात्मका इति॥ तत्र प्रकरणात्क्रियानुप्रवेशे प्राप्ते स्वातंत्र्यं तावत्प्रतिजानीते॥ लिंगभूयस्त्वादिति॥ भूयांसि हि लिंगान्यस्मिन्ब्राह्मणे केवलविद्यात्मकत्वमेषामुपोद्बलयंति दृश्यंते॥ तद्यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरिति तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वंत्यपि स्वपत इति चैवंजातीयकानि॥ नहि लिंगं प्रकरणाद्बलीयस्तदप्युक्तं पूर्वस्मिन्कांडे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति॥ ४४॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्॥ ४५॥ नैतद्युक्तं॥ स्वतंत्रा एतेऽग्नयो न न्यशेषभूता इति॥ पूर्वस्य क्रियामयस्याग्नेः प्रकरणात् नहि षयस्य वायं विकल्पविशेषोपदेशः स्यात् न स्वतंत्रः॥ ननु प्रकरणाल्लिंगं बलीयः॥ सत्यमेवमेतत्॥ लिंगमपि त्वेवंजातीयकं न प्रकरणाद्बलीयो भवति॥ अन्यार्थदर्शनं ह्येतत् सांपादिकाग्निप्रशंसारूपत्वात्॥ अन्यार्थदर्शनं चासत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं न प्रकरणं बाधितुमुत्सहते॥ ॥ यत्किंचिक रणेन सिध्यदर्शनादित्याह॥ तद्यदिति॥ एवं विदे स्वप।

राम.
३५६

ते जाग्रतेऽपि तरीयाग्नीन्भूतानि सर्वदा चिन्वंतीति लिंगांतरं क्रियांगस्य चोदितकालानुष्ठेयस्य सदा सर्वैरनुष्ठीयमानत्वायोगादित्यर्थः षट्त्रिंशत्सहस्रत्वसंख्याप्यामत्वे लिंगमेवंजातीयकपदेनोक्तं॥ ४४॥ एवं सिद्धांतमुपक्रम्य पूर्वपक्षयति॥ पूर्वेति॥ पूर्वस्येष्टकाभिरग्निं चिनुत इत्युक्तस्य सस्यषत्विष्टकोऽग्निरिति सन्निहितस्यायं विकल्पविशेषोपदेशः संकल्पमयत्वाख्यप्रकारभेदोपदेशः क्रियाग्निवत्सांकल्पिकाग्नयोऽप्यंगमिति यावत्॥ किं विधिवाक्यस्थं लिंगं प्रकरणाद्बलीयः अर्थवादस्थं वा आद्यमंगीकरोति॥ सत्यमिति॥ नहि द्वितीय इत्याह॥ लिंगमिति॥ मानसाग्निविध्यर्थार्थवादस्थलिंगानां स्वार्थप्रापकमानाभावद्दौर्बल्यमित्य

सूत्रस्थक्रियापदं व्याचष्टे॥ तस्मादिति॥ ननु अक्रियारूपाग्नीनां ध्यानमयानां कथं क्रियांगत्वं तत्राह॥ मानसवदिति॥ द्वादशाहस्याऽद्यंताहर्द्वयं त्यक्त्वा मध्यस्थदशरात्रस्यैव द्विरात्रादिषु प्रकृतित्वं तद्धर्माणामेव तेष्वतिदेशात् तस्य मध्यदशरात्रस्य दशमेऽहन्यर्थादेकादशेऽहनि मानसग्रहः श्रूयते अनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं मनोग्रहं गृह्णामीति॥ अनया रसया पृथिव्या पात्रेण समुद्रं त्वां प्रजापतिदेवताकं मनोग्रहं गृह्यत इति ग्रहः सोमरसः मनसा रसत्वेन भावितमध्वर्युर्गृह्णातीत्यर्थः॥ अनत्यवर्त्विजां ध्यायितया विविधवाक्योच्चारणाभावादविवाक्यसंज्ञाऽह्नः प्राप्ता ग्रहणं नाम सोमपात्रस्योपादानं गृहीतस्य स्वस्थाने स्थापनमासादनं सोमस्य होमो ह

तस्मात्संपादिका अप्येतेऽग्नयः प्रकरणात्क्रियानुप्रवेशिन एव स्युः॥ मानसवत्॥ यथा दशरात्रस्य दशमेऽहन्यविवाक्ये पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपह्वानभक्षणानि मानसान्येवाम्नायंते॥ स च मानसोऽपि ग्रहकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवति एवमयमप्यग्निकल्प इत्यर्थः॥४५ अतिदेशाच्च॥४६॥ अतिदेशश्चैषामग्नीनां क्रियानुप्रवेशमुपोद्बलयति॥ षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्व इति॥ सति हि सामान्येऽतिदेशः प्रवर्त्तते॥ अतश्च पूर्वेणेष्टकाचितेन क्रियानुप्रवेशिनाग्निना संपादिकानग्नीनतिदिशन् क्रियानुप्रवेशमेवैषां द्योतयति॥४६॥ विद्यैव तु निर्धारणात्॥४७॥ तुशब्दः पक्षं व्यावर्त्तयति विद्यात्मका एवैते स्वतंत्रा मनश्चिदादयोऽग्नयः स्युर्न क्रियाशेषभूताः॥ तथा हि निर्धारयति ते हैते विद्याचित एवेति विद्यया हैवैत एवंविदश्चिता भवंतीति च॥४७॥ दर्शनाच्च॥४८॥ दृश्यते चैषां स्वातंत्र्ये लिंगं तत्पुरस्ताद्दर्शितं लिंगभूयस्त्वादित्यत्र॥४८॥ ननु लिंगमप्यसत्यामन्यस्यां प्राप्तावसाधकं कस्यचिदर्थस्येत्यपास्य तत्प्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसितमिति॥ ❦ ॥

वनं हुतशेषादानमाहरणं शेषभक्षणाय ऋत्विजां मिथोऽनुज्ञाकरणमुपह्वानं ततो भक्षणमित्येतानि मानसान्येवेत्यर्थः॥ स च मानसो ग्रहो द्वादशाहादहंतरं स्वतंत्रमित्याशंक्य द्वादशाहसंज्ञाविरोधाच्चाहरंतरं किंतु प्रकरणादविवाक्यस्याह्नोंऽगमिति सिद्धांतमाह स चेति॥ कल्पः कल्पनाप्रकारः॥ केचित्तु तत्र भाष्ये दशरात्रशब्दो विकृतिपरः तत्रापि दशमेऽहन्यविवाक्यसंज्ञके मानसग्रहस्यातिदेशप्राप्ततयांगत्वादित्याहुः॥४५॥ मनश्चिदादीनां क्रियांगत्वे प्रकरणमुक्त्वा लिंगमाह॥ अतिदेशाच्चेति॥ क्रियांगत्वसादृश्यादतिदेशादित्यर्थः॥४६॥ सिद्धांतमाह विद्येति॥ श्रुतिलिंगवाक्यैः प्रकरणं बाध्यमिति सूत्रत्रयार्थः॥४७॥४८॥

तत्रावधारणश्रुतेरन्यथासिद्धिंशंकते नन्वबाह्येति॥ विद्याचितइतिपदेनैवाबाह्यसाधनत्वस्यलब्धत्वादवधारणंव्यर्थमित्याह नेतितर्हिकथमस्यार्थवत्त्वंतत्राह॥ऽबाह्येति॥ लिंगंव्यनक्तितथेति॥ अग्नीनांसर्वकालव्यापित्वेनानंगत्वेदृष्टांतमाह॥ यथेतितदाध्यानकालइत्यर्थः होमेयथासातत्यमु

अतउत्तरंपठति॥ श्रुत्यादिबलीयस्त्वाच्चनबाधः॥४९॥ नैवंप्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसायस्वातंत्र्यपक्षोबाधितव्यः श्रुत्यादेर्बलीयस्त्वात्॥ बलीयांसिहिप्रकरणात् श्रुतिलिंगवाक्यानीतिस्थितंश्रुतिलिंगसूत्रे॥ तानिचेहस्वातंत्र्यपक्षंसाधयंति दृश्यंते॥ कथंश्रुतिस्तावत् तेहैतेविद्याचितएवेति॥ तथालिंगंसर्वदासर्वाणिभूतानिचिन्वंत्यपिस्वपतेइति॥ तथावाक्यमपिविद्ययाहैवैतएवंविदश्चिताभवंतीति॥ विद्याचितएवेतिहिसावधारणेयंश्रुतिःक्रियानुप्रवेशेमीषामभ्युपगम्यमानेपीडितास्यात्॥ नन्वबाह्यसाधनत्वाभिप्रायमिदमवधारणंभविष्यति॥ नेत्युच्यते॥ तदभिप्रायतायांहिविद्याचितइतीयतास्वरूपसंकीर्तनेनैवकृतत्वादनर्थकमवधारणंभवेत्स्वरूपमेवह्येषामबाह्यसाधनमित्यऽबाह्यसाधनत्वेतुमानसग्रहवत्क्रियानुप्रवेशशंकायांतन्निवृत्तिफलमवधारणमर्थवद्भविष्यति॥ तथास्वपतेजाग्रतेचैवंविदेसर्वदासर्वाणिभूतान्येतानग्नींश्चिन्वंतीतिसातत्यदर्शनमेषांस्वातंत्र्येऽवकल्पते॥ यथासांपादिकेवाक्प्राणमयेग्निहोत्रेप्राणंतदावाचिजुहोतिवाचंतदाप्राणेजुहोतीतिचोक्त्वोच्यतेएतेऽनंतेऽमृतेआहुतीजाग्रच्चस्वपंश्चसततंजुहोतीतितद्वत्॥ क्रियानुप्रवेशेतुक्रियाप्रयोगस्याल्पकालत्वान्नसातत्येनैषांप्रयोगःकल्पेत॥ नचेदमर्थवादमात्रमितिन्याय्यं॥ यत्रहिविस्पष्टोविधायकोलिङ्गादिरुपलभ्यतेयुक्तंतत्रसंकीर्तनमात्रस्यार्थवादत्वं इहतुविस्पष्टविध्यंतरानुपलब्धेःसंकीर्तनादेवैषांविज्ञानविधानंकल्पनीयं॥ तच्चयथासंकीर्तनमेवकल्पयितुंशक्यतइतिसातत्यदर्शनात्तथाभूतमेवकल्प्यतेतेनतस्यसामर्थ्यादेषांस्वातंत्र्यसिद्धिः॥ ❀ ॥

च्यनेनइदमग्नीनांसातत्यदर्शनमित्यन्वयः यदुक्तमर्थवादस्थत्वाल्लिंगंदुर्बलमितितन्नसर्वदासर्वभूतानिमदर्थमग्नीनचिन्वंतीतिध्यायेदित्यपूर्वार्थतयाविधिकल्पनात्तथाचविधिवाक्यस्थत्वाल्लिंगंप्रकरणाद्बलवदित्याह॥ नचेदमित्यादिना॥

एतेनेति॥ विधित्वेनेत्यर्थः॥ वाक्यं विवृणोति॥ तयेति॥ ४८॥ संपद्युपास्ये मनोवृत्तिषु क्रियांगानां योजनमनुबंधः श्रुत्या क्रियते तदन्यथानुपपत्त्याप्यग्नीनां पुरुषार्थत्वं॥ क्रत्वर्थत्वेंगानां सिद्धत्वेन संपादनानुपपत्तेरित्याह इतश्चेत्यादिना॥ ते अग्नयः अधीयंत तेषामाधानं मनसैव कुर्यादित्यर्थः कालस्यच्छंदस्य नियमाद॥ चीयंत इष्टकाश्चेतव्या इत्यर्थः ग्रहाः पात्राणि अस्तुवन्नुद्गातारः आशंसन्होतारः शंसंति किं बहूक्त्या यत्किंच यज्ञे कर्माऽऽरादुपकारकं यज्ञीयं यज्ञस्वरूपोत्पादकं च

ची३

एतेन तद्यत्किंचेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृतिरित्यादि व्याख्यातं॥ तथा वाक्यमप्येवंविद इति पुरुषविशेषसंबंधमेवैषामाचक्षाणं न क्रतुसंबंधं मृष्यते॥ तस्मात्स्वातंत्र्यपक्ष एव ज्यायानिति॥ ४९॥ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं॥ ५०॥ इतश्च प्रकरणमुपमृद्य स्वातंत्र्यं मनश्चिदादीनां प्रतिपत्तव्यं॥ यत्क्रियावयवान्मनआदिव्यापारेषु अनुबध्नाति॥ ते मनसैवाधीयंत मनसाँयंत मनसैव ग्रहा अगृह्यंत मनसाऽस्तुवन् मनसाशंसन् यत्किंच यज्ञे कर्म क्रियते यत्किंच यज्ञीयं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत इत्यादिना संपन्नफलो ह्ययमनुबंधः॥ न च प्रत्यक्षाः क्रियावयवाः संतः संपदा लिप्सितव्याः॥ नचो द्गीथाद्युपासनवत्क्रियांगसंबंधात्तदनुप्रवेशित्वमाशंकितव्यं श्रुतिवैरूप्यात्॥ नह्यत्र क्रियांगं किंचिदाश्रायतस्मिन्नवसरे तामाध्यवसितव्यमिति वदति॥ षट्त्रिंशत्सहस्राणि तु मनोवृत्तिभेदानादाय तेष्वग्नित्वं ग्रहादींश्च कल्पयति पुरुषयज्ञादिवत्॥ संख्या चेयं पुरुषायुषस्याहःसु दृष्टा सती तत्संबंधिनीषु मनोवृत्तिष्वारोप्यत इति द्रष्टव्यं॥ एवमनुबंधात्स्वातंत्र्यं मनश्चिदादीनां॥ आदिशब्दादतिदेशाद्यपि यथासंभवं योजयितव्यं॥ तथा हि तेषामेकैकस्यैव तावान्यावानसौ पूर्व इति क्रियामयस्याग्नेर्माहात्म्यं ज्ञानमयानामेकैकस्यातिदिशत् क्रियायामनादरं दर्शयति॥ न च सत्येव क्रियासंबंधे विकल्पः पूर्वेणोत्तरेषामिति शक्यं वक्तुं॥ न हि ये तद्व्यापारेणाऽऽहवनीयधारणादिना पूर्वः क्रियायामुपकरोति ते नोत्तरे उपकर्तुं शक्नुवंति॥ ९ तत्सर्वं मनोमयं कुर्यादिति श्रुत्यर्थः॥ वृत्तिष्वग्निध्यानस्य

क्रियानंगत्वेप्युद्गीथध्यानवत्क्रियांगाश्रितत्वं स्यान्नेत्याह॥ न चात्रोद्गीथेति॥ अंगावबद्धश्रुतितोऽस्याः श्रुतेर्वैरूप्यं स्फुटयति न हीति॥ अनंगवृत्तिषु सांगक्रतुसंपादनं पुरुषस्य यज्ञत्वध्यानवत्स्वतंत्रमित्यर्थः॥ अनादरार्थो निर्देशो न भवति किंतु विकल्पार्थ इत्यत आह॥ नचेति॥ एकस्मिन्साध्ये निरपेक्षसाधनयोर्विकल्पो भवति॥ यथा व्रीहियवयोर्न तु क्रियाग्नेर्ध्यानाग्नीनां साध्यभेदान्न विकल्प इत्यर्थः अत एव समुच्चयोऽपि निरस्तः॥ ॥ ॥

यदुक्तंक्रियांगत्वसामान्येनातिदेशइतितन्नेत्याह॥ यत्त्विति॥ सूत्रेबहुवचनार्थमाह॥ श्रुत्यादीनिचेति॥ अनुबंधातिदेशश्रुतिलिंगवाक्येभ्यइत्यर्थः एवमिति॥ अर्थइतिशेषः मनश्विदादीनांस्थानंन्येक्रियाप्रकरणादुत्कर्षःस्यादित्याशंक्यसदृष्टइत्याहदृष्टश्चेति॥ एकादशेचिंतितंराजास्वाराज्यकामोराजसूयेनयजेतेतिप्रकृत्यावेष्टिर्नामकाचिदिष्टिराम्नाता आग्नेयोऽष्टाकपालोहिरण्यंदक्षिणाबार्हस्पत्यंचरुःशितिपृष्ठोदक्षिणाऐंद्रएकादशकपालमृषभोदक्षिणेति॥ तस्यांवर्णभेदेनप्रयोगभेदःश्रूयतेयदिब्राह्मणोयजेतबार्हस्पत्यंमध्येनिधायाहुतिमाहुतिंहुत्वाभिघारयेत्॥ यदिवैश्योवैश्वदेवंचरुंमध्येनिदध्यात् यदिराजन्यस्तदैंद्रमित्याग्नेयैंद्रपुरोडाशयोर्मध्येबार्हस्पत्यंचरुंनिधायेत्यर्थः॥ तत्राग्नेयादिचरुषुअंगानांतंत्रेणप्रयोगोभातिमध्येनिधानलिंगात्प्रयोगभेदेमध्येनिधानायोगादेतयान्नाद्यकामंयाजयेदित्येकवचनाच्चसतचतंत्रप्रयोगोराजसूयक्रतुबाह्यायामन्नाद्यकाम॥

यत्तुपूर्वपक्षेप्यतिदेशउपोद्बलकइत्युक्तंसतिहिसामान्येतिदेशःप्रवर्त्ततइतितदस्मत्पक्षेऽग्नित्वसामान्येनातिदेशसंभवादनुक्तं॥ अस्तिहिसांपादिकानामप्यग्नीनामग्नित्वमिति॥ श्रुत्यादीनिचकारणानिदर्शितानि॥ एवमनुबंधादिभ्यःकारणेभ्यःस्वातंत्र्यंमनश्विदादीनांप्रज्ञांतरपृथक्त्ववत्॥ यथाप्रज्ञांतराणिशांडिल्यविद्याप्रभृतीनिस्वेनस्वेनानुबंधेनानुबध्यमानानिपृथगेवकर्मभ्यःप्रज्ञांतरेभ्यश्चस्वतंत्राणिभवंत्येवमिति॥ दृष्टश्चावेष्टेःराजसूयप्रकरणपठितायाःप्रकरणादुत्कर्षोवर्णत्रयानुबंधाद्राजयज्ञत्वाच्चराजसूयस्य॥ नदुक्तंप्रथमेकांडेक्रत्वर्थायामितिचेन्नवर्णत्रयसंयोगादिति॥५०॥ ११ वर्णत्रयकर्तृकायामेवावेष्टौज्ञेयः क्रत्वर्थेष्टिः॥५१॥

ननुक्रत्वंतर्गतायां॥ ननुकिमत्रनियामकंक्रत्वर्थायामप्यवेष्टौतंत्रप्रयोगः किंनस्यादितिचेन्नवर्णत्रयसंयुक्तायांकाम्यायामेवअंगतंत्रैक्यसाधकस्यमध्येनिधानादिलिंगस्यसत्त्वादतोलिंगैकवचनाभ्यांतंत्रैक्येसतिहिरण्यादिकामितिनैकैवदक्षिणादेयाअन्यथाप्रयोगैक्याऽयोगात्॥ राजमात्रकर्तृकक्रत्वंतर्गतेष्टौतुवर्णत्रयसंयोगाभावान्मध्येनिधानादिलिंगंनास्तिततश्चतंत्रैक्यसाधकाभावाद्दक्षिणाभेदेनतंत्रभेदइत्यंगानामावृत्तिरेवचरुष्वितिसूत्रार्थः अत्रचैकप्रयोगलिंगस्यक्रत्वर्थेष्टावसंभवंकाम्येष्टौचसंभवंवदतानेनसूत्रेणकाम्येष्टेःक्रत्वर्थेष्टिविलक्षणत्वात्क्रतुप्रकरणादुत्कर्षइतिसूचितंसचोत्कर्षोयुक्तएवराजमात्रकर्तृकराजसूयक्रतौवर्णत्रयकर्तृकेष्टेरंतर्भावायोगादितिस्थितमत्तयामनश्विदादीना

॥परोक्तं दृष्टांतं न विघटयति॥ न सामान्यादिति॥ क्रत्वर्थत्वे वैषम्येपि मानसत्वसामान्यं न विरुध्यते विषमयोरपि साम्यदर्शनादित्यर्थः॥ ५१॥ किंच पूर्वोत्तरब्राह्मणयोः स्वतंत्रविद्याविधानात्तन्मध्यस्थस्यापि ब्राह्मणस्य स्वतंत्रविद्याविधिपरत्वमित्याह॥ परेण चेति॥ चितेग्नौ लोकदृष्टिविधानं स्वतंत्रमुत्तरत्र गम्यते पूर्वत्र मंडलपुरुषोपास्तिस्तत्सान्निध्यात्तन्मध्येपि मानसाग्नयः स्वतंत्रा इत्यर्थः॥ नहि क्रियाग्निना सहपाठः किमर्थमित्यत आह॥ भूयांसस्त्वि-

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः॥ ५१॥ यदुक्तं मानसवदिति तत्प्रत्युच्यते॥ न मानसग्रहसामान्यादपि मनश्चिदादीनां क्रियाशेषत्वं कल्प्यं पूर्वोक्तेभ्यः श्रुत्यादिभ्यो हेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः॥ नहि किंचित्कस्यचित्केनचित्सामान्यं न संभवति॥ न चतावता यथास्वं वैषम्यं निवर्त्तते मृत्युवत्॥ यथा स वा एष एव मृत्युर्य एष एतस्मिन्मंडले पुरुष इति अग्निर्वै मृत्युरिति चाग्न्यादित्यपुरुषयोः समानेपि मृत्युशब्दप्रयोगे नात्यंतसाम्यापत्तिः॥ यथा चासौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदित्यत्र न समिदादिसामान्याल्लोकस्याग्निभावापत्तिस्तद्वत्॥ ५१॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः॥ ५२॥ परस्तादप्ययं वाव लोक एषोग्निश्चित इत्यस्मिन्ननंतरे ब्राह्मणे ताद्विध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं तस्य तेन शुद्धकर्मांगविधित्वं॥ तत्र हि विद्यया तदारोहंति यत्र कामाः परागताः॥ न तत्र दक्षिणा यंति नाविद्वांसस्तपस्विन इत्यनेन श्लोकेन केवलं कर्म निंदन्विद्यां च प्रशंसन्विदंगमयति॥ तथा पुरस्तादपि यदेतन्मंडलं तपती यस्मिन्ब्राह्मणे विद्याप्रधानत्वमेव लक्ष्यते॥ सोमृतो भवति मृत्युर्ह्यस्यात्मा भवतीति विद्याफलेनैवोपसंहारान्न कर्मप्रधानता तत्सामान्यादिहापि तथात्वं॥ भूयांसस्त्वस्य वयवाः संपादयितव्याः विद्यायामित्येतस्मात्कारणादग्निनानुबध्यते विद्या न कर्मांगत्वात्॥ तस्मान्मनश्चिदादीनां केवलविद्यात्मकत्वसिद्धिः॥ २९॥ ५२॥ एक आत्मनः शरीरे भावात्॥ ॥५३॥ इह देहव्यतिरिक्तस्यात्मनः सद्भावः समर्थ्यते बंधमोक्षाधिकारसिद्धये॥ नह्यसति देहव्यतिरिक्त आत्मनि परलोकफलाश्चोदना उपपद्येरन् कस्य वा ब्रह्मात्मत्वमुपदिश्येत॥

ति॥ २९॥ मनश्चिदादीनां पुरुषार्थत्वमुक्तं तद्युक्तं देहातिरिक्तपुरुषाभावादित्याक्षिपति एक आत्मनः शरीरे भावात्॥ सिद्धांतफलमाह॥ बंधेति पूर्वपक्षे तु परलोकार्थकर्मसु मोक्षार्थविद्यायां च अप्रवृत्तिरिति व्यतिरेकमुखेन फलमाह नह्यसतीति॥

विचार१

व्यतिरिक्तात्मविचारस्यपूर्वतंत्रेकृतत्वात्पौनरुक्त्यमित्याशंक्यतत्रत्यस्यापीदमेवसूत्रंमूलंजैमिनिसूत्राभावादतःक्वपुनरुक्तिरित्याह ननुशास्त्रेत्यादिना यज्ञायुधीयजमानःस्वर्गंलोकमेतीत्यादिवाक्यस्यभोक्त्रभावादप्रामाण्यप्राप्ताविनस्त्वाक्षेप्यभोक्तुर्विचारःकृतइति॥ अत्रवृत्तिकारवचनंलिंगमाह॥ अतएवेति॥ तत्रसूत्राभावादेवेत्यर्थः उद्धारस्तुपरमः अस्याधिकरणस्यास्मिन्पादेप्रसंगसंगतिरित्याह॥ इहचेति॥ आमुष्मिकफलोपासनानिर्णयप्रसंगेनतदपेक्षितात्मास्तित्वमुच्यतइत्यर्थः॥ एतत्सिद्धवत्कृत्यप्रथमसूत्रेऽथशब्देनाधिकारीचिंतितस्तस्मादिदमधिकरणंसर्वशास्त्रांगमितिशास्त्रसंगतिमाह॥ कृत्स्नेति॥ आक्षेपलक्षणामवांतरसंगतिमाह॥ अ

ननुशास्त्रप्रमुखएवप्रथमेपादेशास्त्रफलोपभोगयोग्यस्यदेहव्यतिरिक्तस्यात्मनोऽस्तित्वमुक्तं॥ सत्यमुक्तंभाष्यकृतानतुतत्रात्मास्तित्वेसूत्रमस्ति॥ इहतुस्वयमेवसूत्रकृतातदस्तित्वमाक्षेपपुरःसरंप्रतिष्ठापितं॥ इतएवचाऽकृष्याचार्येणशबरस्वामिनाप्रमाणलक्षणेवर्णितं॥ अतएवचभगवतोपवर्षेणप्रथमतंत्रेआत्मास्तित्वाभिधानप्रसक्तौशारीरकेवक्ष्यामइत्युद्धारःकृतः॥ इहचेदंचोदनालक्षणेषूपासनेषुविचार्यमाणेष्वात्मास्तित्वंविचार्यते॥ कृत्स्नशास्त्रशेषत्वप्रदर्शनाय॥ अपिचपूर्वस्मिन्नधिकरणेप्रकरणोत्कर्षाभ्युपगमेनमनश्चिदादीनांपुरुषार्थत्वंवर्णितंकोऽसौपुरुषोयदर्थाएतेमनश्चिदादयइत्यस्यांप्रसक्ताविदंदेहव्यतिरिक्तस्यात्मनोऽस्तित्वमुच्यते॥ तदस्तित्वाक्षेपार्थंचेदमाद्यंसूत्रं॥ आक्षेपपूर्विकाहिपरिहारोक्तिर्विवक्षितेऽर्थेस्थूणानिखननन्यायेनदृढांबुद्धिमुत्पादयति॥ अत्रैकेदेहमात्रात्मदर्शिनोलोकायतिकादेहव्यतिरिक्तस्यात्मनोऽभावंमन्यमानाःसमस्तव्यस्तेषुवाह्येषुपृथिव्यादिष्वदृष्टमपिचैतन्यंशरीराकारपरिणतेषुभूतेषुस्यादितिसंभावयंतस्तेभ्यश्चैतन्यंमदशक्तिवद्विज्ञानंचैतन्यविशिष्टःकायःपुरुषइतिचाहुः॥ नस्वर्गगमनायापवर्गगमनायवासमर्थोदेहव्यतिरिक्तआत्मास्तियत्कृतंचैतन्यंदेहेस्यात्देहएवतुचेतनश्चात्माचेतिप्रतिजानते॥

ऽऽपिचेति॥ देहातिरिक्तआत्मास्तिनवेतिवादिविप्रतिपत्तेःसंशयेपूर्वपक्षमाह॥ अत्रैकइतियद्यपिसमस्तेषुमिलितेषुभूतेषुचैतन्यंनदृष्टंतन्नोदकुंभस्यज्ञानाभावात्व्यस्तेषुतुनास्त्येवतथापिदेहात्मकभूतेषुस्यादितितेभ्योभूतेभ्यश्चैतन्यंसंभावयंतोमदशक्तिवद्विज्ञानंसंघातजंतद्विशिष्टसंघातआत्मेत्याहुरित्यन्वयः॥ यथामादकद्रव्येषुतांबूलपत्रादिषुप्रत्येकमदृष्टापिमदशक्तिस्तत्संघाताज्जायतेतद्वदित्यर्थः ननुदेहःस्वयंनचेतनःघटवद्भौतिकत्वात्किंतुचेतनःकश्चित्स्वर्गादिभोक्तास्तितत्सान्निध्याद्देहस्यचैतन्यविभ्रमइत्यतआह नस्वर्गेति॥ ५३॥

॥ मनुष्योहंजानामीतिदेहस्यज्ञातृतायाः प्रत्यक्षत्वादात्मधर्मत्वेनप्रसिद्धानांधर्माणांदेहान्वयव्यतिरेकानुभवात्तदन्यात्मनिप्रत्यक्षाभावादप्रत्यक्षस्यअप्रामाणिकत्वाद्देहएवात्मेतिप्राप्तेसूत्रस्थनत्वितिपदेनसिद्धांतंप्रतिजानीते॥ नत्वेतदिति॥ अनुमानस्यतावत्प्रामाण्यमनिच्छताप्यास्थेयमन्यथाव्यवहारासिद्धेः॥ नह्यनागतपाकादाविष्टसाधनतानुमितिंविनाप्रवृत्तिःसंभवति॥ तथाचज्ञानादयोदेहव्यतिरिक्ताश्रयाःदेहसत्वेप्यसत्वात् व्यतिरेकेणदेहरूपादिवदित्याह॥ व्यतिरेकएवास्येति॥ नचादौश्यामदेहस्यपश्चाद्रूपांतरेव्यभिचारः गुणत्वसाक्षात्व्याप्यजात्यवच्छे

हेतुंचाचक्षतेशरीरेभावादिति॥ यद्धियस्मिन्सतिभवतिअसतिचनभवतितत्तद्धर्मत्वेनाध्यवसीयते॥ यथाग्निधर्मावौष्ण्यप्रकाशौ॥ प्राणचेष्टाचैतन्यस्मृत्यादयश्चात्मधर्मत्वेनाभिमताआत्मवादिनांतेप्यंतरेवदेहउपलभ्यमानाबहिश्चानुपलभ्यमानाअसिद्धेदेहव्यतिरिक्तेधर्मिणिदेहधर्माएवभवितुमर्हंति॥ तस्मादव्यतिरेकोदेहादात्मनइत्येवंप्राप्तेब्रूमः॥ व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत्॥५४॥ नत्वेतदस्तियदुक्तमव्यतिरेकोदेहादात्मनइति॥ व्यतिरेकएवास्यदेहाद्भवितुमर्हतितद्भावाभावित्वात्॥ यदिदेहभावेभावाद्देहधर्मत्वमात्मधर्माणांमन्येतततोदेहभावेप्यभावादतद्धर्मत्वमेवैषांकिंनमन्येतदेहधर्मवैलक्षण्यात्॥ येहिदेहधर्मारूपादयस्तेयावद्देहंभवंति॥ प्राणचेष्टादयस्तुसत्यपिदेहेमृतावस्थायांनभवंति॥ देहधर्माश्चरूपादयः परैरप्युपलभ्यंतेनत्वात्मधर्माश्चैतन्यस्मृत्यादयः॥ अपिचसतिहितावद्देहेजीवदवस्थायामेषांभावःशक्यतेनिश्चेतुंनत्वसत्यभावःपतितेपिहिकदाचिदस्मिन्देहेदेहांतरसंचारेणात्मधर्माअनुवर्तेरन्॥ संशयमात्रेणापिपरपक्षःप्रतिषिध्यते॥ किमात्मकंचपुनरिदंचैतन्यंमन्यते॥ यस्यभूतेभ्यउत्पत्तिमिच्छतीतिपरःपर्यनुयोक्तव्यः॥ नहिभूतचतुष्टयव्यतिरेकेणलोकायतिकःकिंचित्तत्वंप्रत्ये

देनअसत्वस्यविवक्षितत्वाद्देहेचस्थितेसदारूपत्वावच्छिन्नमस्त्येवज्ञानत्वावच्छिन्नंतुनास्तीतिनज्ञानंदेहधर्मः किंचएतेनदेहगुणाःपरैर्दृश्यत्वादित्याह॥ देहधर्माश्चेति॥ किंचदेहव्यतिरेकेतेषामभावस्यसंदिग्धत्वात्नदेहधर्मत्वनिश्चयइत्याह॥ अपिचेति॥ नचानुपलंभात्तेषामभावनिश्चयस्तत्रानुपलब्धेरमानत्वात् तद्धर्म्यात्मनोदेहांतरगमाद्याप्यनुपलंभोपपत्तेश्चेतिभावः॥ उपलब्धिवदितिसूत्रस्थंपदंव्याख्यातुमुपक्रमते किमात्मकमिति॥

तत्किंभूतातिरिक्तं तत्वमुत रूपादिवद्भूतधर्मः नाद्यः अपसिद्धांतादित्युक्त्वा द्वितीयमाशंक्य निषेधति॥ यत्त्वनुभवनमित्यादिना देहात्मकभूतानां चैतन्यं
प्रतिविषयत्वात्कतृम् विरोधेन विषयस्य कर्तृत्वायोगात्तद्भूतकर्तृकत्वं चैतन्यस्येत्यर्थः किंच ज्ञानस्य भूतधर्मत्वे रूपादिवज्जाड्यापत्तेर्न तद्धर्मत्वमित्या
ह नहीति॥ फलितं सूत्रपदार्थमाह॥ अतश्चेति॥ या देहातिरिक्ता सद्रूपोपलब्धिः स एवात्मा चेदनित्यः स्यादुपलब्धेरनित्यत्वादित्यत आह नित्य
त्वं चेति घटः स्फुरति पटः स्फुरतीति सर्वत्र स्फूर्तेरभेदान्नित्यत्वं विषयोपरागनाशे तु नाशभ्रम इत्यर्थः॥ एवमात्मा देहाद्भिन्न उपलब्धिरूपत्वादुपल

यत्त्वनुभवनं भूतभौतिकानां तच्चैतन्यमिति चेन्न हि विषयत्वात्तेषां न तद्धर्मत्वमश्नुवीत स्वात्मनि क्रियाविरोधात्॥ नह्यग्निरुज्ज्वलः सन्
स्वात्मानं दहति न हि नटः सुशिक्षितः सन् स्वस्कंधमधिरुह्यते न हि भूतभौतिकधर्मेण सता चैतन्येन भूतभौतिकानि विषयीक्रियेरन्॥
न हि रूपादिभिः स्वरूपं पररूपं वा विषयीक्रियते विषयीक्रियंते तु बाह्याध्यात्मिकानि भूतभौतिकानि चैतन्येन॥ अतश्च यथैवास्या भू
तभौतिकविषयाया उपलब्धेर्भावोऽभ्युपगम्यते एवं व्यतिरेकोप्यस्यास्तेभ्योऽभ्युपगंतव्यः॥ उपलब्धिस्वरूप एव च न आत्मेत्यात्मनो देह
व्यतिरिक्तत्वं नित्यत्वं चोपलब्धेरैकरूप्यादहमिदमद्राक्षमिति चावस्थांतरयोगेप्युपलब्धृत्वेन प्रत्यभिज्ञानात् स्मृत्याद्युपपत्तेश्च॥ यत्तू
क्तं शरीरभावाच्छरीरधर्म एवोपलब्धिरिति तद्वर्णितेन प्रकारेण प्रत्युक्तं॥ अपि च सत्सु प्रदीपादिषु उपकरणेषु उपलब्धिर्भवत्यसत्सु न
भवति॥ न चैतावता प्रदीपादिधर्म एवोपलब्धिर्भवति॥ एवं सति देहे उपलब्धिर्भवति असति च न भवतीति न देहधर्मो भवितुमर्हति॥ उ
पकरणत्वमात्रेणापि प्रदीपादिवद्देहोपयोगोपपत्तेः॥ न चात्यंतं देहस्योपलब्धावुपयोगो दृश्यते॥ निश्चेष्टेप्यस्मिन्देहे स्वप्ने नानाविधोप
लब्धिदर्शनात्॥

ब्धिवदित्युक्तं किंच आग्रत्स्वप्नयोर्देहभेदेप्यात्मैक्यप्रत्यभिज्ञानादात्मभेदे च अन्यानुभूते अन्यस्य स्मृतीच्छानुपपत्तेः स्वप्नस्मृत्या
दिमानात्मा देहाद्भिन्न इत्याह॥ अहमिति॥ निरस्तमप्यधिकाऽभिधित्सयानुवदति यत्तूक्तमिति॥ उपलब्धेर्देहान्वयव्यतिरेकौ न देहधर्मत्वसाध
कौ न निमित्तत्वेनान्यथासिद्धेरित्यधिकमाह॥ अपि चेति॥ उपलब्धिमात्रे देहस्य निमित्तत्वमप्यसिद्धमित्याह॥ न चात्यंतमिति॥ स्वप्नोपलब्धिर्न दे
हजन्या देहव्यापारं विनापि भावात् तृक्षवदत एव तत्त्वभावेपि स्वप्नवद्योगिनां भोगं सूत्रकृद्दर्शयति जाग्रदुपलब्धेर्देहजत्वमस्तीत्यत्यंतमित्युक्तम्॥

तस्मादुक्तानुमानानुगृहीतात्ममशरीरमिति भेदानुभवादहंमनुष्यइत्यभेदज्ञानंभ्रमइत्युपसंहरतितस्मादिति॥५४॥ अंगावबद्धाः॥ उद्गीथावयवोंकारेप्राण दृष्टिः॥ पृथिवीहिंकारोग्निःप्रस्तावोंतरिक्षमुद्गीथआदित्यःप्रतिहारोद्यौर्निधनमिति हिंकारादिपंचविधेसाम्निपृथिव्यादिलोकदृष्टिः उक्थाख्यशस्त्रेपृथिवीदृष्टिः इष्टकाचिताग्नौलोकदृष्टिरित्येवंकर्मांगाश्रितोपास्तयः संतितासूद्गीथादिसाधारणश्रुत्या विशेषसन्निधिनाचसंशयः॥ ननूद्गीथादीनांसर्वशाखास्वेकत्वादुपास्तयः सर्वत्रेतिवेद्यैकान्निश्चयेकथंसंशयइत्यतआह॥ प्रतिशाखंचेति॥ यथादेहात्मनोर्भेदादात्मधर्मादेहेनसंभवंतितथाप्र

मुक्थ२

तस्मादनवद्यंदेहव्यतिरिक्तस्यात्मनोस्तित्वं॥३०॥ अंगावबद्धास्तुनशाखासुहिप्रतिवेदं॥५५॥ समाप्ताप्रासंगिकीकथासंप्रतितु प्रकृतामेवानुवर्तामहे॥ ओमित्येतदक्षरमुद्गीथमुपासीतलोकेषुपंचविधंसामोपासीतउक्थमितिवैप्रजावदंतितदिदमेवोक्थं इयमेवपृथिवीअयंवावलोकएषोग्निश्चितइत्येवमाद्या॥ यउद्गीथादिकर्मांगावबद्धाःप्रत्ययाःप्रतिवेदंशाखाभेदेषुविहितास्तेनतच्छाखागतेष्वेवोद्गीथादिषुभवेयुः अथवासर्वशाखागतेष्विति विशयः प्रतिशाखंचस्वरादिभेदादुद्गीथादिभेदमादाययमुपन्यासः॥ किंतावत्प्राप्तं॥ स्वशाखागतेष्वेवोद्गीथादिषुविधीयेरन्निति॥ कुतः सन्निधानात् उद्गीथमुपासीतेतिहिसामान्यविहितानांविशेषाकांक्षायांसन्निकृष्टेनैवस्वशाखागतेनविशेषेणाकांक्षादिनिवृत्तेस्तदतिलंघनेनशाखांतरविहितविशेषोपादानेकारणंनास्तितस्मात्प्रतिशाखंव्यवस्थेत्येवंप्राप्तेब्रवीति॥ अंगावबद्धास्त्विति॥ तुशब्दःपक्षंव्यावर्तयति॥ नैतेप्रतिवेदंस्वशाखास्वेवव्यवतिष्ठेरन् अपितुसर्वशाखास्वनुवर्तेरन्कुतः॥ उद्गीथादिश्रुत्यविशेषात्॥ स्वशाखाव्यवस्थायांह्युद्गीथमुपासीतेतिसामान्यश्रुतिरविशेषप्रवृत्तासतीसन्निधानवशेनविशेषेव्यवस्थाप्यमानापीडितास्यात्॥ तिवेदमुद्गीथादीनांभिन्नत्वादेकस्मिन्वेदेविहितोद्गीथाद्युपास्तयोवेदांतरस्थोद्गीथादिषुनसंभवंतीतिदृष्टांतेनेनपूर्वपक्षयति॥ स्वशाखेति उद्गीथमुपासीतेतिविधिवाक्यस्थोद्गीथत्वसामान्यस्यव्यक्त्यपेक्षत्वात्स्वशाखासन्निहितव्यक्तिग्रहइत्यर्थः॥ सामान्यश्रुतेःसन्निहितव्यक्तिग्रहाख्यसंकोचस्तत्रकर्तव्यःयत्रव्यक्तिमात्रग्रहोनोपपद्यते यथाशुक्लांगामानयेत्यत्रगोश्रुतेःसन्निहितशुक्लव्यक्तिपरतयासंकोचः अत्रत्वानुपपत्त्यभावाद्व्यक्तिमात्रसंबंधसामान्यमुपास्यमितिसिद्धांतयतिस्वमित्या

॥ पूर्वं शाखांतरविहितोपासीनां शाखांतरस्थांगसंबंधे यः प्रतीतो विरोधस्तमंगीकृत्य संबंध उक्तः संप्रति विरोध एव नास्ति शाखांतरविहितां
गानां शाखांतरस्थांगिसंबंधवदुक्तसंबंधोपपत्तेरित्याह॥ अथवेत्यादिना यजुर्वेदिनां कुक्कुटोसीति मंत्रोस्ति कुटरुरसीति नास्ति तथापि तंदुला
पेषणार्थाश्मादाने मंत्रद्वयस्य विकल्पेन विनियोगात्तेपि प्राप्नोतीत्यर्थः सूत्रस्थादिपदोपात्तकर्मणामुदाहरणमाह॥ येषामिति॥ मैत्राय
णीयानामित्यर्थः॥ हेमंतशिशिरयोरैक्या दृतवः पंचतद्वत्यं च संख्याकाः प्रयाजाः समान त्र तुल्यकर्मस्थले होतव्या इति पंचत्वगुणविधानात् गु

नचैतन्न्याय्यं॥ सन्निधानाद्धि श्रुतिर्बलीयसी॥ नच सामान्याश्रयः प्रत्ययो नोपपद्यते॥ तस्मात्स्वरादिभेदे सत्यप्युद्गीथत्वाद्यविशे
षात्सर्वशाखागतेष्वेवोद्गीथादिष्वेवंजातीयकाः प्रत्ययाः स्युः॥ ५५॥ मंत्रादिवद्वाऽविरोधः॥ ५६॥ अथवा नैवात्र विरोध आशं
कितव्यः॥ कथमन्यशाखागतेषूद्गीथादिषु अन्यशाखाविहिताः प्रत्यया भवेयुरिति मंत्रादिवदविरोधोपपत्तेः॥ तथाहि मंत्राणां कर्म
णां गुणानां च शाखांतरोत्पन्नानामपि शाखांतर उपसंग्रहो दृश्यते येषामपि हि शाखिनां कुटरुरसीत्यश्मादानमंत्रो नाम्नातः तेषा
मप्यसौ विनियोगो दृश्यते कुक्कुटोसीत्यश्मानमादत्ते कुटरुरसीति वेति॥ येषामपि समिदादयः प्रयाजा नाम्नातास्तेषामपि तेषु गुणवि
धिराम्नायते ऋतवो वै प्रयाजाः समान त्र होतव्या इति॥ तथा येषामप्यजोऽग्नीषोमीय इति जातिविशेषोपदेशो नास्ति तेषाम
पि तद्विषयो मंत्रवर्ण उपलभ्यते॥ छागस्य वपाया मेदसोनुब्रूहीति॥ तथा वेदांतरोत्पन्नानामपि अग्नेर्वै होत्रं वेरध्वरमित्येवमादि
मंत्राणां वेदांतरे परिग्रहो दृष्टः॥ तथा बह्वृचपठितस्य सूक्तस्य यो जात एव प्रथमो मनस्वानित्यस्याऽध्वर्यवे सजनीयं शस्यमित्यत्र
परिग्रहो दृष्टः॥ तस्माद्यथाश्रयाणां कर्मांगानां सर्वत्रानुवृत्तिः॥ एवमाश्रितानामपि प्रत्ययानामिति अविरोधः॥ ३१॥ ५६॥

णिनः शाखांतरविहिताः संबध्यंत इति भावः॥ गुणमुदाहरति॥ तथा येषामिति॥ यजुर्वेदिनामग्नीषोमीयः पशुः श्रुतो नाज इति जातिविशेषस्तथापि
प्रैषमंत्रलिंगाज्जातिविशेषसंग्रह इत्यर्थः॥ मंत्राणामुदाहरणांतरमाह॥ तथेति॥ सामवेदस्थानां यजुर्वेदे परिग्रह इत्यर्थः॥ तथेति॥ स जनास इंद्र इत्यनेनो
पलक्षितं सूक्तं सजनीयं तस्य याजुषाध्वर्युकर्तृकप्रयोगे शंसनं दृष्टमित्यर्थः॥ यो जातो बाल एव प्रथमो गुणैः श्रेष्ठो मनस्वान्विवेकवान्स इंद्र एवंविधो हे जनाः
सो जनास इति श्रुत्यर्थः॥ ५६॥

एम
३९६

भूम्नः क्रतुवत्॥ द्युलोकादित्यादिषु प्रत्येकं वैश्वानरत्वोपास्तिर्व्यस्तोपास्तिस्तदवयव्युपास्तिः समस्तोपास्तिरिति भेदः आख्यायिकापूर्वमेव व्याख्यातात्तत्रोभयत्र विधिफलयोः श्रवणादेकवाक्यत्वोपपत्तेश्च संशयमाह॥ तत्रेति॥ सैव हि सत्यादयः इत्यत्र तद्यत्तत्सत्यमिति प्रकृताकर्षाद्धि द्वैक्यमुक्तं तद्वदत्रैक्यहेत्वभावादगतार्थत्वं मत्वा पूर्वत्रोद्गीथादिश्रुत्या सन्निधिबाधेनोद्गीथाद्युपास्तीनां सर्वशाखासूपसंहारवदत्र सो

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति॥५७॥ प्राचीनशाल औपमन्यव इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य च वैश्वानरस्योपासनं श्रूयते॥ व्यस्तोपासनं तावदौपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाच एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इत्यादि॥ तथा समस्तोपासनमपि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावित्यादि॥ तत्र संशयः॥ किमिहोभयथाप्युपासनं स्यात्॥ व्यस्तस्य समस्तस्य च उत समस्तस्यैवेति॥ किं तावत्प्राप्तं॥ प्रत्यवयवं सुतेजःप्रभृतिषूपास्स इति क्रियापदश्रवणात्॥ तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यत इत्यादिफलभेदश्रवणाच्च व्यस्तान्यप्युपासनानि स्युरिति प्राप्तं॥ ततोऽभिधीयते॥ भूम्नः पदार्थोपचयात्मकस्य समस्तस्य वैश्वानरोपासनस्य ज्यायस्त्वं प्राधान्यमस्मिन्वाक्ये विवक्षितं भवितुमर्हति॥ न प्रत्येकमवयवोपासनानामपि॥ क्रतुवत्॥ यथा क्रतुषु दर्शपौर्णमासप्रभृतिषु समस्तेन सांगप्रधानप्रयोग एवैको विवक्ष्यते॥ न व्यस्तानामपि प्रयोगः प्रयाजादीनां नाप्येकदेशांगयुक्तस्य प्रधानस्य तद्वत्॥ कुत एतत्॥ भूमैव ज्यायानिति तथा हि श्रुतिः भूम्नो ज्यायस्त्वं दर्शयत्येकवाक्यतावगमात्॥ एकं हीदं वाक्यं वैश्वानरविषयं पौर्वापर्यालोचनया प्रतीयते॥

१ विद्या

६६ पास्तीनां विधिश्रुतेः फलश्रवणस्य च समस्तोपास्तिसन्निधिप्रा॰ क्तं इति सिद्धान्ताशयः॥ प्तं स्तुत्यर्थत्वं बाधित्वात्तद्विधेयत्वमिति पूर्वपक्षमाह॥ प्रत्यवयवमिति॥ फलानुक्तौ पूर्वोत्तरपक्षसिद्धिरेव फलं मंतव्यं॥ सुतं खंडितं सोमद्रव्यं तत्सैव प्रसुतत्वमासमंतात्सुतत्वमवस्थाभेदः॥ सोमयागसंपत्तिस्तव कुले दृश्यत इति यावत्॥ आत्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इति वाक्यप्रकरणाभ्यां व्यस्तोपास्तीनां समस्तोपास्त्यंतर्भावेन प्रयाजदर्शवदेकप्रयोगत्वसिद्धेः प्रधानतदंगफलानामर्थवादगतानामेकप्रधानफलतयोपसंहाराद्वाक्यभेदो नयु

शा॰भा॰
र॰प्र॰टी॰
३६२

एकदेशिव्याख्यामनूद्य दूषयति केचित्त्विति ॥ यद्युभयथोपासनं सिद्धांतस्तर्हि व्यस्तोपासनमेवेति पूर्वपक्षो वक्तव्यः स च न संभवतीत्याह ॥ स्पष्टे चेति ॥ क
थं तर्हि सूत्रे ज्यायस्त्वोक्तिस्तत्राह ॥ सौत्रस्येति ॥ व्यस्तोपास्तीनामप्रामाणिकत्वद्योतनार्थं तदुक्तिरिति भावः ॥ ५७ ॥ नानाशब्दादिभेदात् ॥ शांडिल्यादिब्र

तथा हि प्राचीनशालप्रभृतय उद्दालकावसानाः षडृषयो वैश्वानरविद्यायां परिनिष्ठामप्रतिपद्यमाना अश्वपतिं कैकेयं राजानम
भ्याजग्मुरित्युपक्रम्य एकैकस्य ऋषेरुपास्यं द्युप्रभृतीनामेकैकं श्रावयित्वा मूर्द्धा त्वेष आत्मन इति होवाचेत्यादिना मूर्धादिभावं तेषां
विदधाति मूर्धा ते व्यपतिष्यत् यन्मां नागमिष्यत् इत्यादिना च व्यस्तोपासनमपवदति ॥ पुनश्च व्यस्तोपासनं व्यावर्त्य समस्तो
पासनमेवानुवर्त्य स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति भूमाश्रयमेव फलं दर्शयति ॥ यत्तु प्रत्येकं सुतेजः प्रभृतिषु
षु फलभेदश्रवणं तदेवं सत्यंगफलानि प्रधान एवाभ्युपगतानीति द्रष्टव्यं ॥ तथोपास्स इत्यपि प्रत्यवयवमाख्यानश्रवणं पराभिप्रा
यानुवादार्थं न व्यस्तोपासनविधानार्थं ॥ तस्मात्समस्तोपासनपक्ष एव श्रेयानिति ॥ केचित्त्वत्र समस्तोपासनपक्षं ज्यायांसं प्रतिष्ठाप्य
ज्यायस्त्ववचनादेव किल व्यस्तोपासनपक्षमपि सूत्रकारोऽनुमन्यत इति कथयंति तदयुक्तं ॥ एकवाक्यतावगतौ सत्यां वाक्यभेदकल्पनस्या
न्याय्यत्वात् ॥ मूर्धा ते व्यपतिष्यदिति चैवमादिनिंदावचनविरोधात् ॥ स्पष्टे चोपसंहारस्थे समस्तोपासनावगमे तदभावस्य पूर्वपक्षेऽव
क्तुमशक्यत्वात् ॥ सौत्रस्य ज्यायस्त्ववचनस्य प्रमाणवत्त्वाभिप्रायेणाप्युपपद्यमानत्वात् ॥ ३२ ॥ ५७ ॥ नानाशब्दादिभेदात् ॥ ५८ ॥ पूर्व
स्मिन्नधिकरणे सत्यामपि सुतेजःप्रभृतीनां फलभेदश्रुतौ समस्तोपासनं ज्याय इत्युक्तं ॥ अतः प्राप्ता बुद्धिरन्यान्यपि भिन्नश्रुतीन्यु
पासनानि समस्योपासिष्यंत इति ॥ अपि चैवं वेद्याभेदे विद्याभेदो विज्ञातुं शक्यते ॥ वेद्यं हि रूपं विद्यायाः द्रव्यदैवतमिव यागस्य ॥
वेद्यश्चैक एवेश्वरः श्रुतिनानात्वेऽप्यवगम्यते ॥ मनोमयः प्राणशरीरः कं ब्रह्म खं ब्रह्म सत्यकामः सत्यसंकल्प इत्येवमादिषु ॥ त
थैक एव प्राणः प्राणो वाव संवर्गः प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च प्राणो ह पिता प्राणो माता इत्येवमादिषु वेद्यैकत्वाच्च विद्यैकत्वं ॥ ९ ॥

ह्मविद्यैकानानात्वं तथा संवर्गादिप्राणविद्यैकानानात्वे इति रूपैक्यभावाभावाभ्यां संशये दृष्टांतसंगत्या पूर्वपक्षमाह ॥ पूर्वस्मिन्निति ॥ रूपैक्याच्च विद्यै
क्यमित्याह ॥ अपि चेति ॥

अ॰पा॰
३ ३

सम॰
३६२

विद्यैकंचेदेकश्रुत्युक्तविद्यायाः श्रुत्यंतरेप्युक्तिर्व्यर्थेत्यतआह॥ श्रुतिनानात्वमपीति॥ पूर्वपक्षफलमाह॥ तस्मादितिसिद्धांतेतुगुणानुपसंहारइतिमत्वासूत्रंयोजयतिविद्याभेदेपीति॥ ननुभिन्नभावार्थवाचकशब्दः शब्दांतरंयथायजतिददातिजुहोतीतितस्मिन्शब्दभेदेकर्मशब्दितविध्यर्थभावनायाभेदोयुक्तस्तस्याः कृत्यनुबंधत्वाद्भेदेनस्वीकृतविषयत्वाद्धात्वर्थभेदादितियावत्॥ प्रकृतेतुवेदोपासीतेत्यादिशब्दार्थोपास्तेर्यागदानहोमवत्स्वतोभेदाभावात्सिद्धगुणकब्रह्मणएकत्वेनविषयतोपिभेदाभावात्कथमुपास्तिभेदइतिशंकते॥ नन्विति॥ अत्रसूत्रेशब्दभेदोभ्युच्चयमात्रतयोक्तः विद्यानानात्वेसम्य

श्रुतिनानात्वमप्यस्मिन्पक्षेगुणांतरपरत्वान्नानर्थकं॥ तस्मात्स्वपरशाखाविहितमेकवेद्यव्यपाश्रयंगुणजातमुपसंहर्तव्यंविद्यैकात्वायेत्येवंप्राप्तेप्रतिपाद्यते॥ नानेतिवेद्याभेदेप्येवंजातीयकाविद्याभिन्नाभवितुमर्हंति॥ कुतः शब्दादिभेदात्॥ भवतिहिशब्दभेदोवेदोपासीतसक्रतुंकुर्वीतेत्येवमादिः॥ शब्दभेदश्चकर्मभेदहेतुः समधिगतः पुरस्तात्शब्दांतरेकर्मभेदः कृत्यानुबंधत्वादिति॥ आदिग्रहणात्गुणादयोपियथासंभवंभेदहेतवोयोजयितव्याः॥ ननुवेदेत्यादिषुशब्दभेदएवावगम्यतेनतुयजतीत्यादिवदर्थभेदः सर्वेषामेवैषांमनोवृत्त्यर्थत्वाभेदादर्थांतरासंभवाच्चतत्कथंशब्दभेदाद्विद्याभेदइति॥ नैषदोषः॥ मनोवृत्त्यर्थत्वाभेदेपिअनुबंधभेदाद्वेद्यभेदेसतिविद्याभेदोपपत्तेः॥ एकस्यापीश्वरस्योपास्यस्यप्रतिप्रकरणंव्यावृत्तागुणाः शिष्यंते॥ तथैकस्यापिप्राणस्यतत्रतत्रोपास्यस्याभेदेपिअन्यादृग्गुणोन्यत्रोपासितव्यः अन्यादृग्गुणश्चान्यत्रेत्येवमनुबंधभेदाद्वेद्यभेदेसतिविद्याभेदोविज्ञायते॥ नचात्रैकोविद्याविधिः इतरेगुणविधयइतिशक्यंवक्तुंविनिगमनायांहेत्वभावात्॥ अनेकत्वाच्चप्रतिप्रकरणंगुणानांप्राप्तविद्यानुवादेनविधानानुपपत्तेः॥

११कुहेतवस्त्वादिपदोपात्तागुणास्यसएव॥ तथाहिसिद्धस्यापिगुणस्यकार्यान्वयितयाकार्यत्वमस्तियथाआरुण्यादिगुणानांक्रयणभावनान्वयितयाकार्यत्वंतथाचतत्तत्प्रकरणेश्रूयनिशिष्टैरूपास्तिभावनान्वयितयासाध्यैस्तत्तद्गुणैर्विशिष्टतयोपास्यस्वरूपभेदादुपासनाभेदः॥ यथाछत्रचामरादिगुणभेदेनराजोपास्तिभेदः॥ यथावामिक्षावाजिनगुणभेदेनयागभेदस्तद्वत्तथाप्रतिविद्यांफलसंयोगभेदाद्दहरशांडिल्यादिसमाख्याभेदाद्भेदइतिसमाधत्तेनैषदोषइत्यादिनायदुक्तं। श्रुतिनानात्वंगुणांतरविध्यर्थमितितत्रेत्याह॥ नचात्रैकइति॥ किंचप्राप्तविद्यानुवादेनाप्राप्तानेकगुणविधानेवाक्यभेदः स्यादित्याह॥ अनेकत्वाच्चेति॥

किंचविद्यैक्यपक्षेगुणानांपुनरुक्तिर्वृथानचप्रत्यभिज्ञानार्थाब्रह्मैक्यादेवतत्सिद्धेः॥विद्यानानात्वपक्षेतुगुणानामप्राप्तेःसाप्राप्त्यर्थेत्याह॥नचास्मिन्प
क्षइति॥फलभेदाच्चोदनैक्याभावात्सर्वगुणध्यानस्याशक्यत्वाच्चविद्यानानेत्याह॥प्रतिप्रकरणंचेत्यादिना॥दहरध्यातुःसर्वेषुलोकेषुकामचारोभवति
वैश्वानरध्यातासर्वत्रान्नमत्तीत्यादिफलभेदइत्यर्थः॥ननुविद्यानानात्वेसिद्धेपश्चाद्दहरादिविद्याप्रतिवेदंतमेकानेकावेतिचिंतोचितानन्तकथमा।

नचास्मिन्पक्षेसमानाःसंतःसत्यकामत्वादयोगुणाःअसकृच्छ्रावयितव्याः॥प्रतिप्रकरणंचेदंकामेनेदमुपासितव्यमिदंकामेन
चेदमितिनैराकांक्ष्यावगमान्नैकवाक्यतापत्तिः॥नचात्रवैश्वानरविद्यायामिवसमस्तचोदनाऽपरास्तियद्बलेनप्रतिप्रकरणव
र्तीन्यवयवोपासनानिभूत्वैकवाक्यतांयायुः॥वेद्यैकत्वनिमित्तेचविद्यैकत्वेसर्वत्रनिरंकुशेप्रतिज्ञायमानेसमस्तगुणोपसंहारोऽशक्यः
प्रतिज्ञायेत॥तस्मात्सुष्ठूच्यतेनानाशब्दादिभेदादिति॥स्थितेचैतस्मिन्नधिकरणेसर्ववेदांतप्रत्ययमित्यादिद्रष्टव्यं॥३॥५८॥विक।
ल्पोऽविशिष्टफलत्वात्॥५९॥स्थितेविद्याभेदेविचार्यते॥किमासामिच्छयासमुच्चयोविकल्पोवास्यात्॥अथवाविकल्पएवनि।
यमेनेति॥तत्रस्थितत्वात्तावद्विद्याभेदस्यनसमुच्चयनियमेकिंचित्कारणमस्ति॥ननुभिन्नानामप्यग्निहोत्रदर्शपूर्णमासादीनां
समुच्चयनियमोदृश्यते॥नैषदोषः॥नित्यताश्रुतिर्हितत्रकारणंनैवंविद्यानांकाचिन्नित्यताश्रुतिरस्तितस्मान्नसमुच्चयनियमः॥
नापिविकल्पनियमःविद्यांतराधिकृतस्यविद्यांतराप्रतिषेधात्॥पारिशेष्याद्यथाकाम्यमापद्यते॥नन्वविशिष्टफलत्वादा।
सांविकल्पोन्याय्यः॥तथाहिमनोमयःप्राणशरीरःकंब्रह्मखंब्रह्मसत्यकामःसत्यसंकल्पइत्येवमाद्यास्तुल्यवदीश्वरप्राप्तिफलाल
क्ष्यंतेनैषदोषः॥समानफलेष्वपिस्वर्गादिसाधनेषुकर्मसुयथाकाम्यदर्शनात्॥तस्माद्यथाकामप्राप्तावुच्यते॥

दोसाकृतेत्यतआह॥स्थितेचे।
ति॥विद्यानानात्वाधिकरणंपादादावेवसंगतंअत्रप्रासंगिकमितिभावः॥५८॥विकल्पोविशिष्टफलत्वात्विद्यानांस्वरूपमुक्त्वानुष्ठानप्रकारोऽत्रनि
रूप्यतइत्युपजीव्यत्वसंगतिमाह॥स्थितइतिविद्यास्त्रिविधाःअहंग्रहास्तटस्थाअंगाश्रिताश्चेतितत्राहंग्रहविद्यासुयथाकाम्यविकल्पयोर्विद्यानानात्व
साम्यात्संशयमाह॥किमिति॥पूर्वपक्षेयथेच्छमनुष्ठानमित्यनियमःसिद्धांतेविकल्पेनानुष्ठानमितिनियमइतिफलभेदः॥तत्रानियमंसाधयति॥तत्रस्थि

एकपुरोडाशफलत्वाद्यथा व्रीहियवयोर्विकल्पस्तथा विकल्पनियम एवासां विद्यानां न्याय्यः तुल्यफलत्वान्न च फलभूयस्त्वार्थिनः काम्यकर्मसमुच्चयोपि दृष्ट इति वाच्यं ईश्वरसाक्षात्कारात्परफले भेदेप्यासामहंग्रहोपास्तीनां साक्षात्कारात्मकफलस्य तुल्यत्वात्तस्य चैकयाकृतत्वे अन्यस्याः कृत्याभावाच्चित्तविक्षेपकतया तद्विधानकत्वाच्चेति सिद्धांतभाष्यार्थः॥ मास्तु साक्षात्कार इत्यत आह॥ साक्षात्करणसाध्यं चेति॥ यस्य पुंसोऽद्धा ईश्वरोहमिति साक्षात्कारः स्याद्धि विचिकित्सा च नास्ति अहमीश्वरो न वेति तस्यैवेश्वरप्राप्तिरित्यर्थः॥ जीवन्नेव भावनया देवत्वं साक्षात्कृत्य

॥ विकल्प एवासां भवितुमर्हति॥ न समुच्चयः कस्मात्॥ अविशिष्टफलत्वात्॥ अविशिष्टं ह्यासां फलं उपास्यविषयसाक्षात्करणं॥ एकेन चोपासनेन साक्षात्कृत उपास्ये विषय ईश्वरादौ द्वितीयमनर्थकं॥ अपि चासंभवः साक्षात्करणस्य समुच्चयपक्षे चित्तविक्षेपहेतुत्वात्॥ साक्षात्करणसाध्यं च विद्याफलं दर्शयंति श्रुतयः॥ यस्य स्यादद्धा न विचिकित्सास्तीति देवो भूत्वा देवानप्येतीति चैवमाद्याः॥ स्मृतयश्च सदा तद्भावभावित इत्येवमाद्याः॥ तस्मादविशिष्टफलानां विद्यानामन्यतमामादाय तत्परः स्याद्यावदुपास्यविषयसाक्षात्करणेन तत्फलं प्राप्तमिति॥ ३४॥ ५४॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६०॥ अविशिष्टफलत्वादित्यस्य प्रत्युदाहरणं॥ यासु पुनः काम्यासु विद्यासु स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीति चैवमाद्यासु क्रियावद्दृष्टेनात्मनात्मीयं फलं साधयंतीषु साक्षात्करणापेक्षा नास्ति॥ ता यथाकामं समुच्चीयेरन्न वा समुच्चीयेरन्॥ पूर्वहेत्वभावात् पूर्वस्याविशिष्टफलत्वादित्यस्य विकल्पहेतोरभावात्॥ ३५॥ ६०॥ ९॥

देहपातोत्तरकालं देवान्प्राप्नोतीति श्रुत्यंतरार्थः॥ अहंग्रहाणामनुष्ठानप्रकारमुपसंहरति॥ तस्मादिति॥ ५९॥ काम्यास्तु॥ तदस्योपास्तयोत्र विषयस्तासु किं विकल्प उत यथाकामं अनुष्ठानमिति पूर्ववत्संशये सत्युपास्तित्वाविशेषादहंग्रहवद्विकल्प इति प्राप्तावपवादं सिद्धांतयति अविशिष्टेति॥ स यः कश्चिदेतं वायुमेव गोत्वेन कल्पितानां दिशां वत्सं वेदोपास्ते नासौ पुत्रमरणनिमित्तं रोदनं रोदिति लभते नित्यमेव जीवत्पुत्रो भवतीत्यर्थः॥ अहंग्रहदृष्टांते साक्षात्कारद्वारत्वमुपाधिरिति भावः॥ ६०॥

संप्रत्यंगावबद्धोपास्तीनामनुष्ठानक्रमं वक्तुं पूर्वपक्षयति अंगेषु॥ अंगाश्रितत्वात्तत्फलत्वाच्च संशयमाह॥ किमिति॥ यथा क्रत्वनुष्ठानेन तदाश्रितांगानां समुच्चित्यानुष्ठाननियमस्तथांगानुष्ठानेन तदाश्रितोपास्तीनां तन्नियम इति सूत्रार्थः॥ ननु तन्निर्धारणानियम इत्यत्रांगाश्रितानां गोदोहनवदनंगत्वमुक्तं तत्कथमनंगानामंगवत्समुच्चयशंकेति उच्यते॥ अंगान्यनुष्ठापयत्प्रयोगविधिर्यद्युपासनानि नानुष्ठापयेत्तर्हि तेषां तदाश्रितत्वं व्यर्थमिति मन्वानस्य शंकेति भावः॥ ६१॥ नहि गोदोहनस्यापि समुच्चयः स्यादित्यत आह॥ शिष्टेश्चेति॥ शिष्टिः शासनं विधानमिति यावत् विहितत्वाविशेषात्समुच्चयोंगवदित्यर्थः॥ गोदोहनस्य तु नानुष्ठाननियमः॥ चमसस्थाने विहितत्वात्तन्नियमे चमसविधिवैय्यर्थ्यादुपासनानां तु न कस्यचिदंगस्य स्थाने विहितत्व-

अंगेषु यथाश्रयभावः॥ ६१॥ कर्मांगेषूद्गीथादिषु य आश्रिताः प्रत्यया वेदत्रयविहिताः॥ किं ते समुच्चीयेरन् किं वा यथाकामं स्युरिति संशये यथाश्रयभाव इत्याह॥ यथैवैषामाश्रयाः स्तोत्रादयः संभूय भवंति एवं प्रत्यया अपि आश्रयतंत्रत्वात्प्रत्ययानां॥ ६१॥ शिष्टेश्च॥ ६२॥ यथा चाश्रयाः स्तोत्रादयस्त्रिषु वेदेषु शिष्यंते॥ एवमाश्रिता अपि प्रत्ययाः॥ नोपदेशकृतोपि कश्चिद्विशेषोंगानां तदाश्रयाणां च प्रत्ययानामित्यर्थः॥ ६२॥ समाहारात्॥ ६३॥ होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीति च प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यादुद्गाता स्वकर्मण्युत्पन्नं क्षतं होत्रात्कर्मणः प्रतिसमादधातीति ब्रुवन्वेदांतरोदितस्य प्रत्ययस्य वेदांतरोदितपदार्थसंबंधसामान्यात्सर्ववेदोदितप्रत्ययोपसंहारं सूचयतीति लिंगदर्शनं॥ ६३॥

मिति समुच्चयनियमो न विरुध्यत इति भावः॥ ६२॥ समुच्चये लिंगमाह॥ समाहारादिति॥ ऋग्वेदिनां यः प्रणवः स सामवेदिनामुद्गीथ इति छांदोग्ये प्रणवोद्गीथयोरैक्यध्यानविधिरस्ति तस्य फलार्थवादो होतृषदनादित्यादिः होतुः शंसनस्थलवाचिना होतृषदनशब्देन शंसनं लक्ष्यते॥ उद्गाता स्वरादिप्रमादात् दुष्टमप्युद्गीथं सम्यक्कृतात् होतृशंसनादनुसमाहरत्येव निर्दोषं करोत्येव किल शंस्यमानप्रणवेन स्वीयोद्गीथस्यैक्यध्यानबलादित्यर्थः ततः किं तत्राह इति ब्रुवन्निति॥ सामवेदस्थोद्गीथध्यानस्य ऋग्वेदोक्तप्रणवसंबंधो यो दृष्टः स एवांगानां सर्ववेदांतविहितोपास्तिसमुच्चये लिंगं प्रणवःरूपपदार्थस्योपास्तीनां च वेदांतरोक्तत्वसादृश्यात् वेदांतरोक्तांगसंबंधस्यापि समानत्वादित्यर्थः॥

॥ ॐ तत्सत् ॥ श्रीकृष्णानंद रामसमर्थ ॥

ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥

अथशारीरकसूत्रभाष्येरत्नप्रभायांतृतीयाध्यायस्यचतुर्थपादःप्रारम्भः

ॐ तत्सत् ॥ तत्सत् ॥ ॐ तत्सत्

॥ ॐ तत्सत् ॥ ॐ तत्सत् ॥ ॐ तत्सत्

ब्रा.भा.
टी.
र.प्र.
३६६

अ.पा.
३.४

श्रीगणेशाय नमः॥ ॐ कर्मांगविद्याप्रसंगात् ब्रह्मज्ञानस्य कर्मांगत्वमाशंक्याह॥ पुरुषार्थोतः शब्दादिति बादरायणः पूर्वपादे परापरविद्यानां गुणोपसंहारोक्त्या स्वरूपं निश्चितं अस्मिन्पादे तासां कर्मानंगतया पुरुषार्थहेतुत्वं निरूप्यते॥ ततो गताकांक्षायां यज्ञादीनि बहिरंगाणि शमादीन्यंतरंगाणि च निरूप्यंत इति सकलविद्याविषयत्वं पादयोः संगतिः॥ तत्रादौ तत्त्वज्ञानं विषयीकृत्य वादिविप्रतिपत्त्या संशयमाह॥ अथेति॥ पूर्वपक्षे ज्ञानकर्मणोरंगांगित्वेन समुच्चयः सिद्धांते केवलज्ञानान्मुक्तिरिति फलभेदः॥ य आत्मेति प्रजापत्युक्तब्रह्मविद्यायां लोकादिकं सगुणविद्याफलं मोक्षानंदेन भावाभिप्रायेणोक्तमिति मन्तव्यं॥ १॥

॥ श्री॥ पुरुषार्थोतः शब्दादिति बादरायणः॥ १॥ अथेदानीमौपनिषदमात्मज्ञानं किमधिकारद्वारेण कर्मण्येवानुप्रविशति॥ आहोस्वित्स्वतंत्रमेव पुरुषार्थसाधनं भवतीति मीमांसमानः सिद्धांतेनैव तावदुपक्रमते पुरुषार्थोऽत इति॥ अस्माद्वेदांतविहितादात्मविज्ञानात्स्वतंत्रात्पुरुषार्थः सिध्यतीति बादरायण आचार्यो मन्यते॥ कुत एतदवगम्यते शब्दादित्याह॥ तथाहि॥ तरति शोकमात्मवित् स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परं आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्य इति ॥ य आत्मापहतपाप्मेत्युपक्रम्य स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति आत्मा वा अरे द्रष्टव्य इत्युपक्रम्य एतावदरे खल्वमृतत्वमिति एवंजातीयका श्रुतिः केवलाया विद्यायाः पुरुषार्थहेतुत्वं श्रावयति॥ १॥ अथात्र प्रत्यवतिष्ठते॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः॥ २॥ कर्तृत्वेनात्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसंबंध्येवेति॥ अतस्तस्मिन्नवगतप्रयोजने आत्मज्ञाने या फलश्रुतिः सार्थवाद इति जैमिनिराचार्यो मन्यते॥ यथान्येषु द्रव्यसंस्कारकर्मसु यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृंक्ते यत्प्रयाजानुयाजा इज्यंते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्या इत्येवंजातीयका फलश्रुतिरर्थवादस्तद्वत्॥ २॥

राम
३६६

न्तव्यं॥ १॥ एवं सिद्धांतमुपक्रम्य पूर्वपक्षयति शेषत्वादिति॥ सूत्रेऽर्थवादपदमावर्तनीयं ज्ञानात्पुरुषार्थवादोऽर्थवाद इत्यर्थः॥ ज्ञानं कर्मांगमफलत्वे सति कर्मशेषाश्रयत्वात्प्रोक्षणपर्णमयीत्वादिवदिति भावः॥ ननु निर्णयार्थं गुरुशिष्ययोः कथा वादोऽयमिति ज्ञापनार्थं जैमिनिग्रहणं अंगिफलेनांगभूत आ [illegible] त्मावगतप्रयोजनस्तदाश्रयेण तत्संस्कारे ज्ञाने फलश्रुतिरर्थवाद इत्यत्र दृष्टांतः यथेति पर्णमयी द्रव्यं यजमानस्य अंजनसंस्कारः प्रयाजादीनि कर्माणि तेषु

ॐकारस्यध्येयस्यसाधारण्यादपितदाश्रितध्यानानांसमुच्चित्यानुष्ठानंगम्यतइतिलिंगांतरमाह॥ गुणेति॥ तेनोंकारेणवेदत्रयोक्तंकर्मप्रव।
र्त्तत इत्यर्थः॥ अन्वयमुखेनोक्तमेवार्थंव्यतिरेकतोपिव्याचष्टेअथवेति॥ ६४॥ फलेच्छाया अनियमादुपास्त्यनियमएवयुक्तः अंगवत्समुच्चा।

गुणसाधारण्यश्रुतेश्च॥ ६४॥ विद्यागुणंचविद्याश्रयंसंतमोंकारंवेदत्रयसाधारणंश्रावयति॥ तेनेयंत्रयीविद्या।
वर्त्तत ॐमित्याश्रावयत्योमितिशंसत्योमित्युद्गायतीतिच॥ ततश्चाश्रयसाधारण्यादाश्रितसाधारण्यमितिलिंगदर्श
नमेव॥ अथवागुणसाधारण्यश्रुतेश्चेति॥ यदीमेकर्मगुणाउद्गीथादयः सर्वेसर्वप्रयोगसाधारणानस्युर्नस्या।
त्ततस्तदाश्रयाणांप्रत्ययानांसहभावः॥ तेतूद्गीथादयः सर्वांगग्राहिणाप्रयोगवचनेनसर्वेसर्वप्रयोगसाधार।
णाः श्राव्यंतेततश्चाश्रयसहभावात्प्रत्ययसहभावइति॥ ६४॥ नवातत्सहभावाश्रुतेः॥ ६५॥ नवेतिपक्षंव्याव।
र्त्तनं॥ नयथाश्रयभावआश्रितानामुपासनानांभवितुमर्हति॥कुतः तत्सहभावाश्रुतेः॥ यथाहित्रिवेदीविहिता
नामंगानांस्तोत्रादीनांसहभावः श्रूयतेग्रहंवागृहीत्वाचमसंवोन्नीयस्तोत्रमुपाकरोतिस्तुतमनुशंसतिप्रस्तोतः॥
साम गायहोतरेत यजेत्यादिना॥ नैवमुपासनानांसहभावश्रुतिरस्ति॥ ननुप्रयोगवचनएषांसहभावंप्रापयेत्॥
॥ नेतिब्रूमः पुरुषार्थत्वादुपासनानां॥ प्रयोगवचनोहिक्रत्वर्थानामुद्गीथादीनांसहभावंप्रापयेत्॥ ॥

यनियमेमानाभावादितिसिद्धांतयति॥ नवेति। प्रयोगविधिः खलुसांगप्रधानानुष्ठाननियामकः नत्वनंगानांसंग्राहकइत्याह॥ नेतिब्रूम।
इतिविमतोपास्तयः क्रतौ नसमुच्चित्यानुष्ठेयाः भिन्नफलत्वाद्गोदोहनवदितिभावः॥ ६ ६ ॥

शिष्टेश्चेत्युक्तंनिरस्यतिअयमेवेति॥समाहाराद्गुणसाधारण्यश्रुतेश्चेत्युक्तंलिंगद्वयमपिमानांतरप्राप्तस्यद्योतकंनस्वयंसाधकं॥अर्थवादस्यत्वादित्याह॥
परंचेति॥गुणसाधारण्यसूत्रस्यद्वितीयांव्याख्यांदूषयति॥नचेति॥नत्प्रयुक्तत्वाभावेनतदाश्रितत्वंकथमित्यतआह॥आश्रयेति॥इदमेवतेषामं
गाश्रितत्वंयदंगाभावेसत्यसत्वंनत्वंगव्यापकत्वमित्यर्थः॥६५॥ किंचविदुषाब्रह्मणात्वेषामृत्विजांपाल्यत्ववचनात्सर्वोपास्तीनांसहप्रयोगइ

उद्गीथाद्युपासनानिक्रत्वर्थाश्रयाण्यपिगोदोहनादिवत्पुरुषार्थानीत्यवोचामपृथग्ध्यप्रतिबंधःफलमित्यत्र॥अयमेवचोपदे
शाश्रयोविशेषोंऽगानांतदालंबनानांचोपासनानांयदेकेषांक्रत्वर्थत्वमेकेषांपुरुषार्थत्वमिति॥परंचलिंगद्वयमकारणंउपासनसह
भावस्यश्रुतिन्यायाभावात्॥नचप्रतिप्रयोगमाश्रयकार्त्स्न्योपसंहारादाश्रितानामपितथात्वंविज्ञातुंशक्यंअतत्प्रयुक्तत्वादुपा
सनानां॥ आश्रयतंत्राण्यपिहिउपासनानिकाममाश्रयाभावेमाभूवन्॥ नत्वाश्रयसहभावेनसहभावनियममर्हंति॥न
त्वसहभावाश्रुतेरेवतस्माद्यथाकाममेवोपासनान्यनुष्ठीयेरन्॥६५॥दर्शनाच्च॥६६॥दर्शयतिचश्रुतिरसहभावंप्रसयानां॥ए
वंविद्धवैब्रह्मायज्ञंयजमानंसर्वांश्चर्त्विजोभिरक्षतीति॥ सर्वप्रत्ययोपसंहारेहिसर्वेसर्वविदइतिनविज्ञानवताब्रह्मणापरिपाल्य
त्वमितरेषांसंकीर्त्येत॥तस्माद्यथाकाममुपासनानांसमुच्चयोविकल्पोवेति॥३६॥ इतिश्रीशारीरकमीमांसाभाष्येशंकरभ
गवत्पादकृतौतृतीयस्याध्यायस्यतृतीयःपादःसमाप्तः॥ ३॥श्रीसीतारामचंद्रायनमः॥ श्रीसांबसदाशिवायनमः॥

त्याह॥दर्शनाच्चेति॥ऋग्वेदादिविहितांगलोपेव्याहृतिहोमप्रायश्चित्तादिविज्ञानवत्त्वमेवंवित्त्वंब्रह्मणइत्यर्थः॥६६॥इतिश्रीमच्छारीरकमीमां
साव्याख्यायांभाष्यरत्नप्रभायांतृतीयस्याध्यायस्यतृतीयःपादःसमाप्तः॥ भाष्यम्॥११६०॥टीका१०५०॥एवमादितः॥२२१०॥ ॥

आत्मज्ञानेन कर्मांगमानाभावादिति सिद्धांती शंकते ॥ कथमिति ॥ पूर्वपक्ष्याह ॥ कर्त्रिति युक्तो ह्यनारभ्याधीतायाः पर्णतायाः जुहूद्वारेण वाक्यात्क्रत्वंगभावोऽनुक्ताः क्रतुव्याप्यतया क्रतूपस्थापकत्वात् ॥ न तथात्मविज्ञानस्य आत्मा द्रष्टव्य इति वाक्यात्क्रतुसंबंध उपपद्यते ॥ आत्मनः क्रतुव्याप्यभावादिति सिद्धांती दूषयति नेति ॥ देहभिन्नत्वेन ज्ञातात्मनः क्रतुव्याप्यत्वमस्तीति पूर्वपक्षी समाधत्ते न व्यतिरेकेति सर्वथेति ॥ देहात्म-

कथं पुनरस्यानारभ्याधीतस्यात्मज्ञानस्य प्रकरणादीनामन्यतमेनापि हेतुना विना क्रतुप्रवेश आशंक्यते ॥ कर्तृद्वारेण वाक्यात्तद्विज्ञानस्य क्रतुसंबंध इति चेन्न वाक्याद्विनियोगानुपपत्तेः ॥ अव्यभिचारिणा हि केनचिद्द्वारेणानारभ्याधीतानामपि वाक्यनिमित्तः क्रतुसंबंधोऽवकल्पते ॥ कर्ता तु व्यभिचारि द्वारं लौकिकवैदिककर्मसाधारण्यात् ॥ तस्मान्न तद्द्वारेणात्मज्ञानस्य क्रतुसंबंधसिद्धिरिति ॥ न व्यतिरेकज्ञानस्य वैदिकेभ्यः कर्मभ्योऽन्यत्रानुपयोगात् ॥ न हि देहव्यतिरिक्तात्मज्ञानं लौकिकेषु कर्मसूपयुज्यते सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः ॥ वैदिकेषु तु देहपातोत्तरकालफलेषु देहव्यतिरिक्तात्मज्ञानमंतरेण प्रवृत्तिर्नोपपद्यत इत्युपयुज्यते व्यतिरेकविज्ञानं ॥ नन्वपहतपाप्मत्वादिविशेषणादसंसार्यात्मविषयमौपनिषदं दर्शनं न प्रवृत्त्यंगं स्यात् ॥ न प्रियादिसंसूचितस्य संसारिण एवात्मनो द्रष्टव्यत्वेनोपदेशात् ॥ अपहतपाप्मत्वादिविशेषणं तु स्तुत्यर्थं भविष्यति ॥ ननु तत्र तत्र प्रसाधितमेतदधिकमसंसारि ब्रह्म जगत्कारणं तदेव च संसारिण आत्मनः पारमार्थिकं स्वरूपमुपनिषत्सूपदिश्यत इति ॥ सत्यं प्रसाधितं तस्यैव तु स्थूणानिखननवत्फलद्वारेणाक्षेपसमाधाने क्रियेते दार्ढ्या

त्वेनापीत्यर्थः ॥ देहभिन्नकर्तृज्ञानस्यांगत्वेऽप्यकर्तृब्रह्मात्मज्ञानस्य नांगत्वमिति शंकते ॥ नन्वपहतेति ((या ॥ २ ॥ आचारदर्शनात् ॥ ३ ॥

॥ यस्यार्थे जायादिकं प्रियं भोग्यं स आत्मा द्रष्टव्य इति भोग्यलिंगेन सूचितभोक्तृभिन्नमकर्तृस्वरूपं नास्तीति समाध्यर्थः ॥ जन्मादिसूत्रमारभ्य साधितं स्वरूपं कथं नास्तीति शंकते ॥ नन्विति ॥ स्वरूपज्ञानं वेदांतानां फलं तस्य क्रत्वर्थत्वपुरुषार्थत्वविचारेण दार्ढ्यं क्रियत इत्याह ॥ सत्यमिति ॥ २ ॥ ब्रह्मविदां कर्माचारदर्शनं ब्रह्मविद्यायाः कर्मांगत्वे लिंगमित्याह ॥ आचारेति ॥ ७ ॥ ७ ॥

ईजे यागं कृतवानित्यर्थः॥ हे भगवंत इति ब्राह्मणान्संबोध्य ब्रह्मवित्केकेयराजो ब्रूते॥ अहं यक्ष्यमाणो यागं करिष्यमाणोस्मि वसंत्वत्र भगवंत इत्यर्थः॥ अन्यपरेष्विति विद्याविधिपरेष्वित्यर्थः॥ अल्पायासंसुकेरूपायं ज्ञानं लब्ध्वा बह्वायासं कर्म न कुर्युरित्यत्र दृष्टांतमाह॥ अक्क इति समीप इत्यर्थः॥ अर्क इति पाठेप्ययमेवार्थः॥ ३॥ ब्रह्मविद्यायाः कर्मांगत्वे तृतीयाश्रुतिरप्यस्तीत्याह तच्छ्रुतेरिति॥ ४॥ लिंगांतरमाह॥ समिति॥ तं परलोकं गच्छंतं विद्याकर्मणी अनुगच्छत इत्यर्थः॥ ५॥ गुरोः शुश्रूषारूपं कर्म कुर्वन्नतिशेषेणावशिष्टेन कालेन यथाविधानं वेदमधीत्यानंतरमाचार्यस्य कुलाद्गृहाद्ब्रह्मचर्यादिति॥

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे यक्ष्यमाणो वै भगवंतोहमस्मीत्येवमादीनि ब्रह्मविदामप्यन्यपरेषु वाक्येषु कर्मसंबंधदर्शनानि भवंति॥ तथोद्दालकादीनामपि पुत्रानुशासनादिदर्शनात् गार्हस्थ्यसंबंधोवगम्यते॥ केवलाच्चेज्ज्ञानात्पुरुषार्थसिद्धिः स्यात् किमर्थमनेकायाससमन्वितानि कर्माणि ते कुर्युः॥ अक्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेदिति न्यायात्॥ ३॥ तच्छ्रुतेः॥ ४॥ यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च कर्मशेषत्वश्रवणाद्विद्याया न केवलायाः पुरुषार्थहेतुत्वं॥ ४॥ समन्वारंभणात्॥ ५॥ तं विद्याकर्मणी समन्वारभेते इति च विद्याकर्मणोः फलारंभे सहकारित्वदर्शनान्न स्वातंत्र्यं विद्यायाः॥ ५॥ तद्वतो विधानात्॥ ६॥ आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयान इति चैवंजातीयका श्रुतिः समस्तवेदार्थविज्ञानवतः कर्माधिकारं दर्शयति॥ तस्मादपि न विज्ञानस्य स्वातंत्र्येण फलहेतुत्वं॥ नन्वत्राधीत्येत्यध्ययनमात्रं वेदस्य श्रूयते नार्थविज्ञानं॥ नैष दोषः॥ दृष्टार्थत्वाद्वेदाध्ययनमर्थावऽऽबोधपर्यंतमिति स्थितं॥ ६॥ नियमाच्च॥ ७॥ ९

पावत्॥ अभिसमावर्त्तनं कृत्वा कुटुंबे गार्हस्थ्ये स्थितः सन् गृहं शुचौ देशे स्वाध्यायाध्ययनं कुर्वन्नन्यांश्च नित्यादिधर्माननुतिष्ठन् ब्रह्मलोकं प्राप्नोतीति श्रुत्यर्थः॥ यथाऽवघातस्तुषविमोकपर्यंतः एवमध्ययनमर्थावबोधांतं दृष्टे अर्थावबोधाख्ये फले संभवति अध्ययनस्यादृष्टार्थत्वायोगादिति पूर्वतंत्रे स्थितं तत्तस्य ब्रह्मापि वेदार्थ इति तदवबोधवतः कर्मविधानमित्यर्थः॥

॥ ६॥ यावज्जीवं कर्मनियमोप्यत्र लिंगमित्याह॥ नियमाच्चेति॥

इहदेहेकर्माणिकुर्वन्नेवशतंसंवत्सरान्जीवितुमिच्छेदेवंकर्मित्वेनजीवतित्वयिनरेकर्मपापंनलिप्यतेइतःकर्मणोऽन्यथानास्तिकर्मविनाश्रेयोनास्तीत्य
र्थः जरामर्यंजरामरणावधिकमित्यर्थः ॥७॥ कर्तुरधिकस्यासंसारात्मनःकर्मशेषत्वाभावात्तत्त्वज्ञानंकर्मांगंनेतिसिद्धान्तयत्यधिकेति ॥ अस्यमहतइतिवा

कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः ॥ एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरइति ॥ तथाएतद्वैजरामर्यंसत्त्रंयदग्निहोत्रंजर
यावाह्यवास्मान्मुच्यतेमृत्युनावेति ॥ एवंजातीयकान्नियमादपिकर्मशेषत्वमेवविद्याया इति ॥७॥ एवंप्राप्तेप्रतिविधत्ते ॥ अधिकोप
देशात्तुबादरायणस्यैवंतद्दर्शनात् ॥८॥ तुशब्दात्पक्षोविपरिवर्तते ॥ यदुक्तंशेषत्वात्पुरुषार्थवादइतितन्नोपपद्यतेकस्मात् ॥ अधिको
पदेशात् ॥ यदिसंसार्येवात्माशारीरःकर्ताभोक्ताचशरीरमात्रव्यतिरेकेणवेदान्तेषूपदिष्टःस्यात्ततोवर्णितेनप्रकारेणफलश्रुतेरर्थवा
दत्वंस्यात् ॥ अधिकस्तावत्शारीरादात्मनोऽसंसारीईश्वरःकर्तृत्वादिसंसारधर्मरहितोऽपहतपाप्मत्वादिविशेषणःपरमात्मावे
द्यत्वेनोपदिश्यतेवेदान्तेषु ॥ नचतद्विज्ञानंकर्मणांप्रवर्तकंभवतिप्रत्युततत्कर्माण्युच्छिनत्तीतिवक्ष्यतिउपमर्दंचेत्यत्र ॥ तस्मा
त्पुरुषार्थोतःशब्दादितियन्मतंभगवतोबादरायणस्यतत्तथैवतिष्ठतिनशेषत्वप्रभृतिभिर्हेत्वाभासैश्चालयितुंशक्यते ॥ तथा
हितमधिकंशारीरादीश्वरंआत्मानंदर्शयंतिश्रुतयः ॥ यःसर्वज्ञःसर्ववित्भीषास्माद्वातःपवतेमहद्भयंवज्रमुद्यतंएतस्यवा
अक्षरस्यप्रशासनेगार्गितदैक्षतबहुस्यांप्रजायेयेतितत्तेजोसृजतेत्येवमाद्याः ॥ यत्तुप्रियादिसंसूचितस्यसंसारिणएवात्मनो
वेद्यतयानुकर्षणंआत्मनस्तुकामायसर्वंप्रियंभवतिआत्मावाअरेद्रष्टव्यःऽयःप्राणेनप्राणितिसतआत्मासर्वान्तरोयएषो
क्षिणिपुरुषोदृश्यतेइत्युपक्रम्यएतंत्वेवतेभूयोनुव्याख्यास्यामीतिचैवमादितदपिअस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वे
दोयोशनायापिपासेशोकंमोहंजरांमृत्युमत्येतिपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसउत्तमःपुरुषइत्येवमादिभिर्वा
क्यशेषैःसत्यामेवाधिकोपदिदिक्षायांमत्यंनभेदाभिप्रायमित्यविरोधः ॥ ९. क्यशेषात्प्रियसंसूचितआत्मापरस्त्वद्रष्टव्यःपरःप्राणा
दिप्रेरयतिसोप्यशनायाद्यत्ययवाक्यशेषात्परएवतथाऽक्षिपुरुषोप्यवस्थासाक्षिपरंज्योतिरितिवाक्यशेषात्परइतिविभागः ॥

शा·भा·
टी·
र·प्र·
३६८

जीवानुकर्षणमभेदाभिप्रायमित्यंगीकारे न विरोध इति कथं अभेदे जीवत्वविरोधादित्यत आह पारमेश्वरमिति ज्ञानं कर्मांगमफलत्वे सति कर्मशेषा
श्रयत्वादित्युक्तो हेतुरसिद्ध इति भावः ॥८॥ ब्रह्मविदां कर्मवत्संन्यासस्यापि दर्शनात्तेषां कर्मदर्शनात्मकं लिंगं लोकसंग्रहार्थत्वेनाऽन्यथासिद्धमित्याह

अ·पा·
३।४

पारमेश्वरमेव हि शारीरस्य पारमार्थिकं स्वरूपं उपाधिकृतं तु शारीरत्वं तत्त्वमसि नान्यदतोस्ति द्रष्ट्रित्यादिश्रुतिभ्यः ॥ सर्वं चैतन
द्विस्तरेणास्माभिः पुरस्तात् तत्र तत्र वर्णितं ॥८॥ तुल्यं तु दर्शनं ॥९॥ यत्तूक्तं आचारदर्शनात्कर्मशेषो विद्येति अत्र ब्रूमः ॥ तुल्य
माचारदर्शनमकर्मशेषत्वेपि विद्यायाः ॥ तथा हि श्रुतिर्भवति ॥ एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयम
ध्येष्यामहे किमर्था वयं यक्ष्यामहे एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहुवां चक्रिरे एवं चैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैष
णायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्येवंजातीयका ॥ याज्ञवल्क्यादीनामपि ब्रह्मविदामकर्म
निष्ठत्वं दृश्यते एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेत्यादिश्रुतिभ्यः ॥ अपि च यक्ष्यमाणो वै भगवंतोऽह
मस्मीत्येतल्लिंगदर्शनं वैश्वानरविद्याविषयं ॥ संभवति च सोपाधिकायां ब्रह्मविद्यायां कर्मसाहित्यदर्शनं ॥ न तु तत्रापि कर्मां
गत्वमस्ति प्रकरणाद्यभावात् ॥९॥ यत्पुनरुक्तं तच्छ्रुतेरित्यत्र ब्रूमः ॥ असार्वत्रिकी ॥१०॥ यदेव विद्यया करोतीत्येषा श्रुतिर्न
सर्वविद्याविषया प्रकृतविद्याभिसंबंधात् ॥ प्रकृता चोद्गीथविद्या ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्र ॥१०॥ विभागः श
तवत् ॥११॥ यदप्युक्तं तं विद्याकर्मणी समन्वारभेते इत्येतत्समन्वारंभवचनमस्वातंत्र्ये विद्याया लिंगमिति तत्प्रत्युच्यते ॥ वि
भागोत्र द्रष्टव्यो विद्यान्यं पुरुषमन्वारभते कर्मान्यमिति शतवत् ॥ यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पंचाशदेक
स्मै पंचाशदपरस्मै तद्वत् ॥ न चेदं समन्वारंभवचनं मुमुक्षुविषयं इति नु कामयमान इति संसारिविषयत्वोपसंहारात् ॥ ६ ॥

॥ तुल्यं त्विति ॥ किं च यस्य कर्म स न ब्रह्मविदित्याद्यपि चेति तर्हि वैश्वानरविद्यायाः कर्मांगत्वं स्यादित्यत आह ॥ न त्विति ॥ ब्रह्मविदां लोकसंग्रहार्थं क्रियमा
णमपि कर्म न भवति अभिमानाभावेनानधिकारित्वादिति भावः ॥९॥ समन्वारंभवचनस्य मुमुक्षुविषयत्वमंगीकृत्य विद्या अन्यं मुमुक्षुं मुक्तत्वेनान्वार
भत इति विभाग उक्तः सूत्रकृता वस्तुतस्तु तन्नास्तीत्याह ॥ न चेदं
समन्वारंभवचनमिति ॥ ७ ॥

राम·
३६८

तत्र संसारिविषये तं विद्येत्यादिवाक्ये यथाप्राप्तानुवादिनि विद्यादिपदार्थमाह तत्रेति॥ विहितोद्गीथादिविद्या प्रतिषिद्धा नग्नस्त्रीध्यानादिरूपा॥११
यच्चैतदिति॥ उक्तमिति शेषः॥ अविद्वत्त्वाद्वेदार्थज्ञानशून्यत्वादित्यर्थः॥ मात्रपदमात्मज्ञानस्य व्यावर्तकं न कर्मज्ञानस्येत्याह॥ नैष दोष इति॥१२॥ नि
यमेषाकामज्ञविषयमित्युक्तं विदुषो ज्ञानस्तुत्यर्थं वेत्याह॥ स्तुतय इति॥ एवं कर्म कुर्वन्नपि त्वयि नरे नेतो विद्यालब्धाद्ब्रह्मभावादन्यथास्ति कर्मणा संस

अथाकामयमान इति च मुमुक्षोः पृथगुपक्रमात्॥ तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च परिगृह्यते विशेषाभावात्क
र्मापि विहितं प्रतिषिद्धं च यथाप्राप्तानुवादित्वात्॥ एवं सत्यविभागेनापीदं समन्वारंभवचनमवकल्पते॥११॥ यच्चैतत्तद्वतो विधा
नादित्यत उत्तरं पठति॥ अध्ययनमात्रवतः॥१२॥ आचार्यकुलाद्वेदमधीत्येत्यत्राऽध्ययनमात्रस्य श्रवणात्॥ अध्ययनमात्रव
त एव कर्मविधिरित्यध्यवस्यामः॥ ननु एवं सत्यविद्यत्वादनधिकारः कर्मसु प्रसज्येत नैष दोषः॥ न वयमध्ययनप्रभवं कर्मावबो
धनमधिकारकारणं वारयामः॥ किं तर्ह्यौपनिषदमात्मज्ञानं स्वातंत्र्येणैव प्रयोजनवत्प्रतीयमानं न कर्माधिकारकारणतां प्रति
पद्यत इत्येतावत्प्रतिपादयामः॥ यथा च न क्रत्वंतरज्ञानं क्रत्वंतराधिकारेणापेक्ष्यत एवमेतदपि द्रष्टव्यमिति॥१२॥ यदप्युक्तं नि
यमाच्चेति अत्राभिधीयते॥ नाविशेषात्॥१३॥ कुर्वन्नेवेह कर्माणि जिजीविषेदित्येवमादिषु नियमश्रवणेषु न विदुष इति विशेषो
ऽस्ति अविशेषेण नियमविधानात्॥१३॥ स्तुतयेऽनुमतिर्वा॥१४॥ कुर्वन्नेवेह कर्माणीत्यत्रापरो विशेष आख्यायते॥ यद्यप्यत्र
प्रकरणसामर्थ्याद्विद्वानेव कुर्वन्निति संबध्येत तथापि विद्यास्तुतये कर्मानुज्ञानमेतत् द्रष्टव्यं॥ न कर्म लिप्यते नर इति हि वक्ष्य
ति॥ एतदुक्तं भवति॥ यावज्जीवं कर्म कुर्वत्यपि विदुषि पुरुषे न कर्म लेपाय भवति विद्यासामर्थ्यादिति॥ तदेवं विद्या स्तूयते॥१४॥
कामकारेण चैके॥१५॥ अपि चैके विद्वांसः प्रत्यक्षीकृतविद्याफलाः संतस्तदवष्टंभात्फलांतरसाधनेषु प्रजादिषु प्रयोजनाभावं प
रामृशंति कामकारेणेति॥ श्रुतिर्भवति वाजसनेयिनामेतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां नोऽयमा त्माऽयं लोक इति॥

रेनास्तीति यावत् यतः कर्म न लिप्यते॥ अपूर्वरूपलेपाय न भवतीत्यर्थः॥ श्रुतेरिति भावः॥१४॥ स्वेच्छातः कर्मसाधनप्रजादित्यागलिंगाच्च विद्यास्व
तंत्रफलेत्याह॥ कामेति॥ तदेतद्ब्रह्म येषां नोऽस्माकं अयमपरोक्ष आत्मा अयमेव लोकः पुरुषार्थस्ते वयं किं प्रजादिना करिष्याम इत्यालोच्य कर्म त्यक्तं व त इत्यर्थः॥

शा·भा·
टी·
र·प्र·
३८९

नन्वयंलोकइतिज्ञानफलस्यप्रत्यक्षत्वोक्तिरयुक्ताकर्मफलवद्दृष्टत्वादित्यतआह॥अनुभवेति॥१५॥नकेवलमनुपयोगाज्ज्ञानस्यकर्मांगत्वं
किंतुकर्मनाशकत्वाच्चेत्याह उपमर्दंचेति॥१६॥ किंचकर्मतत्त्वज्ञानेनांगांगीभूतेभिन्नाधिकारिस्थत्वाद्राजसूयवृहस्पतिसववदित्याह॥ऊ
र्ध्वेतित्रयोधर्मस्कंधाःकर्मप्रधानाआश्रमाश्चतुर्थोब्रह्मसंस्थइत्यर्थः ब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यएषवाअनृणइति

अ·पा
३·४

अनुभवारूढमेवचविद्याफलंनक्रियाफलवत्कालांतरभावीत्यसकृदवोचाम॥ अतोपिनविद्यायाःकर्मशेषत्वंनापि
तद्विषयायाःफलश्रुतेरयथार्थत्वंशक्यमाश्रयितुं॥१५॥ उपमर्दंच॥१६॥ अपिचकर्माधिकारहेतोःक्रियाकारकफलल
क्षणस्यसमस्तस्यप्रपंचस्याविद्याकृतस्यविद्यासामर्थ्यात्स्वरूपोपमर्दमामनंति॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्ये
त्तत्केनकंजिघ्रेदित्यादिनावेदांतोदितात्मज्ञानपूर्विकांतुकर्माधिकारसिद्धिं प्रत्याशासानस्यकर्माधिकारोच्छित्तिरेवप्रसज्येत
॥तस्मादपिस्वातंत्र्यंविद्यायाः॥१६॥ ऊर्ध्वरेतस्सुचशब्देहि॥१७॥ ऊर्ध्वरेतःसुचाश्रमेषुविद्याश्रूयते॥नचतत्रकर्मांगत्वं
विद्यायाउपपद्यते॥कर्माभावान्नह्यग्निहोत्रादीनिवैदिकानिकर्माणितेषांसंति॥स्यादेतत्ऊर्ध्वरेतसआश्रमानश्रूयंते
वेदइति॥तदपिनास्तितेपिहिवैदिकेषुशब्देष्ववगम्यंते॥त्रयोधर्मस्कंधायेचेमेरण्येश्रद्धातपइत्युपासतेतपःश्रद्धेयेह्यु
पवसंत्यरण्येएतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतिब्रह्मचर्यादेवप्रव्रजेदित्येवमादिषु॥प्रतिपन्नाःप्रतिपन्नगार्ह
स्थ्यानामपाकृतानपाकृतर्णानांचोर्ध्वरेतस्त्वंश्रुतिस्मृतिप्रसिद्धं॥तस्मादपिस्वातंत्र्यंविद्यायाः॥१७॥परामर्शंजैमिनिर
चोदनाचापवदतिहि॥१८॥

श्रुतेःऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत्॥अनपाकृत्यमोक्षंतुसेवमानोव्रजत्यधइतिस्मृतेः
श्रमाप्तगार्हस्थ्यस्यैवनिरस्तर्णत्वस्यपारिव्राज्यमित्यपिशंकानकार्याब्रह्मचर्यादेवप्रव्रजेदितियमाश्रममिच्छेत्तमावसेदितिचविधिश्रुतिस्मृति
विरोधेनअर्थवादश्रुतिस्मृत्योरविरक्तविषयत्वावगमादित्याह प्रतिपन्नेति॥तस्मादितिसंन्यासनिष्ठत्वादित्यर्थः॥१७॥संन्यासोनास्तीत्याक्षिपति

परामर्शंजैमिनिरिति॥

ऊर्ध्वरेतः शब्दितं पारिव्राज्यमनुष्ठेयं न वेति मानभ्रांतिमूलत्वाभ्यां संदेहे भ्रांतिमूलत्वान्नानुष्ठेयमित्याह त्रय इति आश्रमाणामवांतरभेदापेक्षया बहुवचनं तथा च काण्वायनस्मृतिरर्थतोनुक्रम्यते॥ गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति ब्रह्मचारी चतुर्विधः॥ तत्रोपनयनादूर्ध्वं यस्त्रिरात्रमक्षारलवणाशी गायत्रीमधीते स गायत्रः॥ यस्तु वेदस्य ग्रहणांतं ब्रह्मचर्यं चरति स ब्राह्मः॥ ऋतुकाले स्वदारगामी नित्यं परस्त्रीविमुखः प्राजापत्यः संवत्सरं वेदव्रतकृद्वा प्राजापत्यः॥ आमरणं गुरुकुलवासी नैष्ठिको बृहन्नित्युच्यते॥ गृहस्थोपि चतुर्विधः वार्त्तको यायावरः शालीनो घोरसंन्यासिकश्चेति॥ तत्र कृषिगोरक्षादिकया वैश्यादिवृत्त्याजीवन्निज्यादिक्रियापरो वार्त्तकवृत्तिः॥ यायावरस्त्वयाचितवृत्तिर्याजनाध्यापनप्रतिग्रहविमुखः॥ शालीनस्तु षट्कर्मनिरतो याजनादिवृत्तिः संचयी। उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वन्प्रत्यहं कृतोंछवृत्तिर्ग्रामवासी घोरसंन्यासिक इत्युच्यते हिंसाविमुखत्वात्॥ वानप्रस्थोपि चतुर्विधः वैखानस औदुंबरो वाल

त्रयो धर्मस्कंधा इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावायोदाहृता न चैते न तत्प्रतिपादनाय प्रभवंति॥ यतः परामर्शमेषु शब्देष्वाश्रमांतराणां जैमिनिराचार्यो मन्यते न विधिं॥ कुतो न ह्यत्र लिङादीनामन्यतमश्चोदनाशब्दोस्ति॥ अर्थांतरपरत्वं चैषु प्रत्येकमुपलभ्यते त्रयो धर्मस्कंधा इत्यत्र तावत् यज्ञोध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यंतमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवंतीति परामर्शपूर्वकमाश्रमाणामनात्यंतिकफलत्वं संकीर्त्यात्यंतिकफलतया ब्रह्मसंस्थतां स्तुवते ब्रह्मसंस्थोऽमृतत्वमेतीति॥

((खिल्यः फेनपश्चेति॥ तत्राकृष्टपच्यौषधीभिर्ग्रामबहिष्कृताभिरग्निहोत्रादि कुर्वन्वैखानस उच्यते॥ यस्तु प्रातरुत्थाय यां दिशं पश्यति तत्रत्यौदुंबरबदरीनीवारश्यामाकैः कर्मपरः स औदुंबरः॥ यस्तु जटावल्कलधारी अष्टौ मासान्वृत्त्युपार्जनं कृत्वा चातुर्मास्ये संगृहीताशी कार्त्तिक्यां संगृहीतपुष्पफलत्यागी स वालखिल्यः॥ फेनपास्तु शीर्णपर्णफलवृत्तयो यत्र क्वचिद्वसंतः कर्मपरा इति॥ तथा परिव्राजकाश्चतुर्विधाः॥ कुटीचका बहूदका हंसाः परमहंसाश्चेति॥ तत्र स्वपुत्रगृहे भिक्षां चरंतस्त्रिदंडिनः कुटीचकाः बहूदकास्तु त्रिदंडिनः शिक्यजलपवित्रपादुकासनशिखायज्ञोपवीतकौपीनकाषायवेषधरास्तीर्थान्यटंतो भैक्ष्यं चरंत आत्मानं प्रार्थयंते॥ हंसास्तु एकदंडिनः शिखावर्जं यज्ञोपवीतधराः शिक्यकमंडलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचांद्रायणपराः॥ परमहंसास्त्वेकदंडधरा मुंडा अयज्ञोपवीतिनः त्यक्तसर्वकर्माण आत्मनिष्ठा इति॥ अत्र पूर्वपक्षे संन्यासाभावाज्ज्ञानस्य स्वतंत्रफलत्वासिद्धिः सिद्धांते तद्भावात्तत्सिद्धिरिति फलभेदः। स्कंधा आश्रमा आत्मानं शरीरं आचार्यस्य कुले गृहे कर्शयन्नैष्ठिक इत्यर्थः॥

स्कंधश्रुत्या वाश्रमा न विधीयंते किंतु ब्रह्मसंस्थतास्तुत्यर्थमनूद्यंत इत्युक्ते शंकते ॥ ननु परामर्शेपीति ॥ अनुवादापेक्षितपुरोवादाश्रुतीतिमंगीकरो
तिसत्यमितिप्रत्यक्षास्कंधश्रुतिरेव पुरोवादोस्तु नानुवाद इत्यत आह स्मृतीति तयोरपि द्वयमेव श्रुतिर्मूलमस्तु प्रत्यक्षश्रुतौ विधिमात्रकल्पनाला
घवात् अस्या अनुवादत्वे तु मूलत्वेन साग्निकानग्निकाश्रमश्रुतिस्तत्र विधिश्चेति द्वयकल्पनागौरवादित्यत आह ॥ अतश्चेति स्यान्नत्वादाश्रमाः
प्रत्यक्षया वज्जीवकर्मविधिश्रुत्या विरुद्धा ग्राह्याः ॥ विरुद्धास्त्वनग्निकाश्रमा उपेक्ष्याः कर्मानधिकृतैरंधादिभिर्वा अनुष्ठेया इत्यर्थः ॥ याव।

ननु परामर्शेप्याश्रमा गम्यंत एव ॥ सत्यं गम्यंते ॥ स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिर्न प्रत्यक्षश्रुतेः अतश्च प्रत्यक्षश्रुतिविरोधे सत्यना
दरणीयास्ते भविष्यंत्यनधिकृतविषया वा ॥ ननु गार्हस्थ्यमपि सहैवोर्ध्वरेतोभिः परामृष्टं यज्ञोध्ययनं दानमिति प्रथम इति ॥
सत्यमेवं तथापि तु गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानाच्छ्रुतिप्रसिद्धमेव हि तदस्तित्वं ॥ तस्मात्स्तुत्यर्थ एवायं परामर्शो
न चोदनार्थः अपि चापवदति हि प्रत्यक्षा श्रुतिराश्रमांतरं वीरहा वा एष देवानां योग्निमुद्वासयते ॥ आचार्याय प्रियं ध
नमाहृत्य प्रजातंतुं माव्यवच्छेत्सीः नापुत्रस्य लोकोस्तीति तत्सर्वे पशवो विदुरित्येवमाद्या ॥ तथा ये चेमेरण्ये श्रद्धां तप इत्युपास
ते तपः श्रद्धे ये ह्युपवसंत्यरण्य इति देवयानोपदेशो नाश्रमांतरोपदेशः ॥ संदिग्धं चाश्रमांतराभिधानं तप एव द्वितीय इत्येव
मादिषु ॥ तथैतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति लोकसंस्तवोयं न पारिव्राज्यविधिः ॥ ननु ब्रह्मचर्यादेव प्रव्रजेदि
ति विस्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जाबालानां ॥ सत्यमेतदनपेक्ष्य त्वेतां श्रुतिमयं विचार इति द्रष्टव्यम् ॥ १८ ॥ ६ ॥

ज्जीवश्रुतिविरोधाल्लाघवं त्याज्यमिति भावः ॥ स्कंधश्रुतावनुवादत्वाविशेषाद्गार्हस्थ्यवदितरेषामनुष्ठेयत्वमाशंक्य तस्य श्रौतत्वादनुष्ठानं नेतरे
षामश्रौतत्वादतो ब्रह्मसंस्थतास्तुतिपरमिदं स्कंधवाक्यमित्याह ॥ नन्वित्यादिना तत्तु संनतिं तथा ये चेति ॥ तेर्चिषमभिसंभवंतीति वाक्यशेषादित्यर्थः
॥ स्कंधशब्दस्य आश्रमेषु रूढत्वाच्चात्र नाश्रमविधिरित्याह ॥ संदिग्धं चेति न हि प्रव्रजंतीत्याश्रमविधिरित्यत आह तथैतमिति ॥ आत्मलोको म
हीयान् यदर्थमशक्यां प्रव्रज्यामपि कुर्वंतीति स्तुतिर्वर्तमानापदेशादित्यर्थः ॥ संप्रतिपूर्वपक्षमाक्षिप्येयं श्रुतिर्नास्तीति कृत्वा चिंत्यत इत्याह नन्वित्यादि

उपासनमार्त्विज्यं ऋत्विक्कर्तृकमित्यत्र श्रौतं लिंगमाह ॥ तथा चेति ॥ तमुद्गीथाख्यं प्रणवं प्राणदृष्ट्या ध्यातवान्ध्यात्वा च नैमिशीयानां सत्रिणामुद्गातासीदित्यर्थः ॥ यजमानेन स्वगामिफलकसांगप्रयोगकरणायर्त्विजां क्रीतत्वात्कर्त्तृत्वेपि न तत्फलभाक्त्वं उत्सर्गस्य बाधकाभावादित्युक्तत्वात्क्रयणद्वारा कर्त्तृत्वभोक्तृत्वसामानाधिकरण्यं चोपपद्यते ॥ भृत्यकर्त्तृके युद्धे राजा युध्यते जयति चेतिवदिति भावः ॥ ४५ ॥ ४६ ॥ सहकार्यंतरविधिः ॥ यस्मात्पूर्वे ब्राह्मणा आत्मानं विदित्वा संन्यस्य भिक्षाचर्यं चरंति तस्मादद्यतनोपि ब्राह्मण आपातज्ञानरूपपंडावान्पंडितः तस्य कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन श्रवणजज्ञानस्य बलभावेन मननेनासंभावनानिरासेन बालस्य भावेन वा शुद्धचित्तत्वेन ९

तस्माद्गोदोहनादिनियमवदेवर्त्विग्भिर्निर्वर्त्यं संस्तथा च तं ह बको दाल्भ्यो विदांचकार स ह नैमिशीयानामुद्गाता बभूवेत्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति ॥ यत्तूक्तं कर्त्राश्रयं फलं श्रूयत इति ॥ नैष दोषः ॥ परार्थत्वादृत्विजोन्यत्र वचनात्फलसंबंधानुपपत्तेः ॥ ४५ ॥ श्रुतेश्च ॥ ४६ ॥ यां वै कांचन यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव ता आशासत इति होवाचेति तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानीति चर्त्विक्कर्तृकस्य विज्ञानस्य यजमानगामिफलं दर्शयति ॥ तस्मादंगोपासनानामृत्विक्कर्मत्वसिद्धिः ॥ २३ ॥ ४६ ॥ सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥ तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यके श्रूयते ॥ तत्र संशयो मौनं विधीयते न वेति ॥ न विधीयत इति तावत्प्राप्तं ॥ बाल्येन तिष्ठासेदित्यत्रैव विधेरवसितत्वात् ॥ ९

स्थातुमिच्छेदेवं मननश्रवणे कृत्वाथानंतरं स मुनिर्निदिध्यासनकृत्स्यादेवममौनं च मौनादन्यद्बाल्यपांडित्यद्वयं मौनं च निदिध्यासनं लब्ध्वाश्रयज्ञानसामग्रीपौष्कल्यानंतरं ब्रह्माहमिति साक्षात्कारवान्ब्राह्मणो भवतीत्यर्थः ॥ मौनशब्दस्य सिद्धरूपे परिव्राज्ये अनुष्ठेये च ध्याने प्रयोगात्संशयः ॥ यथा तं ह बक इत्यादिवाक्यशेषादुद्गीथाद्युपासनस्यार्त्विज्यत्वनिर्णयस्तद्वदयं ब्राह्मण इति विधिहीनवाक्यशेषान्मौनस्याप्यविधेयत्वनिश्चय इति पूर्वपक्षमाह ॥ न विधीयत इति ॥ अत्र ध्यानस्याननुष्ठानं सिद्धांते त्वनुष्ठानमिति फलं ॥ ॥

शा·भा·
टी·
बृ·भ·
३८१

अ·पा
३·५

च मौनं च॥

यदि मौनं पाण्डित्यादन्यं तदा वाक्यांतरप्राप्तमनूद्यते बाल्यविधिप्रशंसार्थं यदि ज्ञानं तदा पांडित्यशब्दात्प्राप्तमिति पूर्वपक्षग्रंथार्थः॥ मुनिशब्दाद्धि ज्ञानातिशयः प्रतीयते॥ तस्य ज्ञानमात्रवाचिपांडित्यशब्दात्प्राप्तिर्नापि मुनिशब्दः परिव्राड्वाचकः वाल्मीक्यादिषु प्रयुज्यमानत्वात्तस्मादप्राप्तं मौनमपूर्वत्वाद्विधिं कल्पयतीति सिद्धांतयत्येवमित्यादिना आपस्तंबवचनयोगस्य गतिमाह॥ इतरत्समाश्रमेति किं चामौनं च निर्विद्येति श्रवणमननवदनुष्ठेयत्वोक्तेर्मौन

न ह्ययं मुनिरित्यत्र विधायिका विभक्तिरुपलभ्यते तस्मादयमनुवादो युक्तः॥ कुतः प्राप्तिरिति चेत्॥ मुनिपंडितशब्दयोर्ज्ञानार्थत्वात्पांडित्यं निर्विद्येत्येवं प्राप्तमौनं॥ अपि चामौनं मौनं च निर्विद्याथ ब्राह्मण इत्यत्र तावन्न ब्राह्मण्यं विधीयते॥ प्रागेव प्राप्तत्वात्तस्मादथ ब्राह्मण इति प्रशंसावादस्तथैवाथ मुनिरित्यपि भवितुमर्हति॥ समाननिर्देशत्वादिति॥ एवं प्राप्ते सूत्रः॥ सहकार्यंतरविधिरिति॥ विद्यासहकारिणो मौनस्य बाल्यपांडित्यवद्विधिरेवाश्रयितव्योऽपूर्वत्वान्न तु पांडित्यशब्देनैव मौनस्यावगतत्वमुक्तं॥ नैष दोषो मुनिशब्दस्य ज्ञानातिशयार्थत्वान्मननान्मुनिरिति च व्युत्पत्तिसंभवान्मुनीनामप्यहं व्यास इति च प्रयोगदर्शनात्॥ ननु मुनिशब्द उत्तमाश्रमवचनोपि श्रूयते गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमित्यत्र न वाल्मीकिर्मुनिपुंगव इत्यादिषु व्यभिचारदर्शनात्॥ इतराश्रमसन्निधानात्तु पारिशेष्यात्तत्रोत्तमाश्रमोपादानं ज्ञानप्रधानत्वादुत्तमाश्रमस्य॥ तस्माद्बाल्यपांडित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते॥ यत्तु बाल्य एव विधेः पर्यवसानमिति॥ तथाप्यपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते मुनिः स्यादिति॥ निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपांडित्यवत् विधेयताश्रयणं तद्वतो विद्यावतः संन्यासिनः॥ कथं विद्यावतः संन्यासिन इत्यवगम्यते तदधिकारादात्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरंतीति॥ ननु सति विद्यावत्त्वे प्राप्नोत्येव तत्रातिशयः किं मौनविधिनेत्यत आह पक्षेणेति॥ एतदुक्तं भ

स्य विधेयतेत्याह॥ निर्वेदनीयत्वेति न च त्रयाणां विधाने वाक्यभेदो दोषः॥ उपरिधारणवदिष्टत्वात्तद्वाक्यभेदस्येति भावः॥ कस्येदं ध्यानं विधीयत इत्याह तद्वत इति॥ आत्मानं विदित्वेति परोक्षज्ञानवतः संन्यासिनः प्रकृतत्वादित्यर्थः॥ सूक्ष्मार्थसाक्षात्कारसाधनत्वेन ध्यानादेः षड्जादौ लोकतः प्राप्तिं प्र

वति॥

किंत्वानियमविधिमाह तन्विमित्यादिना॥

ननु ब्रह्मविद्यापरे वाक्ये कथं ज्ञानांगमिति चेन्न फलक्रतुपरवाक्येंगविधिवदित्याह ॥ विध्यादिवदिति प्रधानमारभ्यांगपर्यंतो विधिः तत्र प्रधानः क्रतुर्विध्यादिरत एवांगं विध्यं न तु समुच्चय इत्यर्थः ॥ एतत्सूत्रभाष्यभावानभिज्ञाः संन्यासाश्रमधर्मश्रवणादौ विधिर्नास्तीति वदंति विधौ ह्यप्राप्तिमात्रमपेक्षितं तत्त्वभेददर्शनप्राबल्याद्दर्शितमिति ॥ ४७ ॥ संप्रदायविदः समावर्त्तनानंतरं कुटुंबे स्थितो ब्रह्मलोकं प्राप्नोतीति न च पुनरावर्त्तते इत्युपसंहारात्संन्यासो नास्ती

यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोतीति तस्मिन्नेष विधिरिति ॥ विध्यादिवद्यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवंजातीयके विध्यादौ सहकारित्वेनाग्न्यन्वाधानादिकर्मांगजातं विधीयते ॥ एवमविधिप्रधानेप्यस्मिन्विद्यावाक्ये मौनविधिरित्यर्थः ॥ ४७ ॥ एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिमति विद्यमाने कस्माच्छांदोग्ये गृहिणोपसंहारोऽभिसमावृत्य कुटुंब इत्यत्र तेन ह्युपसंहरंस्तद्विषयमादरं दर्शयतीत्यत उत्तरं पठति ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४८ ॥ तुशब्दो विशेषणार्थः ॥ कृत्स्नभावोस्य विशेष्यते बहुलायासानि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्त्तव्यतयोपदिष्टान्याश्रमांतरकर्माणि च यथासंभवमहिंसेंद्रियसंयमादीनि तस्य विद्यंते तस्माद्गृहमेधिनोपसंहारो न विरुध्यते ॥ ४८ ॥ मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥ यथा मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमंतावेवमितरावपि वानप्रस्थगुरुकुलवासौ ॥ दर्शिता हि पुरस्तात् श्रुतिस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीय इत्याद्या ॥ तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात्तुल्यवद्विकल्पसमुच्चयाभ्यां प्रतिपत्तिरितरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षया अनुष्ठातृभेदापेक्षया वेति द्रष्टव्यम् ॥ १४ ॥ ४९ ॥ अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥ तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदिति बाल्यमनुष्ठेयतया श्रूयते ॥ ५०

तिशंकार्थः ॥ आयासविशिष्टकर्मबाहुल्याद्गृहिणोपसंहारः कृतो न संन्यासाभावादिति समाधानार्थः ॥ ४८ ॥ संन्यासगार्हस्थ्यद्वयमत्र सूत्रकृतोक्तं न ततोन्यदाश्रमद्वयं नास्तीति कस्यचिद्भ्रमः स्यात्तं निरस्यति ॥ मौनवदिति ॥ आश्रमद्वयवदित्यर्थः ॥ इतरयोरपीति वाच्ये बहूक्तिरवांतरभेदमपेक्ष्य स चास्माभिः प्राग्दर्शितः ॥ ४९ ॥ अनाविष्कुर्वन्नन्वयात् ॥

तत्र बाल्ये विषये तद्धितस्य भावार्थत्वासंभवात् कर्मार्थत्वं गृहीत्वा निष्ठन्मूत्रत्वादिकर्मणोः प्ररूढेंद्रियत्वादिरूपभाववृद्धेश्च बालकर्मत्वाविशेषात्संशयमाह तत्रेति ॥ पूर्वपक्षे विद्यांगत्वेन निष्ठन्मूत्रत्वादेरप्यनुष्ठानं सिद्धांते भावशुद्धेरेवेति फलं ॥ पूर्वत्र मौनशब्दस्य ज्ञानातिशये ध्याने प्रसिद्धत्वात् ध्यानं विधेयमित्युक्तं ॥ तद्वद्बाल्यशब्दस्य कामचारादौ प्रसिद्धेस्तद्विधिग्रहणमित्याह किंतावदिति ॥ कामतश्चरणवदनभक्षणानि यस्य स कामचारवादभक्षणस्त।

तत्र बालस्य भावः कर्म वा बाल्यमिति तद्धिते सति बालभावस्य वयोविशेषस्येच्छया संपादयितुमशक्यत्वाद्यथोपपादमूत्रपुरीषत्वादि बालचरितं मनोगतो वा भावविशुद्धिरप्ररूढेंद्रियत्वं दंभदर्पादिरहितत्वं वा बाल्यं स्यादिति संशयः ॥ किं तावत्प्राप्तं ॥ कामचारवादभक्षणता यथोपपादमूत्रपुरीषत्वं च प्रसिद्धतरं लोके बाल्यमिति तद्ग्रहणं युक्तं ॥ ननु पतितत्वादिदोषप्राप्तेर्न युक्तं कामचारताद्याश्रयणं न विद्यावतः संन्यासिनो वचनसामर्थ्याद्दोषनिवृत्तेः पशुहिंसादिष्विवेत्येवं प्राप्तेऽभिधीयते ॥ न वचनस्य गत्यंतरसंभवात् अविरुद्धे ह्यन्यस्मिन् बाल्यशब्दाभिलप्ये लभ्यमाने न विध्यंतरव्याघातकल्पना युक्ता ॥ प्रधानोपकाराय चांगं विधीयते ॥ ज्ञानाभ्यासश्च प्रधानमिह यतीनामनुष्ठेयं ॥ न च सकलाया बालचर्याया अंगीक्रियमाणायां ज्ञानाभ्यासः संभाव्यते ॥ तस्मादांतरो भावविशेषो बालस्याप्ररूढेंद्रियत्वादिरिह बाल्यमाश्रीयते ॥ तदाहाऽनाविःकुर्वन्निति ॥ ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमविख्यापयन् दंभदर्पादिरहितो भवेत् ॥ यथा बालोऽप्ररूढेंद्रियतया न परेषामात्मानमाविःकर्तुमीहते तद्वदेवं ह्यस्य वाक्यस्य प्रधानोपकार्यर्थानुगम उपपद्यते ॥ तथा चोक्तं स्मृतिकारैः ॥ यं न संतं न चासंतं नाश्रुतं न बहुश्रुतं ॥ न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ॥ गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् ॥ अंधवज्जडवच्चापि मूकवच्च महीं चरेत् ॥ अव्यक्तलिंगोऽव्यक्ताचार इति चैवमादि ॥ १५ ॥ ५० ॥

स्वभावस्तत्तेनेत्यर्थः ॥ यथोपपादं यथासंभवं मूत्रादि यस्य तद्भावस्तत्त्वं बाल्यविधिबलात्पातित्यशास्त्रमन्यविषयमिति भावः ॥ यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः न स तत्पदमाप्नोति संसारं चाधिगच्छतीत्यादिशौचभिक्षादिनियमविधिशास्त्राविरुद्धस्वभावशुद्ध्याख्यबाल्यस्य विधिसंभवान्न यथेष्टचेष्टाविधिरिति सिद्धांतयति ॥ एवमिति प्रधानविरोधित्वाच्च न तद्विधिरित्याह ॥ प्रधानेनेति ॥ भावशुद्धेर्विद्योपकारकत्वेनान्वयादनाविष्कुर्वन्भवेदिति बाल्यविध्यर्थ इति सूत्रयोजना ॥

नन्वनाश्रमिणां कर्म भवतु विद्याहेतुस्तथापि तेषां न श्रवणादावधिकारः संन्यासाभावादित्यत आह दृष्टार्था चेति ॥ बंधकाज्ञानध्वस्तिफलकविद्याकामस्य श्रवणेऽधिकारः संन्यासोऽपि कदाचित्कृतो ज्ञान उपकरोति श्रवणं प्रत्यनंगत्वादिति भावः ॥ ३८ ॥ तर्ह्याश्रमित्वं व्यर्थमित्यत आह ॥ अतस्त्विति पुण्यकृत्तैजसः शुद्धसत्त्वस्तेन ज्ञानमार्गेणेति ब्रह्म प्राप्नोतीत्यर्थः ॥ अत्र पुण्यकृत्त्वलिंगादाश्रमित्वं ज्यायः पुण्योपचये शीघ्रविद्यालाभादनाश्रमस्य निंदितत्वाच्चेति भावः ॥ ३९ ॥ तद्भूतस्य तु ॥ उत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य प्रच्युतस्य कर्मापि विद्याहेतुरनाश्रमिकर्मवदिति संगतिः पूर्वपक्षफलं चैतत् सिद्धांते तु भ्रष्टस्य कर्म न हेतुरिति फलं रागादिप्राप्तत्वात्प्रच्युतिनिषेधाच्च प्रच्युतिः प्रामाणिकी न वेति संशयः सिद्धांतसूत्रे नियमं व्याचष्टे तथाहीति ॥ अत्यंतमिति नैष्ठिकत्वनियमः ॥ अरण्यमित्येकांतोपलक्षितं पारिव्राज्यं गृह्यते तेनदियाद्गच्छेदिति पदं शास्त्रमार्गस्तत्रस्थात्पारिव्राज्यान्न पुनरेयात् न प्रच्यवेदित्युपनिषद्रहस्यमित्यर्थः ॥ अतद्रूपप्रच्युतौ प्रमाणाभावं व्याचष्टे ॥ यथा चेति ॥ शिष्टाचाराभावमाह नचैव

दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोति श्रवणादिषु ॥ तस्माद्विधुरादीनामप्यधिकारो न विरुध्यते ॥ ३८ ॥ अतस्त्वितरज्ज्यायो लिंगाच्च ॥ ३९ ॥ अतस्त्वंतरालवर्तित्वादितरदाश्रमवर्तित्वं ज्यायो विद्यासाधनं श्रुतिलिंगात्स्मृतिलिंगाच्च ॥ तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेति ॥ अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ॥ संवत्सरमनाश्रमी स्थित्वा कृच्छ्रमेकं चरेदिति च स्मृतिलिंगात् ॥ ९।३९ ॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥ संत्यूर्ध्वरेतस आश्रमा इति स्थापितं तांस्तु प्राप्तस्य कथंचित्ततः प्रच्युतिरस्ति नास्ति वेति संशयः ॥ पूर्वकर्मस्वनुष्ठानचिकीर्षया रागादिवशेन वा प्रच्युतोऽपि स्यात् विशेषाभावादित्येवं प्राप्त उच्यते ॥ तद्भूतस्य तु प्रतिपन्नोर्ध्वरेतोभावस्य कथंचिदप्यतद्भावो न ततः प्रच्युतिः स्यात् ॥ कुतः नियमातद्रूपाभावेभ्यः ॥ तथा ह्यत्यंतमात्मानमाचार्यकुलेऽवसादयन्निति ॥ अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषदिति ॥ आचार्येणाभ्यनुज्ञातस्य चतुर्णामेकमाश्रमं ॥ आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधीति चैवंजातीयको नियमः प्रच्युत्यभावं दर्शयति ॥ यथा च ब्रह्मचर्यं समाप्य गृही भवेत् ॥ ब्रह्मचर्यादेव प्रव्रजेदिति चैवमादीन्यारोहरूपाणि वचांसुपलभ्यंते नैवं प्रत्यवरोहरूपाणि ॥ न चैवमाचाराः शिष्टा विद्यंते ॥ यत्तु पूर्वकर्मस्वनुष्ठानचिकीर्षया प्रत्यवरोहणमिति ॥ ९

```
[OrderDescription]
,CREATED=29.02.20 14:05
,TRANSFERRED=2020/02/29 at 15:13:39
,PAGES=418
,TYPE=STD
,NAME=S0002923
,Book Name=M-2876-SHARIRKSUTRA BHASYRATAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
```

```
FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
```

```
FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
```

```
FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
```

```
FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
```

```
FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
```

```
FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
```

```
FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
```

```
FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
```

```
FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
```

```
FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
```

```
FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
```

```
FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
```

```
FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
```

```
FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,
```